by Arya Samaj Foundation Chennai and

संस्कृत साहित्यपरि[illegible]

वर्ष १०, संख्या १-१२, मई १९२४-

अप्रैल १९२५

ublic Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080541

* ओ३म् *

भवानी भण्डार

पुस्तक संख्या संस्कृत लो० प० ५ (१-१२)

पंजिका संख्या 1९५८.२००१

पुस्तक पर सब प्रकार की निशानियां लगाना वर्जित है। कोई महाशय १५ दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकते। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

6
080541

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080541

THE

१८४६ शकाब्दे } 1924-25. SANSKRIT SAHIT[...] [...]वर्षस्य } Vol. VII

संस्कृतसाहित्यपरिषत्

मासिकी पत्रिका

कलिकाता-श्यामवाजारावस्थित-
संस्कृतसाहित्यपरिषद्भवनात् प्रकाशिता

सम्पादकौ

महामहोपाध्याय-श्रीदुर्गाचरण-सांख्यवेदान्ततीर्थः

श्रीकालीपदतर्काचार्य्यश्च

पुस्तकालय
गुरुकुल कांगड़ी

सहकारिसम्पादकः

काव्य-सांख्य-पुराणतीर्थ-श्रीदुर्गामोहनभट्टाचार्य्यः एम्-ए

वार्षिकमूल्यम्—३ रूप्यकत्रयम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमवर्षीय
संस्कृतसाहित्यपरिषत्-पत्रिकागत-
विषयसूची

विषयनाम	लेखकनाम	पत्राङ्क:
अभिभाषणम्	श्रीपञ्चाननतर्करत्नभट्टाचार्य्य:	१२१
अभिलाष: (कविता)	श्रीसूर्य्यनारायणशास्त्री	३५३
आयुर्वेदस्य महिमा (अनुवाद:)	श्री के, ए, रामलिङ्गशास्त्री	१४१
आशुतोषमुखोपाध्याय:(शोकवृत्तम्)	श्री:	७४
आस्तिकनास्तिकदर्शनविवेक:	„ हरिपदकाव्यस्मृतिमीमांसातीर्थ:	३६९, ४०९, ४६५
कालिदासस्य कङ्कणधारणञ्च	„ के, ऐ, रामलिङ्गशास्त्री	११
कालिदासस्य कन्यकादानञ्च	,, के, ए, रामलिङ्गशास्त्री	२४९
गुरुदक्षिणा (कविता)	,, यामिनीकान्तसाहित्याचार्य्य:	३६५
गुरुशिष्यसंवाद: (धर्म्मशास्त्रीय:)	,, शरत्कमलन्यायस्मृतितीर्थ:	७, ५०, १५०, १७६, २५९, ३७२, ४५७
गोपीनां वस्त्रहरणम् (कविता)	,, योगीन्द्रनाथ विद्याचुञ्चु:	४१७, ४४६
गौरीसमागम: (कविता)	,, योगीन्द्रनाथसांख्यस्मृतितीर्थ:	२०१
ग्रन्थपरिचय:	श्री:	२९७, ३१६
चन्द्रप्रशस्ति: (कविता)	,, अमयापदचट्टोपाध्याय एम, ए	२४६
जयचन्द्रमहाप्रयाणम् (श्लोकमयम्)	महामहोपाध्याययादवेश्वरतर्करत्नम्	२७६
जीवनालेख्यकम्	श्रीगिरिजाप्रसन्नलाहिड़ी व्याकरणतीर्थ: वि,ए	३९३, ४३४
जैनजीवतत्त्वम्	,, मक्खनलाल न्यायालङ्कार:	१५८, १६४, २२३
तन्त्रेषु आत्मचतुष्टयम्	,, सतीशचन्द्रसिद्धान्तभूषण:	४१
तर्करत्नप्रयाणम् (श्लोकमयम्)	,, भगवतीचरणविद्याविनोद:	२७४
तारां प्रति सोमस्य (कविता)	,, उपेन्द्रमोहनसांख्यतीर्थ:	२१६
दीपहस्ता (कविता)	,, हेमेन्द्रचन्द्रव्याकरणतीर्थ:	१६९
द्रौपदीपञ्चस्वामिकतारहस्यम्	,, तारानाथ न्यायतर्कतीर्थ:	२२०
धर्म्मकल्पतरु: (पद्यमय:)	,, के, ए, रामलिङ्गशास्त्री	१८४
नयनानुनय: (कविता)	,, कालीपदतर्काचार्य्य:	३८०
नलदमयन्तीयम् (नाटकम्)	,, कालीपदतर्काचार्य्य:	२५, ६५, १०५, २९७, ३४५, ३८५, ४७२
नववर्षनिवेदनम्	(सम्पादकीयम्)	४
न्यायतत्त्वसमालोचनम्	,, महामहोपाध्याय आशुतोषतर्कभूषण:	४२८
परिषद आयव्ययसंक्षेपलिपि:	,, वामाचरणकाव्यतीर्थ: ,, अवनीन्द्रनाथमित्र-(वि, एस्-सि·)श्च	१३७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयनाम	लेखकनाम	पत्राङ्कः
परिषदः कार्य्यपरिचालकनामानि		१३८
परिषदो वार्षिककार्य्यविवरणम्	,, पशुपतिनाथशास्त्री एम,ए, बि,एल, पि-एइच, डि ,, गोष्पतिकाव्यतीर्थश्च	१२८
परिषदो वार्षिकमहोत्सवः		११३
परिस्थितिर्धर्मपरिवर्त्तनञ्च	,, अनन्तकृष्णशास्त्रिवेदान्तविशारदः	३३७
पुरुषव्याघ्रप्रयाणम् (कविता)	,, हरिहर शास्त्री	७७
पुष्पाञ्जलिः (कथा)	,, तरणीकान्त चक्रवर्त्ती	१७९, २२९
प्राचीनभारते भृत्यसंव्यवहारः	,, उपेन्द्रनाथ सेनगुप्तकाव्यतीर्थः	५६, ९४. १६९
प्राचीनवङ्गवैशिष्ट्यम्	,, गिरिशचन्द्र वेदान्ततीर्थः	२८८, ३२९
भक्तिसिद्धान्तनिम्नगा	,, प्रसन्नकुमार मिश्रः	३१२
भाग्यविपर्य्यासः (कथा)	,, आशुतोष काव्यव्याकरणतीर्थः	७१, ८९
भारतीयसभ्यताप्राचीनत्वम्	,, चिन्ताहरणचक्रवर्त्तिकाव्यतीर्थः वि, ए,	३८२
मतिमञ्जरी (सम्पादकीया)		१६१, २०४, २४१, २८१, ३२१, ३६१, ४०१, ४४१
महाकविभासः	श्रीकेदारनाथ सारस्वतः	३०७
मानभञ्जनम् (कविता)	,, योगीन्द्रनाथ विद्याचुञ्चुः	२६४, ३०५
मानसी (आलोचनम्)	,, श्रीः	३३
वर्षाविलासः (कविता)	,, लक्ष्मीनारायण द्विवेदी	८१, १४०
वसन्तविहारः (कविता)	,, योगीन्द्रनाथ विद्याचुञ्चुः	४७
शास्त्रार्थविचारः समस्यापूरणञ्च (विवरणम्)		३४१
शिशिराभियानम् (कविता)	श्रीयामिनीकान्तसाहित्याचार्य्यः	३२८
शुभाशंसनम् (श्लोकमयम्)	,, तारानाथ न्यायतर्कतीर्थः	६
शोकोच्छ्वासः (कविता)	,, हरिपद काव्यस्मृतिमीमांसातीर्थः	३१६
शोकविजल्पितम् (कविता)	, गिरिजाप्रसन्नलाहिड़ी व्याकरणतीर्थः वि,ए,	३५९
श्रीकृष्णमाचार्य्यः (जीवनकथा)	श्रीः	११८
श्रीश्रीकृष्णाष्टमी (कविता)	,, कालीपद तर्काचार्य्यः	१८२
संस्कृतसाहित्यस्य धर्मप्रधानता	,, चिन्ताहरण चक्रवर्त्ती काव्यतीर्थः वि,ए	८४, १९४
संस्कृतसाहित्ये विज्ञानवैचित्र्यम्	कविरत्नमखिलानन्दशर्म्मा	१८५, २१२, २५६
सन्देशाः		३७, ७८, ११६, १५९, १९८, २३८, २७९, ३१७, ३६०, ३९८, ४३९, ४८१
सिद्धान्तभूषणजीवनचरितम्	श्रीगोपीचन्द्रकाव्यरत्नम्	२३४, ३५४
सुभाषितद्वयी		३२७
सोमं प्रति तारायाः (कविता)	श्रीयामिनीकान्त साहित्याचार्य्यः	१४७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमवर्षीय-संस्कृतसाहित्यपरिषत्-पत्रिकागत-

चित्रसूची

१म संख्यायाम्	महामहोपाध्यायश्रीगणपतिशास्त्री
२य ,,	सार् आशुतोषमुखोपाध्यायः
३य ,,	विद्यानिधिः कृष्णमाचार्य्यः
४र्थ ,,	श्रीपञ्चाननतर्करत्नम्
६ष्ठ ,,	जयचन्द्रसिद्धान्तभूषणः
७म ,,	महामहोपाध्याययादवेश्वरतर्करत्नम्
८म ,,	महामहोपाध्यायश्रीगङ्गानाथझा
११श ,,	महामहोपाध्यायरामनाथसिद्धान्तपञ्चाननः
१२श ,,	महामहोपाध्यायश्रीहरप्रसादशास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये
वैशाखे
May 1934.

Reg. No. C. 1073.

७म वर्षस्य
१म संख्या
Vol. VII. No. 1

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—श्रीजानकीनाथसाहित्यशास्त्री ।

प्रार्थनाञ्जलिः	१	भाग्यविपर्य्यासः	१८
नववर्षनिवेदनम्	४	नलदमयन्तीयम्	२५
शुभाशंसनं	६	मानसी	३३
गुरुशिष्यसंवादः	७	सन्देशाः	३७
कालिदासस्य कङ्कणधारणञ्च	१२		

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र पुस्तकालय, निवेदिता लेन, बागबाज़ार, कलिकाता ।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা, মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।



স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহার দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজ-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড্।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत साहित्य परिषत्-पत्रिका १८४६ वैशाखे

भासनाटकचक्रादि बहुग्रन्थप्रकाशकः शास्त्रीगणपतिर्धीमाननन्तशयनाश्रयः

Mahamahopadhyaya T. Ganapati Sastri. Travancore.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये वैशाखे, ७म-वर्षस्य १म-संख्या

प्रार्थनाञ्जलिः ।

लेखकः—श्री ....

देव ! त्वमेव जगतामुपकारहेतोः,
माता पितासि गुरुरिष्टपथोपदेष्टा ।
भ्राता सखा प्रणयिनो तनयस्य शक्तिः,
बालो युवा स्थविररूपमथो गतोऽसि ॥ १

त्वं स्त्री पुमानपि च पुंप्रकृतिस्वरूपः
देवोऽण्डजोऽथ दनुजो मनुजो द्विजो वा ।
इत्थं विकल्पकलनादिदमित्थमेवं
निर्णीयसे न च परापररूपधारिन् ॥ २

देवप्रभावविहते वत भारतेऽस्मिन्
वर्षैऽयुतायुत-जनार्त्तिशतप्रतापैः ।
दंदह्यमानमनसा मनसाप्यचिन्त्ये
त्वय्येव कातरवचोऽञ्जलिमर्पयामि ॥ ३

नित्यं पुरातन-कथाकथनप्रवीणान्
"आसीदिदं मम पुरे"ति विकल्पमानान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्नोत्थितानिव निरर्थकवावदूकान्
अस्मान् समुद्धर तमोहर शक्तिदानैः ॥ ४
रोगैरशेषरदनैः परिपीड्यमानान्
उद्दण्डयामिक-भटैरपि ताड्यमानान् ।
क्रूरैः सदासुरवलैः परिभूयमानान्
अस्मान् समुद्धर परावरशक्तियोगैः ॥ ५
भक्ष्यान्नशून्यसदनैः सदनैकवाधान्
कङ्कालसारवपुषोऽशनचिन्तयार्त्तान् ।
हाहारवैर्दश दिशो मुखराश्च कर्त्तृन्
क्षुत्क्षाम-कातरतनून् तनुजानुजादीन् ॥ ६
दृष्टाऽनिशं हृदि हृदीश्वर खिद्यमानान्
स्वान्तर्निरुद्धकलुषाग्निशिखोपगूढान् ।
दुर्दैवदावदहनाहुतशक्तिवीजान्
अस्मान् समुद्धर तमोहर शक्तिदानैः ॥ ७
दारिद्र्यदास्यभयदुःखविभूषिताङ्गान्
शक्तौ च युक्तवचनेऽप्यवशान् विधानैः ।
मन्त्रौषधिप्रहतवीर्य्यविलेशयाभान्
अस्मान् समुद्धर विभो ! निजशक्तियोगैः ॥ ८
येषां जगन्निपुणशिल्पकलाकलापं
निःस्पन्दमेतकुसुमैश्चिरमर्च्चति स्म ।
तान् देवराज ! विधिना विपरीतवृत्तान्
अस्मान् समुद्धर तमोहर शक्तिदानैः ॥ ९
वाह्वोर्वलं न कुशलं त्वपि रचितुं स्वान्
आलस्यदीर्घशयनोत्थितदुर्विपाकान् ।
उद्बोधनेन कृपया निजसन्ततीस्तान्
अस्मान् समुद्धर तमोहर शक्तिदानैः १०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्भारतं सकलरत्ननिधानमाहुः
सर्व्वर्त्तुशस्यपरिपूरितशान्तिसद्म ।
स्निग्धद्रुमव्रततिनिर्झरिणीगिरीन्द्रैः
नित्यं समर्च्चिततलं सुरलोककल्पम् ।　११

तत्रैव जातजनुषो निजकर्म्मदोषाद्
भिक्षार्थिनो भृतिभुजः शतकाकुयाञ्चान् ।
दुर्व्वारजाठरशिखिक्षपितप्रभावान्
अस्मान् समुद्धर तमोहर शक्तिदानैः ॥　१२

ये विद्यया विशदया जगदप्रमेयाः
देशे सुनीतिगुरवस्त्वयि चार्द्रचित्ताः ।
ते म्लेच्छभावितधियः स्थितदुर्व्विलासाः
आर्य्या गताञ्जवदयापथमाश्रयन्ति ॥　१३

देशे कियत् कियदहो जनतापकारि
जातं महद्व्यसनमार्य्यबलापहारि ।
के नाम नामसहितान् नयवर्त्म विज्ञान्
धीरान् विना सुनिपुणं परिचिन्तयन्ति ॥　१४

तान् देशमङ्गलविधौ सुकृतिप्रबुद्धान्
रात्रिन्दिवं विदधतः शतशः प्रयोगान् ।
विद्याविशारदमतीन् मतिमद्वरेण्यान्
पाहीश मङ्गलगुणैरपि योजयस्व ॥　१५

धर्म्मे मतिर्भवतु यातु मनोविकारः
शिक्षा च सञ्चरतु तेऽर्च्चनयोगयोग्या ।
भायाच्च भारतभुवां पुनरार्य्यवीर्य्यम्
सर्व्वे स्वदेशकुशले प्रणयं भजन्तां ।　१६

अब्धिर्भवेन्मरुरहो मरुरप्ययाब्धिः
ग्रावा पयस्तरति वह्निरुपैति शैत्यं ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पङ्गुर्गिरिं व्रजति ते करुणाकटाक्षैः
अस्मत्समुन्नतिविधौ विमुखोऽसि कस्मात् ॥ १७
देहे बलं वितर सिद्धिमभीप्सितेऽर्थे
प्रोत्साहमुद्यममथो हृदये च शक्तिम्
त्यागं तनोः परहिते स्वजनानुराग-
मुद्बोध निर्दिश विभो शुभकर्ममार्गम् । १८
नो कामये गजघटां न च वाजिराजिम्
नो वा स्वयं सुतशतं न च कान्तकान्तम् ।
दुःखं निरस्य भर भारतजाः प्रजा नः
एषोऽञ्जलिस्तव पदे शरणार्थिनो मे ॥ १९

नववर्षनिवेदनम्

अयि भो प्रियपाठकमहाभागाः ! परिषत्कल्याणकामिनो महत्तमाश्च ! नववर्षारम्भे यथायोग्यमभिवादनसम्भाषणादिकं भवत्सु विज्ञापयतां न किञ्चिदपरं कालानुरूपं विज्ञाप्यमास्ते, तद् यथा—परिषत्पत्रिकेयं नानाविधबाधाभिः प्रतिरुध्यमानापि सुतरामनुकूलदैव-प्रभावात् कथं कथमपि व्यतीत्य षष्ठं वर्षम् अद्य सप्तमे वर्षे पदं कुरुते। सेयं भवतां चित्तमनुवर्त्तमानापि कीदृशं चित्तसन्तोषं सम्पादयितु-मलमभूदिति न वयं सविशेषं जानीमहे। परमिदमस्माभिरनुभूयते यथा अद्यत्वे संस्कृतभाषाया महाविपत्तिकालः प्राप्तः, यतो हि भाषान्तर-प्रणयाद्वा संस्कृतभाषाया अर्थागमानुगुण्यशून्यतया वा प्राचीनवस्तुपरि-वर्त्तनकाममाप्रभावाद्वा ऐहिकसुखादिमात्रतत्परतया वा अन्यथा वा सर्व्वकल्याणसम्पादिकायामपि सुरसरस्वत्यां लोकास्तथा न दृष्टिं कुर्व्वन्ति येनैषा पुनरपि प्रचितोपकरणा समुद्दीप्तपूर्व्वभावा दावानलदग्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काननं वार्षिकवृष्टिरिव संसारतापदुःस्थितानस्मान् स्वास्थ्यमुपलम्भयितुं क्षमा सम्पद्येत, तथापि अस्याः संस्कृतसाहित्यपरिषत्पत्रिकायाः सोत्साह--पाठकलाभेन विदुषामतिगभीरार्थक--प्रबन्धसम्बन्धेन द्रविणदातॄणांसाग्रहमुपहारीकृतेनार्थजातेन तथा विविधैरुपायैः साहाय्यकमनुष्ठितवतामक्षत्रिमेण सौहार्द्देनाद्यापि सानन्दं प्रतिमासं विद्वत्समाजसमीपे समवतरन्ती नितरामभिनन्दितेयं सविशेषमानन्द-सन्दोहमाराद‌स्माकमुपजनयति ।

यद्येवमुत्तरोत्तरं परिषत्पत्रिकायामस्यां विद्वत्समितिः सानुग्रहा स्यात्, यदि सा स्वसम्पदा लोकचित्तवृत्तिमनुवर्त्तितुं सामर्थ्यमात्मनः प्रतिपदं प्रतिपद्येत, यदि च निबन्धलेखकाना-मुत्साहसम्पादिता लेखा इत्थमेव पत्रिकागर्भमपूर्व्वरसभार-भरितं विदधुः तदा नातिचिरमेव वयं महनीयगुणायाः सुर-सरस्वत्याः सर्व्वजनीनताञ्च सुमधुरताञ्च सर्व्वकल्याणसम्पादकताञ्च देशान्तरभाषाविलक्षणरसभावसुभगताञ्च यथा कथमपि प्रकर्षा-तिरेकञ्च सुसम्प्रकाशयितुमलं भविष्याम इत्याशंसामहे ।

परमिदमस्माभिरत्र सविषादमावेद्यते यत् एवं सत्स्वपि बहुलेषु प्रकर्षकारणेषु, सत्स्वपि तथा प्राणैः पणैः प्रकर्षमस्याः सम्पादयितुमुद्-युक्तेषु परःसहस्रेषु परिषदुन्नतिं कामयमानेषु, सज्जेषु च कतिपयेषु परिषदो नियतमुपासकेषु नानाविधमुद्रापणव्यापारादिप्रतिबन्धेन यथाकालमियं पारिषदानां करकमलमलङ्कर्त्तुमनीशा भवतीति । प्रतिवर्षं प्रतिमासं प्रतिदिनञ्च वयमस्या यथाकालमवतारे सन्नद्धा वर्त्तामहे, परमेशानुकम्पया यदा निस्प्रत्यूहं यथासमयमस्याः प्रति-मासमवतारः सम्भवेत्, परिषदुन्नतिकामिनामित्थमेव च निरर्गला करुणा स्यात्, तदैव कृतान्निष्पादकानां प्राणैः पणैः प्रयत्नस्य सम्यक् तया साफल्यं सम्पद्यते ।

1　2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूदेवैर्वहुलैरधिष्ठिततनुः श्रीभट्टपल्लीस्थली
जीयात् शश्वदनन्तपुण्यकृतिभिः संवर्द्धयन्ती जगत् ॥ १
अस्यां धीरधुरन्धरो हलधरो राखालदासस्तथा
साक्षादक्षपदायते स्म विलसन्न्यायप्रभावादिभिः ।
अस्यामेव हि सार्व्वभौमसुकृती सोऽभूज्जगद्विश्रुतो-
नाम्ना यः शिवचन्द्र इत्यपि परं शश्वत्स्फुरद्दीधितिः ॥ २

स रामकृष्णाभिधतर्कतीर्थः
शास्त्री हृषीकेश इति प्रसिद्धः
ताराप्रसन्नः स च सर्व्व एते
प्रख्यातविद्वांस इहैव जाताः ॥ ३
अद्यापि यत्र वहुशास्त्रवनप्रताने
पञ्चास्यचारचतुरैरतुलप्रभावैः
पञ्चाननप्रमथनाथमुखैर्महद्भिः
संरक्ष्यते ननु निजस्थलकीर्त्तिधारा ॥ ४

अस्यामद्य वहुश्रुतैर्वहुतरस्थानादुपेतैर्महा-
मान्यैः पण्डितमण्डलैर्विलसिता संसत् प्रतिष्ठां गता ।
शास्त्रीयैरुपदेशसारसुरसैः पुष्टिं दधाना परा—
माधारोचितसुप्रकृष्टफलभाग् भूयादिति प्रार्थना ॥ ५

गुरुशिष्यसंवादः ।

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थः ।

वर्णाश्रमविभागो हि भारतस्य विशिष्टता ।
यदि नाम न विद्येत, मरणं शरणं भवेत् ॥ १
किन्त्वस्मिन् वहुधा तर्कों वर्त्तमाने कलौ युगे ।
"उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" ॥ २

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णानामाश्रमाणाञ्च श्रुत्युक्तः स्मार्त्त एव च।
धर्म्मः क्षीणस्ततो भाति जलदावृतभानुवत्॥ ३
निवेदयामि तत्तत्त्वं तेनैवाहं यथामति।
गुरुशिष्ययोः संवादे शास्त्रयुक्त्यनुसारतः॥ ४
ऋषयो धर्म्मवक्तारो भारते चिरकालतः।
तत्पदाङ्कमनुस्मृत्य सन्दर्भोऽयं प्रवर्त्ततां॥ ५
नूनं महति कार्य्येऽस्मिन् शक्त्यभावश्च यद्यपि
तथापि क्रियते यत्नः "परिषद्"वाक्यगौरवात्॥ ६
साधवो दोषमुत्सृज्य गुणं गृह्णन्ति सर्व्वदा।
कर्म्मण्यस्मिंस्ततस्तेषामाशीर्व्वाक् परमं बलम्॥ ७

अस्ति तावत् पूर्व्ववङ्गप्रदेशे "धर्म्मपुरं" नाम कश्चिद् ग्रामः। पवित्रैर्ब्रह्मपुत्रनदसलिलैर्व्विधौतस्तस्य प्रान्तभागः सततं स्निग्धतामग्नेव रमणीयताञ्चावर्त्तति। तद्ग्रामस्यैकदेशे विविधवृक्षच्छायामण्डिते विराजते काचिच्चतुष्पाठी "हरिहराश्रमो" नाम। तत्र विद्यन्ते बहवश्छात्रा विविधविद्याध्यायिनः। अध्यापयति च तानन्नदानादिपुरःसरं सुगृहीतनामाध्यापको विद्यारत्नोपाधिरत्नभूषितः श्रीमत्कृष्णानन्दभट्टाचार्य्यः। स खलु शमदमादिब्राह्मणगुणराजिराजितस्तस्मिन् प्रदेशे मूर्त्त इव धर्म्मो लोकैः सम्पूज्यमानः स्वीयैराचरणैरमृतकल्पैः स्वोपदेशवचनैस्तत्रत्यानां मानसं धर्म्मश्रवणं भगवद्भक्तिरसाप्लुतञ्च विदधदवतिष्ठते। स एकदा स्वशिष्यानाहूय—इदमाह।

गुरुः। वत्साः पठ्यते सर्व्वैः शास्त्रम्। तेषु कैश्चिद् वर्त्तमानकालोपयोगिनी परीक्षापि दीयते। परीक्षायामपि तादृश्यां विशेषयोग्यतां प्रदर्शयन्तः समुत्तीर्णाः केचिदध्यापकपदवीमारूढाश्चतुष्पाठीषु शिष्यानध्यापयन्तीति बहुशूपलक्ष्यते नाम। किन्तु महद्दुःखमिदं साम्प्रतं समुपस्थितं—"किं शास्त्रस्य स्वरूपम्, तद्गतव्युत्पत्तिलाभे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगते वर्षे पत्रिकायाः सम्पादनादिविधौ यथा यथा दोषाः समभवन्, वर्त्तमाने वर्षे तेषां सर्व्वथा समुत्सारणाय प्रयत्नशतमस्माभिरवलम्बनीयं, फलन्तु दैवायत्तमेव ।

अन्ते तावत् सविनयं सकृतज्ञताकं सान्तःकरणप्रशंसाप्रकाशं यथायोग्यनतिशतादिसहितञ्च विज्ञापयामः यथा—येषां विदुषां सुगभीरचिन्ताप्रसूता निबन्धा विगतवर्षे परिषत्पत्रिकागौरवं समवर्द्धयन्, त एव पत्रिकायाजीवनभूताः, तेषामेव समुत्साहः पत्रिकामिमां परिरक्षितुं वा विलयं लम्भयितुं वा प्रमाणपदवीमङ्गीकुरुते, अतः सविशेषकरुणापरास्ते यदि वर्त्तमानवर्षेऽपि पत्रिकायामस्यां यथापूर्व्वमनुग्राहका वर्त्तेरन्, यदि तेषामुत्साहसम्पादिता लोकरुचिमनुवर्त्तमाना निबन्धा अस्माभिः सौभाग्ययोगात् प्राप्येरन् तदैव नितरामस्या यथापूर्वमुन्नतिलाभे वयमाशामवलम्बितुमर्हामो नान्यथा, निबन्धदारिद्र्येणैव पूर्वमितः कति संस्कृतपत्रिका लयमलभन्त, तदिदं दृष्टचरमेव प्रायेण सर्वेषां सुरसरस्वतीरसपिपासूनाम् । तददा कृताञ्जलिबन्धं निबन्धसम्पादनचतुरानभ्यर्थयामहे यथा ते प्रवर्त्तमानेऽपि संवत्सरे रससारसुभगनिबन्धनिबन्धनं गौरवमस्याः प्रतिपालयन्तः पुनरपि भारतस्य प्राचीनप्रकर्षं जगति प्रचारयेयुरिति ।

भट्टपल्लीब्राह्मणमहासम्मेलने पठितं

शुभाशंसनं ।

लेखकः—श्रीतारानाथन्यायतर्कतीर्थः

एषा सर्व्वजनश्रुता बहुमता पाण्डित्यलीलावनी
गाङ्गोत्तुङ्गतरङ्गसङ्गविगलत्पापातिपूतच्छविः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीदृशं साधनमवलम्बनीयम्, किम्वा तत्पाठफल"मित्याद्यद्य किमल्पैरपि चिन्त्यते।

"स्वकीये खलु जीवने शास्त्रसाधनफलानि विद्यन्ते कीदृशानी"ति अनुसन्धानमणवपि न विद्यतेतराम्। ततश्च तादृशचिन्ताभावेन शास्त्रविश्वासो हीयते, क्रममानात् खलु शास्त्रविश्वासाद्धर्मोऽपि क्रमशः क्षीणतामावहति। धर्मक्षयाद्दुर्दशेति सत्यं कथमस्वीकार्य्यम्? किन्तु शास्त्रपाठात् सर्व्वैरेव स्वीकर्त्तव्यमेतत् –

वर्णाश्रमविभागो हि भारतस्य विशिष्टता।

वर्णाश्रमधर्म्म एव देशमिमं पवित्रं भारतवर्षमन्येभ्यो देशेभ्यः सुतरां व्यावर्त्तयति। तथाहि पुरा आसन्नाम या जातयो भारत-व्यतिरिक्तेषु जनपदेषु, तासामेतादृशो वर्णाश्रमधर्म्म आसीदिति न श्रूयते। साम्प्रतमपि या जातयो वसन्ति देशान्तरेषु तासामप्येतादृशो वर्णाश्रमधर्म्मो न परिदृश्यत इति प्रत्यक्षमेवैतत्। अतोऽपूर्व्वोऽयं धर्म्मः पुरातनः सनातनश्च साम्प्रतमपि भारतस्य विशिष्टतां द्योतयति।

(धर्म्मस्य सनातनत्वविचारः)

प्रथमशिष्यः—सुष्ठूक्तमाचार्य्यपादेन "यदयं धर्म्मः अपूर्व्वः पुरातनश्चेति। किन्तु "सनातन" इत्यंशे विद्यते मे विप्रतिपत्तिः।

द्वितीयशिष्यः—ममापि किञ्चिद् वक्तव्यमस्ति, यद्यभयं दीयते गुरुपादेन तर्हि कथयामि।

गुरुः—किं वा भयकारणमत्र। शास्त्रार्थनिर्णये भयं सर्व्वथा परिहर्त्तव्यम्। अतो निर्भयमुच्यतां ते वक्तव्यम्।

२य शिः—वर्णाश्रमधर्म्मः अपूर्व्वः (१) पुरातनः (२) सनातनश्च (३) इति पक्षत्रयं स्वीकुर्व्वतापि मयैतदुच्यते, भवतु नाम स धर्म्मस्तादृशः, तथापि साम्प्रतं यादृशः समयः समुपस्थितस्तादृशे खलु समयेऽस्योप-योगित्वमणवपि नोपलभ्यते इति मे वक्तव्यसारः।

2 1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गु—भोः शिवदास! (द्वितीयशिष्यस्य नामैतत्) तव प्रश्नस्योत्तरं व्यापकं भविष्यति। अतः प्रथमं सूचीकटाहन्यायेन गुरुदासस्य (प्रथमशिष्यस्य नामैतत्) विप्रतिपत्तिं शृणोमि। वत्स! गुरुदास! उच्यतां कीदृशी ते विप्रतिपत्तिः?

१म शि:—वर्णाश्रमधर्मः सनातन इत्यंशे मे विप्रतिपत्तिः। तथाहि "धर्म्मोऽयं सनातनो न"वेति संशये "नायं सनातन" इति मे पूर्वपक्षः। तथाहि सनातनशब्देन नित्यपदार्थ उच्यते, नित्यशब्देनापि यस्योत्पत्तिस्तथा विनाशो नास्ति तादृशवस्त्वभिधीयते। यतो धर्मोऽयं ब्राह्मणादिवर्णाश्रितो ब्रह्मचर्य्याद्याश्रमाश्रितश्च ततोऽस्यानित्यत्वमायाति। तथाच ब्राह्मणादिवर्णा ब्रह्मचर्य्याद्याश्रमाश्च प्राङ् नासन्। आदौ सर्व्व एवैकवर्ण आसीत्, पश्चाद् गुणकर्मविभागेन ब्राह्मणादिवर्णभेदो बभूव ब्रह्मचर्य्याद्याश्रमभेदोऽपि। अत्र भगवद्वाक्यं प्रमाणमुपलभ्यते यथा—

"चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः।" इति।

पूर्व्वोक्तभगवद्वाक्येन ब्राह्मणादिवर्णानां जन्यत्वं स्फुटमुपपादितं भवति। ततश्च ब्राह्मणादिषु वर्णेष्वनित्येषु वर्त्तमानो धर्मोऽनित्य एव घटाश्रितरूपवत्। तथाहि यथा घटरूपं घटमाश्रित्योत्पद्यते विनष्टे च तस्मिन् तदीयं रूपमपि विनश्यति, तथायं वर्णाश्रमधर्मो ब्राह्मणादिवर्णमाश्रित्योत्पद्यते विनष्टे च तस्मिन् ब्राह्मणादिवर्णे विनश्यत्येवेति धर्मस्यास्योत्पत्तिविनाशस्वभावत्वा"नायं धर्मः सनातन" इति पूर्व्वपक्षो बलीयान् प्रतिभाति।

विशेषतश्चात्र नवीना ऐतिहासिका वदन्ति वैदिके युगे नासीद् वर्णाश्रमविभागः। प्रवर्त्तिनि खलु काले समाजशृङ्खलायमैकैकस्य वर्णस्योपरि कार्य्यभारः एकैकशः प्रदत्तः, तथाहि येषां शौर्य्यादिबुद्धिः प्रखरा तेषामुपरि शिष्टपालनदुष्टदमनादिकं येषामर्थनीतौ प्रतिभा तेषामुपरि कृषिवाणिज्यादिकं, तथा पूर्व्वोक्तानां साहाय्यार्थं कतिपयाना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपरि सेवारूपं कार्य्यं प्रदत्तमासीत्। ततश्च पूर्वोक्तक्रमेणायं वर्णविभागः परस्मिन् काले कल्पितः एवमाश्रमविभागोऽप्यवगन्तव्यः। एवञ्च आदावभ्यासत्वात् परतश्च कल्पितत्वात् सनातनत्वव्याघातः स्फुट एवापन्नः। पूर्वः पक्षो विशदं वर्णितः, समाधानमत्र श्रोतव्य मस्माभिरिति।

गु—वत्स! श्रुतस्ते पूर्व्वः पक्षः, अवगतश्च सम्यक् तदर्थः, साम्प्रतमत्र समाधानमुच्यते सावधानं श्रोतव्यम। प्रथमकल्पे ब्राह्मणादिवर्णानामनित्यत्वं मन्यमानस्तदाश्रितत्वेन धर्मस्यास्यानित्यत्वं कथयसि। आश्रयस्यानित्यत्वादाश्रितमनित्यमिति हि प्रथमपक्षः फलितः। तादृशः पक्षो न साधुर्व्यभिचारात् तथाहि—आश्रयस्य घटादेरनित्यत्वेऽपि तदाश्रितघटत्वादिजातेर्नित्यत्वदर्शनात्। विशेषतश्च ब्राह्मणादिशब्देन ब्राह्मणत्वादिजातिरेवोच्यते तत्रैव तादृशशब्दस्य शक्तिनिरूपणात्। ततश्च एतन्मते धर्मस्य अनित्यपदार्थाश्रितत्वेना-ऽनित्यत्वमिति न भवत्येवेति स्फुटमेव गम्यते।

१म शिः—न सम्यगवगतमाचार्य्यपादवाक्यं विशदं श्रोतुमिच्छामः।

गु—"वर्णानां धर्मः" वर्णधर्मः, वर्णशब्देन ब्राह्मणत्वादिजातिरभि-धीयते। ब्राह्मणत्वादिजातिस्तु नित्या "नित्यत्वे सति अनेकसमवेतत्व"-मिति तल्लक्षणात्। ततश्च धर्मस्यास्याश्रयो नित्या जातिरेव नत्वनित्या ब्राह्मणादिव्यक्तिः। एवं सति धर्मस्य य आश्रयस्तस्य नित्यत्व-मायातम्, ततश्च आश्रयस्य अनित्यत्वात् घटरूपवद्धर्मस्याऽनित्यत्वमिति पूर्वः पक्षो न विचारसह इति फलितम्।

१म शिः—अवगतस्तत्रभवतां वाक्यार्थस्तथापि नापगतो मे संशयः। धर्मस्याश्रयो जातिर्नित्या तदाश्रितत्वाद्धर्मस्य नित्यत्वमित्याचार्य्यपादानां वाक्यार्थः फलितः। एवं सति आश्रयस्य नित्यत्वादाश्रितस्य नित्यत्व-मिति नियमो भवति। नायं नियमो भवितुमर्हति व्यभिचार-दर्शनात्। तथाहि शब्दस्याश्रय आकाशस्तावन्नित्यस्तदाश्रितः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दस्त्वनित्यः एवमत्रापि भवितुमर्हति। विशेषतश्च भाव्यो धर्मः पुरुषव्यापारतन्त्रः स कथं तादृशो नित्यः स्यात् तथाहि पुरुषव्यापारादिना स धर्म उत्पद्यते इति तस्य जन्यत्वं स्फुटमायातमिति कथं सनातनत्वं सिध्यति। अत एव प्रत्यक्षस्य विद्यमानोपलम्भकत्वाद् भविष्यति धर्मे तस्य न प्रमाणत्वमिति धर्ममीमांसासिद्धान्तः। एवञ्च यस्तावद्धर्मो भावी पुरुषव्यापारेण चोत्पद्यते स "सनातन" इति न सिध्यत्येवेति पूर्वपक्ष एव बलीयान्।

गु—सुष्ठूक्तमायुष्मता। न वयं वर्णाश्रमधर्म्मस्य सनातनत्वं पूर्वोक्तदिशा वदामः। तर्हि अत्र "सनातन" इत्यस्य कोऽर्थः? उच्यते,—धर्म्मः स्वयं भविष्यन्नपि पुरुषव्यापारतन्त्रोपि प्रवाहरूपेण "सनातन" इत्युच्यते। धर्मस्य उत्पत्तिध्वंसरहितत्वरूपसनातनत्वकथने एव भवदुक्तदोष आपतति, प्रवाहरूपेण सनातनत्वव्याख्याने न भवत्कथितदोषस्पर्श इत्यवगम्यताम्।

कालिदासस्य विरहकालिके कङ्कणाधारणञ्च।

लेखकः सं-कामधेनुसम्पादकः K A रामलिङ्गशास्त्री।

जानन्त्येव नः प्रियपाठकमहाभागाः कथाभागमिमं—तद्यथा—यदा नु खलु भर्त्तुः प्रियहिते रता कौशल्यातोऽपि रघुकुलतिलके तनयवात्सल्यभरिता केकयसुता मन्थरया प्रकृतिकुटिलया भरताभिषेचनाय कलुषीकृताशयाऽकारि, ननु तदैव तदनुगुणं चेष्टमाना निजमनोरथपरिपूरणपरायणा मुनिजनमनश्चकोरराकाशशाङ्कायमानाननं नलिननयनं रघुनन्दनं गहनाय गमयामास पङ्क्तिरथेन महता प्रयासेन।

काननं गन्तुकामोऽसौ सौवर्णवैदूर्य्यादीनि सर्वाण्याभरणानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसिष्ठाय सुयज्ञाय दत्त्वा खनित्रपिटकौ वल्कलयुगलं च धृत्वा समदुःख-सुखेन समं सौमित्रिणा 'अग्रतस्ते गमिष्यामि मृद्नती कुशकण्टकान्' इति सादरमीरयन्त्या पतिशुश्रूषणे रतया अरुन्धतीजानेरनुरोधेन दुकूले विहाय वल्कले अवसानया उज्ज्वलसकलमण्डनमण्डितया सह सीतया 'मातृदेवो भव पितृदेवो भव' इति श्रुतिशीर्षोदितमातापितृवाक्यपरिपालनस्य पौरजानपदेभ्यः प्रबुबोधयिषया प्रस्थाय कतिपयवासराभ्यन्तरे चित्रकूटवनोद्देशमुपागतश्चिरमरमत रामः । क्रमेण च दण्डकारण्यानीमाढौक्य अनुजविरचितवरिवस्ये कृतसीतासीमनस्ये न्यक्कृतसाकेतसारस्ये प्रशंसितकैकेयीप्रयत्नप्रवर्द्धितनिजप्रवादनसंरस्ये दशरथौरस्ये (रामभद्रे) सर्वर्तुघने विपिने अनुभवति आनन्दममन्दमविदितवासररजनीकम् तत्र आगतायाः रामलक्ष्मणौ विशालवक्षसौ वृषस्कन्धौ च एकैकशो वृषस्यन्त्या अनुजायाः कर्णनासच्छेदनोदन्ताकर्णनेन कोपितः प्रतिक्रियाप्रसितः शूर्पणखावर्णितसीतालावण्यबाणशरव्यायमाणहृदयः साह्यभूतेन मायाकुरङ्गरूपेण मारीचेन कनकहरिणग्रहणाय प्रेयसीप्रेरिते रामभद्रे बहुदूरमाकृष्टे अन्ततो राघवशिलीमुखखिलीकृतस्य तस्य (मारीचस्य) हा सीते ! लक्ष्मण ! इति दीनाक्रन्दनश्रवणादुद्विग्नया जानक्या लक्ष्मणे च सनिर्बन्धं विनिर्यातुं सारिते रामपर्णशालां सालावृक इव वराह्यामिषम् अनिमिषाणामप्यदृश्या रामां प्रसभं प्रगृह्य विहायसायासीत् "रामरामे"ति करुणं क्रोशन्ती कुररीव मृगेक्षणाऽशरणा गत्यन्तरमपश्यन्ती कौशेयवसनाञ्चलं विदलय्य तत्र आभरणस्थाप्याभरणात् प्रतीकादेकैकस्मात् भूषणमेकैकं तूर्णमेवाऽवमुच्य निक्षिप्य यथाकथमप्यलमिमान्यलङ्करणानि मां मार्गमाणस्य रामस्य आश्वासायेति विचिन्तयन्ती अभिज्ञानार्थम् ऋष्यमूकशिखरे शनैर्न्यक्षिपत् । अधिमेखलं कलकलरवेण सह निपतन्तीं पत्रोर्णाञ्चलापिनद्धां प्रेक्षणीयं भूषणग्रन्थिं तत्क्षणमेव मन्वयमानाः पञ्चवानरा हनूमदादय आदाय निजपरिवृढ सोदराय सुग्रीवाय ददुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्ये मार्गं सुमित्रानन्दवर्द्धनं दृष्टमिवान् जानकीजानिः 'अत्याहित-मापतितम्' इत्याकुलहृदयः प्रविश्य पर्णशालां विशालां शून्यस्थलाम् आलोक्य हा धिक् कष्टम् प्रिये जनकनन्दिनि क्व वससि ? नायं परिहासस्य समयः

कमलान्यवचेतुं त्वं कासारं किमवातरः।
विमलान्युत गङ्गायाः पुलिनानि निषेवसे ? १
अहो नक्तञ्चरैर्जग्धा ? श्वापदैर्वा विदारिता।
अन्यपुष्टैरुताऽऽकृष्टा पिककण्ठि सहावने ॥ २
त्वद्युक्तं काननं रम्यं त्वद्विहीनं हि जाङ्गलम्।
सुखं दुःखञ्च दुर्दैवं युगपत् सन्तनोति मे ॥ ३

इति बहुधा विलपन् सौमित्रलक्ष्मणाय लक्ष्मणायापि कुप्यन् मुहुर्मुहु मुंह्यन् महता प्रयासेन ऋष्यमूकवनोद्देशमाविश्य हनुमन्मुखेन वायु-सखसन्निधौ मैत्रीं साकं सुग्रीवेण विरच्य वैदेह्या गिरेरधस्तादवमुक्त पूर्वाम् अञ्जनानन्दनेन सादरं पुरस्तान्निक्षिप्तामपूर्वं भूषणग्रन्थिं समीक्ष्य एकैकमपि सौत्सुक्यमादाय हृदये निधाय सुतरामाश्वस्तोऽ-भूदिति।

अत्र च दलितवसनाञ्चलनिचोलितानि भूषणानि सर्वाण्यपि अवमुक्तवत्या मैथिल्या धृतमाङ्गल्यार्थपरिमिताभरणया 'प्रोषिते मलिना कृशा' इति पतिव्रतालक्षणं ललनाभिः परिपालनीयमिति बोधितं भवति। अन्यच्च विरहकाले यस्य कस्यापि मण्डनस्य यस्मित् कस्मिं-श्चिदङ्गके धारणं—स्वीयां मानसीं व्यथां संसूचयेदिति च विज्ञापितम्। सीतैषा वरवर्णिनी रावणगृहावाससमये एकमेव कङ्कणं करकमलस्य मणिबन्धे बबन्धेत्यभूद्यते। एतदनुसारेणैव श्रीमद्रामायणोपजीविना महाकविकालिदासेन इत्थमुपावर्णि रघुवंशे त्रयोदशसर्गे—प्रतिप्रयाण-समये सीतां प्रति पुष्पकस्थेन काकुत्स्थेन कथितम् "आमुञ्चतीवा-भरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते।" २१॥ इति पद्यमिदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्य्यालोचयतां प्रेक्षावतां विशदमिदं प्रतिभायाद् यत् जानक्याः करे कमले केवलं तदा वलयमेकमेव वर्त्ततेस्म इति। सेयं सीता तादृशं कटकं किं वामे हस्ते धरति उत दक्षिणे ? इत्येतत्सूक्तादस्मान्नाव-गम्यते निश्चप्रचम्। तथापि कविकोकिलान्तेवासिकल्पेन कालि-दासेन विप्रयोगवेलायां नायकविषयेऽपि एककङ्कणधारणवर्णनमिदं मेघसन्देशशाकुन्तलादिष्वपि सरसमायोजितम्। मेघसन्देशे ताव-दादिपद्येन वस्तुनिर्देशानन्तरमिदं सूक्तं निर्दिश्यते—

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः॥ इति

अनवगतचरप्रेयसीविरहव्यथोऽयं यक्षः शापप्राप्तेः कतिपयवासरा-भ्यन्तरे कायकार्श्येन कनकवलयमेकं स्वतः कूर्पराद् भ्रष्टमपि एककं केवलं वामकरे धत्ते इत्यभ्यूहनीयम्। यतोयं कविवरेण्यः शाकुन्तले तृतीयेऽङ्के

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतम्
निशि निशि भुजन्यस्तापाङ्गप्रसर्पिभिरश्रुभिः।
अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते॥ इति

सुभाषिते स्रंसनशीलमपि कनककङ्कणं मुहुर्यथास्थानं प्रतिनीयते इति वर्णयति। अतोऽवगम्यते—वियोगवेलायाम् एककङ्कणधारणं विप्र-लम्भद्योतकमभिप्रैतीति।

भवतु नाम जायापत्योरेकवलयधारणं विरहबोधकं, तच्च धारणं कतरस्मिन् करे ? इति पर्यालोचने नायकस्य तावत् सव्यकरे इति निर्णीयते। कथं यतोयं कविपुङ्गवः शाकुन्तले धीवरानीतं स्वनामा-ङ्कितमङ्गुलीयकं दृष्टवतः तत्क्षणमेव शकुन्तलां स्मृतवतो दुष्यन्तस्य

प्रत्याख्यातविशेषमण्डनविधिर्वामप्रकोष्ठार्पितम्
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्ताजागरणप्रताम्लनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥

यथा च निमित्तज्ञा स्त्रीपुंसयोः सव्यसव्येतरकरोरुनयनादिपरिस्पन्दनं शुभसूचनमामनन्ति, ननु तथैव तन्नीति प्रातिलोम्येन दम्पत्योर्दक्षिण-दक्षिणेतरकरयोरेकैककङ्कणधारणं विरहकालिकमाधिमासूचयेदिति। इममादिकवेराशयं कविप्रकाण्डोऽयमभ्यूह्य मेघदूतशाकुन्तलादिषु उदन्तमिमं न्यभान्त्सीदिति। समुन्नीयते मधुमयरचनानामध्वसन्दर्शकेन आदिकविना यद्यद् आदि काव्ये उपवर्णितम् तत् समग्रमपि स्वीय काव्येष्वपि तत्तत्सन्दर्भानुगुणं महाकविरसावयं प्रतिपादयति। तथाहि—रामदूतागमनसूचकं निमित्तं सुन्दरकाण्डे भगवान्-बाल्मीकिरेवं निबबन्ध—

तस्याः शुभं वाममरालपक्ष्म राज्यावृतं कृष्णविशालशुक्लम् ।
प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम् ॥ २
भुजश्च चार्वञ्चितवृत्तपीनः परार्ध्यकालागुरुचन्दनार्हः ।
अनुत्तमेनाध्युषितः प्रियेन चिरेण वामः समवेपताशु ॥ ३
गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोश्च जातः ।
प्रस्पन्दमानः पुनरूरुरस्याः रामं पुरस्तात् स्थितमाचचक्षे ॥ ४
१९श सर्गः

इत्यादिना पद्यरत्नेन, तथैव कालिदासोपि

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यम्
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलय श्रीतुलामेष्यतीति ॥ २८
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरविरचितं त्याजितो दैवगत्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संभोगान्ते मम समुचितो हस्तसंवाहनानाम्
यास्यतूरु: सरसकदलीस्तम्भगौरश्चलत्वम् ॥ २८

इत्यादिना पद्यमणिना यक्ष:—पयोदस्य दूतस्य आगमनसूचकं प्रेयस्या वामनयनोरुपरिस्पन्दादिनिमित्तम् उत्पश्यतीति निबध्नाति। अत्र निर्दिष्टस्य शुभसूचनस्य उपलक्षणतया वामहस्ताद्यवयवपरिस्फुरणमपि वर्णितप्रायं वेदितव्यम्। एवमादिभिरुदाहरणनिरूपणैर्महाकविपुङ्गवोऽयं श्रीमद्रामायणवर्णितं शुभसूचनम् स्वीयकाव्ये मेघसन्देशेऽपि आयोजयामासेति निरूपितं भवति। न केवलमिदं इतरकविभिर्नास्वादितास्वादानि आदिकव्युत्पन्नानि दारक्रियापरार्ध्यमहार्हं उपकार्या वसति प्रभृतीनि पदानि अपरिमितानि तत्ताद्द्रसमम्पूरितानि कवीन्द्रेण अमुनैव प्रयुज्यन्ते तत्तत् सन्दर्भयुक्तानि रूपाणि इति दिङ्मात्रमुदाह्रियते—

"अथ राजा दशरथस्तेषां दारक्रियां प्रति।" इति रामायणे वाल्मीकि:। "तं श्लाघ्यसंबन्धमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम्।" इति रघुवंशे कालिदास:।

भुजश्च चार्वञ्चितवृत्तपीन: परार्ध्यकालागुरुचन्दनार्ह:। (रा: वा:)
परार्ध्यवर्णास्तरणोपपन्नमासेदिवान् रत्नवदासनं स:। (र: का:)
पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि। (रा: वा:)
तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये। (र: का:)
उपकार्य्यं स गत्वा तु रघूणां कुलवर्द्धनम्। (रा: वा:)
तस्योपकार्य्यारचितोपचारा वन्येतरा जानपदोपदाभि:। (र: का:)

किं च महाकविवल्लभोऽयं न केवलमेककङ्कणधारणवृत्तान्तप्रतिपादनमात्रेण परितृप्यति; किं तर्हि—त्वां मार्गमाणेन मया एकं नीरवं नूपुरमुपालाभि इति तुलाकोटिवार्तामपि आयोजयति रघुवंशे। तथाहि —सैषा स्थली यत्र विचिन्वता त्वाम् भ्रष्टं मया नूपुरमेकमुर्व्याम्। अदृश्यत त्वच्चरणारविन्दविश्लेषदु:खादिव बद्धमौनम् ॥ २३ ॥ सं १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादि बहु ऊहनीयम्। किं बहुना महाकविविलक्षणलक्षण-भूषितोऽयं कविवरेण्यः श्रीकालिदासः श्रीमद्रामायणात् संस्कृत-साहित्यधर्मशास्त्ररहस्यसर्वस्वाकराद्बहूनि अनुत्तमवर्णानि वर्णनारत्नानि उद्धृत्य स्वीयकाव्यविपणिषु क्रय्याणि सज्जीकृत्य समुचितमूल्य-प्रदान् काव्यागमकोविदान् आह्वयतीति मन्यामहे—इति शम्।

भाग्यविपर्य्यासः।

लेखकः श्रीयुक्त आशुतोषकाव्यव्याकरणतीर्थः

मातृपदे नमस्कृत्य दरिद्र-तनयो विनयो यदा स्वगृहान्निर्गतस्तदा तदेकपुत्रा जननी तद्गतहृदया गृहमागस्य शय्यामाश्रितवती। पत्यु-र्मरणकाले इममेव बालकं विनयं त्रिवर्षमङ्केनादाय श्वशुरगृहं क्षिपेते सा तरुणी। इदानीं पुनरष्टादशवर्षदेशीयः स पुत्रः दारिद्र-पीड़ितोऽपि विद्यार्ज्जनेन स्ववंशमर्य्यादां यथायथं पालयितुमना देशान्तरं प्रस्थितः। नितरामसहायापि जननी पुत्रमङ्गलमभीप्सन्ती स्वयमेव पुत्रस्य विदेश-गमनाय त्वरते स्म। आत्मनः अस्वस्थतायां क इमामवलोकिष्यति, को वा प्रजागृहेभ्यो धान्यादिसंग्रहं कृत्वा वर्षमा जीविकां सम्पादयिष्यति, कथं वा एकाकिन्या तया नाति-प्रौढ़या स्वगृहे स्थातव्यमित्यनालोच्यैव सा पुत्रं विद्याशिक्षार्थं विदेशं प्रेषयामास।

विनयोऽपि मातुः कीदृशी दशा तस्य दूरावस्थानकाले जायेत तदाशङ्क्य अनिच्छन्नपि मातृनिदेशवर्त्ती क्रोशषोड़शकेऽवस्थितं नवद्वीप नगरमागतः। कुत्र तेन गन्तव्यं कोवा उपाय अवलम्बनीयः, क उपाध्यायः तेन आश्रयितव्य इति चिन्तयन्नपि किञ्चिन्निर्द्धारयितु मसमर्थः स मध्याह्नकाले क्षुत्तृषापरीतः पथिभ्रमणाकुलः विदग्ध

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जननीमन्दिरपार्श्वस्थस्य वटतरोरधस्तात् विश्रमितुमनाः छायाशीतल-तनुः सुष्वाप। आपणनिर्गता गृहाय प्रस्थिताश्च जनाः स्वकार्य्यनिरता-स्तमवलोक्यापि अपश्यन्त इव गच्छन्ति स्म। वृक्षोपरिस्था विहगा एव पवनसञ्चालिततरुनिकरशब्देन गीतिरवं मिश्रितवन्तः। कदाचित् पुनर्धूलिधूसरितं पत्रजातं पथिकस्य कमनीयतनुं संस्पृश्य दूरं गतम्।

अस्मिन्नेव काले समापितनिखिलगृहकार्य्या अतिथिपरितोषेण तत्परतया मध्याह्नापगमेऽपि अनिर्वर्त्तितशिवोपचारा श्वेताम्बरावृता-नावृतशरीरा मस्तकस्थापितगात्रमार्ज्जनीकनिवारितातपतापा कन्य-याष्टवर्षदेशीयया इतस्ततोविनिक्षिप्तनयनया अनन्तरितनिपातित-लघुचरणया कुम्भकं वामकक्षेणोद्वहन्त्या नलिन्या अनुगम्यमाना कापि महिला तेनैव तरुतलेन याति स्म। कन्यापि समन्तात् कुत्र विहगो गायति, कुत्र प्रजापतिरुड्डीयते, कुत्र भ्रमरो गुञ्जति, कुत्र वा कुसुमानि नानावर्णानि विकसितानि, कुत्रापि वा पारावता अपस्किरन्ते तदव-लोकयन्ती वटतले स्थितं विनयं सुषुप्तमपितु छायापगमादातपपरिव्याप्त-सुखमण्डलमपश्यत्। तत्क्षणादेव रविकिरणार्दितदेहस्य तस्य दुःखेन तप्तहृदया सा मातरमन्य-मनस्कतया चलन्तीं पथिकमदर्शयत्। सा च क्षणेनैव तन्मुखमवलोकयन्ती पथिभ्रमणश्रान्तमनाहार-क्लान्तमजानात्, तदन्तिकमुपेत्य बहुशः सम्बोधयन्ती अपि तं जागर-यितुमसमर्था स्नेहेन तदङ्गं पस्पर्श। वत्सरात् पूर्व्वं तस्याः यः पुत्रो लोकमिमं तत्याज तदङ्गमस्यैवाङ्गमनुकुरुते इति सा सादरं स्पर्शेन सम्बोधनेन च तं जागरयामास। स च निद्राविमर्द्दनात् परमेव तादृशेऽपरिचिते प्रदेशे तथाविधां स्नेहमयीं वाचमाकर्ण्य दृष्टिश्च निरोक्ष्य नैव शशाक आत्मानमपि अवगन्तुम्। तया चायं जात्या ब्राह्मण इति विदितवृत्तान्तः भोजनार्थमाहूतः स स्नानाय चादिष्टः ताभ्यामेव सह मातादुहितृभ्यां भागीरथीतीरमागतः। कृतस्नान-उपासितसन्ध्यश्च स बालिकायै सलिलपूर्णं कुम्भकमर्पयित्वा महिलां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावत् अपिवति स्म, तावत् तीरतरुच्छाये निषस: स विनयो वालिकाया गृहस्य वृत्तान्तं कमपि ज्ञातवान्।

क्षुधातुरं पथिकमतिथिमनुस्मरन्ती माता त्वरमाणैव तीरमनुप्राप्ता कन्यां पथिकस्यागमनायादिशत्। गृहं गता च भोज्यदानेन तं सन्तोष्य भोजनावसरे नाम-कुलञ्च जिज्ञासितवती। क्लान्तस्य पथिकस्य शयनमेव कर्त्तव्यमिति तदुपदिश्य सा स्वयं भोजनार्थं गता। अपराह्णे च शयनादुत्थितो विनयोऽन्तिकचरीं नलिनीमापृच्छ्य गन्तुमुद्यत:, तया मातृवचनात् निवारित:। सोऽपि तद्वाक्यमन्यथा कर्त्तुं न कथमपीयेष यतस्तस्यापि कुत्रचिन्निर्द्धारिते स्थाने गमनं न लक्ष्यमासीत्; होरा-द्वयमपि नावशिष्टं सन्ध्याया:। अतो यावत् माता नायाति अभिप्रायमस्या वेदयितुं तावत् नलिन्या सह विनय: गृहात् वहि: सञ्चरन् सर्व्वं गृहजातं दिदृक्षुरभवत्! पूर्व्वं सत्वरमागच्छता गृहाणां कारुकार्य्यं न लक्षितमिदानीं पुनर्नलिनीसाहाय्येन अवसरप्राप्तेश्च तेन सर्व्वं लक्षयितुमुपक्रान्तम्। वहिरङ्गने श्रीभगवत्या: पूजार्थं यत् मन्दिरं वर्त्तते तत्रास्मिन् वर्षे दुर्गा न पूजिता। मुखोपाध्यायमहाशय: हस्तिनं विक्रीतवान्। तत्पार्श्वे या मन्दुरा वर्त्तते तत्रैकदा कश्चिदश्वो मृत इति एक एवाश्वो विद्यते, नलिन्या मातुरादेशात् न पुनरश्व: क्रीत: एकएवायं कदाचित् शकटं वहति कदाचित् वा मुखोपाध्याय: इममारोहति। नलिन्या: "कालीदादा" अश्वशालापार्श्वस्थे अस्मिन् गृहे स्वपिति। गते वत्सरे तस्या ज्यायान् भ्राता मृत:, तत्पूर्व्ववत्सरे च पिता। तस्या: पिता अस्मिन् उद्याने उपविष्ट: कुसुमानि अस्यै अददात्। अधुनापि कालीदादा: कदाचित् ददाति, इदानीं न वहूनि कुसुमानि सन्ति, प्रतिवासी गोपाल: एकदा एकं कुसुमवृक्षकं भञ्जन् भृत्यै: धृतोऽपि मात्रा आगत्य मोचित:। तस्या: कनीयान् भ्राता न तया समं धावितुं शक्नोति, वेणी: भगिन्या: क्रोड़मारोहति; किन्तु कदाचित् सा भ्रातरं कोपयितुं मातृक्रोड़े

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी

उपविशति। भ्राता एकदा तस्याः एकां पुत्रिकां इष्टकाघातेन बभञ्ज ; स दुष्टः निवारितोऽपि पुत्रिकायाः शाटिकां चिच्छेद। एका पुत्रिका सरलायाः पुत्रकेन सह विवाहसम्बन्धं न प्रावध्नासीत्। तस्याः विवाहार्थं महानुद्योगोऽपि नलिन्या विहितः, सरलायाः भ्राता रासेश्वरः पुरोहित आसीत्, किन्तु विवाहदिवसे सः अवदत्, कायस्थायाः कन्यया सह भगिन्याः पुत्रकस्य विवाहं स न कथमपि अनुमोदिष्यति।

एवमादि बहु कथयन्तो एव नलिनी माता आहूता विनयेन सह तदन्तिकमागता। तया च उपदिष्टो विनयस्तां रात्रिं तत्रैव यापयितुं स्वीकृतवान्। रात्रौ च कृताहारः सः कथं तेन नवद्वीपमागतम्, तत्र कोऽपि आत्मीयो वर्त्तते नवा, कुत्र तेन स्थातव्यम्, गेहे वा तस्य को वर्त्तते, पितरौ वर्त्तेते नवा, पित्रा किं कार्य्यं विहितं, वित्तात् यत् उपार्ज्जयितव्यं तदधुना केन संग्रहीतव्यम्, कुत्र इदानीं तेन अध्येतव्य-मिति सर्व्वं ज्ञातम्। नलिन्यापि पृष्टं, तन्माता तस्मिन् स्निह्यति नवा, तद्गृहोद्याने कुसुमं विकसति नवा, तदालये शुकपारावतं कूजति नवा, मार्ज्जारसारमेयमस्ति न वेति। ततस्तया दिष्टोऽतिथिः शयितुं गतः। माता च कन्ययानुगम्यमाना गृहान्तरमगमत्।

परेद्युः प्रभाते समापितप्रातःकृत्यं विनयं गृहभर्त्री तद्दिवसे तत्रैवावस्थानाय अवदत्। यदि विद्याभ्यासकाले तत्रैवावस्थितः सः पण्डितश्रेष्ठाज्जगदीशात् शास्त्रं शृणोति तदापि तत्र न तस्याः कापि आपत्तिरासीत्। विनयस्तु श्रीजगन्मातुः करुणाधारया अभिषिक्तः निराश्रयोऽपि महान्तमाश्रयमेव लेभे। तस्मिन्नेव दिवसेऽपराह्णकाले स पण्डितराजमुपगम्य न्यायशास्त्राध्ययनं प्रार्थयते स्म। समासव्याकरणः स गुरुणा आदिष्टः अत्रैव कस्याश्चिद् महानुभवायाः कृपावशात् स्थानादिकं प्राप्तवानिति निवेदितात्मवृत्तान्तः परेद्युः प्रभृति महता प्रयत्नेन शास्त्रमध्येतुमुदयुङ्क्त।

3 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहमागतस्य विनयः स्वपाठे एव नितरामासक्त आसीत्। पूर्वाह्णे गुरुगृहं गत्वा पाठाभ्यासो मध्याह्नात् प्रभृति च आनिशं स्वावासे एव प्रवासो अवसत। एवं कतिपयैरेवाह्नोभिः स महाग्रहतया शास्त्रेषु दक्षतां कामपि प्राप। वर्षात् परं श्रीश्रीजगन्मातुः पूजावसरे सकृत् जननीचरणदर्शनकामेन तेन गृहं गन्तव्यमिति ज्ञात्वा आश्रयदात्री जननीकल्पा विनयस्य साते वासोयुगलं मुद्रापञ्चकञ्च दत्तवती। विनयोऽपि स्वकृते वासोद्वयमवाप इत्थं पूर्व्वमपि स कदाचित् प्राप्तवान् इदानीं पुनरस्याकृतरत्नादासोदित्येव भेदः। स्वग्रामं गत्वा मातृसकाशे सर्व्वं वृत्तान्तम् आनुपूर्व्व्येण संवर्ण्य स परां मुदं प्राप। मातापि पुत्रो भगवत्कृपया दयावत्याः कस्याश्चिदाश्रयं प्रापेति स्मरन्ती पुत्रार्थं वीतचिन्ता जाता।

एवमतीते वर्षद्वये नलिन्या माता वरानुसन्धानाय समन्तात् घटकान् प्रेषितवती। तेऽपि बहूनामेव वराणां वार्त्तामानयन्तोऽपि अभिमतस्य कस्यापि वरस्य संदेशदाने न समर्था जाताः। नलिन्या भ्राता षड्वर्षदेशीयः किं कुर्य्यात्; गृहमार्ज्जारकुक्कुरादीनां प्रभुत्वे एव तस्य महान् कालोऽपयाति। अन्तरान्तरा वर्णमालाशिक्षार्थमपि तस्य क्षणः कश्चित् व्ययितो भवति। कदाचिन्मृदुगानेन कदाचिद् भगिन्या सह भ्रमणेन कदाचिन्मात्रालपनेन कदाचित् पुनरितस्ततः सञ्चरणेन स दिनं यापयति। माता च अधमर्णानां वाचमाकर्णयन्ती सत्यपि सुख्याध्यक्षे मुखोपाध्याये प्रजाजनानां कोऽपि यथा न व्यर्थम् उद्विजते तद् विवेचयन्ती दासानां कश्चित् यथा न किमप्यपहरति तदवलोकयन्ती, बालकान् तोषयन्ती, दुष्टवृद्धान् निन्दन्ती, विवादरतां दासीं गर्हयन्ती, अतिथीन् भोजयन्ती, रुग्णान् परिजनान् परिचरन्ती कथमपि उवास। नलिनी अपि कुसुमानि चिन्वती, देवेभ्यो माला ग्रथ्नती, कथं विनयेन विद्यालये चिरायितमिति पृच्छन्ती, कदापि वा तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नानार्थं सत्वरं तैलमानीय ददती, ज्ञात्वा वा अविज्ञाय वा विनयस्य प्रवासजदुःखं छिन्दती विचचार ।

समयश्चलत्येव । त्वं सुखेन दुःखेन वा तिष्ठसि, ऋद्ध्या दारिद्र्येण वा राजसे, आलोके तमसि वा वर्त्तसे, न समयः कमपि अपेक्षिष्यते। या शोकविह्वला विधवा प्राणप्रतिमं पुत्रं विहाय संसारं सत्यमेवासारं मेने, द्वादशवर्षीयायाः कन्यायाः परिणयार्थं समन्तात् जनान् प्रेषयन्त्यपि अभिमतं जामातरमप्राप्य सा सर्व्वमेव तत् विसस्मार। सुखोपाध्यायेनानीतः विवाहप्रस्तावो न नलिन्या मात्रे रोचते स्म इति सोऽपि इदानीं तूष्णीमास्ते। तत्र कोऽत्र अवलम्बः, कथमभिमतो वरः प्राप्येत। दुःखपूरितहृदयापि सा यथापूर्व्वं गृहकार्य्यं साधयन्ती अतिवाहितवती दिनानि।

अहो गङ्गातीर, पापतापाकुलदेहमनसां दीर्घजीवनपरिश्रमक्लान्तानां जनानां त्वमसि शरणम्; रोगविहतकायानां स्वास्थ्यमभीप्सूनां त्वमेवाश्रयः। त्वय्येव महान्ति नगराणि शोभन्ते, तीर्थानि पावयन्ति नरान्, वाणिज्यमस्य भारतवर्षस्य नियतं वर्द्धततराम्। तवैव समीपे पुनर्विरचितकुटीरनिकाया वसन्ति ऋषयो मुनयश्च। गङ्गासलिलशीकरसमीप्सवो दूरस्था अपि त्वामुपसेव्य आत्मानं पावयितुमायान्ति सन्तः। तवैव क्रोडे बहवः रमणीजनाः पतिताः कलङ्कितानि स्वजीवनानि यापयन्ति। स्नानार्थिनः परनिन्दाया मधुरं रसमास्वादयन्ति; त्वं हि अमुद्रितं संदेशपत्रम्, अप्रतिकं ग्राम्यवादसभामण्डपम्, अचरणद्वयः सन्देशहरः। सुखे वा शोके वा सम्पत्तौ वा विपत्तौ वा उत्सवे वा व्यसने वा कतिजनानामाश्रयस्त्वमिति नैवायं मानवको निर्द्धारयितुं शक्नोति। त्वामेव उपागम्य नलिन्याः माता कोशदशकान्तरिते कस्मिंश्चिदग्रहारे कस्यचित् धनिनो वरस्य संदेशमवाप। परं परमात्मीयभूतः कोऽपि तस्या न आसीत् यस्तस्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुसन्धानाय वनमदीवाधामतिक्रम्य तावत् दूरम् गच्छेत्। सा च चिन्तापरा गृहाय निवर्त्तते।

अपराह्णे च कृताहारा सा विनयमादरपुरःसरं सम्भ्रमसानाय्य अपृच्छत् स नलिन्याः कृते कियन्मात्रं शारीरायासमङ्गीकर्त्तुम् इच्छति न वेति। सोऽपि सानन्दं स्वीकृत्य परेद्युः प्रभाते एव गमनसमयं निरूप्य मुखोपाध्यायात् पथो विवरणमवाप्य बहिरङ्गनमगमत्, मातापि तस्य गमनाय उद्‌युक्ताना गृहकर्म्मनिरताभवत्।

एकस्य जनस्य वृत्तान्तमेतावन्तं कालमुपेक्षितमपि वर्णयितु-मिदानीमस्मि संवृत्तः। सा च नलिनी। कथमपि सा विनयस्य तादृशीं मूर्खतामन्तरेण समर्थयितुम् न शशाक। का सा नलिनी विनयस्य ? कथं तेन तदर्थे पथि गमनदुःखमङ्गीकर्त्तव्यम् ? साहस-माचरत्ययं तरुणो युवा। पथि चेत् कुत्रापि पिपासया पीड्यते, बुभुक्षया दह्यते, तदैव तस्य साहसस्य फलं निखिलं लब्धं स्यात्। तथा चेत् नलिनया एव पापं भवेत्, यतस्तस्या एव कृते विनयेन दुःखं प्राप्यते। अथवा नलिनी तावत् तदर्थं परिश्रमकरणाय न तं प्रार्थयते, यदि विनयः स्वयमेव दुःखमङ्गीकर्त्तुमीहते तद् नलिनया न दोषः। कदाचित् पुनः सा स्थिरीकृतवती यत् सा तं मूर्खं पठनाय आदिश्य दूरगमनक्लेशात् निवारयिष्यति, किन्तु बाला सा कथमलज्जा आत्म-विवाहविषयकं विधानं वा निवारणं वा स्वयं कुर्य्यात्। तत्र भवेत्। किमेवं स नलिनयाः सर्व्वं समञ्जसमपि समञ्जसयितुमुद्यतः।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

लेखक —श्री........

अथवा वनविहारपरिश्रमादुपकुपितेन वातेन तत्तदङ्गकम्पनमुत्पादितं भवेत् तद् गच्छामि। (निष्क्रान्तौ)

विदू - (राजानं निवर्ण्य) अहो विहङ्गवञ्चनचातुर्य्यं वयस्यस्य, एष हि पृष्ठेन कुब्ज इव शरीरं त्रिधा विभज्य उपहसितापरूपवामनरूपो निःशब्दपदसञ्चारं तथा गच्छति यथा वसुन्धरापि अविदितपादन्यासा वञ्चिता स्यात्। (सहर्षं) अये एष गृहीतप्रायो हंसः। (पुन सहर्षं) अये कथं गृहीत एव। (तारं) वयस्य अपि गृहीतः ?

राजा - अथ किम्। किन्तु नालमस्मि एकाकी एनं विनिरोद्धुं, तत् त्वमपि सत्वरमेहि यावदुभावेव मिलित्वा निरुन्धाव।

विदू—बाढ़ं एष आगच्छामि (इति उत्प्लुत्य निष्क्रान्तः)

समाप्तः प्रथमाङ्कः।

द्वितीयाङ्कः।

(ततः प्रविशति आकाशमार्गं प्रवहणारूढ़ः कलिः)

कलिः— श्रुत्वा स्वयंवरकथामिह भीमजाया,
देवर्षिनारदमुखादनुरागमुग्धः।
भावं परीक्षितुमनाः कलिरेष तस्याः
क्रीड़ावनं प्रति विमानचरः प्रयामि॥

अहो चिराददृष्टपूर्व्वेयं मे विदर्भभूमिः कालेन सुतरामन्यथैव सम्वृत्ता, पर्य्यायेण जगदधिकारिणो नाम भवन्ति चत्वारो युगदेवाः, तेषु च समापतितस्तावदद्य सत्यस्याधिकारः, ततो लुप्तशक्तय इव प्रतिभान्ति सर्व्वथा सर्व्वे मदनुचराः कामप्रभृतयः, प्रभावश्च भूयानेव समुपलक्ष्यते प्रथमयुगानुचराणां विवेकदयादाक्षिण्यप्रभृतीनाम्। स्मरामि हन्त तदानीन्तनीमवस्थां अस्या वसुन्धराया मदधिकारसमाक्रान्तायाः, तदा खलु—

4 1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्मः क्षीणज्योतिरासीत् प्रजानां, पापोत्सेकादुत्कटेषु प्रवृत्तिः।
यज्ञो लुप्तः स्वर्गगन्ता न कश्चित्, पश्चात्तापो नापि पापे रतानाम्॥

अपिच—

क्षौणी कृष्टमदीकृतापि सुषुवे शस्यानि नो कर्षकैः,
वृक्षाः पुष्पफलच्युताः किशलयैः शून्याश्च कष्टप्रदाः।
सन्ध्यावन्दनवर्त्तनादिनियमा भ्रंशं द्विजानां श्रिताः
शूद्रा मुद्रितनित्यकृत्यविकटा भ्रष्टस्वभावाः स्थिताः।

अपिच तदानीम्—

सौहार्द्दं मद्दिताङ्ग गुरुगणगरिमा दुर्व्विबोधः प्रजाभिः,
दाराणां प्रीतिहेतोः पितृहृदयरुजोत्पादनं नित्यकृत्यम्।
आत्मा देहादभिन्नः श्रुतिरपिच मुधा धूर्त्तमात्रोपजीव्या,
नादृष्टं मानसिद्धं सखफलमनृतं नो परोक्षाः पदार्थाः॥

तदद्य सर्व्वमेवेदं विपरीतं परिणमति, तथाहि—

लोकानां कलुषाद्भयं समभवत् पुण्येषु धन्या मतिः,
क्षौणी शस्यसमन्विता प्रसविनो जाताः शुभाः पादपाः।
सन्ध्यादिष्वनुरागिता गुरुगणे भक्तिः प्ररूढ़ा परा,
श्रौतस्मार्त्तविधानसाधनरतिर्वर्णाश्रमाचारिणाम्॥

अपिच—

प्रातः प्रभृति नित्येषु कर्त्तव्येषु मनस्विनाम्।
दृश्यते परमासक्तिः साधुतेव शरीरिणी॥

अथवा कियानेव मे समयो निखिलभुवनविध्वंसनपटीयसी वसुन्धरामिमामन्यथाकर्त्तुम्, यस्य मम—

उद्यद्दुर्गमसर्गवर्गविकटा वृत्तिः परध्वंसिनी,
प्रोद्दामप्रकटप्रभञ्जनसमा शक्तिर्जनस्तम्भिनी।
विघ्नोद्घाटनपाटवव्यतिकरात् क्रोधो जगद्रोधकः,
प्रातर्दीप्तमयूखसूरसदृशी दृष्टिर्ज्वलज्ज्योतिषा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं हि—

आकाशस्पर्शिशीर्षैः क्षितिधरनिकरान् निक्षिपेयं समुद्रे,
तीरोदीर्णप्रवाहप्रतिभयविषमं शोषयेयं तमथवा।
उद्यत्तिग्मांशुमूर्त्तिं गगनपटतटोत्पाटितं वा विदध्याम्,
उग्रोग्रध्वान्तधाराजटिलमपि जगत् पक्ष्मकम्पेन कुर्य्याम्।

तदत्र कन्दर्प एव मे परमो दर्पः स्वाधिकारप्रतिष्ठापन कृत्ये। अथ देवर्षिणा नारदेन कथितं निषधनाथो वैरसेनिः सुतरां विदर्भदुहितरं दमयन्तीं कामयत इति। अहो साहसं तस्य यौवनाभिमानदुर्विदग्धस्य मूढस्य! कुतः—

या सौरभभ्रमितचञ्चलभृङ्गपङ्क्तिः,
दौव्यद्गुणा चितरमा नवपुष्पमाला।
इन्द्रादिभिः प्रतिपलं विहितव्यपेक्षा
तां लिप्सते वत नलो निषधाधिनाथः!

अथ किं तस्यां स इव सापि तस्मिन् मनोभावं धत्ते? अथवा अलीकमेवैतत्-कुतः?

इन्द्रादयो वयमपि प्रचिनानुरागाः
सौन्दर्य्यसारशरणायितभीमजायै।
दूतीजनानपि विसृज्य कृतप्रयत्नाः,
नूनं न सा सुरविरागवती भवित्री॥

भवतु प्रियसहचरं कामदेवमामन्त्र्य सर्व्वमिदं विज्ञास्यामि, तत् क नु खलु साम्प्रतं कामदेवः स्यात्?

(ततः प्रविशति आकाशे पुष्पमयविमानस्थः
कुसुमोज्ज्वलवेशः कामदेवः)

काम—देव, एष प्राप्तोऽस्मि, तदाज्ञापयतु भगवान् किं मया दासजनेनानुष्ठातव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिः—सखे, कामदेव, समुत्कण्ठते मे हृदयं प्रियाया विद
जाया वृत्तमाकर्णयितुम्, श्रूयते नृपापसदस्य नलस्य तत्र भूयाननुरा
इति, अपि सत्यमेतत् ? किन्न, दमयन्त्या अपि तत्र समासक्तमन
कारणं तर्कयसे ? सर्वमिदं विस्तरेण वर्णयितुमर्हसि कुतः ?

अस्मासु तस्याः परमानुरागं श्रुत्वा पुरा निर्वृतिमान् भवेयम् ।
ग्रीष्मात् परं वार्षिकवर्षयोगात् यथा रसाकर्षणखिन्नपृथ्वी ।

कामः—देव, यद्यभयं, तदा कथयितुमर्हामि ।

कलिः—सखे, अलमाशङ्कया, यथावद्वस्तुविनिवेदनं सुहृद्धर्मः
तदशङ्कमभिधीयताम् ।

कामः—देव, कथयामि, श्रूयताम्, अस्ति कदाचित् दमयन्ती-
चित्रदर्शनविमनायितेन राज्ञा नलेन सवयस्येन उद्यानवापीपवन-
सेवनं कुर्वता कश्चित् सुवर्णमयो मरालः समासादितः ।

कलिः—सुवर्णमयो मराल इति ? अपूर्वः खल्वेष प्रबन्धः ।
ततस्ततः ?

कामः—ततश्च शकुनिरुतेषु परमाभिज्ञो राजा तस्य कातरस्य
पानभोजनप्रार्थनावचनेन दयापरो निजं पटवासमानीय पानभोजन-
दानैरेनं समुज्जीवितवान् । अथ राज्ञो मधुरेण स्वभावेन पर्य्याप्तेन च
पानाहारलाभेन परितोषितः किलासौ दमयन्त्या रूपातिशयमाख्याय तं
तथा रागं नीतवान् यथा चित्रदर्शनसम्प्ररूढा रागवृत्तिः षोड़शीमपि
कलामस्य नो विन्देत । तेनैव च हंसेन तदनन्तरं दमयन्तीसमीप-
मुपसृत्य तस्या अपि तथैव नलं प्रति वर्द्धितो रागानुबन्ध इति ।

कलिः—सखे अपि जानीषे, कोऽयं मरालापसद इति, अपि
कश्चन मायावी छद्मवेशमास्थाय अस्मद्वैरनिर्य्यातनकाम्यया तयो-
रन्योन्यमेवमनुरागमुद्दीपितवान् ? यद्येवं तदा नायं सुचिरं सहते
स्वीयमुच्छ्वासम् । तत् कथय केनानेन भवितव्यम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामः—देव, कथमयं मायावी स्यात्? अयं हि पितामहेन देवाधिपतिना दमयन्तीं प्रति नितरां नलमावर्जयितुं स्ववाहनभूतो हेमहंसः प्रेषितः ।

कलिः—किं नाम, पितामहेन निगृहीताः स्मः? अहो दुर्ग्रहः!

वार्द्धक्यात् परिवर्जितः कमलजः कर्त्तव्यबुद्ध्या स्वया,
नोचेन्निर्जरदुर्जयं कलिमिमं हित्वा नले किं रतः?
रे दुर्जात चतुर्मुख प्रणयिनीं कृत्वा सुतां कामतो,
नो जानासि किमस्मदीयहृदयं धिक् ते सुराहङ्कृतिम् ॥

कामः—देव, नात्र विशेषेण भगवन्तं पितामहमेव दूषयितुमर्हसि, यतो नियतमस्य प्रियानुवर्त्ती धर्म्मो नाम नलार्थमात्मना भगवन्तं पितामहं प्रकाममनुरुन्धे, तस्यैव नूनमिदं फलं सम्भवेत् ।

कलिः—आं एवं, धर्म्मो नाम मे प्रतिकूलवर्त्तीति, अहो दौर्वृत्तम्! साक्षाद् वैरमाचरितुमशक्तो द्वारीकरोति सम्प्रति वैराचरणे पितामहम् । अहो मूढ़ता! धर्म्म,

चतुर्मुखं चक्रधरं पुरारिं वज्रायुधं वापि सहायमेहि ।
नालं विजेतुं ननु मत्प्रभावं भवान् कदाचित् भवितेति वाढ़म् ॥

तदद्यापि विरम्यतामस्माद्व्यवसायात् । सखे कामदेव, अथ स राजा किमारम्भः सम्प्रति? अपि प्राप्ता तेन दमयन्त्याः स्वयंवरणवार्त्ता?

कामः—देव, अथकिम् । किन्तु यावद्देवासौ स्वयंवरवृत्तान्तमुपलभ्य विदर्भगामिनं पन्थानमनुसृतवान् तावदेव पर्य्यायेण

पुरन्दरश्च वह्निश्च यमो वरुण एव च ।
स्वेषु भैमीप्रवृत्त्यर्थं दूतकृत्यं ययाचिरे ॥

कलिः—किं नाम? विफलप्रयत्नास्तर्हि अस्मदुपसृष्टाः सर्व्वे एव दूतीजनाः?

कामः—देव, अथकिम् । का कथा तेषां परिमितसामर्थ्यानां

4 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूतीजनानां, त्रिभुवनविक्षोभसमर्थेन मयापि न पारितं दमयन्तीचित्तमन्यथा प्रवर्त्तयितुम् ।

कलिः—(सक्षोभम्) अहह ! किं कुर्य्याम ? नालमस्मि व्यवस्थापयितुमात्मानम्, तथाहि

अब्धिग्रासप्रसक्तप्रविततवड़वावक्त्रविक्षिप्तवह्नि-
प्लुष्टान्तस्तीव्रतापप्रविकटविपुलज्वालया दग्धमङ्गम् ।
कर्त्तव्यव्यस्तबुद्धिव्यसनपरिभवोत्पातदुर्जातदर्पः
क्षोभः कोऽपि प्रदीप्तः प्रलयघनघटोद्गीर्णतीव्रान्धकारः ॥

तदिदानीं

प्रासादैः सह काननैश्च तरसा सर्व्वान् विदर्भानहं
किं नो ध्वंसगतिं नयामि कुपितो रुद्रोपमो विग्रहे ॥

कामः—देव, अलमनेन रोषावेगेन । श्रूयतां श्रोतव्यम् ।

कलिः—क्रोधेनालमिहाथवा प्रियतमा भैमी विदर्भेषु यत्
पद्म लोलचरित्रमप्युपगता विष्णुप्रिया प्रोच्यते ॥

तदुच्यतां कीदृशं श्रोतव्यम् ?

कामः—देव, श्रूयताम्, अथ यावदेवासौ पुरन्दरादिभिः सम्प्रार्थितो नितरां दमयन्तीगृहीतहृदयोऽपि बहुकृत्वः श्लाघ्यमात्मानं मन्यमानः सानन्दमिव दौत्यम् अङ्गीकृतवान्, तावदेव तदुपरि पतिता गगनतलात् सिद्धजननिसृष्टा कुसुमवृष्टिः, पुरन्दरादिभिश्च मनोरथलाभपरितुष्टैः विसृष्टा राज्ञे निषधेश्वराय बहुविधा एव वरवाचः ।

कलिः—मूढ़ाः खल्वमी देवाः, ये धूर्त्तापसदस्य नैषधस्य वञ्चनाचातुर्य्यमपि नोपलक्षितवन्तः ।

कामः—देव, कथमिव ? अत नलस्य कीदृशं वञ्चनाचातुर्य्यं सम्भवेत् ?

कलिः—सखे, अत्रापि किमावेदयितव्यमस्ति ?

कामः—देव, अस्ति, न खल्वहमवधारयामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिः—यद्येवं श्रूयताम्

विदर्भस्थान्तपुरं निरन्तरं कृतावधानैः पुरुषैः सुरक्षितम्।

तत्र प्रवेशो हि सुदुष्करस्ततो न दूतकृत्यं करणीयमस्य तत्॥

कामः—देव, नैवमवगन्तुमर्हसि, यतो हि समादिष्टमभिलाषानुरूपमन्तर्धानमप्य पुरन्दराद्यैः।

कलिः—वाढ़म्?

कामः—यदि न वाढ़ं, किं देवो विज्ञाप्यते।

कलिः—सखे, कामदेव, आस्तां सर्व्वमेवेदमस्मत्प्रतिकूलं, तथापि

समग्रजगदुद्गतिप्रतिभयोपशान्तिक्षमः

क्षमोरसि कठोरतात्रुटितसत्वगोत्राह्वयः।

भवद्विभवयोजनाघटितपापसाहायकः

करोम्यचिरमात्मना सकलमेव चूर्णायितम्॥

अथवा अलं सकलेन, योऽयं दुर्विदग्धो विदग्धजनाभिमानी चन्द्रकुलकलङ्को वैरसेनिः स एव मे चिरात् प्रभृति प्रतिपक्षो देवानामद्य दमयन्तीं दत्ते, न तु मामभिजानाति, तदेष एव मे विषयः क्रोधस्य तदयमहमिदानीम्—

काष्ठैरापुष्टवैश्वानरविकटशिखाभीषणक्रोधराशेः,

जाग्रद्घोरप्रतापैः प्रविचरितमरुद्व्यस्तपातैः स्फुलिङ्गैः।

प्रासादग्रामसम्पद्द्रुमयुतनिषधान् भस्मशेषान् विदध्याम्,

उत्पाद्य क्षौणिपीठान्निषधपतिममुं स्वं ततः स्थापयिष्ये॥

तत् कामदेव, कथय, क्व साम्प्रतं स धृष्टः?

कामः—देव, स खलु साम्प्रतं सखीजननिषेवितया दमयन्त्या समध्यासितामन्तःपुरपुष्पवाटिकामनुसरति।

कलिः—सखे, काम, प्राप्तं प्रतिविधानम्, एष एव शुभावकाशो नैषधस्य व्यवसायमन्यथा कर्त्तुम्।

कामः—कथमिव?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिः—श्रूयताम् यदा नाम नैषधो देवकृत्यसम्पादनाय दमयन्ती-समीपमुपगमिष्यति, तदा त्वया—

येनास्त्रेण पुरारिमानसमभूद् भ्रष्टं तपस्याव्रतात्,
येनास्त्रेण च मेनकामुपगतो गाधिस्तनूजः पुरा।
तेनोन्मथ्य नलस्य चित्तमनघं संघट्य बुद्धिप्रभां
देवादेशविशेषसाधनविधौ व्यर्थश्रमः साध्यताम्॥

तदलं विलम्बेन, गच्छ स्वनियोगमनुष्ठातुं यावदहमपि अस्मिन्नवसरे नलपरिशून्येषु निषधेषु प्रविश्य स्वं प्रभावं प्रकटयामि।

कामः—यथाज्ञापयति देवः (उभौ निष्क्रान्तौ)

(विष्कम्भकः)

(ततः प्रविशति पुष्पवाटिकायां ससखीजना शिलातलमधिशयाना विरहोत्कण्ठिता दमयन्ती)

दम—सखि, कल्पलते अपि जानासि ममाद्य हृदयावस्थां।

कल्प—कथं न जानामि, अद्य तु विशेषेण प्रकाशितासि, मया पुनस्त्वदीयहृदयावस्था तदानीमेव विदिता।

दम—कदा ?

कल्प—यदा अपूर्वदर्शनो हेमहंसः प्रियसख्या एकाकिन्या अनुबध्यमानः प्रियसखीं गभीरां माधवीलतापद्धतिं नीतवान्।

दम-सखि, निपुणं जानासि। ततः प्रभृति एव विकारं नीतास्मि मदनहतकेन। अथ अद्य मां कीदृशीं प्रेक्षसे ?

कल्पः—सखि, किमत्र निपुणं प्रेक्षितव्यम् ? चिरात् प्रभृति विरहपर्युत्सुका स्वभावतस्तनुशरीरापि तनुतरशरीरासि, केवलं चिरन्तनं लावण्यमेव अवशिष्यमाणं तव प्रत्यभिज्ञां जनयति। पाण्डुतेयं सुसञ्चिता कपोलयुगले, प्रक्षीणकण्ठस्वरा न क्षमसे यथोचितं वाचमपि प्रवर्त्तयितुम्। प्रायेणैव निर्निमेषनयना दृश्यमात्रविनिवृत्त-मानसा भावनाव्यापृता परिलक्ष्यसे। पुनः पुनरनुरुध्यमानापि नैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानसी ।

स्वस्ति श्रीमत्सु पत्रिकानायकेषु—

महाभागाः,

कर्णाकर्णिकयैतदाकर्णितमस्माभिर्यद् भवदीया श्रीमती 'संस्कृतसाहित्यपरिषत् पत्रिका' प्रसादमधुरं नियतमुदीरयन्ती गुणसम्पदा वशीकृतविबुधमण्डली सकरालम्बदानमिदानीमादीयमाना सर्व्वत्र सम्भाव्यत इति। एवमपि श्रूयते यदत्नसमङ्केतानुवर्त्तनेन सहजातभावगाम्भीर्य्येण च सजातीयपरविलक्षणेषा रसिकमानसमधिकमाकर्षन्ती सोपचारोपन्यासमभ्यर्थिता साम्प्रतं गोष्ठ्यादिष्वपि स्वपदं प्रसारयतीति । भवतां नियोगमनतिवर्त्तमानाया एव प्राप्तोऽस्यास्तादृशः सौभाग्यातिरेक इति मदीयां 'मानसी'मपि श्रीमतां पाणितलसङ्गमुपलम्भये । अचिरोन्मेषसुलभमुग्धतया पदे पदे सङ्कोचमनुभवन्ती परमर्म्मानुवर्त्तनकर्म्मण्यतिमात्रमकुशलासौ भवत्पत्रिकासहचरीभूतैव यदि कदाचित् विदग्धमहत्तमानां लोचनगोचरतामधिकुर्य्यादित्येव मे बलवदाशसनम् । अविज्ञातविलासविभ्रमाप्यन्ववायेनेयमतिविशुद्धेत्यार्य्याणां दाक्षिण्यमेतस्यामतितमामभ्यर्थये ।

एतदत्र पूर्व्वत एव भवद्भ्यो निवेदनीयमस्ति यद् जन्मत एवानुदिवसमियं सचिन्तवृत्त्या विमनायमानेवावतिष्ठते, वाक्येन च बालप्रौढ़िमनारतमाविष्कुरुत इति। मन्ये परमोल्लासहेतुना भवादृशां सम्पर्कसुखेनैव मानसमालिन्यमेतस्या यावच्छीघ्रमुपशाम्येत्, भूयोदर्शनवयोविज्ञानवृद्ध्या च विदितस्वापकर्षायाः स्वयमेवापगताः स्युः प्रौढ़िवादा इति।

सम्बन्धनिबन्धनोपक्रमे युक्तमस्याः स्वरूपविनिवेदनं भवत्सु सम्पादयितुमिति तदर्थं भवदन्तिके तामिमां प्रकटीकरोमि। अनन्तरमस्या गुणागुणविचारतो ग्रहणे वा परिहारे वा भवन्त एव प्रमाणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ विदितमेवैतत् परिषत्पत्रिकापाठकानां यद् राजकीयसंस्कृत-महापाठशालायाः संस्कृतशिक्षापद्धतीनाञ्च समुन्नतये यथापेक्षित-मवधारयितुं केचन योगग्रपुरुषास्तत्र निर्द्धारकपदे नियुक्ता इति। 'संस्कृतकलेजकमिटी'त्याख्या समितिस्तेषां कियच्चिरमतन्द्रा स्वनियोगे सोत्साहं कर्म्मजातं निरवाहयदित्यपि प्रचारितमासीत् पत्रिकायाम्।

संस्कृतशिक्षायाः प्रचलितां शैलीं संस्कृतपरीक्षाविधिः प्रवर्त्तमानं प्रकारं संस्कृताध्यायिनामाजीवादिकञ्चाधिकृत्य विचारणाय समिति-रियमध्यापकानामप्यभिमतं जिज्ञासत इत्याकर्णयद्भिः स्फुटमवगम्यत एतस्याः कल्याणकामता। नूनमवसरोऽयं पण्डितानामपि स्वसत्ता-मावेदयितुमभिमतञ्च जनसंसदि प्रचारयितुम्। जिज्ञासितविषयाणां सम्यगालोचनाय संस्कृतसाहित्यपरिषन्मन्दिर एवान्येद्युराकारितासीत् परिषत्पत्तीयैः काचन पण्डितगोष्ठीति यत् सत्यं संस्कृताध्यायिनामपि प्राणसञ्चारमिदं बोधयति। अपूर्व्व इव प्रतीयते दवीयसोऽपि प्रदेशा-दागतानां पण्डितमहत्तमानामीदृशः समुद्योगः। यदि नामेत्थं 'कमिटि'प्रारम्भमहिम्नापि ते विघटितसुखासिकाः स्वकृत्येषु दत्ताभि-निवेशा भवेयुस्तदपि सुतरां कल्याणकरं सुचिरमनादरोपहतायाः सुरसरस्वत्याः।

परमिदमस्माकं विषादबीजं यदेवं योगग्रपुरुषनिबद्धाधिष्ठितापि संस्कृतशिक्षाशैलीसमुन्नतये प्रधानराजपुरुषैः सम्यगुपदेशमभ्यर्थितापि विचारफलविज्ञानाय सर्व्वशिक्षितसमाजैः सोत्कण्ठमपेक्ष्यमानापि शिक्षासंस्कारसमितिरसौ नैव यावत्सत्वरमात्मकृत्यकुशलतामावेदयति, सुषुप्तेव वा गतजीवितेव सा सम्भाव्यमाना च सम्प्रति नितरां नैराश्य-मस्माकमुपजनयतीति।

संस्कृतशिक्षाया विक्षोभविचारे क्लिन्सावन्युत्यतयास्यामवसाद-बाधामुत्पादयतीत्येतदेव तत्समितिसदस्यानां प्रथमतोः निर्णयमास्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीविकादैन्यं हि संस्कृताध्यायिनां भूयसा विद्यानुशीलनं प्रतिबध्नातीत्यत्र नास्ति कस्यापि मतवैषम्यम्। दृश्यते—शैशवादेव निरन्तरालं संस्कृतभारतीमाराधयन्तो लब्धवैदुष्यमाणाः प्राणयात्रामेव दुष्करामनुभूय हतं भागधेयमात्मनः कीर्त्तयन्ति तथा स्वाधीतविद्याया अधन्यतां निष्फलताञ्च परिकल्पयन्तीति। नूनमतीव कष्टेयमवस्था संस्कृतविद्याया यत्तस्याः सेवका एव साम्प्रतं न तां श्रद्धातुमर्हन्ति।

अर्थमनर्थं विभावयन्त एव पण्डितपदवीं यथार्थतया समधिगच्छन्तीति विजानतामपि कालप्रभावेण नैव सम्भवेदिदानीमुत्साहातिशयः सर्व्वेषामेव कौपीनमवलम्बितुम्। आसीत् पुरापि कश्चिदीदृशः कालो यदा संस्कृतविद्यासेविनो वृत्तिनिर्वर्त्तके राष्ट्रपरिचालनादिकर्म्मण्यधिनायका अभूवन्। सुप्रसिद्धमेवास्ते विष्णुगुप्त-हेमाद्रि-सायणमाधवादीनां सान्धिविग्रहिकत्वम्।

तन्नूनं सम्प्रति तथा कोऽपि दोषः समापतितः संस्कृतविद्याक्रमे येन प्रविलुप्तमैकान्ततो व्यवहारिककर्म्मसम्पादनचातुर्य्यमार्य्यभारतीप्रणयिनामित्यप्रतिबन्धमर्थ्यमुच्चारयितुं पार्य्यते। यत् सत्यं पण्डिताश्च परिलक्ष्यन्ते सर्व्वमधीतं वस्तु मञ्जूषिकायामिव महामणिं मनसि निधाय लोकोपयोगि किमप्यननुतिष्ठन्तो वचनमेतत् प्रमाणीकुर्व्वन्त एव। न वयमिदानीं विशेषेण निचिन्वन्त एकमप्यर्थशास्त्रीयनिबन्धं नवीनमयालोचितामित्युपलभामहे, शिल्पशास्त्रेऽपि पण्डितं न कमप्यायस्यन्तमवगच्छामः, साम्प्रतिकविज्ञानादिविषयानवलम्ब्यापि न कस्यचिन्निबन्धनिर्म्माणमाकर्णयामः।

अद्यापि यदि पण्डिताः स्वाधीतविद्यासप्रयोगवर्त्तीं साधयितुमुत्सहेरन्, न स्यात्तदानीं वृत्तिमत् कर्म्म सर्व्वथैव तैर्दुरवापमित्ययमस्माकं दृढ़ः प्रत्ययः। अपेक्ष्यत इदानीमेतादृशः कश्चन शिक्षणशैल्याः संश्रयणं यया खल्वध्येष्यमाणा ग्रन्थेभ्यो निरवशेषमेव सारमादाय लौकिकानामपि तत् उपयोगाय प्रकल्पयेयुः। जीविकार्य्यतैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां कथञ्चन सुस्थिता भवेत्। सम्प्रत्यपि पण्डितानां ये तावद् ग्रन्थादिप्रणयणेन शास्त्रव्याख्यानादिना वा लोकोपकारप्रवृत्तिमाविष्कुर्व्वते, नैव तेषां भवति तादृग् जीविकाक्लेश इति प्रत्यक्षमेतत्।

तदेवमाजीवसङ्कटप्रतीकाराय संस्कृतज्ञेषु कर्म्माधिकारदानार्थन्तदधिकृतपुरुषाणां प्रवर्त्तनं तथा शिक्षाक्रमप्रविष्टनिरुक्तदोषसमुत्सारणमित्युपायद्वयं सद्यैवावलम्बनीयम्।

तत्र च शिक्षाक्रमविचारे प्राचीनकालात् प्रभृति वर्त्तमानकालपर्य्यन्तं संस्कृतवेदिनां तिस्रो विधाः समुपलक्ष्यन्ते। प्रथमायां विधायां पतञ्जलि-वात्स्यायन-शङ्कर कुमारिल-वाचस्पति-माधवादयः सम्भाव्यन्ते। ते हि लोकोत्तरप्रतिभानसम्पदा तुल्यतया समासादितविविधविद्याप्रकर्षा विशेषदृशां विस्मयातिशयमुत्पादयन्ति। द्वितीयायाञ्च विधायां कालिदास-गङ्गाधर-रघुनन्दन मम्मट-नागेशादयः समन्तर्भवन्ति। ते हि निःशेषमेकं विषयमायत्तीकृत्य सारतो विषयान्तराण्यपि बहूनि विदितवन्तो विषयविशेषमधिकृत्य बहुलगभीरार्थनिबन्धनिबन्धनेन तत्तच्छात्रसम्प्रदायमविच्छेदमभिरक्षितवन्तो विश्रूयन्ते। तृतीयायाञ्च विधायां तथा केचिदन्तर्भवन्ति ये विषयमेकमधिकृत्य लोकविलक्षणां विचक्षणतां कक्षीकुर्व्वन्तोऽपि विषयान्तराणि नाममात्रेणाप्यविजानन्तः साम्प्रतिकैरनुस्मर्य्यन्ते।

तत्र जगदुपकारे तिस्र एव विधाः समुपयोगिन्यः। तासु च प्रथमाया विधायाः क्वाचित्कशुभादृष्टादिनिबन्धनतया तत्र प्रायेण साधारणानामनधिकार एव। तृतीयापि विधा न तथा वर्त्तमानसमयोपयोगिनीति द्वितीयैव यथा विद्यार्थिनामिदानीमाराधनीया स्यात् तथा समितिनिर्द्धारणमपेक्षितमस्माभिः।

सम्प्रति तु द्वेधा पण्डिताः परिलक्ष्यन्ते। एके तावत् किञ्चिदे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैकं शास्त्रं सबहुशेषमाघ्राय शास्त्रान्तरचिन्तामनर्थकरीं प्रत्याययन्तः प्रागुक्त तृतीयप्रकारोचितं सम्मानं परीभ्यो निष्कासयितुमोहन्ते । अपरे च शास्त्रतत्त्वबुभुत्सां दूरे विसृज्य कथञ्चन सञ्चित-परीक्षोत्तरणोपायाः सर्व्वेषां शास्त्राणां वार्त्तामात्रमिव जानन्तः प्रागुक्त-प्रथमकल्पोचितप्रकर्षमुपार्जयितुमिच्छन्ति । तेषां द्वयेषामेव प्रकारो न बहुमन्तव्यः !

तत्र पाठ्यपुस्तकविचारे प्रतिशास्त्रमेको विभागः कल्पनीयः । तत्र तत्र विभागे च प्रतिस्वं तत्तच्छास्त्रीयगभीरव्युत्पत्तिसम्पादक-ग्रन्थानां बाहुल्यम्, शास्त्रान्तरीयसाधारणज्ञानसम्पादकग्रन्थानाञ्च यथायोग्यं समावेशनं करणीये। परीक्षाविधिप्रवर्त्तनमपि तथा कर्त्तव्यं यथा विद्यार्थिभिः प्रकृतशास्त्रव्युत्पत्तिरतिमात्रमपेक्षणीया स्यात् । तीर्थपरीक्षोत्तरं विशेषेण तत्तच्छास्त्रमनुशीलयतां किञ्चिदेकं विशेषोपाधिपरीक्षणं प्रवर्त्तनीयं, येन तेषां तत्र विशेषज्ञतासूचनया सहैव यथोचितसम्मानलाभो निराबाधो भवेत् ।

इत्येवं क्रमेण कृतप्रयत्ना संस्कृतशिक्षासंस्कारसमितिरवश्यं जनानां शुभायकल्पेतेति मे 'मानसी' कल्पना ।

सन्देशाः

परिषदो मासिकाधिवेशनम्— सौरवैशाखस्याष्टाविंशदिवसे रविवासरे सायं प्रावर्त्तत परिषदस्तन्मासीयमधिवेशनम् । तत्र श्रीमता उपेन्द्रनाथसेनगुप्तकाव्यतीर्थमहाशयेन वाचितः कश्चिद् गभीरार्थसार्थसमलङ्कृतो नवनवविषयालोचनरमणीयो 'विविदिषे'-तिनामधेयो निबन्धः । लेखकोऽयं नैयायिकसांख्यमीमांसकादिदर्शन-ग्रन्थेषु बौद्धपक्षव्यपदेशेन निराकरणीयतया समुपस्थापितानां दार्शनिकमतानां वस्तुतो बुद्धमतप्रभवत्वं सम्भवेन्नवेति विषयमधिकृत्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलतयात्र विचारितवान् । तत्र तत्र वेदानुमतशास्त्रनिबन्धेषु समुदाहृतानां सुगतमतानां पालिभाषामयेषु बौद्धग्रन्थेष्विदानीमनुपलम्भात् पालिभाषाप्रवीणाः साम्प्रतिकाः प्रत्यवतिष्ठन्ते यत् बौद्धविरुद्धवादिभिः श्रुतिप्रमाणबद्धानुरागैराचार्य्यवर्य्यैः स्वमतानि नैव विषययाथातथ्येन निवेशितानि स्वकीयग्रन्थेष्विति । अतिगुरुं विषयमिममवलम्ब्य भूयसा समालोचनं तथ्योद्घाटनञ्च साग्रहमस्माभिराकाङ्क्ष्यते ।

परिसमाप्ते एतन्निबन्धसमालोचने परिषच्छात्रसमितिसदस्या महाकवेर्भासस्य कृतिं 'कर्णभारं' नाम रमणीयरूपकं भट्टनारायणकृत-'वेणीसंहार'नाटकस्य तृतीयाङ्कञ्च रङ्गे प्रयोज्य समागतसदस्यवर्य्यान् सुतरामानन्दयामासुः इत्येवमवसितमासीत्तदधिवेशनकृत्यमिति ।

ग्रन्थपरिचयः—सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः—

—अधिगतमस्माभिः 'केनचिद्भिक्षुगौरीशङ्करेण संगृहीत दर्शनशास्त्रीय-' पदानां समासेनार्थवर्णनात्मकं संस्कृतभारतीमयमिदं पुस्तकम् । विविधपारिभाषिकशब्दानामबोध एव संस्कृतदर्शनशास्त्रस्याधिगमे प्रथमो दुरतिक्रमः प्रत्यूह इव प्रतिभाति । तादृशदार्शनिकशब्दानां बोधे काठिन्यक्लेशमसुं दूरीकर्त्तुं लघूकर्त्तुं वा श्रीमता ग्रन्थकृता प्रस्तुतमिदं शास्त्रगतदुर्बोधपदार्थानां द्वात्रिंशदुत्तरशतत्रयाधिकाहिसहस्र (२३३२) संख्याकानां लक्षणमयं कोषपुस्तकम् । शास्त्राध्यायिनामिदमुपकारातिशयं साधयेदित्यसंशयमेव प्रकाशयितुमुत्सहामहे ।

अपरञ्च 'हिसाराख्यप्रदेशनिवासिन्या वैश्यधर्म्मावलम्बिन्या श्रीमत्या सनभर्य्याख्यया देव्या' एतन्मुद्रणव्ययभारं निखिलमेव सानन्दमङ्गीकृत्य सज्जनपुरुषाणां सुखेन प्राप्त्यर्थं पुस्तकमिदं मूल्यं विनैव वितीर्य्यत इति विजानन्तः सत्यमेव सम्मोदपरीतहृदयाः शतशस्तस्या आशीर्भिर्वयमुपहरामः । आशास्महे च यथायोग्येभ्यो दत्तमिदं पुस्तकरत्नं जनानां चेतांसि भारतीयदर्शनेषु बद्धानुरागाणि सम्पादयेदिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते भातु भारती ।

सबहुमानमावेदनम्—

आगामिनि सौरज्यैष्ठस्य अष्टादशदिवसे रविवासरे सायं ६॥० होरायां परिषद एतन्मासिकमधिवेशनं भविता । भवद्भिः कृपया यथाकालमेत्य सभाकार्य्यं सम्पूरणीयमिति ।

विधेय

सं-सा-परिषदः ज्यैष्ठस्य दशमदिवसे — श्रीपशुपतिनाथशास्त्रिणः श्रीगोष्पतिकाव्यतीर्थस्य च सम्पादकयोः

कार्य्यावलिः

१ । चार्वाकमतमितिशीर्षकनिबन्धपाठः

—पाठकः श्रीदक्षिणारञ्जनशास्त्री एम, ए

२ । विविधाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलतयात्र विचारितवान् । तत्र तत्र वेदानुमतशास्त्रनिबन्धेषु समुदाहृतानां सुगतमतानां पालिभाषामयेषु बौद्धग्रन्थेष्विदानीमनुपलम्भात् पालिभाषाप्रवीणाः साम्प्रतिकाः प्रत्यवतिष्ठन्ते यत् बौद्धविरुद्धवादिभिः श्रुतिप्रमाणबद्धानुरागैराचार्य्यवर्य्यैः स्वमतानि नैव याथातथ्येन निवेशितानि स्वकीयग्रन्थेष्विति । अतिगुरुं विषयमिमवलम्ब्य भूयसा समालोचनं तथ्योद्घाटनञ्च साग्रहमस्माभिराकाङ्क्ष्यते ।

परिसमाप्ते एतन्निबन्धसमालोचने परिषच्छात्रसमितिसदस्या महाकवेर्भासस्य कृतिं 'कर्णभारं' नाम रमणीयरूपकं भट्टनारायणकृत-'वेणीसंहार'नाटकस्य तृतीयाङ्कञ्च रङ्गे प्रयोज्य समागतसदस्यवर्य्यान् सुतरामानन्दयामासुः इत्थं समवसितमासीत्तद्दधिवेशनकृत्यमिति ।

ग्रन्थपरिचयः—सर्व्वतन्त्वसिद्धान्तपदार्थलक्षणसंग्रहः—

—अधिगतमस्माभिः 'केनचिद्भिक्षुगौरीशङ्करेण संगृहीत दर्शनशास्त्रीयपदानां समासेनार्थवर्णनात्मकं संस्कृतभारतीमयमिदं पुस्तकम् । विविधपारिभाषिकशब्दानामबोध एव संस्कृतदर्शनशास्त्रस्याधिगमे प्रथमो दुरतिक्रमः प्रत्यूह इव प्रतिभाति । तादृशदार्शनिकशब्दानां बोधे काठिन्यक्लेशममुं दूरीकर्त्तुं लघूकर्त्तुं वा श्रीमता ग्रन्थकृता प्रस्तुतमिदं शास्त्रगतदुर्बोधपदार्थानां द्वात्रिंशदुत्तरशतत्रयाधिकद्विसहस्र (२३३२) संख्याकानां लक्षणमयं कोषपुस्तकम् । शास्त्राध्यायिनामिदमुपकारातिशयं साधयेदित्यसंशयमेव प्रकाशयितुमुत्सहामहे ।

अपरञ्च 'हिसाराख्यप्रदेशनिवासिन्या वैश्यधर्म्मावलम्बिन्या श्रीमत्या सनभर्य्याख्यया देव्या' एतन्मुद्रणव्ययभारं निखिलमेव सानन्दमङ्गीकृत्य सज्जनपुरुषाणां सुखेन प्राप्त्यर्थं पुस्तकमिदं मूल्यं विनैव वितीर्य्यत इति विजानन्तः सत्यमेव सम्मोदपरीतहृदयाः शतशस्तस्या आशीर्विवयमुपहरामः । आशास्महे च यथायोग्येभ्यो दत्तमिदं पुस्तकरत्नं जनानां चेतांसि भारतीयदर्शनेषु बद्धानुरागाणि सम्पादयेदिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकप्राप्तिस्थानम्—ग्राम पुष्ठी देवीसनभरी, पोष्ट जामालपुर,
जिला हिसार ।

ब्राह्मणमहासम्मेलनम्—सौरवैशाखस्य षष्ठे सप्तमे च दिवसे सुसम्पादितं सप्तमाधिवेशनं वङ्गीयब्राह्मणमहासम्मेलनस्य भागीरथीतीरावलग्ने भट्टपल्लीब्राह्मणपत्तने। तत्र सुविश्रुतविक्रमपुरमण्डलप्रभवा वाराणसीमधितिष्ठन्तः प्रथितब्राह्मण्यपाण्डित्यकीर्त्तयो महामहोपाध्यायपदलाञ्छना न्यायवैशेषिकाचार्य्याः श्रीमन्तो वामाचरणभट्टाचार्य्याः सभापतिपदमलमकुर्व्वन् ।

नानादिग्भ्यः समापतिता ब्राह्मणपण्डितमण्डली मण्डितवती सभामण्डपं निरतिशयेनाग्रहेण । दृष्ट्वा चैतदाशा समुत्पद्यते नो हृदयसद्मनि यथा नाद्यापि निरन्वयो विध्वंसः समपद्यत विद्याब्राह्मण्यप्रभृतीनां भारते वर्षे ! सम्मेलनदिवसाद् बहुपूर्व्वत एव विज्ञापितस्तदधिवेशनसमाचारो लिपिसन्देशादिद्वारा कर्म्माधिकृतैः, येन विज्ञातवृत्तान्ता ब्राह्मण्यधर्म्मकानुष्ठानस्य विरोधिनश्च यथास्वं समालोचनीयविषयेषु चिन्तां प्रवर्त्तयन्तः स्वकीयसिद्धान्तसम्प्रचारेण सम्मेलनकर्म्मणः साफल्यं वैफल्यञ्च उपपादयितुमुद्युक्ता अभूवन् । प्रतिबन्धवन्तो भवन्ति सर्व एव मङ्गलोद्यमा इति विजानन्तो विघ्नसहस्रं विधूयापि यत्ते भट्टपल्लीब्राह्मणाः सम्मेलनमिदं निरवद्यं सम्पादितवन्तस्तत्र सर्वशक्तिमतो मङ्गलमयस्य सुमहती करुणा कर्म्माधिकृतानाञ्च परमं नैपुणमेव हेतुतामधिकुर्वीते । मुनिजनोचिताचाराणां तर्करत्नप्रमुखपण्डितमहत्तराणामयमनुभावो यत् समन्ततः सत्स्वपि सन्नद्धेषु सम्मेलनवैरिवर्गेषु वर्णाश्रमाचारमर्य्यादा तत्र गौरवपदं लम्भितेति ।

सति सम्भवे तत्र सभायामनुवाचितं मनस्विजनावधानयोग्यमभिभाषणादिकमितः ऊर्द्ध्वं संस्कृतेनानुवाद्य एतत्पत्रिकाद्वारेण पाठकेभ्यः समुपाहर्त्तुमभिलषाम इति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। **কেন না**—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

কালীতন্ত্র—এইরূপ উপাদেয় তন্ত্র এই পর্য্যন্ত আর কোথাও প্রকাশিত হয় নাই। অনেকগুলি প্রাচীন হস্তলিখিত পুঁথি হইতে পাঠ উদ্ধার করিয়া বহু পাঠান্তর, বিস্তৃত সংস্কৃত টীকা ও বঙ্গানুবাদ সহ সংস্কৃতসাহিত্যপরিষৎ হইতে পূর্ণানন্দবংশীয় তান্ত্রিক পণ্ডিত শ্রীযুক্ত সতীশচন্দ্রসিদ্ধান্তভূষণ মহাশয়ের সম্পাদকতায় প্রকাশিত হইয়াছে। কালীর ধ্যানের ব্যাখ্যা সম্বন্ধে নানারূপ মত ভেদ আছে। সেই সকলের মীমাংসাপূর্ব্বক বিস্তৃত ব্যাখ্যা প্রদত্ত হইয়াছে। মূল্য ৷৵০ দশ আনা মাত্র। পরিষদের সভ্যগণের পক্ষে ৷০ আট আনা মাত্র।

শঙ্করীসঙ্গীতম্—গীতগোবিন্দের অনুকরণে প্রাচীন কবি জয়নারায়ণের রচিত গীতিকাব্য। মূল্য ৵০ ছয় আনা, পরিষৎসভ্যের পক্ষে ।০ চারি আনা মাত্র

প্রাপ্তিস্থান—সম্পাদক, সংস্কৃতসাহিত্যপরিষৎ।

শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

চ্যবন প্রাশ— ৩৲ সের। [মকরধ্বজ— তোলা ৪৲]

অধ্যক্ষ মথুরবাবুর

ঢাকা শক্তি ঔষধালয়।

(১৩০৮ সনে স্থাপিত)

ঢাকা, কলিকাতা, ময়মনসিংহ, চট্টগ্রাম, শ্রীহট্ট, রঙ্গপুর, গৌহাটী, জলপাইগুড়ি বগুড়া, সিরাজগঞ্জ, কাশী, পাটনা, লক্ষ্ণৌ ও মাদ্রাজ।

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিশুদ্ধরক্ত ও সারিবাদ্যরিষ্ট।

সারিবাদ্যরিষ্ট— যকৃতের যে কোনপ্রকার দোষ নিশ্চয় দূরীভূত করে এবং লিভারকে কার্য্যক্ষম রাখিয়া মল মূত্র সহ পিত্ত নিঃসরণ করিয়া পিত্তাধিক্যের সমতা করে। হাত পা জ্বালা চক্ষু জ্বালা দাহ প্রভৃতি বায়ু পিত্ত রোগ দূরীভূত করে। পিত্ত দূষিত হইলে রক্তও দূষিত হয়।

সারিবাদ্যরিষ্ট—সর্ব্ববিধ রক্তদুষ্টি, যথা বাতরক্ত শীতপিত্ত, পাঁচড়া, বিখাজ, কণ্ডু কুষ্ঠ বিসর্প প্রভৃতির মহৌষধ।

সারিবাদ্যরিষ্ট—সর্ব্ববিধ বাতের বেদনা, স্নায়ুশূল, গেটেবাত, আমবাত, ঝিঁঝিঁবাত, বাতব্যাধি প্রভৃতি ঐন্দ্রজালিকের ন্যায় প্রশমিত করে।

সারিবাদ্যরিষ্ট— স্নায়বিক দৌর্ব্বল্যনাশক, জীবনীশক্তি বর্দ্ধক, কর্ম্মোৎসাহ প্রদায়ক। মূত্র ও শুক্র সম্বন্ধীয় পীড়া, শুক্রতারল্য, খড়িগোলার ন্যায় প্রস্রাব এবং স্ত্রীলোকের শ্বেত ও রক্ত প্রদর প্রভৃতি নিশ্চয় আরোগ্য করে।

সারিবাদ্যরিষ্ট - দূষিত সংসর্গজাত বিষাক্ত বীজানু প্রস্রাবদ্বারের ক্ষত, পুঁজ রক্তপাত, স্ফীতি, বেদনা, পারদবিকৃতি প্রভৃতি মারাত্মক দূষিত ব্যাধি মন্ত্রশক্তির ন্যায় আরোগ্য করে।

সারিবাদ্যরিষ্ট—বালক, বৃদ্ধ, যুবা, স্ত্রী পুরুষ সকলেই সুস্থ অসুস্থ অবস্থায় সকল ঋতুতে সেবন করিতে পারে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৸০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৸০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লীকষায়

রক্তদুষ্টির মহৌষধ শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৸০ দেড় টাকা, ৩ শিশি ৩৷৶০ আনা। ৬ শিশি ৭৸০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি. কে. সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ।

সংস্কৃতসাহিত্যপরিষদ্ভবনম্, শ্যামবাজার ব্রীজরোড, কলিকাতা।

মুদ্রণস্থানং—শ্রীপ্রেস ; ১০৩, কর্ণওয়ালিস ষ্ট্রীট, শ্যামবাজার, কলিকাতা

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये ज्यैष्ठे
June 1924.

पुस्तक Regd. No. C. 1073.
आगत सं० संस्कृत सा॰ प॰
तिथि० .... ५(२)
गुरुकुल ग्रन्थालय कांगड़ी.

७म वर्षस्य २य संख्या
Vol. VII. No. 2

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—श्रीजानकीनाथसाहित्यशास्त्री।

तन्त्रेषु श्राद्धचतुष्टयम्	४१	भाग्यविपर्य्यासः	६५
वसन्तविहारः	४७	नलदमयन्तीयम्	७३
गुरुशिष्यसंवादः	५०	आशुतोषमुखोपाध्याय	७४
प्राचीन भारतेभृत्य संव्यवहारः	५६	पुरुषव्याघ्रप्रयाणम्	७७
विश्वतश्चक्षुरित्यृचो व्याख्या	६२	सन्देशाः	७८

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम्।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च।
लभ्यते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम्॥
छात्र-पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে। কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুণ। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বী দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফুর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজী অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায় অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারি হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবার জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অ বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভ অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষে ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগে নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি; এবং বিষচিকিৎস দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড্।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यार आशुतोष मुखोपाध्याय सरस्वती।

INDIAN ART SCHOOL
92, BOWBAZAR ST. CALCUTTA

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये ज्यैष्ठे, ७म-वर्षस्य २य-संख्या ।

तन्त्रेषु आत्मचतुष्टयम् *

लेखकः श्रीसतीशचन्द्रसिद्धान्तभूषणः

तन्त्रेषु आत्मनश्चातुर्व्विध्यं प्रसिद्धम् । कृष्णानन्दभट्टाचार्य्येण तन्त्रसारे सामान्यपूजाप्रकरणस्थपीठन्यासविधौ हृत्पुण्डरीकगतेष्ट-देवतापीठमध्ये आत्मचतुष्टयस्य न्यास उक्तः । तत्र आत्मा अन्तरात्मा परमात्मा ज्ञानात्मेति नामचतुष्टयमात्रमुक्तं न तु तेषां प्रमाणभूतं वचनम् स्वरूपञ्च । शारदातिलकेऽपि पीठन्यासप्रकरणे—

"आत्मानमन्तरात्मानं परमात्मानमत्र तु ।
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः ॥"

(शारदातिलकम् ४।४१)

इत्येवं नाममात्रमुक्तं न तु स्वरूपम् । आधुनिका अपि नित्येष्ट-देवतापूजनशीलाः प्रत्यहमेवं न्यासमाचरन्ति जानन्ति च आत्म-चतुष्टयस्य नामानि । साधकहिताकाङ्क्षया तेषां स्वरूपनिर्द्देशं कुर्व्वता भगवता शिवेन ज्ञानार्णवतन्त्रे एवमुक्तम्—

* प्रबन्धोऽयं परिषदो मासिकाधिवेशने वाचितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आत्मनो वेदसंख्या हि ज्ञातव्या साधकोत्तमैः ।
एषां विज्ञानमात्रेण पुनर्जन्म न विद्यते ॥
साधारणेन पक्षेण वर्त्तते सर्व्वजन्तुषु ।
स आत्मा परमेशानि प्राणरूपी वरानने ॥
प्राणस्तु पवनो देवि हृदयस्थानमन्दिरः ।
शरीरं व्याप्य सकलं चरस्याप्यचरस्य च ॥
हंसस्वरूपी विज्ञेयः श्वासोच्छ्वासविलासवान् ।
जीव इत्येव नामास्य भ्रान्त्या श्वासान्न वस्तुतः ॥
श्वासोच्छ्वासौ देहभावाद् भ्रान्तिरेव न संशयः ।
कुलालचक्रभेदेन घटाकाशं घटे यथा ॥
दृश्यते परमेशानि आकाशं व्याप्य तिष्ठति ।
घटे भवति भिन्नत्वं नाकाशे भिन्नता भवेत् ॥
तथा देहगतो जीवो देहनाशे वरानने ।
व्याप्य तिष्ठति सर्व्वत्र तस्मादात्मा परं महत् ॥
आत्मज्ञानं शिवेनोक्तं द्वितीयस्य शृणु प्रिये ।
अन्तरात्मेति किं नाम तच्छृणुष्व पदं महत् ॥
अन्तःशब्देन सकलं रहस्यं सूक्ष्मरूपकम् ।
परमाणुस्वरूपेण (१) सर्व्वं व्याप्य विजृम्भते ॥
अन्तरङ्गतया तेन चरं वाप्यथवाचरम् ।
व्याप्यते सकलं तस्मादन्तरात्मेति गीयते ॥
स एव हंस आत्माहि योगिगम्यो यदा भवेत् ।
तारचक्षुर्वरारोहे निगमागमपक्षवान् ॥
शिवशक्तिपदद्वन्द्वो विन्दुत्रयविलोचनः ।
अयं परमहंसस्तु सृष्टिं व्याप्यावतिष्ठति ॥

(१) "परमात्मस्वरूपेण" इति पाठान्तरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा भूतानि जायन्ते क्रमेण कमलेक्षणे ।
आकाशं पवनो ह्यग्निर्जलं पृथ्वी वरानने ॥
अविद्याख्यसरोमध्ये मोहपङ्कजपूरिते ।
प्रपञ्चकमले भूतपद्माख्यपरिजृम्भिते ॥
विहारोऽस्यैव हंसस्य सृष्ट्या मायामयो भवेत् ।
अयमेव महाकाले निष्प्रपञ्चो यदा भवेत् ॥
संहाररूपी हंसस्तु तदात्मानं प्रदर्शयेत् ।
पक्षित्वमस्य नास्त्येव सोऽहमात्मा प्रतिष्ठितः ॥
परमात्मेति जानीहि त्वयमेतदुदाहृतम् ।
पक्षपुच्छशिरो देवि आकारप्रतिभासकम् ॥
ज्ञानात्मा कथ्यते भद्रे यः साक्षात् साक्षिरूपकः ।
येनेदं ज्ञायते सर्वं समत्वेन च सर्वदा ॥
चन्द्रबिम्बं यथा नित्यं जलक्षीरेषु दृश्यते ।
न लिप्तं तस्य देवेशि नीरक्षीरविभेदतः ॥
कर्दमे चन्दने बिम्बं न भवेल्लिप्तमद्रिजे ।
साक्षी स सर्वजगतां ज्ञानात्मा परिकीर्त्तितः ॥
आत्मान्तरात्मपरमज्ञानात्मानः प्रकीर्त्तिताः ।"

(ज्ञानार्णवतन्त्रम्, २१श पटलः)

इति । अस्मत्पूर्वपुरुषपरमहंसपरिव्राजकाचार्य्यश्रीमत्पूर्णानन्दगिरिणा श्रीतत्त्वचिन्तामणिनामधेयस्वकीयनिबन्धे पञ्चदशप्रकाशे एतान्येव वचनानि उद्धृतानि, किन्तु तत्र पाठव्यत्ययो दृश्यते ।

ज्ञानार्णववचनानामयमेव निष्कर्षः—वायुरूपी देहाधिष्ठितः प्राण एव आत्मा । अस्य सर्वदेहव्यापित्वेऽपि हृदयमेव मुख्यावासस्थानम् । स च हं-सः स्वरूपेण श्वासोच्छ्वासक्रियां सम्पादयति । प्राणस्यावस्थाने देहः सजीवः बहिर्गमणे निर्जीवः, अतः प्राण एवात्मा, जीव इत्यस्यापरं नाम । प्राण एव श्वासोच्छ्वासाभ्यां आत्मनो देहसम्बन्धं बहिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशयति, अतः प्राणरूपो जीवात्मा आत्मनः स्थूलरूपम्। वस्तुत आत्मशब्देन स्थूलरूपं जाग्रदवस्थोपहितचैतन्यमिवोच्यते। स्थावरजङ्गमात्मकं जगद्व्याप्य अन्तरङ्गतया सूक्ष्मरूपेणावस्थितं अन्तरङ्गतया मनस्यधिष्ठितं चैतन्यमेव अन्तरात्मा। अन्तरङ्गत्वादेवास्यान्तरात्मत्वम् अतःस्वप्नावस्थोपहितचैतन्यमेवान्तरात्मशब्देनोच्यते। एष एवान्तरात्मा योगिभिर्हंसःस्वरूपेण भाव्यते। स च हंसः पक्षिरूपी, प्रणवस्तस्य चञ्चुः, निगमागमौ पक्षौ, शिवः शक्तिश्च पदद्वन्द्वम्, शैवागमप्रसिद्धं श्वेत-लोहित-मिश्ररूपं विन्दुत्रयं तस्य लोचनत्रयम्, अस्मादेव पञ्च भूतानि प्रादुर्भवन्ति, अविद्याख्यसरोवरे मोहरूपपङ्कजपूरिते पञ्चभूतरूपसरोजपरिजृम्भिते प्रपञ्चकमले मायामयस्य अस्य विहारः। एवं हंसरूपी अन्तरात्मा योगिभिर्भावनीयः। वस्तुत आत्मनः पक्षिरूपत्वं नास्त्येव, यत् पक्षिरूपत्वमुपवर्णितं तदाकारप्रतिभासकमात्रम्। सोऽयमन्तरात्मा यदा महाकाले निष्प्रपञ्चो भवेत् तदा प्रपञ्चलयादेव संहाररूपो भूत्वा स्वस्वरूपं प्रदर्शयेत्। एवंरूपः परमात्मा। एतेन सुषुप्त्युपहितचैतन्यमेव परमात्मशब्देनोच्यते। ज्ञानात्मा तु निरुपाधिकं ब्रह्मैव।

आत्मोपनिषद्यपि "अथाङ्गिरास्त्रिविधः पुरुषोऽजायतात्मान्तरात्मा परमात्मा चेति। त्वक्चर्ममांसरोमाङ्गुष्ठाङ्गुल्यः पृष्ठवंशनखगुल्फोदरनाभिमेढ्रकट्यूरुकपोलश्रोत्रभ्रूललाटबाहुपार्श्वशिरोऽक्षीणि भवन्ति जायन्ते म्रियन्ते इत्येष आत्मा। अथान्तरात्मा नाम पृथिव्यापस्तेजोवायुराकाशमिच्छाद्वेषसुखदुःखकाममोहविकल्पनादिस्मृतिलिङ्गोदात्तानुदात्तह्रस्वदीर्घप्लुतः स्खलितगर्जितस्फुटितमुदितनृत्तगीतवादित्रप्रलयविजृम्भितादिभिः श्रोता घ्राता रसयिता नेता कर्त्ता विज्ञानात्मा पुरुषः पुराणन्यायमीमांसाधर्म्मशास्त्राणीति श्रवणघ्राणाकर्षणकर्म्मविशेषणं करोत्येषोऽन्तरात्मा। अथ परमात्मा नाम यथाक्षर उपासनीयः। स च प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि-योगानुमानाचिन्त्यन्तकवट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कणिका वा श्यामाकतण्डुलो वा बालाग्रशतसहस्रविकल्पनाभिः स लभ्यते नोपलभ्यते न जायते न म्रियते न शुष्यति न क्लिद्यते न दह्यते न कम्पते न भिद्यते न छिद्यते निर्गुणं साक्षिभूतः शुद्धो निरवयवात्मा केवलःसूक्ष्मो निर्म्ममो निरञ्जनो निर्व्विकारः शब्दस्पर्शरूपरसगन्धवर्ज्जितो निर्विकल्पो निराकाङ्क्षः सर्व्वव्यापी सोऽचिन्त्यो निर्व्वर्णश्च पुनात्यशुद्धान्यपूतानि । निष्क्रियस्यास्य संसारो नास्ति ।" इत्यादिभिः श्रुतिभिः आत्मा अन्तरात्मा परमात्मेति आत्मत्रयमुपवर्णितम् । ज्ञानात्मा तु तत्र नोच्यते । वामकेश्वरतन्त्रस्य सेतुबन्धाख्यटीकायामेवमुक्तम्—

"आत्मानश्चत्वार आत्मा अन्तरात्मा परमात्मा ज्ञानात्मेति भेदात्, एते च पीठन्यासे परस्परभिन्नदेवतात्वेन प्रसिद्धाः । तेषु त्रयाणां लक्षणानि तावदात्मोपनिषद्याथर्व्वणैराम्नातानि । देहं ब्रह्म आत्मा, भोक्ता अन्तरात्मा, सूक्ष्मो जीव, परमात्मा, इति तन्निष्कर्षः । ज्ञानात्मा तु ब्रह्मैव जीवाभिन्नमिति बोध्यम ।" इति । एतेन ज्ञानात्मनो निरुपाधिकब्रह्मत्वेन प्रसिद्धत्वादेव आत्मोपनिषदि तस्य लक्षणं नोक्तमिति तस्याभिप्रायः प्रतिभाति । अतएव ज्ञानार्णवोक्तात्मचतुष्टयलक्षणैरात्मोपनिषदुक्त लक्षणानां नातिविरोध, ।

"हैरण्यगर्भाः प्राणात्मवादिनस्त्वे वसूचिरे ।
चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति ॥
प्राणो जागर्ति सुप्तेषु प्राणश्रैष्ठ्यादिकं श्रुतम् ।
कोशः प्राणमयः सम्यग् विस्तरेण प्रपञ्चितः ॥"

(पञ्चदशी ६।६५,६६)

इति पञ्चदश्युक्त प्राणात्मवादिसम्मतप्राणात्मना सह ज्ञानार्णवोक्तात्मन एकत्वं तथा—

"मन आत्मेति मन्यन्त उपासनपरा जनाः ।
प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः ॥

6　　2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
श्रुतौ मनोमयः कोशस्तेनात्मेतीरितं मनः॥"
(पञ्चदशी ६।६७,६८)

इति पञ्चदश्युक्तोपासकसम्मतमन-आत्मनासह ज्ञानार्णवोक्तात्मरात्मन एकत्वं तथा—

"जाग्रत्स्वप्नजगत् तत्र लीनं बीज इव द्रुमः।
तस्मादशेषजगतो वासनास्तत्र संस्थिताः॥
या बुद्धिवासनास्तासु चैतन्यं प्रतिबिम्बति।"
(पञ्चदशी ६।१५२,१५३)

इति पञ्चदश्युक्तान्तर्यामिना सह ज्ञानार्णवोक्तपरमात्मन एकत्वं प्रतिपद्यते। ज्ञानात्मा तु तत्सम्मतं ब्रह्मैव।

"तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः। × × ×।" [तैत्तिरीयोपनिषत् २।२] "ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात् सर्व्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा।" × × ×। तस्माद्वा एतस्मात् प्राणमयात्। अन्योऽन्तर आत्मा मनोमय।" [तै, उ, २।३] "तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः।" [तै, उ, २।४]। "तस्माद्वा एतस्मात् विज्ञानमयात्। अन्योऽन्तर आत्मानन्दमयः।" [तै, उ, २।५] इति तैत्तिरीयोपनिषदुक्तात्मचतुष्टये प्राणात्मन आत्मनि, मन आत्मनः अन्तरात्मनि, विज्ञानमयानन्दमयात्मनोः परमात्मनि सन्निवेशो युज्यते। ज्ञानात्मातु निरुपाधिकब्रह्मैव।

अतस्तन्त्रोक्तात्मचतुष्टयस्य श्रुतिविरुद्धता नोपलभ्यते। अतएव तान्त्रिकसाधकैः साधनभूमिकासु जाग्रदवस्थायामात्मा, स्वप्नावस्थायां अन्तरात्मा, सुषुप्त्यवस्थायां परमात्मा, तुरीयावस्थायां ज्ञानात्मा साधनीयः। इष्टदेवतासनञ्च एतदात्मचतुष्टयोपरि कल्पनीयम्।

तैत्तिरीयारण्यके तु "स वा एष पुरुषः पञ्चधा पञ्चात्मा" तैआ१०।७३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादि श्रुत्या एकस्यैवात्मन: पञ्चरूपत्वमुक्तम्। अस्या भाष्ये सायणेनोक्तम्—"पञ्चभिरात्मभिर्युक्त: पञ्चधा वर्त्तते। तथाच पुराणेऽभिहितम्

"भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्।
आत्मा च परमात्मा च त्वमेक: पञ्चधा स्थित:॥"

इति। योगशास्त्रे तु आत्मन अष्टविधत्वमभिहितम्। तथाच सौभाग्यभास्करे (१४० पृ:) भास्कररायेणोक्तम्—"यद्वा योगशास्त्रे

गुणभेदादात्ममूर्त्तिरष्टधा परिकीर्त्तिता।
जीवात्मा चान्तरात्मा च परमात्मा च निर्मल:॥
शुद्धात्मा ज्ञानरूपात्मा महात्मा सप्तम: स्मृत:।
अष्टमस्तेषु भूतात्मेत्यष्टात्मान: प्रकीर्त्तिता:॥ इति।"

तान्त्रिका अपि एकस्यैवात्मनश्चतुर्विधत्वं मन्यन्ते। एकस्या एव चितिशक्ते: स्थूलदेहाधिष्ठानेन आत्मत्वं सूक्ष्मदेहाधिष्ठानेन अन्तरात्मत्वं, कारण-देहाधिष्ठानेन परमात्मत्वं निरधिष्ठानत्वेन ज्ञानात्मत्वं, इत्ययमपि तेषामेव सिद्धान्त:। इति शम्।

योगीन्द्रनाथविद्याचुञ्चुविरचितो 'नवरत्न'न्तर्गतो

वसन्तविहार:।

तत: सखे सुखशिशिरादनन्तरं मधावृतौ धरणितलं समागते।
समीरणो मलयगिरे: सुखावह: समन्तत:·शमनदिश: प्रसर्पति॥ १
महीरुहा नवदलपट्टसंवृता: सुगन्धिभि: कुसुमचयैर्विभूषिता:।
शिलीमुखध्वनिकृतगीतमङ्गला: स्तुवन्ति तं पिकविरुतैर्नृपं मधुं॥ २
ऋतूत्तमे सखिभुवनन्त्वधिष्ठिते समुत्सुका:प्रणयिषु कामपीड़िता:।
वराङ्गना ह्यभिसरणं वितन्वते तमस्विनीघनतिमिराम्बरावृता:॥ ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वने मुदा युवतिगणः सवल्लभो मदोद्धतो वनकुसुमं समाहरन् ।
स्वयं कृतां प्रियहृदये स्रजं ततो निवेशयन् भवति कृतार्थमानसः ॥ ४
मधौ स्त्रियः समदनभावरञ्जिताः प्रियैः सहातनुरसभोगलालसाः ।
रतालये कुसुमित वल्लरीवृते निजं प्रियं चिरमिह कुर्व्वते वशम् ॥ ५
मृगीदृशो गजगतयो वनान्तरे सुखासने विटपितलेकृतासनाः ।
सुधोपमैः पिकरवनिन्दिभिःस्वरैः प्रकुर्व्वते मनसिजगीतिमुच्चकैः ॥ ६
नवाहृतैःकिशलयपुष्पराशिभिर्विनिर्म्मितं स्तवकमुपाहरन्त्यमूः ।
स्वकं पतिं भुजलतिकाधृतांसकं स्मरातुरं विदधति काननाङ्गनाः ॥ ७
कलावता विशदकरैर्विभाषिते महीतले निशि ललना रतोत्सुकाः ।
मनोभवज्वरजनितां तृषां तदा न्यकारयन् प्रणयसरिद्गताः स्त्रियः ॥८
पतत्रिणां शिरसि पिकाः कुहूरवाः कलस्वनैर्विदधति खं सुधाप्लुतं ।
शिलीमुखाः प्रतिकुसुमं नवं रसं पिवन्त्यमी श्रुतिसुखगुञ्जनोत्सुकाः ॥ ९
तदा प्रियं विहगवधूरतार्थिनी कलस्वनाह्वयति निजद्रुमालये ।
समेत्य तां रमयति सोऽपि रागतो निमीलिता भवति दृशा खगद्वयी ॥१०
वनान्तरे मृगमिथुनं परस्परं सुकोमले हरिततृणे विषाणकैः ।
सुखासनं विलिखति गात्रमादरात् करोत्यसौ कलमधुरं पिकध्वनिम् ॥११
न तद्वनं यत्र मनोज्ञपादपं न पादपो यः कुसुमैर्न भूषितः ।
न तत्प्रसूनं न हि यत्र सौरभं न सौरभं यत्र मनोहरत्यलं ॥१२
न तत् सरो यत्र सरोजशोभितं न तत् सरोजं भ्रमरैर्न चुम्बितं ।
न षटपदास्ते न रुवन्ति ये कलं रुतं न तद् यत्र मनोहरं मधौ ॥१३
ऋतूत्तमे राजनिभे समागते द्रुमा व्रतत्यश्च नवैर्दलांशुकैः ।
विचित्रवर्णैः कुसुमैर्विभूषणैर्विमण्डिता हर्षजडा समासते ॥१४
तदा तरुण्यो रसभावविह्वला रतानुकूलाम्बरभूषणव्रजे ।
स्रजो दधानाश्च सुधांशु पाण्डुरा विहर्तुमिच्छन्ति विहारकानने ॥१५
व्रजाङ्गनाः कुसुमितकुञ्जकानने स्मरोल्लसद्हृदय सरोवरास्तदा ।
स्मिताभया सुललितवक्त्रजातया व्रजेश्वरं झटिति वशं प्रकुर्व्वते ॥१६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृगीदृशां ललितकटाक्षतेजसा पुन: पुनर्भुवि चपला प्रकाशते ।
व्रजेश्वरो हसितरुचिद्युतिस्तदा तनुश्रिया घन इव शोभतेऽधिकम् ॥१७
ततो हरिर्निशितशरायमाणया नतभ्रुवां सपदि दृशा प्रताड़ित: ।
मुमुर्षुवत् पुनरपि जीवनं दधौ निपीय तन्मुखविधुसौधसन्ततिम् ॥१८
प्रदक्षिणीकृत्य हरिं नटन्त्यमू: परस्पराश्लिष्टभुजाग्रपल्लवा: ।
विडम्बयन्त्यश्चपला घनागमे विरञ्जयन्त्यो परितो नवाम्बुदम् ॥ १९
व्रजेश्वरस्तत्कुचमर्द्दनच्छलाद्धराङ्गनाभिर्हृतपूर्व्वमाग्रहात् ।
स्वकीयमग्र्यं हृदयं हृदि स्थितं समाददे किं पुनरप्यसौ तदा ॥ २०
हरिर्ममैवेति तदङ्गरञ्जनं करोम्यहं ता: सकला व्रजाङ्गना: ।
परस्परं घोरकलिं वितेनिरे ततो विभागोऽस्य तनो: प्रकल्पित: ॥ २१
काचिन्नवीनास्य दृशौ गृहीत्वा सुरञ्जिते अञ्जनसन्निवेशत: ।
चकार काचिद् भ्रमरायमाणं सुकेशजालं नवसंस्कृतं च ॥ २२
योषापरा चोष्ठपुटौ तदीयौ ताम्बूलरागैर्विदधेऽतिरिक्तौ ।
कर्णौ च काचित् कुसुमै: शिरीषैर्विभूषयामास यथेच्छमस्य ॥ २३
नितम्बिनी काचन गण्डयुग्मके पत्रावलीनां रचनासुकौशलं ।
प्रदर्शयामास विचित्ररञ्जनै: सचन्दनैर्गैरिकरोचनादिभि: ॥ २४
ग्रीवास्य नार्य्या जगृहे कयाचित् कम्बूपमा चारुतरस्रजाढ्या ।
चक्रे कयाचित् पदचिह्नपुष्टे श्रीखण्डचर्च्चा हृदये तदीये ॥ २५
प्रौढ़ा च काचित् कटिदेशमिष्टं संगृह्य चारुं रसनाकलापै: ।
व्यरञ्जयत् राधिकया तत: पदे सुरार्च्चिते नूपुरभूषिते कृते ॥ २६
कलं जगुस्ता रसिका नतभ्रुव: समस्वरै रागविशेषसङ्गतै: ।
सुतालनृत्यैर्बहुभङ्गिसंयुतै: प्रदक्षिणेनैव मुरद्विष: पुन: ॥ २७
सुवर्णशृङ्गाटकत: प्रचोदितै: सुगन्धिफल्गूत्कररञ्जितैर्जलै: ।
तदाभ्यसिञ्चन् रसविह्वलाङ्गना सकौतुकं ता: प्रियगात्रमादरात् ॥ २८
सकुङ्कुमं फल्गुरजो व्रजेश्वरे निचिक्षिपु: काश्चन गोपयोषित: ।
स्मितत्विषा दन्तमयूखपुष्टया प्रक्षालयामासुरिवाम्भसा तत: ॥ २९

7 1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ स रसिकराजः प्रेमसिन्धुर्व्रजनाथो
व्रजकुलरमणीस्ता वीच्य वासन्तकेलौ ।
त्रुटितहृदयमाला ग्लानिमुत्पादयन्ती
रतिचलकटिदेशाः प्राह शान्तिं भजध्वम् ॥ ३०
मयि सुविमलभावं प्रेमनिःशेषगाढ़ं
स्वमनसि भवदीयं सम्यगालोच्य भूयः ।
अहमति परितृप्तो हृष्टचेताः प्रसन्नः
सुख-रति-जलधौ वः पातितोऽस्मीति मन्ये ॥ ३१
वाशिष्ठान्वयभूः प्रसन्नहृदयः स्मृत्वा गुरोरङ्घ्रिणी
श्रीयोगीन्द्रसुधीर्वयोभिरनघः पञ्चाशता पञ्चभिः ।
शाके बाणदृशाभुजङ्गधरणीमानेङ्कि पौषान्तिमे
श्रीकृष्णस्य मधौ विहाररुचिरं प्रासूत काव्यं शुभम् ॥३२

भट्टपल्लीवास्तव्यश्रीहरिपदभारतीशर्मणा प्रकाश्यते

गुरुशिष्यसंवादः ।

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थ ।

प्रथमः शिष्यः ।—न सम्यगवगम्यते तत्रभवतामभिप्रायः । प्रवाहरूपेण सनातनोऽयं धर्म्म" इत्यस्य विशदव्याख्यानं श्रोतव्यम् ।

गुरुः ।—श्रूयतां तावत् । प्रथमतो "धर्म्म" इतिशब्दस्यार्थ एव निरूपणीयः । तथाचात्र पारमर्षं सूत्रम्

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः ।

"अभ्युदय"स्तत्त्वज्ञानं, "निःश्रेयस"मात्यन्तिकी दुःखनिवृत्तिः, तदुभयं यतः स धर्म इति प्रथमपक्षः । वृत्तिकृतस्तु—"अभ्युदयः" सुखं "निःश्रेयस"मेककालीनसकलात्मगुणविशेषध्वंस"— इति विशेषार्थमाहुः । "को धर्म्मः किंलक्षणक"श्चेति सामान्यतः शिष्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिज्ञासायां यतोऽभ्युदयनिःश्रेयससिद्धिरित्युपतिष्ठते, तथाच यतोऽभ्युदयसिद्धिर्यतश्च निःश्रेयससिद्धिस्तदुभयं धर्म्म इति फलितार्थो धर्म्मशब्दस्य। अभ्युदयशब्देन स्वर्गादिः, निःश्रेयसशब्देन अपवर्गापरनामा परापरा मुक्तिरुच्यते। स्वर्गाद्यपरपर्य्यायाभ्युदयसाधकत्वेन प्रवृत्तिलक्षणो धर्म्मो व्याख्यातः। आत्यन्तिकदुःखनिवृत्तिरूपमुक्त्यपरपर्य्यायनिःश्रेयससाधकत्वेन च निवृत्तिलक्षणधर्म्मो व्याख्यातो भवति। जन्मोच्छेद एवमुक्तिरिति प्रमाणसिद्धम्। तदेवमाम्नातम्

"न स पुनरावर्त्तते।"

पुनरावर्त्तनमेव जन्म। जन्मप्रवाह एव "सृष्टिप्रवाह" इति नाम्ना व्यवदिश्यते। सृष्टिप्रवाहस्यानादित्वं सर्व्वतन्त्रसम्मतम्, तथा येषां मते सर्व्वजीवमुक्तिरूपदोषापातात् महाप्रलयो नास्ति तेषां मते तस्य (सृष्टिप्रवाहस्य) अनन्तत्वमपि सिद्धम्। एवञ्च यथा जननमरणप्रवाहस्याऽनाद्यनन्तत्वात्तस्य सनातनत्वमङ्गीकर्त्तव्यमेवं धर्म्मस्यापि सनातनत्वं पूर्व्वोक्तदिशा सिध्यति। तथाहि कदारभ्यायं प्रवृत्तिनिवृत्तिलक्षणो-धर्म्म उपलभ्यत इति कथने नास्ति यथा केषामपि शक्तिस्तथा कदा तादृशो धर्म्मो न स्थास्यत्येव इति कथनेऽपि सर्व्वेषामेव शक्त्यभाव इत्यवितथम्। ततश्च प्राग्भवीयसर्व्वास्वेव सृष्टिषु ब्राह्मणादिवर्णा आसन्नेव, तेषां प्रवृत्तिर्निवृत्तिश्चासीदेव, वर्त्तमाने खलु ब्राह्मणादिवर्णा विद्यन्ते, तेषां प्रवृत्तिनिवृत्ती अपुरुपलभेते, एवं भविष्यन्तीष्वपि सृष्टिषु ते वर्णास्ते च प्रवृत्तिनिवृत्ती स्थास्यन्त्येवेति प्रवृत्तिनिवृत्तिलक्षणधर्म्मस्य प्रवाहरूपेण त्रिष्वेव कालेषु स्थायित्वाद्धर्म्मस्य सनातनत्वमकामेनापि स्वीकर्त्तव्यम्।

अपिच—अयं तावत् प्रवृत्तिनिवृत्तिलक्षणो धर्म्मो वेदप्रतिपादितः भगवता वेदेनैव हि तादृशो धर्म्मो व्युत्पादित इति कृत्वाप्यस्य सनातनत्वमुपपद्यते। तथाहि येषां मते वेदा स्तावदपौरुषेया नित्या स्तेषां मते कदारभ्य भगवद्भिर्वेदैरयं धर्म्मः प्रतिपाद्यते इति कथनावसर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव नास्ति नित्यानां कालकथनासम्भवात्। नित्यतया वेदानां भविष्यत्यपि काले तत्प्रतिपादितधर्म्मः स्थास्यत्येवेति धर्म्मस्य सनातनत्वमुपयुज्यते। तदेतत् स्मृतम्

"न कश्चिद् वेदकर्त्तास्ति वेदस्मर्त्ता पितामहः ।
तथैव धर्म्मं स्मरति मनुः कल्पान्तरान्तरे ॥" (पराशरः)

येषां मते वेदानामीश्वरोच्चारिततया प्रामाण्यपरिग्रहस्तेषामपि मते धर्म्मस्य सनातनत्वं भवितुमर्हति। तथाहि सनातन ईश्वरः सनातन धर्म्मग्लानिं यदैवावालोकयति तदैव तद्रक्षणार्थमवतरतीति प्रसिद्धम्। तथाच तदीयं वाक्यम्

यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम् ॥ १
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदावतीर्य्याहं करिष्याम्यरिसंक्षयम् ॥ २

तदेवं श्रुतिस्मृतीतिहासपुराणयुक्तिभिर्धर्म्मस्य सनातनत्वमुपपादितं भवति। इतःपरमपि यदि कश्चित् संशयः श्रीमतां स कथनीयः।

प्रथमशिष्यः।—धर्म्मस्य सनातनत्वमवगतम्, तत्र प्रश्नावसरो नास्त्येव। किन्तु इतःप्राक्—"चातुर्व्वर्ण्यं मया सृष्ट"मिति भगवद्वाक्यमुपन्यस्यता यः पूर्वः पक्ष उपक्षिप्तस्तत्समाधिरिदानीं श्रोतव्यः।

गुरुः।—पूर्व्वपक्षो विशदं वर्णयतामायुष्मता।

प्रथमशिष्यः।—वर्ण्यते तावद् यथाशक्ति। पूर्व्वोक्तभगवद्वचनेनायमर्थः सम्पद्यते। तथाहि येषु शमदमादिगुणास्तेषां ब्राह्मणत्वजातिः, अध्यापनादि च कर्म्म, येषाञ्च शौर्य्यादिर्गुणास्तेषां क्षत्रियत्वजातिः, राज्यपालनादि कर्म्म, इत्येवंरीत्या वैश्यादिष्वपि जातिष्ववबोधः कर्तव्यः। एवञ्च

"जन्मना जातिरुच्यते"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पक्षो निरस्त:। एतेन पूर्व्वोपक्षिप्तमैतिहासिकमतमपि समर्थित-मुपद्यते। तथाहि आदौ सर्व्व एव एकवर्ण आसीत्, परतस्ताद्दश गुणकर्म्मदर्शनेन जातिविभाग: कल्पित:। पक्षोऽयमुपपद्यते युक्त्यापि, यतोऽस्मिन् पक्षे सर्व्वेषां समानाधिकारात् पक्षपातितादोषस्यानवसर:।

गुरु:। वत्स! श्रुतस्ते पूर्व्वपक्ष:। साम्प्रतं तन्निराकरणमुच्यते। यद्भगवद्वचनं पूर्व्वपक्षे प्रमाणत्वमिति सत्त्वोपक्षिप्तमायुष्मता तेन वचनेन भवदुक्त: पूर्व्वपक्ष: समर्थितो न भवतीति—आदौ दर्शयामि। तथाहि वचनमिदं व्याख्यातं भगवद्भि: शङ्कराचार्य्यैर्यथा

(क) "चातुर्व्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मया ईश्वरेण सृष्टमुत्पादितं—"ब्राह्मणोऽस्य मुखमासी"दित्यादि श्रुते:।...गुण-विभागश: कर्म्मविभागशश्च गुणा: सत्त्वरजस्तमांसि, तत्र सात्त्विकस्य सत्त्व-प्रधानस्य ब्राह्मणस्य शमो दमस्तपइत्यादीनि कर्म्माणि, सत्त्वोपसर्ज्जन-रज:प्रधानस्य क्षत्रियस्य शौर्य्यतेज:प्रभृतीनि कर्म्माणि, तमउपसर्ज्जन रज:प्रधानस्य वैश्यस्य कृष्यादीनि कर्म्माणि रजउपसर्ज्जनतम:प्रधानस्य शूद्रस्य शुश्रूषैव कर्म्म इत्येवं गुणकर्म्मविभागश: चातुर्व्वर्ण्यं मया सृष्ट-मित्यर्थ:।

यथाश्रुतभगवद्वचनेन शाङ्करभाष्येण च वर्णाश्रमविभागं प्रति परमेश्वरस्यैव कर्तृत्वमुपपादितं भवति। ततश्च सृष्टित एव भगवतायं जातिविभाग: कृत: इति कथ"मादौ सर्व एव एकवर्ण आसीत्, परत-स्ताद्दशगुणकर्म्मविभागदर्शनेन जातिविभाग: कल्पित:" इति भगवदुक्त-पूर्वपक्षस्तद्वचनेन समर्थित: स्यात्?

(ख) अपि च—"गुणकर्म्मविभागश:" इत्यत्र गुणशब्देन सत्त्वरज-स्तमांसीति सृष्टेर्मूलकारणमायाति, तत्र परमेश्वरकर्तृत्वं विनाऽन्येषां कर्तृत्वं वा कथमुपपद्यत इत्यपि चिन्तनीयम्।

अतएव "जन्मना जातिरुच्यते"—अयमेव सिद्धान्त: स्वीकर्त्तव्य:। तथाहि सिद्धान्तेऽस्मिन् साधकान्तराणि दर्शयामि। तथाच यदि नाम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिके खलु युगे ब्राह्मणादिजातिर्नासीत्तदा कथं वैदिके खलु पुरुषसूक्ते

"ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत॥

ब्राह्मणादिजातेर्नाम श्रूयते? अपि च वैदिके देवीसूक्तेऽपि "तं ब्रह्माणं सुमेधां करोमि" इति वा कथं श्रूयते? पूर्वोक्तपुरुषसूक्तभाष्ये सायणाचार्य्यपादैरिदमप्युक्तम्—

"इयञ्च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे "स मुखतस्त्रिवृतंनिरमिमीते" इत्यादौ विस्पष्टमाम्नाता।"

(सायणभाष्यम्)

अपि—च—"विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहमस्मि—" (निरुक्तधृता श्रुतिः)

इति श्रुत्यनुसारि शतपथब्राह्मणम्—"यस्मादेते मुख्यास्तस्मान्मुखतो ह्यसृज्यन्त" इति। यतो ब्राह्मणः श्रेष्ठस्ततः श्रेष्ठादङ्गान्मुखत उत्पत्तिरित्यर्थः। यदि जन्मनः परं मुख्यत्वं (श्रेष्ठत्वं) तर्हि कथं मुखात् (श्रेष्ठात्) मुखत उत्पत्तिकथनम्। ततश्च विद्यादिगुणनिरपेक्षं प्रत्युत जन्मसापेक्षमेव श्रेष्ठत्वमिति जन्मनैव ब्राह्मणत्वजातिरिति विस्पष्टमुपलभ्यते। एतावता एतदुक्तं भवति विद्यादिगुणसम्पद् ब्राह्मण्यमुपकरोति नतु ब्राह्मण्यस्वरूपं निष्पादयतीति।

५। अपि च "ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रम् स नैव व्यभवत् स विशमसृजत स शौद्रं वर्णमसृजत" इत्यादि बृहदारण्यकोपनिषत् १।४।११।१२।

उद्धृतेनोपनिषद्वाक्येन जन्मकाल एव जीवो ब्राह्मणादि जातिविशिष्टः सन्नुत्पद्यत इति स्पष्टमुपलभ्यते।

अपि च अन्यदपि श्रूयते यथा—"तद् य इह रमणीयचरणा अभ्यासो ह रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा वैश्ययोनिं वा, य इह कपूयचरणा अभ्यासोहि यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा" ।

छान्दोग्य । ५अ । १०म—७

उद्धृतोपनिषद्वाक्येनापि "जन्मना जातिरुच्यते" सिद्धान्तोऽयं समर्थितो भवति । यदि नाम वैदिके युग एतादृशो वर्णाश्रमविभागो नासीदेव तर्हि कथं नाम पूर्व्वोक्तेषु तत्तद्वेदवाक्येषु ब्राह्मणत्वादिजातेर्नाम बहुशः परिश्रूयते ? अतो वैदिके खलु युगे सर्व्वे एव वर्ण आसीत् परतो वर्णाश्रमविभागोऽयं कल्पित" इति मतमैतिहासिकानां भ्रमपूर्णमेव प्रतिभाति ।

प्रथमशिष्यः । सुष्ठूक्तमाचार्य्यदेवेन, तथाप्यस्माकम् संशयान्तरमस्ति ।

गुरुः । श्रीमतां संशयान्तरमागामिनि दिवसे निराकरणीयम् । अद्य खलु सायंसन्ध्याकालः समुपस्थितः । न खल्वस्माकमन्येषामिव सन्ध्योपासनं वर्ज्जयतां सायंकाले किमप्यालोचनीयम् । शास्त्रसेवकैरस्माभिः शास्त्रादेशः सर्वात्मना पालनीयः । तथाप्यत्र शास्त्रादेशः श्रूयते

"राक्षसो नाम सा वेला गर्हिता सर्व्वकर्म्मसु" १
गणिताज् ज्ञायते कालोह्यत्र तिष्ठन्ति देवताः ।
वरमेकाहुतिः काले नाकाले लक्षकोटयः ॥ २
सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापा स्ते यान्ति ब्रह्मलोकमनामयम् ॥

अत इदानीं सन्ध्योपासनमेव करणीयमस्माकमिति ॥　(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीन भारते-भृत्य संव्यवहारः

लेखकः श्रीउपेन्द्रनाथसेनगुप्तकाव्यतीर्थः

लोकयात्रां निर्वाहयतां सतां भ्रातृपुत्रबन्धुष्विव दृश्यते भृतेष्वपि स्नेहप्रकर्षः। सानुरागा भृत्याः सर्वथा गृहिणां परिजनकक्षमवगाहन्ते, राज्ञां पुनः अमात्यादयो भृत्याः परिजनान् अपि प्रयोजनवशादतिशेरते। तथाच कामन्दकीये प्रकृतिसम्पत्प्रकरणे "स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृद्। परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते" (का·नीतिसारः ४।१) अत्र यथा राज्ञो राज्यादित्वं तथामात्यादीनां राजसेवकानामपि। गृहस्थस्तु

"भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि।
भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती॥ (मनुः ३।११६)

इति मन्वनुशासनक्रमेण बालवृद्धातुरातिथिपित्रादीन् सर्पिःप्रभृतिभिर्भोजयित्वा भोज्यावशेषं स्वयं सस्त्रीको भोजनार्थमाददीत। महाकविभवभूतिना भर्तृनामधेयोच्चारण शङ्किते "महाराज"इत्युक्तवति वृद्धसेवके भगवता रामचन्द्रेण—"आर्य! ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य, तद् यथाभ्यस्तमभिधीयताम्" इति कथयता अयोध्याधिपतेर्भगवतो विनयगुणः तातपरिजनवृद्धसेवकाय गौरवातिशयश्च दर्शितो इति सर्वेषां सुविदितम्। तथापि कविप्रकाण्डेन श्रीहर्षेण "कष्टोऽयं खलु भृत्यभावः" इति यौगन्धरायणेन वाचयता सेवकत्वं गर्हितम्।

कविवरशूद्रकास्तु परस्वापहारक शर्विलकस्य मुखेन—

कामं नीचमिदं वदन्तु पुरुषाः स्वप्ने च यद् वर्द्धते
विश्वस्तेषु च वञ्चनापरिभयश्चौर्य्यं न शौर्य्यं हि तत्।
स्वाधीनावचनीयतापि हि वरं बद्धो न सेवाञ्जलिः
मार्गोह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वदन् चौर्य्यादपि सेवावृत्ति: धिक्कारजननीति उच्चै: समघोषयत्। किमधिकं, भगवान् मनुरपि "सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत्" इत्युक्तवान्। इदं श्लोकार्द्धं व्याचक्षाण: कुल्लूकभट्टस्तु "सेवा तु दीनदृष्टिसन्दर्शनस्वामितर्ज्जनतीचक्रियादियोगात् शुन इव वृत्तिरत: श्ववृत्तिरुक्ता" इत्युक्तवान्। अधुनापि गर्भदासैरपि दासत्वं निन्द्यते। परं यथेच्छं भणन्तु सर्व्वे विना सेवकान् न कदापि लोकयात्रा निरवाह्यत नाद्यापि विना परिचारकै: परिचलति संसार:। वैदिककालमारभ्य अधुनातनकालं यावत् सर्व्वदैव समाजे सेवकबाहुल्यं दृश्यते। ऋग्वेदे इन्द्रोऽपि

"य एकश्चर्षणीनां वसूनामिरज्यति
इन्द्र: पञ्चक्षितीनां" (ऋग्वेद:, १म २अ ७सू ९ऋ)

ब्राह्मणादीनां निषादान्तानां सर्व्वेषामेव मानवानामिन्द्र: प्रभु:, सर्व्वे मानवा: भृत्यवत् तमुपतिष्ठन्ति। सुदासवेणादीनां नृपतीनां काञ्चनवलयधराणां किङ्कराणां सहस्राण्यासन्। भृत्य इति शब्द एव केनचिद् भर्त्तापि भवितव्यमिति बोधयति। यातु प्रसङ्गत: किञ्चित् परमतं विविच्यते। प्राचीनकालसम्भूतपाश्चात्त्यविपश्चित्सु ग्यारिष्टटल (Aristotle) परां ख्यातिं जगाम। तन्मते प्राक् समाजस्थिते: एव राजतन्त्रस्योत्पत्ति:, समाजस्य तन्त्राङ्गत्वात् विना राजतन्त्रं तस्य स्थातुमशक्यत्वाच्च। अस्माकमपि मते "राजानं प्रथमं विन्देत् ततो भार्य्यां ततो धनम्। राजन्यसति लोकेऽस्मिन् कुतो भार्य्या कुतो धनम्।" (महाभारते)। अत्र राजानमिति राजतन्त्रम् भार्य्याशब्द: भार्य्यादिपरिजनोपलक्षक: (family) धनं भूमिसुवर्णदासादि (property)। यथा राजतन्त्रस्य समाज: अङ्गं तथा समाजस्य भार्य्यापुत्रादिपरिवृता: गार्हस्थ्याश्रमा:। गृहस्थाश्रमस्य च द्वे अङ्गे—स्वतन्त्र: प्रभु:, परतन्त्रोदासश्च (The first and least parts of a family are master and slave." Aristotle—Jowett's Translation.)

8 1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भार्य्यापुत्रादयः अपि अङ्गत्वेन विधृताः। परप्रयोजनार्थं जीवन-धारकत्वमेव दासत्वम्। मानवेषु केचन प्रकृत्या एव दासाः केचन प्रकृत्या एव स्वामिनः, अतः दासकर्म्म स्वभावनिर्द्दिष्टम्। यथा देहिनां शरीरं दासः बुद्धिसंकल्पादिमहिताात्मा च प्रभुः तावेकीभूय च मानवः सम्पद्यते तथा लोकेऽपि आजन्मनः परबुद्धिचालिताः शारीरश्रमेण भक्तादीनि क्रीणन्तः केचन वर्त्तन्ते अपरे च केचन आजन्मनः एव परान् स्वबुद्ध्या परिचालयन्ति, ते एकीभूय अङ्गाङ्गिभावेन सम्मिलिताः सन्तः तन्त्रसमाजादीन् जनयन्ति। प्राचीनभारतेऽपि सर्व्ववर्णानां परिचारकः शूद्र आसीत्, क्षत्रादयोऽपि ब्राह्मणादीनामानुलोम्येन।

"भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः
बुद्धिमत्सु नराः श्रेष्ठाः नरेषु ब्राह्मणाः स्मृताः।
ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः
कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः॥" (मनु १।८६।८७)

अतः पुरा यथा ग्रीसादिजनपदेषु तथास्मद्देशेषु विद्वांसः कृतबुद्धयः एव प्रभव आसन् हीनबुद्धयस्तु दासाः एव। य्यारिष्टटलेन विषयेऽस्मिन् बहु प्रपञ्चितं, तत्र सर्व्वत्रास्माकं मतसङ्गतिरपि नास्ति। स्वार्थपरायणाः भारतीयब्राह्मणाः शूद्रादिभिः दासकर्म्म कारयन्ति स्म इति वदतः जनान् "न केवलं भारतीया ब्राह्मणा इत्थं कारयन्ति स्म परं सर्व्वदा सर्व्वत्रैव विधिरेष प्राभवत् अद्यापि एष एव विधिः प्रभवती"दं बोधयितु-मेवायं वाक्प्रपञ्चः। अधुना प्रकृतमनुसरामो वयम्। तत्र दास-पर्य्यायेऽमरः

भृत्ये दासेरदासेयदासगोप्यकचेटकाः।
नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः॥ इत्याह

तत्र भृतिप्रभृतिभिः भरणीयत्वाद् भृत्यः, दास्ट दाने इत्यस्माद्धातोः दासत्यस्मै इति व्युत्पत्त्या दासेरदासेयदासशब्दाः। तत्र दासीपुत्रः दासेयः दासेरश्च, स्वयमागत्य कर्म्म कुर्वन् दासः, गुपु रक्षणे इत्यस्माद्धातोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोप्यकः अन्नादिभि, आश्रयदानादिभिश्च गोप्यत्वात् गोप्यकः। चिट परप्रेष्ये इत्यस्माद्धातोः चेटकः नीचभृत्यवाची। कर्मसु नियोज्यत्वात् नियोज्यः। किं करोमीति वदन् स्वामिनमुपतिष्ठति अतः किङ्करः। एष गतो इत्यस्माद्धातो प्रैष्यशब्दः इतस्ततः गमनेन कार्य्यनिर्वाहके नीचभृत्ये रूढ़ः। भुज पालनाभ्यवहारयोरित्यस्माद्धातोः भुजिष्यशब्दः प्रभुणा भक्तादिपरिव्ययेन स्वगृहपालितभृत्ये रूढ़ः; परिचरतीति परिचारकः चेटकादिभ्यः उच्चाधिकारविशिष्ट भृत्यः। एते सर्व्वे सामान्या भृत्याः अतः उर्द्धं अमात्यादिराजसेवकादिष्वपि भृत्यशब्दः व्यवहार्य्यः सर्व्वेषां कर्म्मसूल्यरूपभृतिवहनयोगात्। शूद्रा एव सर्ववर्णानां दासाः तथाच—

राजा— शूद्रन्तु कारयेद्दास्यं क्रीतमक्रीतमेव वा।
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवा॥
न स्वामिना निसृष्टोऽपि शूद्रो दास्याद् विमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति? मनु ८।४१३।१४

अत्र स्मर्त्तव्यं व्यारिष्टटलस्य वचनम्।
तत्र च सप्तविधाः दासाः भवन्ति। तद् यथा

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ
पैतृको दण्डदासश्च सप्तैते दासयोनयः॥ (मनु ८।४१५)

तत्र टीकायां कुल्लूकः—"(ध्वजाहृतः) संग्रामे स्वामिसकाशाज्जितः, भक्तलोभाभ्युपगतदास्यः (भक्तदास), (गृहजः) तथा स्वदासीपुत्रः (क्रीतः) मूल्येन क्रीतः (दत्त्रिमः) अन्येन दत्तः, (पैतृकः) पित्रादिक्रमागतः, (दण्डदासः) दण्डादिधनशुद्धयेँ स्वीकृतदास्यभावः" इत्याह। ब्राह्मणक्षत्रियादीनामपि दास्यभावोऽस्ति। तद् यथा अमात्यसुमन्त्रपुरोहितादीनां राजसेवकानां सेनापतिप्रभृतीनां राजसेवकानाञ्च ब्राह्मणक्षत्रियादीनां दासत्वं न कथमप्युपपद्यते। "अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्द्ध्वं याजकस्त्वत्रः पञ्चमस्तंशं लभेत।" "प्रसमासे तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म्मणि याज्यं याजकं वा त्यजतः पूर्वमाहसदण्ड." अर्थशास्त्रे महात्मना कौटिल्येन कर्मकरकल्पे पूर्वोक्तवाक्यैः याजकानां भृतिं दण्डञ्च व्यवस्थापयता तेषामपि भृत्यत्वं दर्शितम्। प्रधानतः भृत्यानां चत्वारो विभागाः कल्पयितुं शक्यन्ते। यथा बलापादितदास्यदासः, ध्वजाहृतादिवत्, समयवद्धदासः, अर्थात् योऽहं देवदत्तस्य एतावत् कर्म्म करिष्यामि तेन तु मह्यं एतावत्यः मुद्राः दातव्याः एवं समयं कृत्वा कर्म्मसु प्रवर्त्तते, गृहीतभृतिकदासः अर्थात् योऽहं देवदत्तात् मासिकीं वार्षिकीं वा एतावतीं भृतिं लब्ध्वा यावत् समर्थः तावत्तस्य कर्म तत् करिष्यामि एवं समयं कृत्वा चिरं कर्म्म करोति, आमरणदासश्च क्रीतदासादिवत्। पञ्चमस्त्वेकः दण्डदासः य ऋणादिपरिशोधार्थं दास्यं करोति सञ्जाते ऋणपरिशोधे च दास्याद् विमुक्तो भवति।

तत्र भृतिस्तु त्रिविधा, तथा च शुक्रनीतिसारे

"कार्य्यमाना कालमाना कार्य्यकालमितिस्त्रिधा

भृतिरुक्ता तु तद् विज्ञैः सा देया भाषिता यथा। (शु २।३८२)

स्वामी यदा अन्ते कार्य्यभारः कृतेऽस्मिन् एतावतीं भृतिं दास्यामि एवं समयेन भृत्यनियोगं समाचरति तदा देया भृतिः कार्य्यमाना। प्रतिवत्सरं प्रतिमासं प्रतिदिनं वा तुभ्यमेतद कार्य्यार्थं भृतिमेतावतीं दास्यामीति कृत्वा भृत्यनियोगे स्वामिना देया भृतिः कालमानेत्युच्यते। त्वमेतावता कालेन कार्य्यमेतावत् करिष्यसि, अहमपि तुभ्यं एतावतीं भृतिं दास्यामि एवं विधानेन या भृतिर्दीयते सा कार्य्यकालमाना ज्ञेया। कालमत्र सौरमानानुसारेण भृतिर्दातव्या। तथाच शुक्रनीतिसारे

"भृतिदाने सदा सौरं चान्द्रं कौसीदवृद्धिषु।

कल्पयेत् सावनं नित्यं दिनभृत्येऽवधौ सदा॥ (शु २।३८१)

भृत्योऽपि त्रिविधः, तद् यथा शुक्रनीतिसारे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मन्दो मध्यस्तथा शीघ्रस्त्रिविधो भृत्य उच्यते ।
समा मध्या च श्रेष्ठा च भृतिस्तेषां क्रमात् स्मृता ॥ (शु २।३९१)

समादयः भृतयश्च तत्रैव व्याख्याताः यथा—

अवश्यपोष्यभरणा भृतिर्मध्या प्रकीर्त्तिता ।
परिपोष्या भृतिः श्रेष्ठा समान्नाच्छादनार्थिका ॥
भवेदेकस्य भरणं यया सा हीनसंज्ञिका ॥ (शु २।३९६)

अपि च तत्रैवोक्तं—स्वामी कदापि

न कुर्य्याद् भृतिलोपं वै तथा भृतिविलम्बनम् ॥ (शु २।३९५)

हीनभृतिस्तु सर्वथा न कर्त्तव्या तत्करणे दोषमाह उशनाः—

"ये भृत्या हीनभृतिकाः शत्रवस्ते स्वयं कृताः ।
परस्य साधकास्ते तु छिद्रकोषप्रजाहराः ॥" (शु २।४००)

अर्थात् हीनभृतिका भृत्याः स्वामिकार्य्यं परिहृत्य अन्यान्यकार्य्यकारिणो भवन्ति छिद्रमाश्रित्य प्रभुधनापहारकाः उत्कोचादिग्रहणेन प्रजापीड़काश्च भवन्ति । राज्ञः आयव्ययलेखकः भृत्येभ्यः भृतिदानानन्तरं

कालं भृत्यावधिं देयं दत्तं भृत्यस्य लेखयेत् ।
कति दत्तं हि भृत्येभ्यो वेतनं पारितोषिकम् ॥
तत् प्राप्तिपत्रं गृह्णीयाद्दद्याद् वेतनपत्रकम् ॥ (शु ४।७।२८८)

प्राप्तिपत्रमिदमिदानीं रसिद (Receipt) इति नाम्ना प्रसिद्धम् ॥

अर्थशास्त्रे तु कौटिल्येन भृत्यभरणीयप्रकरणे राजभृत्यानां भृतिनिर्देशः कृतः । तद् यथा "ऋत्विगाचार्य्यपुरोहितसेनापतियुवराजराजमातृराजमहिष्योऽष्टाचत्वारिंशत् सहस्राः । दौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातारश्चतुर्विंशतिसहस्राः" (अर्थशास्त्रम्)। एवं श्रेणीमुख्यहस्त्यश्वरथमुख्यप्रदेष्टृप्रभृतीनामनेकेषामेव भृतिस्तत्र निर्दिष्टा वर्त्तते, विस्तारभिया तत् सर्वमत्र परिहृतम् । अत्र युवराजराजमातृराजमहिषीणाम् अदासत्वं ज्ञेयं । ते । देया अर्थसंख्यात्र निर्दिष्टा ।

8   1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथेदानीं भृत्यानां कार्य्यकालो निरूप्यते. तथाच शुक्रनीतिसारे

"भृत्यानां गृहकृत्यार्थं दिवा यामं समुत्सृजेत् ।
निशि यामत्रयं नित्यं दिनभृत्येऽर्द्धयामकम् ॥ (शु २।४०४)

भगवता उशनसा भृत्यानां विश्रामार्थं अवकाशदिवसा अपि निर्दिष्टाः । तद् यथा शुक्रनीतिसारे

तेभ्यः कार्य्यं कारयीत ह्युत्सवाद्यैर्विना नृपः ।
अत्यावश्यं तूत्सवेऽपि हित्वा श्राद्धदिनं सदा ॥ (शु २।४०५)

अधुनापि यथापुरा तथा धर्म्मोत्सवदिनेषु (Holidays) भृत्येभ्यः-अवकाशोदीयते परं लिपिधरणादिपरमावश्यकविभागेषु विश्राम-दिवसानां संख्याधुनापि नितरां स्वल्पैव दृश्यते। ततः अनुपस्थितेषु भृत्येषु कीदृशी भृतिर्विधेया भगवतोशनसा तदपि चिन्तितम् । यथा

"पादहीनां भृतिं त्वार्त्ते दद्यात् त्रैमासिकीं ततः ।
पञ्चवत्सरभृते तु न्यूनाधिक्यं यथा तथा ।
षाण्मासिकीन्तु दीर्घार्त्ते तदूर्द्ध्वं न च कल्पयेत्
नैव पक्षार्द्धमार्त्तस्य हातव्याल्पापि वै भृतिः ॥
संवत्सरोषितस्यापि ग्राह्यः प्रतिनिधिस्ततः ।
सुमहद् गुणिनं त्वार्त्तं भृत्यर्द्धं कल्पयेत् सदा ॥
सेवां विना नृपः पक्षं दद्यात् भृतकाय वत्सरे ॥"

(शु २।४०६-८)

(असमाप्यते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वतश्चक्षुरित्यृचो व्याख्या

लेखक:—श्रीवाणीकण्ठतर्कवाचस्पति

'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वत:पात्। सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एक:॥' अत्र प्रथमेन सर्व्वज्ञत्वं चक्षुषा द्रष्टृरूपलक्षणात्। द्वितीयेन सर्व्ववक्तृत्वं मुखेन वागुपलक्षणात्। तृतीयेन सर्व्वसहकारित्वं बाहुना सहकारित्वोपलक्षणात्। चतुर्थेन व्यापकत्वं पदा व्याप्तृरूपलक्षणात्। पञ्चमेन धर्म्माधर्म्मलक्षणप्रधानकारणत्वं तौ हि लोकयात्रावहनाद्बाहू। षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वं ते हि गतिशीलत्वात् पतत्रव्यपदेशाः भवन्तीति। सन्धमति सञ्जयन्निति च व्यवहितोपसर्गसम्बन्धः। तेन संयोजयति समुत्पादयन्नित्यर्थः। द्यावा इत्यूर्द्ध्वसप्तलोकोपलक्षणं। भूमीत्यधस्तात्। एक इत्यमादितेति उदयनाचार्य्यव्याख्यानं न्यायकुसुमाञ्जलौ पञ्चमस्तवकीयतृतीयकारिकावृत्तौ। अत्र ईश्वरानुमानमणौ एतत् कामाख्यानाथमहामहोपाध्यायतर्कवागीशमहाशयेन व्याकारि एव—एक: असहाय: इत्यादि। नैतत् समीचीनं ईशस्यादृष्टसहकारित्वोपवर्णनात्। एवं विश्वतश्चक्षुंषि यस्य विश्वतोमुखानि यस्य विश्वतो बाहवो यस्य विश्वतो पादा यस्य एवमेवं। एवं परमेश्वरस्य सर्व्वप्राण्यात्मकत्वात् यत्र यस्य प्राणिनो ये चक्षुरादय: ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्व्वत्र चक्षुरादय सम्पद्यन्ते इत्यर्थः। एतद्व्याख्यानं न नैयायिकानां न वा वेदान्तिनां शोभते अपाणीत्यादि श्रुतिविरोधात्। एवम् अशरीरस्य परमात्मन: उपाध्यवच्छिन्नगगनस्येव पश्यत्यचक्षुरित्यादि श्रुत्यर्थविरोधान्निरुपाधित्वं स्वत एवेति भाव:। महता तर्कवागीशश्रीमता उक्तं कुसुमाञ्जलौ प्रथमस्तबकतृतीयकारिकाव्याख्यानावसरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदृष्टत्वं न जातिः। स्तवकार्थसंग्राहकश्लोकस्य व्याख्याने च जन्यमात्रं प्रति अदृष्टस्य हेतुत्वादिति एकस्मिन् स्तवके विरुद्धव्याख्यानमिदं कथं समीचीनं। एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः क्षित्यादौ कार्य्यत्वेन घटवत्सकर्त्तृकत्वानुमानात्। इतीश्वरानुमानतत्त्वचिन्तामणिः। क्षितिः सकर्त्तृका कार्य्यत्वात् घटवत् इत्यनुमानादित्यर्थः इति तर्कवागीशव्याख्या। नैषा समीचीना यतः अनुपूर्वकमाधातोः पदे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहि परामर्शजन्यविजातीयप्रत्यक्षाद्यतिरिक्तधीः तत्करणस्य व्याप्तिज्ञानस्यानुपूर्वकमाधातोः करणवाच्यविहितप्रत्ययेन अनुमानमिति पदस्य साधुता सम्पद्यते। अथवा भाववाच्यविहितप्रत्ययसाधुता। अन्यथानुमानपदमसदेव भवति इति चेत् तद्व्याख्यानस्य न साधुता जायते। यतः क्षितिः सकर्त्तृका कार्य्यत्वात् घटवत् इत्यस्य न व्याप्तिज्ञानत्वं न वा प्रत्यक्षत्वाद्यतिरिक्तानुमितित्वं। तद्व्याख्यानस्य प्रमाणत्वे भवानेव प्रमाणमिति स्तुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणादिषु इदानीं मन्तव्यो भवति श्रोतव्यो मन्तव्य इति श्रुतेः। तर्कवागीशव्याख्यात्र आत्मा वा अरे इत्यादि श्रुतिघटकात्मपदं ज्ञानवत्त्वेन जीवात्मपरमात्मोभयपरं इति न समीचिनं। ज्ञानवत्त्वेन इत्यत्र ज्ञानं नित्यं जन्यं उभयात्मकं वा ? तत्र नाद्यः जीवात्मन्यभावात्, नद्वितीयं परमात्मनि अभावात्, उभयस्वरूपत्वे उभयत्राभावात्। एवं उदयनाचार्य्यग्रन्थविरोधाच्च तर्कवागीशव्याख्यानं सर्वथा न समीचीनमिति मतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

लेखक—श्री........

नियोजयसि मानसं दिवसकृत्येषु, तदिदं स्थूलदृशामपि विज्ञानविषयं किं पुनः सुनिपुणदर्शिनाम्? किञ्च, अपि स्मरसि यन्मूर्च्छितासि पञ्चमे दिवसे राकानिशाकरं वीक्षमाणा पौर्णमासीरजन्याम्?

दम—सखि, सत्यम् ईदृश्येव संवृत्तास्मि। एतावता कालेन तवापि यत् लज्जया नावेदयम्, तत्सर्वं मदन एव मे विपरिणमय्य विज्ञापयति। अयि कल्पलते, कस्य वा अन्यस्य कथयेयं, त्वमेव मे चिरात् प्रभृति अधिकारिणी निभृतवृत्तान्तेषु, तत तवैव कथयामि।

कल्प—सखि, कथय कथय, यथाहं समदुःखभागिनी दुःखन्ते लघूकुर्य्याम्।

दम—सखि, श्रूयताम्, जानास्येव मे हैमहंसानुसरणं यावत्?

कल्प—अथ किम्। तदनन्तरन्तु न जानामि, येन ते मनोविकारः प्रथममवतीर्णः।

दम—तदेव कथयामि, तदानीं माधवीलतापद्धतिमवतीर्णायां मयि तावदेव गत्वा मत्तो नातिदूरे मदभिमुखः स्थिरं तिष्ठन् हैमहंसः स्वजातिसमुचितां वाचमाश्रित्य विज्ञापितवान्—भवति दमयन्ति, विरम्यतामत्रैव मम ग्रहणाध्यवसायात्, अहमन्यतमः पितामहवाहनेषु हैमहंसेषु, तदस्मदभिलाषमन्तरेण को वा समर्थो ग्रहीतुमस्मान्, तदाकर्णय यदावेदनार्थं निभृतमानीतासि। अस्ति सकलनायकगुणालङ्कृतो नलो नाम भूपालो निषधानाम्, पितामहनिदेशात् तदीयगुणमोहाच्च स त्वया नायिकारत्नभूतया वरणीयतां धत्ते, इति, अन्याश्च कथितास्तेन तदर्थपर्य्यवसायिन्यो वाचः, तत एवाहमभिभूतास्मि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्प—सखि, दमयन्ति, नेदं तव विकारकारणं भवितुमर्हति, तदन्यदप्यस्ति ।

दम—सखि, कल्पलते, नास्ति तव किमपि रहस्यं ; तदाकर्णय, अस्ति अन्यदपि किञ्चित् ।

कल्प—कथय किन्तत् ?

दम—तदिदं श्रूयताम्, येन मे मनो नितरामवसन्नम् ; उक्तं देवहंसेन यथा, राजपुत्रि, भवतीमधिकृत्य मदनेन सुतरां निषधराजो विकारं नीतः, किं बहुना स हि मदनमोहग्रस्तो राज्यचिन्ताममात्येषु विन्यस्य चित्तनिर्वृतये सवयस्यो विलासोद्याने सरोवरसोपानमवतीर्णः सुतरामेव ताम्यति, तत्रापि नासादयति लेशमात्रामपि शान्तिम्, सर्वमेव शान्तिकरमस्य साम्प्रतमशान्तये परिकल्पते इति ।

कल्प—सखि, तत् किमद्याप्येवं विधुरासि ? जतुरसपिण्डयोरिव युवयोस्ताप एव संघटनकारी भविष्यति, तदलं कातर्य्येण ।

दम—सखि, हंसो नामासौ तिर्य्यगन्ववायजात इति कस्तत्र दृढ़ः प्रत्ययः ?

कल्प—सखि, नैवं संशयितुमर्हसि, यथायं तिर्य्यग्वंशसम्भूतोऽपि असाधारणं सुवर्णमयं देहमादत्ते, तथैवास्य सम्भविता तिर्य्यग्जातिविलक्षणा प्रत्यययोग्यतापि भाषितेषु । अपि दृष्टपूर्वस्त्वया कदापि तथाभूतः सुवर्णमयविग्रहो मरालः कुत्रापि ?

दम—सखि, जानामि सर्वं, किन्तु स्वार्थेषु सर्वत्र अनिष्टमेव समाशङ्कन्ते जनहृदयानि । यावदिदं हंसकथितं स्वचक्षुषा न पश्येयं तावदत्र न सम्पद्यते दृढ़प्रत्ययो मे । तदत्र कीदृशः सुगमोऽभ्युपायः स्यात् ।

कल्प—सखि, अलमावयोरत्र तदभ्युपायचिन्तया, स एव परिचिन्तयेदभ्युपायं येन त्वदीये हृदये निषधनाथमधिकृत्य सम्यक्तया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागः प्रकटितः, येन च अदृष्टाश्रुतपूर्व्वो हैमहंसो नामासौ प्रियवृत्तान्त-निवेदनाय भवदन्तिके प्रेषितः।

दम—सखि, अहन्तु नैव अवगच्छामि, परं सर्व्वमिदं मत्-प्रतिकूलस्य विधेर्ममैव दुःखमर्पयितुं निष्ठुरविलसितम्। नास्ति खल्वस्य निर्दयस्य दैवस्य भाग्यहीनायां मयि लेशोऽपि करुणायाः, तथाहि पश्य, सौरभसारसम्पर्कसुभगा अपि मलयमानुसमीरणा मलयज-भुजङ्गविषव्याकुला इव सुदुःसहाः समुपप्रेक्ष्यन्ते, स्मारं स्मारं मराल-वृत्तान्तस्य लोकान्तरमिव प्रस्थितास्मि। किं बहुना, चिराय मे शान्तिनिष्पादनव्रता माधवीलताश्रेणिरपि मरकतवापिकापि इन्द्र-नीलमणिवेदिकापि निरभिमाना इव समुपलक्ष्यन्ते; सखि, कृतमिदानीं दुःखदानव्रतं विधातारवलम्ब्य, यथोचितमात्मनैव प्रयत्नमवलम्बस्व, अन्यथा नूनमचिरादेव मां स्मरणीयां दशां नेष्यति कामहतकः। [सलज्जा अधोमुखी तिष्ठति)।

कल्प—सखि, किमेवं चञ्चलासि? कथं वा त्वयि विधाता निरनुकम्पः स्यात्? नित्यमेव ते पितरौ तवैव शुभकामनया देवतासु परां भक्तिमादधानौ वर्त्तेते, त्वमपि कुमारी भगवत्याः कुमार्य्या आशु-तोषयोग्यस्य च भगवत आशुतोषस्य सभक्तिकमर्च्चनं विदधासि, किमेतावतापि त्वयि नियतिरकरुणा भवितुमर्हति? तत् धैर्य्यमव-लम्बस्व, यथाकालमवश्यं लप्स्यसि मनोरथफलम् देवताप्रसादात्।

(ततः प्रविशति चेटी)

चेटी—भर्त्तृदारिके, देवो विज्ञापयति।

दम—(ससम्भ्रमं) किमाज्ञापयत्यम्बा?

चेटी—एतद् विज्ञापयति ..आगामिदिवसे स्वयंवरसभायां मिलि तायां नानादिग्देशागतेषु सकलगुणालङ्कृतेषु राजन्येषु, परमैश्वर्य-महत्तमेषु देवगणेषु मणिप्रभादीप्तोत्तमाङ्गेषु भुजङ्गेषु, सङ्गीतरङ्ग-सुनिपुणेषु प्रमत्तगर्व्वेषु गन्धर्वेषु, विलासपरायणेषु निखिलेषु दैत्यनिचयेषु,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविधेषु चापरेषु अभिमतेषु, यः कश्चिदेकः स्वमनोरथानुरूपस्त्वया वरणस्रजा सम्मानयितव्यः, तदद्य कुलपरम्परागतेन विधानेन विधातव्या त्वया आयुष्मत्या कुलदेवताया अम्बिकायाः समर्चना, तत् सत्वरमेव मया अपराणि पूजोपकरणानि प्रेष्यन्ते, त्वया च सखीभिः साकं संयतचित्तया स्वयमेव पूजाकुसुमानि समाहृत्य कृतनियमाभिषवया यथाकालं देवीभवनं प्रति प्रस्थातव्यम् इति।

दम—मेनके, विज्ञापय अम्बाम्, एषाहमचिरमेव तदादेशमनुतिष्ठामीति।

चेटी—यथाज्ञापयति भर्त्तृदारिका।

कल्प—मेनके, अस्मद्वचनेन विज्ञाप्यतामम्बा यथा अनेन ते प्रबन्धेन अनुगृहीता वयं भर्त्तृदारिकाया मङ्गलवृत्तान्तसमुत्कण्ठिता वर्त्तामहे, कुसुमेषुव्यापारस्तु सख्या प्रथमत एव परिगृहीतो वर्त्तते, अद्य पुनरम्बादेशात् स एव विशेषेण समवलम्बनीय इति।

चेटी—यदादिशति भवती।

दम—अहो धिक् कल्पलते, किमेवं प्रगल्भवचना अम्बाया अपि कर्णान्तरमुपक्षिपसि ? न रोचते मे सर्व्वथैव तवेयं प्रगल्भवचनपरिपाटी।

कल्प—मुग्धे, अद्यापि अम्बामविदितवृत्तामवधारयसि, अहो मुग्धता ! एकमिदं, नेदं तथा स्यात्।

दम—कथमिव ?

कल्प—यदा प्रियभावमुग्धा मूर्च्छितासि, तदा अन्तःपुरात् अतराह्नितं श्रुत्वा तव पितरौ सममेव समागतौ बहुधा तव दशापरिवृत्तिमीक्षमाणौ सर्व्वमेव भावं विदितवन्तौ इति इत्थमिवेदं स्यात्।

दम—हा धिक् प्रमादः ! हा धिक् प्रमादः ! कथं न केवलम् अम्बया तातेनापि विदितवृत्तान्तास्मि ! सखि, कल्पलते, सुतरामपराद्धासि दुरन्तमूर्च्छया, यस्या एव प्रसूतिरियं मदीयमानसविकारवेदिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुजनानाम्। तत् साम्प्रतं लज्जातिशयदुर्भरमन्तरं मे वसुन्धराया विवरमिव गन्तुमीहते, हा धिक्! मोहात् मया समाचरितं कुमारीजनविरुद्धं किमपि लोकातिगम्। अद्य प्रभृति सर्व्वा एव कुमार्य्यो लज्जा मेव गमिष्यन्ति मदीयेनानेन वृत्तान्तेन। तत् किम् इदानीं करणीयं मन्दभाग्यायाः?

कल्प—अम्बाया आदेशानुगुणं पूजाकुसुमानि संगृह्य यथानियमं अम्बिकामर्च्चयित्वा आगामिदिवसे वरणमाल्येन प्रियकण्ठस्थलमलंक्रियतां, किंवा अन्यत् करणीयमस्ति?

दम—सखि, यदि स्वयम्वरसभायां स नागच्छेत्?

कल्प—स कः?

दम—अयि चतुरे, जागरितापि सुषुप्तिं नाटयसि?

कल्प—व्रीडामति, त्वमपि अनूढापि जढ़ेव वाचं ब्रवीषि?

दम—धिक् प्रहसनम, एतावदवस्थां गतामपि माम् इतरामिव उपहससि?

कल्प—सखि, संशयाविषयेऽपि संशयमारूढ़ासि अत एवं ब्रवीमि, न खलु सततमेव परिहासमभिलषता तदलं चिन्तया, यथा तत्रभवती तथा सोऽपि भवत्यां परं प्रणयमवलम्बते, को वा हेतुरनृतभाषणे हंसस्य? तद् यावदेष श्रुतवानसौ तव स्वयंवरणवृत्तान्तं तावदेव कुण्डिनाय प्रातिष्ठतेति अवितथमिदं वचनं, तत् प्रकृतिमापद्यस्व।

दम—सखि, यद्येवं भवेत् तदैव ते सख्या जीवनाशा, अन्यथा स्मरणीया ते सखी भविष्यति।

कल्प—शान्तं पापं, प्रतिहतममङ्गलम्। सुचिरम् आराधिता दाक्षायणी नूनमेव सम्पादयिष्यति मनोरथं सख्याः, तदलं विलम्बेन, भगवत्या अम्बिकाया नियमार्च्चनाय कुसुमान्युपचिनुवः, तेन भगवती प्रीता अम्बायाश्च आदेशः परिपालितो भवेत्।

दम—एवं कुर्व्वः। (उभे कुसुमचयनं नाटयतः)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशति शङ्किताकारो राजा नलः)

नलः– अहो प्रतारणा नाम महदाशङ्कास्थानम्। तथा हि—

द्वारि दौवारिकान् दृष्ट्वा शङ्कितो दर्शनादहम्।
दैवानान्तु वरं स्मृत्वा मुक्तशङ्कः कथञ्चन॥

तथापि तस्कर इव तमिस्रायां नीलनिचोलप्रच्छादितशरीरः सुरवरप्रभावप्रच्छन्नरूपो विहरामीति लज्जा मां सुतरां बाधत एव। अथवा तस्कराणां स्वार्थमभिसन्धाय, मम तु परार्थमभिसन्धाय प्रवृत्तिरित्येव आवयोर्विशेषः। तदलमत्र लज्जया, कुतः?

पान्थश्रान्तिमपोहितुं प्रसहते सूर्यं वटो वासरं,
मेघो जागतशान्तये जलनिधेः क्षारं जलं सेवते।
दीपो वस्तुविकाशनाय च निजं तैलं दशां शोषति,
स्वं भावं नियतव्यवस्थमजहन्न स्यात् परार्थक्षमः॥

अहो स्मरामि दारुणं विलसितं दैवस्य, कुतः?

क्व स्वयंवरसभामुपेयुषो भीमजावरणमाल्यभागिता।
क्व प्रियाप्रणयिदेवताकृते दूतता, हतविधेर्विडम्बना॥

अथवा किमिदं विषीदामि, कुलक्रमागतमेवैतदस्माद्दशाम्, यत् परार्थे स्वार्थपरिहारो नाम, तथाहि—

चन्द्रो निर्जरहृद्यये निजकला दत्ते परार्थव्रतो,
शीतांशुप्रकरेण शस्यनिवहानुज्जीवयत्यात्मनः।
तातो मे तदनुक्रमेण धरणौ जातः परार्थोन्मुखः,
तद्वंशाङ्कुरतामुपेत्य किमहं न स्यां समर्थस्तथा॥

तदलमावेगेन, निरुध्य समुपात्तमप्यामोहमन्तःकरणतत्त्वम् देवताकृत्यसाधनार्थी स्वाङ्गीकृतमेव प्रतिपालयेयम्। (परिक्रमति)। अहो! इयमेव सा विलासवनवाटिका, यत्र सम्प्रति दमयन्ती सखिभिः सह क्रीडन्ती कौमारसुखमुपास्ते इति श्रुतं परितः परिक्रामताम् आलापात् सखीजनानाम्। तदत्रैव मया प्राप्तव्यं नेत्रनिर्वाणम्। अहो! अत्र प्रिया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिभोगसुभगे विलासकाननविभागे किमिव तथा वर्त्तते यदसाधारणं सौभाग्यं नोपभुङ्क्ते ? तथाहि—

मन्दं वाति समीरणः प्रियतमास्पर्शेन पूतो भवन्,
गुञ्जन्तो मधुपा मधूनि ददते भीमाङ्गजाश्रोत्रयोः।
वल्ली कोमलविग्रहा कुसुमिता सत्पल्लवाः पादपाः,
पुष्पाणि प्रियया दृशा प्रतिदिनं दृष्टानि सौख्याय यत्॥

किन्तु केवलमहमेव न तैः सर्व्वैः परितुष्यामि। मम हि सम्प्रति—

सुप्तस्येव नवीनवस्तुरचना स्वप्ने न सम्पादिता,
लुप्ता क्वापि मनोरतिः प्रियतमामालम्ब्य या प्राक्तनी।
आलोकात् परमन्धकार इव मे चित्तं समाक्रामति,
पुण्यानां विलयो भवत्यतितरां दौव्यन्ति पापक्रमा॥

तत् किमहो प्रलयघनघटातमःसङ्घातेन समुद्विजते मे हृदयम् ? नालमस्मि प्रयत्नशतेनापि तदवस्थापयितुम्। किं करोमि, कमधुना शरणं गच्छामि ? अपि मत्त एव विलुप्येत सुधाकरकुलस्य विमलः कीर्त्तिसम्प्रदायः ? भगवन् मन्मथ, निवार्य्यतां मामधिकृत्य तथा वैरनिष्पादनप्रयत्नः। किमित्यन्यथासमाचरणेन स्वनाम्नो विफलतामाशङ्कसे ? तदलं त्वया। भगवन् मन्मथमथन, शङ्कर, अपि प्रत्यहं मत्सम्पादितामाराधनामपि विस्मरसि ? अथवा किमत्र विस्मयकारणं, मत्ता एव मतिविभ्रमवन्तो भवन्तीति सुविदितमेव सर्व्वेषाम्, तदलं त्वयापि। भगवन् पुरन्दर, हुताशन, पितृपते, देव वरुण, अपि भवन्तोऽस्वप्ना अपि सुषुप्ताः स्थ, यदेवमात्मकृत्यनिष्पादनपरस्यापि मे स्वकार्य्यविरोधिनीमधीरतामुपेक्षमाणा उदासीनास्तिष्ठथ ? (संवरणं नाटयित्वा) अये एवमवस्थां गतोऽस्मि ? प्रकृतमपहाय कृतं पदं हन्त प्रकृतविरोधिनि मार्गे, धिक् प्रमादः! नूनं सर्व्वदर्शिनो देवा मामीदृशं पश्यन्तः परिहासस्मितं कुर्व्वन्ति। हृदय, अपि विस्मृतं त्वया गौरवं सुधांशुवंशस्य ? महाजनानां नीतिमनुसृत्य प्रकृते वर्त्मनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदं कुरुष्व, अलमद्यापि विकल्पेन, अलमद्यापि विषादोपष्टम्भेन, तदिदानीं क्व नु खलु मया दूतवृत्तिमास्थितेन विदर्भनन्दिनी प्राप्तव्या ? (पश्यन् परिक्रामति) ।

कल्प—सखि, विस्मृतकुसुमचयना मलयानिलचालितां वल्लीं वीक्षसे ? अहो मुग्धता !

नलः—(श्रुत्वा) अये, इतो नातिदूरे कामिनीकण्ठ इव प्रतिभाति। तत् पश्यामि (पश्यति) ।

दम—(संभ्रमं नाटयन्ती) नहि, नहि, एते दुष्टमधुकराः कुसुमान्यनुवर्त्तमाना मम भीतिमुत्पादयन्ति, अत एवं स्थितास्मि । तत सखि कल्पलते, निवार्य्यन्तामिमे दुरन्तव्यापाराः, यथा मे वदनममी नातिवर्त्तेरन् ।

कल्प...अयि, सुचतुरे, त्वमिव नाहमन्धास्मि, तत्किमिति जाग्रतीमपि मां सुप्तामिव मन्यसे ? कुतो नु खलु मधुकराः ?

दम—(लज्जां नाटयति)

कल्प—भवतु, एहि यावदपराणि कुसुमान्युपचिनुवः ।

दम—एवं कुर्व्वः (उभे कुसुमानि चिनुतः) ।

नलः—(दृष्ट्वा) अये ! इदं समुद्भिन्नयौवनं कुमारीयुगलं पुष्पोद्याने पुष्पाणि समाहरति । अहो विधेः सौन्दर्य्यसारनिष्पादनाभिनिवेशः ! प्रायेण तुल्यैवानयोराकृतिः समाना च वयोऽवस्था । मन्ये तावदत्रैव समाधिः प्रजापतेः सकलसौन्दर्य्यनिष्पादनोपकरणानाम् । तत् किमिमे विदर्भनन्दिनी तत् सखी च अथवा कोऽत्र सन्देहावकाशः ? कुतः ?

भीमात्मजा सहचरीसहिता वनेऽस्मिन्,
आस्ते तदा परिजनोक्तिवशादबोधि ।
द्वे चावले कुसुमसञ्चयकृत्यमग्ने,
तन्निश्चितं सहचरीसहितास्ति भैमी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाग्यविपर्य्यासः ।

(पूर्व्वानुवृत्तः)

(लेखकः—श्रीआशुतोषकाव्यव्याकरणतीर्थः)

विहितगृहसम्मार्ज्जना प्रदीपितगृहालोका वेणी यत्र चरणौ प्रसार्य्य सोपानोपरि उपविष्टा गगने उद्यतीस्तारका अवलोकयते स्म, तत्रैव उपविश्य नलिनी वेणीक्रोड़े मस्तकमभिरच्य कमपि मुखबन्धं विनैव पृष्टवती—विनयः कुत्र गमिष्यति, कथं गमिष्यति, कियत् वा दूरं स ग्रामः, पथि भ्रमणादिकं सुकरं न वेति । विदितसकलवृत्तान्ता च सा 'कालीचरणः कथं न विनयमनुयाति इति'प्रश्नस्य उत्तरं नाप्नवती । तदा गृहे किमपि कार्य्यं नासीदितुक्तेऽपि नलिन्याः भ्रमो नाजायत सा पुनर्मातृसमीपे कालीचरणस्य गमनं कर्त्तव्यम् इत्युपदेशमपि वाहितवती; केवलं नलिन्या मतन्तदासीदितिप्रकाशनात् वेणी निषिद्धा ।

पथि चलन् विनयो नातिदूरवर्त्ति गृहमतिक्रम्य यावन्नदीतटमागतः तावत् मध्याह्नरविर्मध्यगगनमारुरोह । नलिन्या मात्रा प्रदत्तानि त्रिचतुराणि फलानि कालीचरणस्य हस्ते दत्त्वा कृतस्नानो विनय आगम्य तेनैव सह तानि बुभुजे । अपराह्णं विना गमनं न युक्तियुक्तमिति विविच्य तौ पथिकौ प्रान्तरतरुतले सुप्तौ, यावदुत्थितौ तावत् भगवान् भानुः पश्चिम गगने लम्बते स्म । तौ च सत्वरौ चलितौ सायं विपणिमेकां प्रापतुः । इतोऽपि क्रोशमात्रान्तरितः स देशः यत्र तयोर्गन्तव्यमासीत् ।

पञ्चमीचन्द्रस्य अस्पष्टालोकेन ग्राम्यवर्त्मना चलन्तौ तौ पथिपार्श्वोपविष्टं कमपि युवानमाक्रम्य उत्थापयितुमसमर्थं कमपि भृत्यं ददृशतुः । पार्श्वस्थितावेव तेन यूना तिरस्कृतौ तौ तं मत्तमवगम्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य साहाय्यकं विधाय भूमेस्तमुत्थापयामासतुः। भृत्यौ यावत् तमादा चलति स्म, तावत् क्षुत्पिपासापीड़ितौ तौ पुरः सस्रतुः। कृतविश्रामौ विहिताहारौ तौ गृहस्वामिना वृद्धप्रायेण पुत्रस्य विवाहः अधुना कारयितव्यो न वेति पृष्ट्वा तस्य सम्मतिं प्रापतुः, परं पुत्रस्याप्यभिमतिः प्रष्टव्या इत्यपि वृद्धेन उपदिष्टम्। अस्मिन्नेव काले प्रतिवासिनी काश्चित् निन्दन् भृत्येनानुगम्यमानो युवा स एव गृहं प्रविष्टः। तस्य च माता तं निवारयामास, परं स कस्मादपि न बिभेति, पिता चेत् विरुद्धमाचरति तदा तमपि स हनिष्यति, माता नारीजातीया इति तस्याः तादृशी बुद्धिः कथमपि न तिष्ठेत् येन तां सः अनुवर्त्तिष्यते इत्यादि बहु प्रलपन् गृहं गतः।

वृद्धस्य मुखात् पुत्रस्य क्रोधं निशम्य विनयो विस्मित एव बभूव। परं वृद्धेन कथितं यत् धनिनः क्रोधे न स्थिते कोऽपि न तस्मात् बिभेति, अतः कोपः करणीयः। गृहकर्त्री तु यत्र श्वशुराभावस्तत्र आदरासम्भवात् पुत्रस्य विवाहं नान्वमोदत।

(क्रमशः)

स्वर्गतः

सार् आशुतोषमुखोपाध्यायः।

अनुकूलसमीरणसुभगं माध्याह्निकतपनभास्वरं निर्म्मलं नभोमण्डलं सममेव भारतभूमेरन्तस्तलं शतधा विदारयन्नतर्कितं समुत्थितोऽद्य कालपुरुषस्य करालः कुलिशनिर्घोषः। जैत्रष्ठीयदशमदिवसपर्य्यन्तं नोदितः शङ्कालवोऽपि कस्यचिन्मानसपटे यदस्मच्छरणभूतमुत्तुङ्गं पर्व्वतशृङ्गं परैद्युरेव कालविलसितादकाण्डविपाटितं प्रविलीयेत। न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽप्यजानात्तदानीं यद् वङ्गमण्डलमार्त्तण्डो भारतीयविद्वज्जनमालिकामध्यमणिर्विविधविज्ञानकलावलम्बः संस्कृतसाहित्यपरिषत्प्रतिपालकः सार् आशुतोष मुखोपाध्यायोऽनवाप्तानेककृत्यसम्पूर्त्तिरेव सहसा वङ्गधरित्रीमनाथीकृत्य यशोनामशेषतां प्राप्नुयादिति । वियोगेनैतस्य सामान्यतो जनानां विशेषतश्च भारतीसेवकानां कीदृशी क्षतिः कियती वा सहायशून्यता समुपलब्धा स्यान्न वयं तन्निर्णेतुं पारयामः ।

महापुरुषेऽस्मिन्नप्रमेयविद्याविभवमनन्यसाधारणं व्यवहारनैपुण्यमनुपमं स्वदेशवात्सल्यमप्रतिहतं पौरुषञ्चातीत्य अपरमपि किञ्चिदतिमानुषमन्वभूयत येनासौ सर्व्वजनप्रभुतामधिचक्रे । लोकोत्तरमहिम्नि तस्मिन्नेव सम्भावितोऽभूत्तादृशगुणराशीनामीदृशः सन्निपातः ।

ज्ञानोत्कर्षविधानयज्ञमास्थाय समनुतिष्ठन् विश्वविद्यामन्दिरपुरोहितोऽसौ तन्मन्दिरे विद्यान्तरैः समं भूयसैव संस्कृतविद्यायाः समुन्नतिं निरवर्त्तयत् । वङ्गेषु संस्कृतशिक्षां निर्वाहयन्त्याः राजकीयसंस्कृतसमितेरप्ययमेवासीन्नियन्ता । संस्कृतसाहित्यसम्प्रचारैकव्रतायाः परिषदोऽप्यस्याः स एवासीदेककः संरक्षकः । अद्यापि स्मर्य्यन्ते परिषदः प्रथमसंवत्सरोत्सवसभायां गृहीतसभापतिपदस्य तस्य संस्कृतविद्यायाः समुन्नतये सम्मुत्साहवाक्यानि । तन्महानुभावस्य तस्य महाप्रयाणात् सर्व्वथा निःशरणीदानीं सञ्जाता निरवद्या पुरातनी संस्कृतविद्येति किं वा नः समाश्वासनम् ।

दीपशिखया सहस्रकिरणप्रभाप्रदर्शनमिव अल्पावकाशशङ्कया महात्मनस्तस्य गुणगणवर्णनायासो वृथैव भविष्यति, विशेषतः एवंविधे शोककाले वैकल्यनिःसहचेतसो वयं न शक्ताः पदमेकमप्यधिकं गन्तुं, केवलं तदीयजन्मदिवसमहोत्सवे संस्कृतसाहित्यपरिषदा समुपहारीकृतं तस्यैव प्रशस्तिपद्यजातं पाठकानामुपस्थापयामः ।

सरस्वत्या लीलासदनमधिवासः सुमनसां,
गुणैर्गम्यः सौम्यः प्रहरणपरो दुष्टजनुषाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स एकस्तेजस्वी जयति मृदुचित्तोऽपि सुचिरं,
कुमुद्वत्या ह्रासं रचयति विधुर्हन्ति तिमिरम् ॥ १ ॥
यदा यस्मिन् पीठे विहरति भवानीपुरपति-
स्तदा तस्मिन्नेव प्रभवति सुदीप्तप्रतिभया।
मये वा शैले वा महसि विपुले वा विलसतां,
सतां लोकातीता दधति महिमानः परपदम् ॥ २ ॥
पयोराशौ रत्नं शिशिरकिरणो विन्दति सुधां,
तथा वापी पद्मं रजनिरपि चन्द्रं द्युतिमहः।
त्वमेवं लोकानामनुगुणगुणानेव लभसे,
विभूनामैश्वर्यं परशुभविधावस्ति नियतम् ॥ ३ ॥
त्वमेकोऽपि प्राप्तो भवसि बहुदेशेषु महसा,
तदाध्यक्ष्यं लोके जयति विधिसाफल्यशरणम्।
त्वदीयं सम्मानं चरति वसुधेयं प्रतिपलं,
प्रसूनं शीर्षे यत् स खलु परमस्तस्य गरिमा ॥ ४ ॥
जगत्यस्मिन् धर्मो जयति ननु संसारशरणं,
ततो ज्ञानं धर्माचरणकरणं यद् विजयते।
ततः शास्त्रोत्कर्षस्त्वमसि शरणं तत्र नितरां,
परद्वारा क्षत्यं रचयति विधाता हि भुवने ॥ ५ ॥
यदा विद्योत्कर्षो विलयमगमत् कालवशत-
स्तदा लोकातीतस्त्वमिह भुवने सिद्धचरितः।
प्रयत्नाद् विद्यानां कलयसि परामुन्नतिधुराम्,
अनावृष्टिक्षीणां धरणिमनुरक्षन्ति जलदाः ॥ ६ ॥
महेन्द्रो देवानां, बलिरपि दितेरात्मजनुषां,
भुजङ्गानां भव्ये विलसति तथा वासुकिरपि।
त्वमेको ह्यस्माकं निखिलशुभसिद्धाववहितो,
मनस्कामं को वा प्रवितरतु कल्पद्रुममृते ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषव्याघ्रप्रयाणम् ।

(लेखकः— वाराणसेय श्रीहरिहरशास्त्री)

लोकातीतमहःप्रभावनिवहैरापूर्य्य सर्व्वा दिशः
स्वच्छन्दं तनुषे स्म वङ्गगहने शार्दूलविक्रीड़ितम् ।
स त्वं कालनिषादपातितशराघातेन दुर्द्दैवतो
यातोऽस्यद्य चिराय हन्त ! पुरुषव्याघ्रो यशःशेषताम् ॥

दृश्यन्ते बहवोऽपि संहतिविधौ रुद्रावताराः परं
लोकानां भवतैव शर्म्म विहितं निर्म्माणकर्म्मोत्करैः ।
अत्रत्यं स्वकरे निधाय विपुलं त्वं विश्वविद्यालयं
यं व्यापारविशेषमाचरितवान् नास्त्येव तस्योपमा ॥

विद्यावीर ! विचेष्टितेन भवतो वङ्गेषु शिक्षाविधे
र्भूयानभ्युदयोऽभवन्न खलु यच्चिन्तापि देशान्तरे ।
भूयो वङ्गगिरःसमुन्नतिविधौ सृष्ट्वा परीक्षाक्रमं
नूनं दर्शयसे स्म विश्वसविधे त्वं मातृभाषादरन् ॥

विद्यासद्मनि वा विचारनिलये यन्न्याय्यमालोचितं
सर्व्वेषां नयखण्डनेन भवता तच्च व्यवस्थापितम् ॥
त्वत्सिद्धान्तनिरासकर्म्मणि च नो सम्भूय सर्व्वैः प्रभुं
नास्ते तावदिहाद्य तावकतुलालेशं दधानो नरः ॥

आसीस्त्वं सुलमश्चिराय नितरां सामान्यशिक्षार्थिनां
विद्यावित्तपदप्रभुत्वनिचयैरतुन्नतोऽपि स्वयम् ।
दम्भश्चेद्बहुतामपि प्रभवतां त्वं नाधिगम्यः पुनः
सर्व्वं त्वैषमभूत् त्वदीयचरितं प्रायेण लोकोत्तरम् ॥

---

* वङ्गीय-साहित्य-परिषदो विशेषाधिवेशने पठितम् ।

10 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्य्येणाश्रितवत्सलेन भवता देवोऽप्यधःकारितः
सत्कारैर्गुणिनो अनाश्च नियतं सम्पोषितास्तोषिताः ।
संवृत्तस्तु तवाशुतोष कृपया मूकोऽपि वाचस्पति
र्नूनं दीनजनोऽपि भाजनमभूत् सौभाग्यलक्ष्म्याश्चिरम् ॥
विभ्राणोऽपि पदप्रकर्षमतुलं सन्नोऽपि नानाविध-
व्यापारे बहुदेशपर्य्यटनतः पाश्चात्यदेशोचितम् ।
आहारे च परिच्छदे किमपि नो वैकल्यमापः क्वचित्
त्वस्रासीश्चिरमेवमेव जननस्थानं प्रति प्रीतिमान् ॥
अद्य त्वद्विरहेण रोदितितरां त्वज्जन्मभूमिः पुनः
शोकानादधते मनःसु विषमांश्छात्रास्त्वनाथा इव ।
विद्यागारमिमं तव प्रियतमं कर्म्मै समर्प्याधुना
हा ! हा ! मृत्युपटान्तरालमगमो देवाशुतोष द्रुतम् ॥

सन्देशाः

शोकसभा—सौरजैरठस्य द्वादशदिवसे सोमवासरे शिक्षाविभागाध्यक्षः श्रीयुक्त इ, एफ, ओटेन एम, ए, एल, एल, वि,-महोदयः परिषद्भवनदर्शनाय समागमिष्यतीति प्राक् तेनैव विज्ञापितमासीत् । परं नो दौर्भाग्यात् तस्मिन्नेव दिने परिषदः संरक्षकमहाभागाः सार् आशुतोष मुखोपाध्यायाः पाटलिपुत्रनगर्य्यामकस्मात् परलोकाय प्रस्थिता इति मर्म्मभेदिनी वार्त्ता विना मेघात् वज्रापतनमिव सहसा समुपस्थिता। यथाकालमागताः शिक्षाविभागाध्यक्षमहोदयाः, पूर्व्वमामन्त्रिताः परिषदि सम्मिलिता वहवः पण्डितसज्जनाश्च गुरुशोकविभ्रान्तमानसा विरमय्य सर्व्वमन्यत् कार्य्यं पूर्व्वकल्पितमानन्दानुष्ठानं तदानीं शोकसभायां पर्य्यनमयन् । श्रीमान् ओटेन महोदय एव तत्र सभानायकपदमध्याश्रितः । परिषदोऽद्वितीयसहायकानां स्वर्गतानां मुखोपाध्याय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाशयानां गुणकीर्त्तनपुरःसरस्तत्कृते शोकसूचकः प्रस्तावः सर्व्वैर्नीरवं दण्डायमानैः सभायां परिगृहीतः। स च तदीयशोकसंक्षुब्ध-सन्ततीनां प्रेषयितव्य इति स्थिरीकृतश्चेति।

शोकवृत्तान्तरम्—नेदानीं वङ्गाः केवलं सार् आशुतोष सुखोपाध्यायीनां महाप्रयाणात् शोकसागरे प्लवन्ते; सातिशयदुःखाकुलास्ते त्रिचतुरदिनानि पूर्व्वत एव आसन् वङ्गजननीसुसन्तानस्य सार् आशुतोष चतुर्धुरीणानां परलोकाय प्रस्थानेन। महाविद्वानयं राष्ट्रतान्त्रिकैरनुकृष्टो बहुधनादायिनीं चिराभ्यस्तां व्यवहाराजीववृत्तिमुत्सृज्य सर्व्वोच्चधर्माधिकरणे प्राड्विवाकपदमधितिष्ठन्, जातीयशिक्षापरिषदो भारतीय गौरक्षणसमितेश्च सभापत्यं सम्पादयन्, भारतीय-राष्ट्रसमितौ च सोत्साहं योगं ददत् जनेषु न्यायविचारपरतां, विद्योत्साहं, कृपापारवश्यं, स्वतन्त्रां देशप्रीतिञ्च प्राकटयत्। संस्कृत साहित्यपरिषदस्तृतीयवर्षिकमहोत्सवे सौम्यदर्शनो महानसौ नेतृपदमलंकुर्व्वाणो विनयनम्रशीलेन, स्मितपूर्व्वभाषितेन, संस्कृतप्रीत्या च कस्य न विदुषो हृदयमानन्दावर्जितमकरोत्। केवलं सान्त्वनं नः—"इहलोके जनानन्दः प्रेत्यानन्दं समश्नुते" इत्येवं शास्त्राश्वासनम्।

वार्षिकमहोत्सवः—विदितमस्तु श्रीमतां परिषत्पत्रिकापाठकानां यद् आगामिनि सौराषाढ़ीय द्वाविंशदिवसे (जुलाइ मासस्य षष्ठे दिवसे) रविवासरे सायम् 'युनिभार्सिटी इन्ष्टिटिउट' इत्याख्ये प्रशस्ते सभामन्दिरे परिषदोऽस्याः अष्टमसंवत्सरमहोत्सवो भविता, तदङ्गतया च तत्रैव भासकवे रमणीयरूपकं 'बालचरितं' परिषत्सदस्यै रङ्गे प्रयुक्तं भवेदिति। प्रेक्षागृहप्रवेशपत्रञ्च परिषत्सदस्यानां प्रत्येकं यथाकालं प्रेषयिष्यते; अपरैस्तु दिदृक्षुभिर्विद्वद्भिः परिषदकार्य्यालयात्तत् संग्राह्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। **কেন না**—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

কালীতন্ত্র—এইরূপ উপাদেয় তন্ত্র এই পর্য্যন্ত আর কোথাও প্রকাশিত হয় নাই। অনেকগুলি প্রাচীন হস্তলিখিত পুঁথি হইতে পাঠ উদ্ধার করিয়া বহু পাঠান্তর, বিস্তৃত সংস্কৃত টীকা ও বঙ্গানুবাদ সহ সংস্কৃতসাহিত্যপরিষৎ হইতে পূর্ণানন্দবংশীয় তান্ত্রিক পণ্ডিত শ্রীযুক্ত সতীশচন্দ্রসিদ্ধান্তভূষণ মহাশয়ের সম্পাদকতায় প্রকাশিত হইয়াছে। কালীর ধ্যানের ব্যাখ্যা সম্বন্ধে নানারূপ মত ভেদ আছে। সেই সকলের মীমাংসাপূর্ব্বক বিস্তৃত ব্যাখ্যা প্রদত্ত হইয়াছে। মূল্য ॥৶০ দশ আনা মাত্র। পরিষদের সভ্যগণের পক্ষে ॥০ আট আনা মাত্র।

শঙ্করীসঙ্গীতম্—গীতগোবিন্দের অনুকরণে প্রাচীন কবি জয়নারায়ণের রচিত গীতিকাব্য। মূল্য ৶০ ছয় আনা, পরিষৎসভ্যের পক্ষে ।০ চারি আনা মাত্র

প্রাপ্তিস্থান—সম্পাদক, সংস্কৃতসাহিত্যপরিষৎ।

শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

চ্যবন প্রাশ— ৩৲ সের। [মকরধ্বজ— তোলা ৪৲]

অধ্যক্ষ মথুরবাবুর

ঢাকা শক্তি ঔষধালয়।

(১৩০৮ সনে স্থাপিত)

ঢাকা, কলিকাতা, ময়মনসিংহ, চট্টগ্রাম, শ্রীহট্ট, রঙ্গপুর, গৌহাটী, জলপাইগুড়ি বগুড়া, সিরাজগঞ্জ, কাশী, পাটনা, লক্ষ্ণৌ ও মাদ্রাজ।

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিশুদ্ধরক্ত ও সারিবাদ্যরিষ্ট।

সারিবাদ্যরিষ্ট—যকৃতের যে কোনপ্রকার দোষ নিশ্চয় দূরীভূত করে এবং লিভারকে কার্য্যক্ষম রাখিয়া মল মূত্র সহ পিত্ত নিঃসরণ করিয়া পিত্তাধিক্যের সমতা করে। হাত পা জ্বালা চক্ষু জ্বালা দাহ প্রভৃতি বায়ু পিত্ত রোগ দূরীভূত করে। পিত্ত দূষিত হইলে রক্তও দূষিত হয়।

সারিবাদ্যরিষ্ট—সর্ব্ববিধ রক্তদুষ্টি, যথা বাতরক্ত শীতপিত্ত, পাঁচড়া, বিখাজ, কণ্ডু কুষ্ঠ বিসর্প প্রভৃতির মহৌষধ।

সারিবাদ্যরিষ্ট—সর্ব্ববিধ বাতের বেদনা, স্নায়ুশূল, গেটেবাত, আমবাত, ঝিঁঝিঁবাত, বাতব্যাধি প্রভৃতি ঐন্দ্রজালিকের ন্যায় প্রশমিত করে।

সারিবাদ্যরিষ্ট—স্নায়বিক দৌর্ব্বল্যনাশক, জীবনীশক্তি বর্দ্ধক, কর্ম্মোৎসাহ প্রদায়ক। মূত্র ও শুক্র সম্বন্ধীয় পীড়া, শুক্রতারল্য, খড়িগোলার ন্যায় প্রস্রাব এবং স্ত্রীলোকের শ্বেত ও রক্ত প্রদর প্রভৃতি নিশ্চয় আরোগ্য করে।

সারিবাদ্যরিষ্ট—দূষিত সংসর্গজাত বিষাক্ত বীজাণু প্রস্রাবদ্বারের ক্ষত, পূঁজ রক্তপাত, স্ফীতি, বেদনা, পারদবিকৃতি প্রভৃতি মারাত্মক দূষিত ব্যাধি মন্ত্রশক্তির ন্যায় আরোগ্য করে।

সারিবাদ্যরিষ্ট—বালক, বৃদ্ধ, যুবা, স্ত্রী পুরুষ সকলেই সুস্থ অসুস্থ অবস্থায় সকল ঋতুতে সেবন করিতে পারে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুবর্ণকুমারী

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये
आषाढ़े
July 1924.

Reg. No. C. 1073.

७म वर्षस्य
३य संख्या
Vol. VII. No. 3

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—श्रीदुर्गामोहनभट्टाचार्य्यः M.A. ।

ऋतुविलसिते वर्षाविलासः ८१
संस्कृतसाहित्यस्य धर्म्मप्रधानता ८४
भाग्यविपर्य्यासः ८९
प्राचीनभारते मल्लमल्लव्यवहारः ९४
नन्दसत्यस्तीयम् १०५
परिषदः अष्टमवार्षिकमहोत्सवः ११३
महामहोपाध्यायोपाधिपदलाभः ११६
विद्यानिधिः श्रीकृष्णमाचार्य्यः ११८

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता ।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে। কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফুর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড্।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गतः 'सहृदया'-सम्पादकः
विद्यानिधिः श्रीकृष्णमाचार्य्यः एम, ए (मादुरा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये आषाढ़े, ७म-वर्षस्य ३य-संख्या ।

ऋतुविलसिते वर्षाविलासः ।

(लेखकः श्रीलक्ष्मीनारायण द्विवेदी)

उपागमत्प्रक्षपयन्निदाघजं रजःप्रतापं तटिनीमदार्धनः ।
महाघनो वारिधनो जनावनः शिवाय वर्षा-समयः सुखावहः ॥१
शिलासु तप्तासु निषेदुषां तपस्तपस्विनामाचरतां शरान्निमत् ।
इवासहिष्णुस्तदनल्पदुःखवत् तपःशमं कर्तुमुपैति वारिदः ॥२
अमन्दधाराभिरमेयबिन्दुभिर्निनादनिक्षीणमहेन्द्रदुन्दुभिः ।
तडिल्लताताड़ितभूतलस्थलः स्फुरन्महाचापऽवाम्बुवाहनः ॥३
किरन्निशीथैः शिखराणि भूभृतां गिलन्निवोत्तुङ्गपतङ्गमानिताम् ।
समानयञ्छ्यामतया स्वयाऽवनीः प्रसादयन्कोकिलकेकिचातकान् ॥
उपैति वेगेन हरन्नभःश्रिति वपुः प्रयाणेन समाप्नुवन् दिशः ।
विहाय वेला हि विहायसं प्रयान् नवाम्बुवोऽम्बोधिरिवापरः परः ॥५
महागिरिभ्यामिवपीवरस्तनद्वयेन दध्रे धरणीसमुत्सुका ।
चिरं वियोगाग्निनिपीड़िताक्षशिवक्षीयनेशं वृषभानुजोत्सुकी ॥६
अहो ! प्रचण्डातपतप्तभूधरध्वराङ्क्षखालीढ़वनावनीरुहः ।
निदाघवह्निः कवलीकृताण्डजः शरीरवान् कालइवावशेदिवान् ॥७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वियोगसन्तप्तवराङ्गनाया आयामिनिःश्वाससमानरूपा: ।
ज्वाला न सन्त्यस्य सुदुर्विभाव्या अध्वानमालङ्घयतां जनानाम् ॥८
न वाति चण्डं कृतमङ्गलो नभःस्पृशस्तरूणां परिशुष्कपल्लवान् ।
प्रसारयन् दिक्षु महान् प्रभञ्जनो रयेण तालान् धूनयन्नयन् महीम् ॥
इयं जलं वाञ्छति चातकावली निसर्गतस्त्यक्तकदर्थिताजवम् ।
गताभिसन्धिं विरहय्य दीर्घिका नदीह्रदान् किं स्वयमाश्रिताद्गमात् ॥
इयं बलाका जलदस्यमालातिमालती मौक्तिकमञ्जुकान्ति: ।
शनैः स्खलन्ती सकृदुत्स्फुरन्ती प्रतान् भवन्ती बहु साचि सन्ती ॥११
निदाघतापाकुलितेन्द्रियोऽप्यसौ सतृष्णमूर्ध्वीकृतमनः क्षुधार्दितः ।
निशम्य नादं जलदस्य निर्गतो दरीत उग्रं प्रतिरासते हरि: ॥१२
मुहुर्मुहुः क्राम्यति केशरी पुरो निरीक्षमाणो जलदं समुत्थितम् ।
विदारयन् भूमितलं खरैर्नखैर्भोत्रिधुन्वन्निव नादयन् दिशः ॥१३
नवे नृपेऽभ्यायति वाचकाः करन्त्यसौ प्रवीरा इव बर्हिणः श्रियाम् ।
ससिंहनादं रिपुपक्षगाश्रमाः कुलोचिताचारपरायणा प्रिये ॥१४
क्वचित् प्रमत्ता इव बर्हिणः परं प्रियं पयोदं पुरतः समुत्थितम् ।
अवेक्ष्य नृत्यन्ति कृतोन्नमस्वना: प्रसार्य बर्हं पृथुनाटकोपमम् ॥१५
अवेक्ष्य मेघोपगमं निजं निजं गृहं चिरात् परिवर्त्ततेऽध्वगः ।
पदं न धत्ते कुरुते स नो बहिर्जनः प्रियासङ्गमनाभिलाषुकः ॥१६
इतस्ततस्तृष्णैर्नयनैः कलत्रयुग् जनोऽस्य दृढं पश्यति तन्निमित्तकैः ।
न कस्य मेघस्य समुद्भवाप्सदं निसर्गतोऽन्योपकृतिक्षमक्रियः ॥१७
निशम्य शम्पोद्भवभैरवं रवं धवं विधूताङ्गलतं भयार्दिता ।
विमुच्य मानं समभङ्गवाससा दृढं समाश्लिष्यति कापि मानिनी ॥१८
उपेत्य गेहान् पथिकाः स्ववल्लभा दृढं समाश्लिष्य भवन्ति विज्वराः ।
इते प्रचण्डे जगतो प्रिये नृपे न के सुखं यान्ति हि सम्प्रसन्नास्तु ॥१९
जले स्थलेऽप्यम्बु न भिन्नधारया बलाहको वर्षति वारिधारयापि ।
महामहान्तो महतो लघूनका विचारयन्ते समदृष्टिदाश्रयः ॥२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटन्तिवारां मलक्षोभधारा नभस्त आगत्य रजोऽवलीनाः ।
मलं हि संसर्गवत एव शुद्ध-हृदोऽपि नीचैर्मलिना भवन्ति ॥ २१

इदं प्रगाढेऽतिरयेण वाह्यते, ह्यधःप्रदेशान् सलिलैस्तृणादिकम् ।
विधीयते साधुजनोऽपि साधुभिः असाधुगो ध्वस्ततमा प्रचोदितैः ॥ २२

वराङ्गनाभूषणवद्गतोर्विधौ स्खलन्ति संहत्य पयोदबिन्दवः ।
भुवोऽङ्गमद्दोत्थ इवोपजायते सुरम्यगन्धः सहकारसौरभः ॥ २३

इमा अहो जारमिवाप्य सङ्गतां स्वरास्तटिन्यः परगोपतोऽम्बुदम् ।
न यान्ति हृष्टाः रतिकर्मदक्षिणा न चापि मेघो मधवा स्वरं चिरम् ॥ २४

न भूरि सोढापि मही पयोमुचा जलैः सुपूर्णा विपदि स्थिताऽपि वा ।
दिशा अपीवाश्रयते घनैरलं भृतस्वकस्तेव तु तानि याचिका ॥ २५

यथा यथा मेदुरति वारिदे मही सरःसु संगत्य निवर्तते पयः ।
तथा तथा रम्यमुखत्सु कामिनीमनःसु कान्तैः प्रवर्तते स्मरः ॥ २६

श्रमं न किं केशरिणो न लम्भिताः पयोमुचाऽपास्य निपतनस्थलम् ।
परार्थमेवाहितचेतसामहो महोद्यमानां न हि के वयं मता ॥ २७

वियोगिनां प्राणभृतां दुरासदः प्रवर्षणोऽयं समयः प्रवर्तनः ।
अभूदनासादितपुण्यकर्मणां सदैव दैवं विपरीतमक्षतम् ॥ २८

घनेन कश्चित् पृषतैरुपाहतोऽनवाप्य देशं जलपातवारणम् ।
अवाङ् क्वचिच्छीतजडस्तरोस्तले निकुञ्चिताङ्गः शुचया निषीदति ॥ २९

कदापि मुक्ताफलपीतबिन्दुभिः कदापि नीहारमयैरिवोचितैः ।
महीमयं सिञ्चति वारिवाहनः प्रियः प्रियां कोमलजलैर्यथा मुहुः ॥ ३०

कदापि खं वारिधरैः समन्ततो निरुध्यते भीमरवैरयोमयैः ।
द्युवाति चञ्चच्चपला कलापितैः स्वभावतो भीषण घनघर्घरैः ॥ ३१

चिराय नीरुध्य कराग्रहीधरैः ममैव काशाय रवेः पयोधरैः ।
क्वचित् समासज्य कृतैकमण्डलैः घनावकाशः स्थगितैव दीयते ।
कदापि निर्वारिविशीर्णमण्डलं विभीतकन्योपमितैः पयोधरैः ।
वलक्षपक्षप्रतिमैर्विवं तन्यते सुसम्मोदकरं नभोऽम्बरम् ॥ ३२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिष्ठितः क्वापि घनोऽंशुमालिना प्रसृष्टकर्पूरमयीं दधद्युतिम्।
समन्ततो भाति घनाञ्जनप्रभ स्तथान्तरे राजतलौहपिण्डसात् ॥३४

क्वचिज्जलन्यूनतयाऽम्बुदे रवि र्विरश्मिकाशो विधुवत् प्रतीयते।
परं पयोदेऽपसृतेऽतितिग्मतां गतैर्मयूखैस्तु तनुं विधूनुते ॥३५

क्वचित्सरत्वायुजवेन वारिदव्रजो भ्रमं बालधियां न वारिदाः।
सरन्ति भास्वान् प्रजवोति सम्भ्रमात् करोति निर्वृष्टपयस्तया लघुः॥

कदाचनात्यर्थधराधरोपमा लसन्ति संहृत्य दिशासु वारिदाः।
निबद्धमूला हिमखण्डपाण्डुराः क्वचिच्च कालायसपिण्डसन्निभाः ॥३७

प्रवाहधौतस्फटिकासनास्थितः क्वचिन्मुनिर्ब्रह्मनिलीनमानसः।
दिने दिने वारिमुचाभिषूयतेऽमृतायमानैरमृतैः शिलोच्चये ॥३८

(सावशेषम्)

संस्कृतसाहित्यस्य धर्म्मप्रधानता *

(लेखकः —श्रीचिन्ताहरणकाव्यतीर्थः बि,ए।)

धर्म्मभीरुत्वमेव जागतवस्तूनामपरमार्थत्वस्य सम्यग्ज्ञानवतां भारतीयानामार्य्याणां चरमं वैशिष्ट्यम् एतद् वैशिष्ट्यविशिष्टाश्च निखिल-भारताधिवासिनः सततमेव धर्म्मसञ्चयैकमानसा धर्म्मानुष्ठानपरायणाः कृत्येषु प्रवर्त्तमाना विलोक्यन्ते। तेन च येन येनैव कर्म्मणा सुसम्पादितेन धर्म्माभिवृद्धिः अपुनर्भवो वा सम्पद्येत तस्मिन् तस्मिन्नेव कर्म्मणि आधीयमानप्रयत्ना बद्धव्यापाराश्च ते भवन्तीति प्रायेण सर्व्वेषा-मेव सुविदितम्। न खलु तेषामधर्म्मप्रवस्तुषु आदरः प्रवृत्तिर्वा पर्य्यालोक्यते। प्रायेण अखिलैव तेषां चेष्टा धर्म्ममूलिकेति ते समामनन्ति। तथा च यस्मे अकरणे प्रत्यवायहेतुभूतेषु नित्यकर्म्मसु

---

* प्रबन्धोऽयं परिषदो मासिकाधिवेशने वाचितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्त्तन्ते तदधर्मापाकरणायैव, काम्यनैमित्तिकेषु च धर्मसञ्चयायैव प्रवर्त्तन्ते इति भारतीयानामृषीणां सम्मतम्।

एवञ्च धर्मभीरवोऽधर्मकृत्यविरता भारतीयाः स्वीये देववाणीभूते पूतपूते संस्कृतसाहित्ये अधर्मभावानामनुप्रवेशमनुमंस्यन्त इत्यसम्भावितमेव। परं दूरमास्तामधर्मभावानुप्रवेशानुमोदनम् संस्कृतसाहित्यस्य सर्वेष्वेव विभागेषु धर्मविषयाणामेव यथा प्रवेशः स्यात् एवमेव प्राणानपि पणीकृत्य यतमाना भारतीयाः निखिलसंस्कृतसाहित्यस्य सर्वत एव धर्मपारतन्त्र्यमभ्युपगतवन्तः। तच्च धर्मपारतन्त्र्यं संस्कृतसाहित्यस्याद्य प्राचीनाचार्य्यानुमोदितदिशा स्वोपनिबद्धयुक्त्या च प्रतिपादयितुमभिलषामः।

अस्मिंश्च संस्कृतसाहित्ये यथा धर्मविषयकालोचनस्य प्राचुर्य्यं, न तथा भाषान्तरसाहित्ये इति स्फुटमेव प्रतिभायात् एतत्साहित्यालोचनव्यापारवताम्। तथा च परिहृतेऽपि धर्मपरतन्त्राणां संस्कृतकाव्यनाटकादीनां समालोचने धर्ममात्रालोचनविषयकवेदस्मृतिपुराणादिग्रन्थास्तथा तथैवाधिक्यमासादिता यथा केवलं तेषामेवालोचनेनापि संस्कृतसाहित्यस्य धर्मपारतन्त्र्यम असंशयमेव प्रतिपादयितुमलम्भवामः।

तस्य च संस्कृतसाहित्यस्य वैदिकलौकिकभेदेन भेदद्वैविध्यं परिकल्पयन्ति मनीषिणः। तत् च वैदिकसाहित्यं कर्मकाण्ड ज्ञानकाण्डञ्चेति काण्डद्वयात्मकम्। तयोश्च कर्मकाण्डं स्वर्गादीष्टसाधनयागादीनां विध्युपदेशपरिपूरितैः संहिताग्रन्थैर्ब्राह्मणग्रन्थैश्च निष्पाद्यते, ज्ञानकाण्डं च ब्राह्मणांशभूतैरेवारण्यकोपनिषत्परनामकैः विरागवतां मुमुक्षूणाञ्च ज्ञानसरणिम् उपदेशयद्भिर्ग्रन्थनिचयैरलंक्रियते इति सुविदितमेव सुविदुषाम्। एवं चैतद् वैदिकसाहित्यं धार्मिकमात्रलभ्यस्वर्गादीष्टसाधनयागविधिमन्त्राणामुपनिबन्धनद्वारा मुमुक्षूणां ज्ञानसरण्या मोक्षप्राप्त्युपायनिश्चयनिर्देशद्वारा च धर्ममेव जनानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथयत् धर्मात्मकमेवेति 'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । इति स्मृत्या श्रुतेर्धर्ममूलकतानिर्देशेन, 'चोदनालक्षणोऽर्थो धर्मः' इति मीमांसासूत्रे च धर्मलक्षणे श्रुतिचोदनाया अन्तर्भावात् च सुव्यक्तमेवेति नात्र विकल्पशङ्कापि ।

लौकिकसाहित्ये शिक्षादिवेदाङ्गग्रन्थाः स्मृतिग्रन्थाः पुराणानि, दर्शनग्रन्थाः, नीतिग्रन्थाः, काव्यग्रन्थाः विविधकलाविषयकग्रन्थाश्च अन्तर्भवन्ति । एतेषां धर्मप्रधानताप्रतिपादने यतामहे ।

वेदाङ्गत्वात् वेदार्थव्याख्यानप्रतिपादनादिमूलकप्रवृत्तिकतया च वेदाङ्गानां धर्मपारतन्त्र्यं सर्वथा स्फुटमेव । वेदस्य शिक्षादिशास्त्रापेक्षिता च सर्वेषामेव सम्मता शास्त्रनिष्णातधियां सुधियाम् । तथा चोक्तं पाणिनीयशिक्षायां शिक्षादिप्रयोजनमधिकृत्य—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । इति ।

एवं यथाङ्गिनः पादाद्यङ्गैर्विना न कदापि सम्भाव्यते सत्ता, तथा वेदानामपि शिक्षाद्यङ्गपरिहीनानां दुर्बोधतया सत्ता निष्फलेति तात्पर्यं स्वरसः पाणिनेः ।

भगवता भाष्यकृतापि 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम् । रक्षार्थं वेदानाम् अध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति । ऊहः खल्वपि न सर्वैर्लिङ्गैर्न च सर्वाभिविभक्तिभिर्वेदे मन्त्रा निगदितास्ते चावश्यं पुरुषेण यज्ञगतेन यथायथं विपरिणमयितव्याः । तान् न शक्नोति अवैयाकरणः यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

असन्देहार्थं चाऽप्यध्येयं व्याकरणम् । याज्ञिकाः पठन्ति— 'स्थूलपृषतीमाग्निवारुणीम् अनड्वाहीम् आलभेत' इति । तस्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहः—'स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि वा पृषन्ति यस्याः सेयं स्थूलपृषती इति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्व्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासान्तोदात्तत्वं ततस्तत्पुरुषः।

'न म्लेच्छितवै नापभाषितवै।' म्लेच्छा मा भूम इत्यध्येयं व्याकरणम्।

'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।'

इत्युक्तवता व्याकरणप्रयोजनवर्णनमुखेन वेदस्य सर्व्वथा व्याकरणापेक्षित्वम्, वेदरक्षार्थञ्च व्याकरणस्य प्रवर्त्तनमुररीकृतम्। एवञ्च प्रतिष्ठितं वेदाङ्गानां धर्म्मपारतन्त्र्यम्।

स्मृतिपुराणादीनाञ्च वेदमूलकत्वात् वेदार्थोपनिबन्धृत्वात् चैव प्रामाण्यम्। नहि वेदविरोधिनो वेदातिरिक्ता वा पदार्थाः स्मृत्यादिषु समालोचनपदवीमारोहन्ति। साधारणदुर्बोधा वेदार्थाः स्मृत्यादिभिर्व्यक्तीकृत्य व्यक्तीकृत्य प्रकटीक्रियन्ते इति वेदानामिव धर्म्मपारतन्त्र्यात् स्मृत्यादीनां तथात्वमायातीति निर्विवादम्।

आस्तिकनास्तिकभेदेन द्विविधानि नाम दर्शनानि समुपलभ्यन्ते संस्कृतसाहित्ये। 'नास्तिको वेदनिन्दकः' इति नास्तिकलक्षणात् वेदप्रामाण्यमनङ्गीकुर्व्वतां जैनबौद्धचार्व्वाकमतानुसारिणां दर्शनानि नास्तिकदर्शनकोटिमलङ्कुर्वन्ति विराजन्ते। तेषु च सनातनधर्म्माभावेऽपि तत्तद्धर्म्ममतपरिपोषणप्रवृत्तिकत्वाच्च सर्व्वथा सुघटमेव तेषां धर्म्मपारतन्त्र्यम्। यद्वा स्वमतदार्ढ्यापादनाय विरोधिमतानि निरसनीयानीति विरोधिमतयुक्तीनां सम्यग्ज्ञानस्यावश्यकत्वात्। सनातनधर्म्ममतपरिपोषणायापि तेषां प्रयोजनम् अभ्युपगच्छामः। एवञ्च धर्म्मोपयोगित्वरूपं धर्म्मपारतन्त्र्यम् एषाम् अपि सिध्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्तिकदर्शनानां त्रिविधदुःखात्यन्तनिवृत्तिरूप परमपुरुषार्थस्य मोक्षस्य मार्गदर्शनायैव प्रवृत्तेर्धर्मपारतन्त्र्यं व्यक्तमेव सुमनसाम्, वेदार्थ प्रामाण्यमङ्गीकुर्व तां आस्तिकदर्शनानां सर्व्वेषामेव मूलं वेदांशभूता एव उपनिषद इति उपनिषदुक्ता एव पदार्था विशेषेण वैशद्येन च समालोच्यन्ते सांख्यादिविविधदर्शनशास्त्रप्रणेतृभिरिति वेदार्थप्रतिपादनेन तेषां धर्म्मपारतन्त्र्यं निर्व्विवादमेव सुधियाम् ।

काव्यानान्तु धर्म्मपरतन्त्रता सर्व्वैरेव काव्यशास्त्रप्रणेतृभिरालङ्कारिकै रङ्गीकृता । 'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि । काव्यादेवे'ति ब्रुवता साहित्यदर्पणकृता, 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे' इति ब्रुवता काव्यप्रकाशकृता च काव्यपाठादिना धर्म्मलाभो भवतीति युक्तमेवोक्तम् । अधर्म्मार्थानाञ्च प्रतिपादनं काव्यादौ सर्व्वथालङ्कारिकैः प्रतिषिद्धम् । यत्र च अधर्म्मार्थवर्णनप्रसङ्गस्तत्रापि आयतौ धर्म्मस्यैव विजयः प्रदर्शित इति धर्म्मार्थवर्णने एव तत्रापि स्वरासः । इत्थं युक्त्युपन्यासेनापि काव्यस्य धर्म्मपराधीनत्वं प्रतिपादयितुमलम्भवामः । धर्म्मशास्त्रादिष्वपि काव्यादीनां धर्म्मपरत्वं सर्व्वथैव अङ्गीकृतम् । तथाच—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥'
'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः ॥'

'त्रिवर्गसाधनं नाट्य'मित्यादि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाग्यविपर्य्यासः

(पूर्व्वानुवृत्तः)

(लेखकः—श्रीआशुतोषकाव्यव्याकरणतीर्थः)

पुत्रस्यापि अधीताभिज्ञानशकुन्तलादिप्रबन्धस्य तादृशे एव विवाहे बहोः कालात् प्रभृति मतिरासीत्। मातापितृनिर्व्वाचितया भार्य्यया गृहकार्य्यादिकं सम्भवति परन्तु प्रेम तत्र न तिष्ठति। मुक्त इव विहङ्गमः प्रेमापि मुक्तावेव स्फुरति, बद्धश्च मन्दगति जायते। एवं बहुमतवादं स बन्धुगोष्ठ्यां प्रकाशितवान्, अधुना अन्यनिर्व्वाचितायां कन्यायामूढायां बन्धुषु वदनप्रदर्शनमपि दुष्करं भवेत। पिता एव (न जाने किं मनसिकृत्य) पुत्रस्य सत्वराय विवाहाय यतते स्म।

परेद्युः प्रभातसमये गृहाय विनिवर्त्तनात् पूर्व्वं विनयो गृहस्वामिनं विज्ञापयामास यत् कुलीनस्यापि वन्द्योपाध्यायमहाशयस्य (नलिन्याः पितुः) गृहे वयोदशवर्षीया कन्या अनूढा पूर्व्वं नासीत्। इदानीं पुनरभिमतवराप्राप्तेः अस्या विवाहो न जातः। तद् यदि शीघ्रमेव गृहिण्याः सम्मतिमादाय वृद्धो नवद्वीपे स्वाभिमतिं प्रेरयति कन्यां च द्रष्टुं याति, तदा वन्द्योपाध्यायगृहिणी सुमहदुपकृता भवेत्। तस्या अपि अभिमतिं तत्रैव याथातथ्येन स विजानीयादिति।

आगच्छतस्तस्य विनयस्य कालीचरणेन सह आलापो जातस्तेन स एतदेव बुबुधे यत् ईदृशे वराय कन्याया अर्पणात् पाणिपादं बद्ध्वा गङ्गायामर्पणमपि वरमिति।

गृहं गतः सः सर्व्वमेव आनुपूर्व्व्येण वर्णयामास। अत्र या दुर्घटना जाता, विनयो निरपराधोऽपि तस्याः फलभागभवत्। पूर्व्वमपि माता कन्याया विनयं प्रत्यनुरागं लक्ष्यीकृतवती। इदानीं वरस्य दोषकीर्त्तनेन विनयस्यापि नलिनीं प्रत्यनुरागं सा अनुमितवती। सा यत्सकाशात् वरस्य वार्त्तामाप गदाधरजननी सा बहोः कालात् प्रभृति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलिन्या मातुः सखीरूपेण वर्त्तते; नलिन्या उत्कृष्टवराय तस्या अभिलाषः सुतरामेव तिष्ठेत्; किन्तु अयं वराको दग्धभालः स्वार्थसिद्धये तादृशस्यापि वरस्य निन्दाया न लज्जते। परभोजी वृक्षः कदापि न उद्यानं शोभयति— तस्या दुर्भाग्यत एव सा एतावता कालेन वाक्यमिदं नावगतवती। नलिन्या भ्राता एकदा गङ्गातीरं गत्वा जले पपात विनयः स्वजीवनं विपन्नमपि कृत्वा महता प्रयत्नेन स्रोतसा नीयमानं तं तीरमानीतवान् तत् केवलं प्रीतिप्रदर्शनार्थम्। विगते वर्षे नलिनी ज्वरेण आक्रान्ता पञ्चचत्वारिंशद्दिवसेभ्यः परं संज्ञां लेभे, विनयो विरहितनिद्राहारस्तां परिचचार तत्रापि कश्चित् हेतुरासीत्, कन्याया रोगेण च्छन्नमतिर्माता तं प्राङ् न ज्ञातवती इदानीं सर्व्वमेव तस्याः सरलं प्रतिभाति।

प्रतिवासिन्यस्तस्मिन् दिवसे गङ्गास्नानार्थमागतां नलिनीं दृष्ट्वा एतादृगेव लज्जिता आसन्, मर्म्माणि च अम्रियन्त यत् ताः साक्षेपमूचुः ग्रामस्य मस्तकभूते वन्द्योपाध्याये जीविते नलिन्या एतादृशी अवस्था नाभविष्यत्, तत्समवयस्काया: कस्याश्चित् क्रोडे कस्याश्चित् पुनरुदरे पुत्रो दृश्यते, नलिन्यास्तु सीमन्ते सिन्दूरबिन्दुपातस्यापि सम्भावना नायाति, सर्वमेव भाग्यविलसितम्। ततो गृहमागता समधिकं लज्जिताऽपि नलिनीमाता वरस्य उत्कृष्टतां कल्पयन्ती कथमपि तूष्णीमासीत्, इदानीं विनयात् तस्य निन्दां श्रुत्वा सा अधीरा तं विनिन्द्य गृहात् अपसारयितुमुद्यता बभूव।

तस्मिन् गृहे कोऽपि ईदृशो नासीद् योऽस्याः प्रतिवचनं करिष्यति। प्रातर्विनयस्तां प्रणम्य गृहं गन्तुमुद्यतो बभूव उवाच च वरस्य पिता कन्यादर्शनायामन्त्रितः सत्वरमागच्छेत् स यथा नलिन्या माता सन्तोष्य प्रस्थाप्यते।

वेणी एव कर्त्रीसमीपं गतापृच्छत् परस्य पुत्रो निवारयितव्यो न वा दिवसद्वयेन विंशतिक्रोशान् अतीत्य स पुनरपि क्रोशदशकं गतो व्याधिपीड़ितो भवेत् तरुणो देहः कियत् वा सहेत। परन्तु तस्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि उत्तरमनासाद्य तूष्णीमेव तस्थौ। तत्रस्था अपि बहवो जनाः समपाठिनो गृहान्तरे तस्य स्थानं निर्द्धारितवन्तः। स पुनः आश्रयदात्री अपमानिता भवेदिति तद्गुणमुग्धस्यापि कस्यचित् कर्णमदत्त्वा गुरुं प्रणम्य स्वगृहं प्रस्थितः।

विनयेन कन्यादर्शनार्थमाहूतो वृद्धः पत्नीं बोधयामास यत् समीपस्थाः सद्वंशजाः कथमपि तादृशाय गुणधराय कन्यां नार्पयिष्यन्ति तदयं विवाहश्चेन्न भवति तदा पुत्रस्य विवाहाशा एव नास्ति। अगत्या वृद्धो गोशकटमेकमारुह्य कन्यादर्शनार्थमागतः। गृहादिकं दृष्ट्वा कन्यां च नानालङ्कारशोभितामधिगतामेवाकलय्य स तां स्नुषारूपेण ग्रहीतुं मनश्चकार। दूरागमनखिन्नः स द्वित्राणि दिनानि तत्रावस्थाय स्वाभिमतं प्रकाश्य गच्छेदिति निर्णय आसीत्।

परेद्युः प्रभाते गदाधरो मातृवचनेन वृद्धमाहूय स्वगृहे भोजनार्थं नीतवान्। गदाधरजननी वृद्धस्य मातुलदुहिता, तत् तस्याः साक्षात्कारः सम्बन्धनिर्णये कर्त्तव्य एवेति निश्चित्य वृद्धो मुखोपाध्यायमापृच्छ्य तस्या गृहमागतः। अस्मिन् सम्बन्धे कोऽपि दोषो वर्त्तते न वेति भोजनावसरे पृष्टा गदाधरजननी सर्व्वमेव प्रशशंस। कन्याया ज्येष्ठतातदुहिता वेणी दासीगर्भसमुत्पन्ना कलिकातासमीपे कुत्रापि विवाहिता आसीत्, विधवा च सा पुनरपि गृहमानीता इति वन्द्योपाध्यायः प्रायश्चित्तकरणाय सर्व्वैः आदिष्टोऽपि दास्याः कृते प्रायश्चित्तमन्याय्यमवमानकरं निश्चितवान्। अतः सर्व्वैः सामाजिकैः सोऽपाङ्क्तेयः कृतः। तद् गृहे कृताहारः स वृद्धो गदाधरजनन्या निमन्त्रित इति साऽपि परिज्ञाता चेत् व्रीड़ भवेत्। दरिद्रश्चेत् कश्चिदागत्य कन्यामिमामुपयच्छति, तदा स अपमानमपि सहेत। तस्य यत् वित्तमस्ति, तत् कतिचित् लोकाः स्वयं गतास्तत् पुत्राय सादरं कन्यामर्पयिष्यन्ति। तत् पुत्रस्य अयं समाजग्लानिकरो विवाहः गदाधरजनन्यै न रोचते इति। शूद्रैः सह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मीयताकरणे तस्य कोऽपि अभिलाषो नास्ति इति वृद्धः तस्मिन्नेव दिवसे मुखोपाध्यायमुक्त्वा गृहं जगाम।

नवद्वीपपरित्यागात् चतुर्थदिवसे विनयः अर्द्धचेतनः पथिपार्श्वे वटतले शयित आसीत् इति पञ्चमदिवसे कालीचरणेन मातृष्वस्रीया-दवगतम्। अत्र आगमनेन बहुशः स विनयमपश्यत् तस्य ग्रामञ्च सोऽजानात्। एतावता कालेन विनयो ध्रुवमेव गृहं गच्छेत् यत-स्तद् गृहं वटतलात् क्रोशमात्रान्तरितम्। कालीचरणोऽपि तदालय-मजानात्, तस्य कीदृशी अवस्था जातेति परिज्ञानाय तस्यासीत् महती इच्छा किन्तु गृहस्वामिनीमनापृच्छ्य गमनं न सम्भवति इति स तदन्तिकमुपगम्य विनयस्य सर्वं वृत्तान्तं निवेद्य तस्थौ। विनयं प्रति अविचारः तया तस्मिन्नेव दिवसे अवगतः किन्तु आत्मनो लज्जया न तदा किमपि उक्तम्, चिन्तितञ्च केषुचिद्दिवसेषु विनये आगते सर्वं कथयितव्यम्। वृद्धस्य गमनेन सा विनयस्य निर्द्दोषतामधिकतरं बुबुधे। परन्तु किमपि कर्तव्यं नासीत्। इदानीं तस्य अस्वस्थतां निशम्य चतुःपञ्चानि दिनानि विनयेन तदर्थं क्लान्तश्रमेण रुग्णेन पथि असहायेन इतस्ततः सञ्चरता, कियद्दुःखमधिगतं तत् स्पष्टमिवानुभूतं नलिन्या मात्रापि। सा तदैव कालीचरणस्य गमनमनुमेने। परेद्युश्च प्रभाते मातृष्वस्रीयेण सह कालीचरणो विनयस्य गृहं प्रस्थितः।

इमानि अहानि कीदृशं दुःखमनुभूतवती नलिनी तत् सैवाजानात् आजानाच्च तस्या भाग्यविधाता। अल्पमेव तत् विदितमासीत् वेणी-भगिन्याः। तत् यावदेव कालीचरणस्य मातृष्वस्रीयः समागत्य विनयस्य दारुणं वसन्तरोगमकथयत् तावन्नलिनी मुक्तकण्ठा रुरोद। तस्या रोगसमये स मासद्वयं यावत् परिचचार, अधुना विकारग्रस्तः स तामेव स्मरन् महत् कष्टमाप्नोति, सा पुनरत्र निश्चिन्ता स्वपसीति नैतत् सा चिन्तयितुमप्यलमासीत्। सा तदैव तत्र गमनाय मातरं भूयोभूयः प्रार्थयत। सापि मुखोपाध्यायस्य सम्मतिमपेक्षते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनयः स्वपुत्रवदवासीत् तद्गृहे नलिनया गमने कमपि दोषं सुखोपाध्यायो नापश्यत् परन्तु रोगिणः समीपे गमने नलिनया सावधानया भवितव्यमिति तेन उपदिष्टम्। मातापि अप्रगाढ़मतिः कन्या किं कुर्य्यादिति चिन्तयन्ती वेणीमपि कन्यया समं प्रेषितवती। गमनसमये शतं मुद्रा आत्मन उपकारार्थं रोगिणश्च सेवार्थं वेणीहस्ते सा दत्तवती।

कन्यापि निषेधे अदत्तकर्णा नलिनी विनयस्य शय्यापार्श्वं शिरोदेशे उपविवेश। मुखे तस्याः अन्नं वा वाक्यं वा नासीत् नयनयोश्च निद्रा अनवदृष्टिर्वा कैश्चिन्नोपलक्षिता परन्तु। एतावतापि चेष्टया सा तमरोगीकर्त्तुं न शक्ता, स्वयमेव च ज्वरिता अभवत्। सेवमाना सापि रोगाक्रान्ता जाता इति पूर्व्वं न केनापि ज्ञातम् आत्मग्लानिमुपेक्ष्य सा तं सेवते स्म किन्तु एकदा प्रभाते यदा पुनः पुनराहूयमानापि सा न शब्दं चकार तदा वेणी तामुपगम्य व्याधिविकलाङ्गीमपश्यत्। शकटचालको न तां नेतुमङ्गीकृतवान् महतापि प्रयत्नेन कालीचरणो वसन्ताक्रान्ताया वाहनार्थं शकटान्तरं न प्राप। वैद्यैरप्युपदिष्टं शकटगमनश्रमेण व्याधिवृद्धिर्भवेत् अत्रावस्थाने पुनर्जीविताशा कापि वर्तते। तैरपि अगत्या तदेवानुष्ठितम्।

पञ्चदशदिनानि वेणी तत्र आसीत्। अनन्तरं यावत् सा नवद्वीपं प्रति निवृत्ता, तावत् न सा नलिनया अनुसृता। कालीचरणस्य चेष्टया नलिनया अपि देहेन विनयस्य समाधावधिगतोऽवकाशः।

---

12 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनभारते भृत्य-संव्यवहारः

लेखकः श्रीउपेन्द्रनाथसेनगुप्तकाव्यतीर्थः

पञ्चवत्सरोपादानात् वर्षावधि पीड़िताय भृत्याय पादहीनां भृतिं ददयात् तदूर्द्धं यावच्चतुर्वर्षं त्रैमासिकीं भृतिं प्रतिवर्षं ददयात्। पञ्च-वत्सरावधिपीड़िताय रोगस्य न्यूनाधिक्यं विविच्य भृतिं ददयात, अत ऊर्द्धं षाण्मासिकीं भृतिं ददयात्—तदूर्द्धं कदापि न गच्छेत् सप्ताह-पीड़ितस्यस्य तु भृतिः सर्व्वथा न हातव्या इति रोगिणोऽवकाशव्यवस्था ज्ञातव्या (sick-leave) संवत्सरोषिते भृत्ये तत्स्थाने प्रतिनिधिः (substitute) ग्राह्यः, सुमहद्गुणिने (meritorius servant) सदैव भृत्यर्द्धं दद्यात्। विनैव सेवां वत्सरे स्वामी भृत्यायावकाशार्थं पञ्चदशदिवसान् दद्यात् (casual or privilege leave)। ततस्तु

> चत्वारिंशत् समा नीताः सेवया येन वै नृपः।
>
> ततः सेवां विना तस्मै भृत्यर्द्धं कल्पयेत् सदा॥ (शु २।४१०)

इदमेवाधुनावसरिकीति (pension) कथ्यते। ततश्चावसरिकीमुप-भुञ्जाने परलोकं गते—

> "यावज्जीवं तु तत्पुत्रे क्षमे वातु तदर्द्धकम्।
>
> भार्य्यायां वा सुशीलायां कन्यायां वा स्वश्रेयसे॥"(शु२।४११)

स्वामी भृतिं दद्यात् इति शेषः। अत्र कन्यायामिनूत्यढ़ायामिति टीकाकृतः।

> अष्टमांशं पारितोष्यं दद्यात् भृत्याय वत्सरे।
>
> कार्य्याष्टमांशं वा दद्यात् कार्य्यं द्रागधिकं कृतम्॥ शु २।४१२

यो भृत्यः वत्सरे यावतीं भृतिं वर्हेत् तस्मै प्रतिवत्सरं तदष्टमांशं पारितोष्यं (reward or bonus) दद्यात् तस्मिन् सहसा कृताधिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्य्ये संवत्सरकृतकार्य्योपयोगिनी या भृतिर्भवेत् तस्मै तदष्टमांशं दद्यादित्यर्थ: । अपि च

स्वामिकार्य्ये विनष्टो यस्तत्पुत्रे तद् भृतिं वहेत् ।
षष्ठांशं वा चतुर्थांशं भृतिर्भृत्यस्य पालयेत् ॥
दद्यात् तदर्द्धं भृत्याय द्वित्रिवर्षेऽखिलं तु वा । (शु २।४१४)

द्वित्रिवर्षपीड़िते भृत्ये भृत्यर्द्धदानं सर्व्वभृतिदानं वा भृतग्रानां गुणानां तारतम्यानुसारेण कर्त्तव्यमिति बोद्धव्यम । तथाचात्र कौटिल्य: अर्थशास्त्रस्य भृत्यभरणीयप्रकरणे "कर्म्मसु मृतानां पुत्रदारा भक्तवेतनं लभेरन् । बालवृद्धव्याधिताश्चैषामनुग्राह्या: । प्रेतव्याधितसूतिकाकृत्येषु चैषामर्थमानकर्म्म कुर्य्यात्" इति । अपि च—स्वामी कार्य्यक्षमं जनं कार्य्ये नियोजयेत्—परं

"अत: कार्य्यक्षमं दृष्ट्वा कार्य्येऽन्ये तं नियोजयेत् ।
तत्कार्य्ये कुशलं चान्यं तत्पदानुगतं खलु ॥
नियोजयेद् वर्त्तमे तु-तदभावे तथा परम् ।
तद्गुणो यदि तत्पुत्रस्तत्कार्य्ये तं नियोजयेत् ॥
यथा यथा श्रेष्ठपदे ह्यधिकारी यदा भवेत् ।
अनुक्रमेण संयोज्यो ह्यन्ते तं प्रकृतिं नयेत् ॥ शु २।११३-१५

अत्र अत इति स्वकार्य्यात् गरीय: कार्य्यक्षमं दृष्ट्वा, वर्त्तसे कार्य्यचलने प्रकृतिं स्वपैतृकपदमिति बोद्धव्यम् । अपि च

अधिकारबलं दृष्ट्वा योजयेद्दर्शकान् बहून् ।
अधिकारिणमेकं वा योजयेद्दर्शकैर्विना ॥ (शु २।११६)

अधिकारबलं कार्य्यगौरवम् दर्शक: कार्य्यशिक्षार्थी (probationer) एवं स्वामिना भृत्यसंव्यवहार: कर्त्तव्य: परं स्वामी स्वस्य अर्थदौर्गत्यं समीक्ष्य भृत्यानाहूय ब्रूयात् भवन्तो मे बन्धव: अधुना अधिकारं मे वहन्तु भृतिश्चैतां किञ्चिन्न्यूनां गृह्णन्तु परं सौभाग्योदये भवत: स्मरिष्यामि अदत्तभृतिञ्च दास्यामि । एवं वादिनि स्वामिनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भृतिं विना स्वामिकार्य्यं भृत्यः कुर्य्यात् समाष्टकम्।
षोड़शाब्दधनी यः स्यादितरोऽर्थानुरूपतः॥
निर्धनैरन्नवस्त्रन्तु नृपाद्‌ ग्राह्यं न चान्यथा॥ (शु ५।४८-५०)

षोड़शाब्दधनी षोड़शाब्दव्ययोपयोगिधनसम्पन्न इत्यर्थः। अपि च नगरशिल्पिनः स्वशरीरोपजीविनः प्रतिमासं दिनैकं भोजनमात्रं लब्ध्वा राजकार्य्यं कुर्य्युरिति दृश्यते विधिराग्नेयमहापुराणे यथा

कर्म्म कुर्य्युर्नरेन्द्रस्य मासेनैकञ्च शिल्पिनः।
भुक्तमात्रेण ये चान्ये स्वशरीरोपजीविनः॥ (अग्नि २२३।३३)

अपि च कौटिल्यो भृत्यभरणीये आह—

"अल्पकोशः कुप्यपशु क्षेत्राणि दद्यात् अल्पं च हिरण्यम्।
षष्टिवेतनस्याढ़कं कृत्वा हिरण्यानुरूपं भक्तं कुर्य्यात्॥" इति

अधुना भृत्यसम्बन्धिव्यवहारपदानि आलोच्यन्ते भारतवर्षे पुरा दासक्रयविधिरासीदिति मन्वादिषु सर्व्वत्रैव स्पष्टमुपलभ्यते। दासक्रयविधिः सम्यग् विचारितः महात्मना कौटिल्येन स्वकृतार्थशास्त्रस्य दासकल्पप्रकरणे तत्र ब्राह्मणानां क्रीतदासत्वं नास्ति तथाच तेनोक्तं "न त्वेवार्य्यस्य दासभावः।" (अर्थ कौ) आर्य्यौ ब्राह्मणकुमारयोरिति पाणिनिसूत्रदर्शनादत्रार्य्यशब्देन ब्राह्मण एव लक्षितव्यः। क्षत्रियादीनामपि सर्व्वेषामुच्चवर्णानां दासभावो नास्ति स्मृतौ निषेधदर्शनात् तथाच विष्णुसंहितायां "यस्तूत्तमवर्णान् दास्ये नियोजयेत् तस्योत्तमसाहसो दण्डः।" (विष्णु ५।१५०) कौटिल्योऽपि—"उदरदासवर्जमार्य्यप्राणमप्राप्तव्यवहारं शूद्रं विक्रयाधमं नयतस् स्वजनस्य द्वादशपणो दण्डः। वैश्यं द्विगुणः। क्षत्रियं त्रिगुणः। ब्राह्मणं चतुर्गुणः। परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतॄणां च।" "म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा" "वित्तापहारिणो वा दासस्यार्य्यभावमपहरतोऽर्द्धदण्डः।" तेन म्लेच्छानामुदरदासानाञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रयविक्रयौ भवितुमर्हत:। नतु कदापि द्विजातीनां न वा सच्छूद्राणामिति सुविशदम्। याज्ञवल्क्यश्च

"बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते॥"

इति संविद्व्यतिक्रमप्रकरणे उक्तवान्।

यथा पुरा दासविक्रयविधिरासीत् तथैव निष्क्रयविधिरपि आसीत्। तथा च कौटिल्य: "दासमनुरूपेण निष्क्रयेणार्य्यमकुर्वतो द्वादशपणो दण्ड:। संरोधश्चाकरणात्। (कौ अर्थ) संरोध: कारारोध इत्यर्थ:। अपि च "गृहेजात-दायागत-लब्ध-क्रीतानामन्यतमं दासम् ऊनाष्टवर्षं विबन्धुमकामं नीचे कर्म्माणि विदेशे दासीं वा सगर्भामप्रतिविहित-गर्भभर्म्मण्यां विक्रयाधानं नयत: पूर्व्व: साहसदण्ड: क्रेतृश्रोतृणाञ्च।" सक्तदात्माधाता निष्पतित: सीदेत्। द्विरन्येनाहितक:। सकृत्वेन चार्य्यत्वं गच्छेत्। (कौ अर्थ) आर्य्यत्वमत्र दासभावं गच्छेदुदरदास: आहितकश्च। आहितकश्च दत्रिमदास: इति बोद्धव्य:। याज्ञवल्क्यश्च "स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि" (याज्ञ १८५) इत्याह। निष्क्रयस्तु "प्रक्षेपानुरूपश्चास्य निष्क्रय:" इत्याह कौटिल्य:। अर्थात् देवदत्तो यज्ञदत्तं पञ्चाशता मुद्राभि: क्रीतवान् पञ्चाशन्मुद्रा निष्क्रयं दत्त्वा यज्ञदत्तो दास्यान्मुक्तिं लभेत। "दण्डप्रणीत: कर्म्मणा दण्डमुपनयेत। आर्य्यप्राणो ध्वजाहृत: कर्म्मकालानुरूपेण मूल्यार्द्धेन वा विमुच्येत।" इति कौटिल्य:। दण्डदासध्वजाहृतदासौ पूर्व्वमेव व्याख्यातौ। अपि च "दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्ड: अन्यत्र स्वयं वादिभ्य:।" इति कौटिल्य:। यदि कश्चित् प्रव्रज्यां स्वीकृत्य पुन: संसारे निवर्त्तेत तदा स आमरणं राज्ञो दास्यं कुर्य्यात्। तथाच विष्णुसंहितायां "त्यक्तप्रव्रज्यो राज्ञो दास्यं कुर्य्यात्।" (विष्णु ५।१५१) याज्ञवल्क्योऽपि "प्रव्रज्यावसितो राज्ञो दासस्त्वामरणान्तिक:।" इत्याह (याज्ञ संविद् १८३)।

13　　1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथेदानीं गृहभृत्यानां दायव्यवहारः पुत्रादिव्यवहारश्च वक्ष्यते। क्रीतदासस्याहितकदासस्य च दासभावात् पूर्व्वोत्पन्नः पुत्रः अदासः स्यात्। "आत्मविक्रयिणः प्रजामार्य्यां विद्यात्" इति कौटिल्यः। उद्वाहतत्त्वे स्मार्त्तमहामहोपाध्यायरघुनन्दनधृतं वक्ष्यमाणं कात्यायन वचनं दृश्यते—तद् यथा

दासेनोढ़ा त्वदासी या सापि दासीत्वमाप्नुयात्।
यस्माद् भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्मतः॥ इति

अत्र दासपदं "स्वत्वास्पदीभूतदासपरमिति" रघुनन्दनः। तथाच दासपदस्य सप्रतियौगिकत्वात् सोमयागे श्रूयमाणस्य "पदपांशुना यूपमनक्ति सप्तमं पदं गृह्णाती"ति मन्त्रवर्णस्य पदशब्देन यथा "उपस्थितत्वायोगात्" इति सूत्रानुसारेण तत्रोपहितायाः सोममूल्य-भूतायाः पिङ्गलाक्ष्याः एकहायन्याः अरुणायाः गोरेव पदमभिधीयते अत्रापि तद्वत् "यो यस्य दासस्तेन तद्दास्यपि परिणीता तस्य दासी भवती"ति रघुनन्दनस्याशयः। अपि च तत्रैव स्मार्त्तभट्टाचार्य्येणोक्तम् —"दासी च द्विविधा—कस्यापि न दासी, अन्यस्य दासी वा। तत्र पूर्व्वा सर्व्वथैव दासी, परा तत्प्रभोरनुमत्या दासी, तदनुमत्या न दासी, न वा तत्पतिः कन्येश्वरस्य वड़वाकृतो दासस्तत्तन्त्रत्वात्।" अर्थात् "अदासी दासपरिणीता दासस्वामिनो दासी स्यात्। श्यामो रामस्य दासः वामा कस्यापि न दासी, श्यामेन परिणीता वामा रामस्य दासत्वं कुर्य्यात्। अन्यदासी अन्यदासपरिणीता स्वस्वामिनो-ऽनुमत्या परिणेतृस्वामिनो दासत्वं कुर्य्यात्। श्यामा रामस्य दासी, माधवो देवस्य दासः, माधवेन श्यामा परिणीता। चेत् रामः अनुमन्येत तदैव श्यामा देवदत्तस्य दासत्वं कुर्य्यादन्यथा न। माधवः अपि वड़वादासो भूत्वा रामस्य दासत्वं न कुर्य्यात् यतः विवाहात् प्रागेव स देवदत्तस्य दास आसीत्। वड़वा दासस्तु "वड़वा दासी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया कृत:, तल्लोभात् अङ्गीकृत्य दास्य इत्यर्थ:" इति रत्नाकर: । अपि च बृहस्पति:—

यो भुङ्क्ते परदासीन्तु स ज्ञेयो वड़वा कृत: ।
कर्म्म तत्स्वामिन: कुर्य्यात् यथान्ये न भृती नर: ॥

तत् स्वामिनो दासीश्वरस्य । तदपत्य तयोरपत्यं स्वामिनोर्विभागम् इति रघुनन्दन: ।

गृहस्थितदासीगर्भजात: पुत्र: प्रभोरेव भवेत् । अर्थात् सोऽपि गृहस्वामिनो दास्यमेव कुर्य्यात् । अयमेव गृहज इत्युच्यते । यस्याय-मौरसपुत्रस्तस्यास्मिन् परक्षेत्रोप्तबीजजातस्य इ-ानधिकार: । तथाच मनुरपि—

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ।
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषीणाञ्च विज्ञेय: प्रसवं प्रति ॥ मनु ९।५४-५५)

चेत् तादृशपुत्र: अशूद्रेण भर्त्रा शूद्रदास्यां जायेत तदा पित्र्य रिक्थहर: न भवेत् । अत्र दासीपदं परोढ़ापरं तस्यामनेन जातो दासीभर्त्तुर्न-बीजभर्त्तुरिति रघुनन्दन:, तथाच मनु:—

कानीनश्च सहोढ़श्च क्रीत: पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड़दायादबान्धवा: ॥ (मनु ९।१६०)

परं तदा सा दासी दास्यान्मुक्तिं लभेत, तथाच कौटिल्य:—"स्वामिन-स्तस्यां दास्यां जातं समातृकमदासं विद्यात् । गृह्या चे। कुट,म्बार्थ-चिन्तनी माता भ्राता भगिनी चास्या अदासा: स्यु: ।" परमस्य शूद्रेण जातस्तथाविध: पुत्र: पितु: सकामस्य रिक्थहरो भवेत् मृतेतु पितरि तस्य पत्नीगर्भजातै: पुत्रै: रिक्थभाग् भवेत् । विशेषस्त्वयं अनेऽस्य पुत्रा: सवर्णाभावे यद्धनं दास्यन्ति अस्मै कार्द्धमिति । तथाच याज्ञवल्क्य:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत्।
मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनः ॥
अभ्रातृको हरेत् सर्व्वं दुहितॄणां सुतादृते ॥ (याज्ञ १३७) इत्यादि

कश्चिद्दासः चेत् स्वामिनः कार्य्योपघातमकृत्वा स्वयं केनाप्युपायेन किञ्चिदर्जयति तदा तदर्थः तस्यैव। स तस्य पित्र्यं दायञ्च हरेत्, परम्मृते दासे तस्य दायादाः एव मृतस्य द्रव्याधिकारिणः भवन्ति, तेषामभावे दासद्रव्याणि स्वामिनमेव गच्छेयुः। तथाच कौटिल्यः

"आत्माधिगतं स्वामिकर्म्माविरुद्धं लभेत। पित्र्यं च दायम्।"

दासद्रव्यस्य ज्ञातयो दायादाः। तेषामभावे स्वामी॥

न किल कदाचित् प्रभुः दासं यथेच्छं पीड़यितुं तेन यथेच्छं कर्म्म कारयितुं वाशक्नोत्। तथाच कृते सति तेषां मूल्यनाशापत्तेः। अर्थात् ये स्वामिनो भृत्यान् दासान् वा यथेच्छं व्यवहरन्ति विनैव निष्क्रयदानं ते भृत्या दासा वा तत् स्वामिसकाशात् मुक्तिं लभेरन्। तथाच - प्रेत विण्मूत्रोच्छिष्टग्राहणमाहितस्य नग्नातापनं, दण्डप्रेषणमतिक्रमणञ्च स्त्रीणां मूल्यनाशकरम्। धात्रीपरिचारिकार्द्धसीतिकोपचारिकाणां च मोक्षकरम्। सिद्धमुपचारकस्याभिप्रजातस्य अपक्रमणम्।" इति कौटिल्यो दासकल्पप्रकरणे। अत्र नग्नस्तापनं नग्नायाः तस लौहादिभिः पीड़नमिति बोद्धव्यम् अन्यत् सर्व्वं सुविशदम तथाचाग्निपुराणेऽपि

भार्य्या पुत्राश्च दासाश्च शिष्यो भ्राता च सोदरः।
कृतापराधास्ताड्याः स्युः रज्ज्वा वेणुदलेन वा॥
पृष्ठे—न मस्तके हन्यात्— (अग्नि २२७।४७)

विनैव सम्मतिं स्वामी स्वगृहस्थितां दासीं यथेच्छमुपभोक्तुमपि न प्राभवत् तथाच कौटिल्यः दासकल्पे

"धात्रीमाहितिकां वाकामां स्ववशामधिगच्छतः पूर्वः साहसदण्डः। परवशां मध्यमः। कन्यामाहितिकां वा स्वयमन्येन वा दूषयतः मूल्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाशः शुल्कं तद्द्विगुणश्च दण्डः।" इति

अथ समयबद्धकर्म्मकराणां सम्भूयसमुत्थितानाञ्च व्यवहारः वक्ष्यते। कर्म्मकरः—"यथासम्भाषितं वेतनं लभेत। कर्म्मकालानुरूपम् असम्भाषितवेतनम्। कर्म्मकरस्य कर्म्मसम्बन्धमासन्ना विद्युः।" इति कौटिल्यः। याज्ञवल्क्यस्त्वाह वेतनदानप्रकरणे

दाप्यातु दशमं भागं वाणिज्यपशुशस्यतः।

अनिश्चित्य भृतिं यस्तु कारयेत स महीक्षिता॥ (या १९७)

कौटिल्योऽपि—"कर्षकः शस्यानां, गोपालकः सर्पिषां वैदेहकः पण्यानामात्मना व्यवहृतानां दशभागमसम्भाषितवेतनो लभेत।" इत्याह, अपि च— "कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिराशाकारिकवर्गस्तु यथान्यस्तद्विधः कुर्य्यात्, यथा वा कुशलाः कल्पयेयुः, तथा वेतनं लभेत। साक्षिप्रत्ययमेव स्यात्। साक्षिणामभावे यतः कर्म्म ततोऽनुयुञ्जीत।" इति कौटिल्यः। स्वामिभृत्ययोरन्यतरस्य संविद्व्यतिक्रमे तु यथाह विष्णुः "भृतकश्चापूर्णकाले भृतिं त्यजन् सकलमेव मूल्यं दद्यात्। राज्ञे च पणशतं दद्यात्। तद्दोषेण यद् विनश्येत् तत् स्वामिने। अन्यत्र दैवोपघातात्। स्वामी चेद् भृतकमपूर्णे काले जह्यात् तस्य सर्व्वं मूल्यं दद्यात्। पणशतञ्च राजनि अन्यत्र भृतकदोषात्।" (विष्णु ५।१५२-५६)

गृहीतवेतनागृहीतवेतनयोः कर्म्मासम्पादने दण्डमाह याज्ञवल्क्यः "गृहीतवेतनकर्म्म त्यजन् द्विगुणमावहेत्। अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः। (या १९६) कौटिल्योऽपि "गृहीत्वा वेतनं कर्म्म अकुर्व्वतो भृतकस्य द्वादशपणो दण्डः। संरोधश्चाकरणात्। अत्र संरोधः कारारोधः। परन्तु "अशक्तः कुत्सिते कर्म्मणि व्याधौ व्यसने वा अनुशयं लभेत। परेण वा कारयितुम्। तस्य व्ययं कर्म्मणा लभेत।" इत्यपि कौटिल्यः। चेत् प्रभुः भृत्येन कर्म्म कारयित्वा वेतनं न ददाति तदा तस्य "वेतनादाने दशबन्धो दण्डः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट्पणो वा ।" इति कौटिल्यः अत्र दशबन्धः दशदिनानि कारारोध
भृत्येन प्रभुद्रव्ये ऽपव्ययिते तस्य "अपव्ययमाने द्वादशपणो दण्डः, पञ्च-
बन्धो वा" इति कौटिल्यः ।

अपि च "भर्त्तुरकारयतो भृतकस्याकुर्व्वतो वा द्वादशपणो दण्डः
कर्म्मनिष्ठापने भर्त्तुरन्यत्र गृहीतवेतनः नासकामः कुर्य्यात् ।" इत्य
कौटिल्यः । अर्थात् कश्चित् चेत् कस्मैचित् कार्य्यार्थं किञ्चित् वेत
दत्वा निर्द्दिष्टकालातिक्रमे अन्यं तत्कर्म्मणि नियोजयति तदा गृहीत
वेतनः इच्छानुसारेण तत् कुर्य्यात् न कुर्य्याद्वा ।

"उपस्थितमकारयतः कृतमेव विद्यात्" इत्याचार्य्याः
कौटिल्यस्तु तत्र समर्थयति तन्मते "कृतस्य वेतनं, नाकृतस्यास्ति
स चेदल्पमपि कारयित्वा न कारयेत् । कृतमेवास्य विद्यात् ।" यं
भृत्यः स्वस्यानवधानतया प्रभोः द्रव्यनाशादिकमनर्थकमर्थव्यय
करोति तत्सम्बन्धे याज्ञवल्क्येनोक्तम्—

देशं कालञ्च योऽतीयाल्लाभं कुर्य्याच्च योऽन्यथा ।
तत्र स्यात् स्वामिनश्छन्दोऽधिकं देयं कृतेऽधिके ॥ (या १८८)

कौटिल्योऽपि "देशकालातिपातने कर्म्मणामन्यथाकरणे वा न सकामः
कृतमनुमन्येत ।" परं याज्ञवल्क्यो यत्राधिके कृते अधिकं देयमित्याह
तत्र कौटिल्यसम्मतिर्नास्ति, तथा च कौटिल्यः सम्भाषितादधिकक्रियायां
प्रयासान् मोघं कुर्य्यात् ।" इति । अर्थात् यः भर्त्तृनिर्द्दिष्टकार्य्यादधिकं
करोति भर्त्ता तस्य भृतस्याधिककार्य्यं कृत्वा वेतनमपि समधिकं
लभेयमिति प्रयासं विफलं कुर्य्यात् अधिककृत्यार्थं तस्मै किमपि
न दद्यात्, याज्ञवल्क्यस्यापि छन्दतः देयमित्ययमभिप्रायः वेदितव्यः ।
अधुना सम्भूयकर्म्मकारकाणां सङ्घभृतानां व्यवहारो वक्ष्यते । सम्भूय-
कर्म्म कुर्व्वतां तु

यो यावत् कुरुते कर्म्म तावत्तस्य तु वेतनम् ।
उभयोरप्यसाध्यश्चेत् साध्यं कुर्य्याद् यथाश्रुतम् ॥ (या १८८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौटिल्यस्तु "सङ्घभृताः सम्भूय समुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन्। कर्षकवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः। पुरुषोपस्थाने समग्रांशं दद्युः। संसिद्धे तु छृतपण्ये सन्नस्य तदानीमेव प्रत्यंशं दद्युः। सामान्या हि पथि सिद्धिश्चासिद्धिश्च" इत्याह। पुनः स एव "तैन सङ्घभृता व्याख्याताः" इत्यारभ्य सम्भूय समुत्थानप्रकरणे आह,

"तेषामधि सप्तरात्रमासीत। ततोऽन्यमुपस्थापयेत्। कर्मनिष्पाकञ्च। न चानिवेद्य भर्त्तुः सङ्घः किञ्चित् परिहरेत्, अपनयेद् वा। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः। सङ्घेन परिहृतस्यार्द्धदण्डः।" इति अत्र तेषामिति सङ्घभृतानाम्। अधिरपेक्षाकालः। याजकानां तु सम्बन्धे इयं व्यवस्था कृता कौटिल्येन तद् यथा—

"याजकाः स्वप्रचारद्रव्यवर्जं यथासम्भाषितवेतनं समं वा विभजेरन्। अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्ध्वं याजकः सन्नः पञ्चममंशं लभेत। सोमविक्रयादूर्ध्वं चतुर्थमंशम्। मध्यमोपसदः प्रवर्ग्योद्वासनादूर्द्ध्वं द्वितीयमंशम्। मयादूर्ध्वमर्ध्वमंशम्। सुत्ये प्रातः सवनादूर्द्ध्वं पादोनमंशम्। माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत। नीता हि दक्षिणा भवति। बृहस्पतिः सवनवर्जं प्रतिसवनं हि दक्षिणा-दीयते तेनाहर्गणदक्षिणा व्याख्याताः। सन्नानामादशाहोरात्राच्छेषभृताः कर्म कुर्य्युः। अन्ये वा स्वप्रत्ययाः। कर्मण्यसमाप्ते तु यजमानः सीदेत्। ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः। असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वः साहसो दण्डः।" इति। अत्र स्वप्रचारद्रव्यन्तु होतृपोतृप्रभृतीनां विशिष्टांशरूपम्। सोमविक्रयः सोमयागादौ प्रसिद्धः। अहर्गणप्रवर्ग्यादिशब्दानां तात्पर्य्यन्तु मन्त्रकाण्डेषु ऐतरेयब्राह्मणादिषु च स्पष्टम। भृत्यस्यानवधानतादिदोषभावे प्रभुद्रव्यपरिक्षयेऽपि तस्मै दण्डो न विहितः परम् अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः। इति याज्ञवल्क्योक्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहाद्यर्थं प्रस्थानोपयुक्तकार्य्यकरणस्वीकृतस्य तदकरणे दण्डमाह महर्षियाज्ञवल्क्य: ।

"प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ।
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि सन्त्यजन् ॥
भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च ॥"

(या।२००।२०१)

कौटिल्यस्तु, प्रक्रान्ते तु कर्म्मणि स्वस्थस्यापक्रमतो द्वादशपणो दण्ड: । न च प्राकाम्यमपक्रमणे ॥" इत्याह । भृतस्य चौरदोषादिके जाते "चोरं त्वभयपूर्वं कर्म्मण: प्रत्यंशेन ग्राहयेद्दद्यात् प्रत्यंशमभयश्च । पुन:स्तेये प्रवासनमन्यत्रगमनं च, महापराधे तु दूष्यवदाचरेत् ॥" इति कौटिल्य: ।

"क्षत्रविट् शूद्रदायादा ये स्युर्व्विप्रस्य सेवका: ।
तेषामशेषं विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
षड्रात्रं वा त्रिरात्रं वाप्येकरात्रक्रमेण तु ॥
वैश्यक्षत्रियविप्राणां शूद्रेष्वाशौचमेव तु ।
अर्द्धमासेऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवा: ॥ इत्यादि

(उशन: संहिता । ३५।३७)

तथाच— -

कारव: शिल्पिनो वैद्यदासीदासास्तथैव च ।
राजानो राजभृत्याश्च सद्य:शौचा: प्रकीर्त्तिता: ॥

उशन: संहिता । ५५)

इत्यादि उशन: संहितायां—विस्तरतो द्रष्टव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

लेखकः—श्री········

तदुपसर्पामि प्रक्षतकृत्यनिवेदनाय, (किञ्चित् गत्वा पुनः प्रतिनिवृत्य) अये एवं विमुग्धोऽस्मि, अदृष्टपुरुषान्तरमन्तःपुरमिदं मद्दर्शनेव मामप्रत्यमिज्ञातपूर्व्वमासाद्य भीतभीतं भविष्यति। तदलममेन व्यापारेण, अन्तरालमास्थाय सम्यक्तया भावानुबन्धप्रभृतिकमस्या निरूपयामि, (अन्तरालं गत्वा पुनः प्रतिनिवृत्य) अहो विभ्रमः! किमिवं शङ्कामङ्कुसमाकुलोऽस्मि। दैवप्रसादेन लब्धान्तर्धानशक्तिः अदृश्यस्तावदनयोःमितास्याम्, तदेवं करोमि, (एकान्ते स्थितः)।

दम—सखि कल्पलते, सुसञ्चितानि पर्य्याप्तानि पूजाकुसुमानि, तदेहि यावदम्बिकागृहं गत्वा तदीयां पूजां निर्वर्त्तयावः। (वामाक्षिस्पन्दनं सूचयित्वा) अये वामं मे लोचनं परिस्फुरति, किमत्र अभिमतं मे रुम्भवेत? अथवा अचिन्त्योपनिपातानि भवदृश्यभाविदैव विलसितानि भवन्ति।

कल्प—सखि, नैतावन्ति कुसुमानि पर्य्याप्तानि, तदपराण्यपि समाहरावः।

दम—एवमस्तु। (कुसुमचयनं नाटयतः)।

नलः—(आत्मगतं) अहो निर्बन्धः!

चित्तं मनोरथफलत्वरितं यदस्याः,
कालात्ययं न सहते कुसुमोच्चयेऽपि।
अस्ताद्रिपङ्कजकुलं तपनानुरक्तं
पद्माकरे दिवसशेषमवैति दीर्घम्।

तत् किमेष निर्बन्धो मामेवाधिकरोति?

कल्प—सखि, एष नल—(इत्यर्धोक्ते)।

दम—कुत्र कुत्र सः? (इतस्ततः पश्यति)।

कल्प—अयि, एकनिष्ठे, कथयामि,···एष नलवनसङ्गतो वकुल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुसुमालङ्कृतो भूभागः, तदेहि ततः कुसुमानि सञ्चिनुवः। (आत्मगतं) अहो अस्या औत्सुक्यम्! तृणनामनि श्रुतेऽपि स्वदयितमाशङ्कमाना त्वरामाश्रयति।

दम—(लज्जां नाटयन्ती) तथा क्रियताम्। (परिक्रामति)

नलः— अहो श्रोत्रामृतं वचनमस्याः,
वाङ्मात्रमाधुर्य्यविशेषहेतो
श्चित्तं ममोत्सर्पति मोहराशिम्।
तत्रापि यन्मामधिकृत्य मुग्धा,
को वास्ति तस्मात् परतो विनोदः।

यत् सत्यम् एतेन प्रियतमाप्रियवचनेन विमूढ़ एवास्मि, अवितथमेव हैमहंसभाषितं यथा भैमी मुग्धेति। तृषितलोचन, अपि अद्यापि न पूर्णस्ते मनोरथः? कियानेव ते समयो गतो विषयान्तरविनिवृत्तस्य तपस्यामिवाचरतस्तपस्विनः। तस्यैवाद्य परिणमति परमोपादेयः फलराशिः, तत् किमिदानीमपि आत्मानं न बहुमन्यसे? हृदय, तव तु एतावता परितोषः। मूढ़, अलं ते विकारेण, स्थैर्य्यमवलम्बस्व, विकारातिशयमासाद्य मा तावदेष निक्षिप्यतामयशःपङ्के, भगवन् मन्मथ, अनङ्गोऽपि एवं माद्यसि, तदयुक्तमेव विहितं त्रिलोचनेन, तव तादृशं देहं भस्ममयं कृतवता, (संवरणं नाटयित्वा) एषः अधीरोऽस्मि। धिक् प्रमादः! यथा तथा विकलीभवति मे स्थैर्य्यप्रयत्नः, प्रतिपदमेव पदमादधाति हृदये दमयन्तीविषया मनोवृत्तिः। तत् कीदृशोऽस्मि,

धैर्य्याभिमानो विलयं गतो मे,
कामः प्रकामं तनुतेऽधिकारम्।
लज्जा समाक्रामति विक्रमेण,
स्वान्तं गतं मे दुरितं प्रतिष्ठाम्।

तदास्तामिदं सर्व्वमेव, यथा तथा वा भवतु, आगमनप्रयोजनमिदानीं साधयितव्यम्, तदत्र कीदृशी सरणिरनुसर्त्तव्या? भयव्याकुला हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजान्तःपुरचारिण्यो भवन्ति, विशेषेण च एषा मुग्धा, तत्रालमस्मि सहसैव एतयोरात्मानं प्रकाशयितुम्, अतः प्रतिपाल्यतामवसर एवास्याः! (स्थितः)

दम—अलमद्यापि प्रतीक्षया, सत्वरमनुष्ठीयतामनुष्ठातव्यम्।

नलः—अये, किमिति भाषितमस्या मन्मानसमनुवर्त्तते, तत् किमिवेदम्?

कल्प—(चीयमानं कुसुमं विचित्य) असंगृहीतेषु अनुष्ठानोपकरणेषु किमेवं ब्रवीषि?

दम—सखि, त्वरते मे हृदयं सर्व्वार्थनिष्पादनक्षमाया अम्बिकायाः समर्च्चनाय। अहं हि जानामि यावच्छीघ्रं समर्च्चनमम्बिकायाः तावच्छीघ्रमेव मनोरथलाभ इति।

कल्प—सत्यं सुतरामुत्कण्ठितासि, एवमेव हृदयम् उत्कण्ठितामाम, तदिदानीं पर्य्याप्तानि कुसुमानि, अथ दृश्यमानात् कमलसरोवरात् कमलानि, श्रीफलपादपाच्च करप्राप्यस्तवकात् फलालङ्कारशोभिताच्च स्निग्धरूपाणि पत्राणि सञ्चित्य न चिरादेव देव्या अम्बिकाया गृहं गच्छाव:, मन्ये तावता कालेन महादेव्या विसृष्टाः परिजनास्तत्र अस्मदपेक्षां कुर्व्वते इति। तदेहि।

दम—तथा। (परिक्रामतः)

कल्प—सखि, इदमदूरे कमलसरः, अहो कीदृशानि शोभन्ते विकचकमलानि, एतानि आत्मनां देवीपूजोपकरणतां विदित्वेव परितः स्मयन्ते। तदेहि यावदिमानि कमलानि समासादयावः।

नलः—एष एव मे समयः स्वमात्मानं परिदर्शयितुम्, इतो नातिसन्निहितमन्तःपुरम्, येन अस्माकमन्योन्यसंवादो जनान्तरं नैव संस्पृशेत्, तदिदानीं देवतावरप्रसादेन केवलमात्मा मे दमयन्तीदृष्टिमेव नातिवर्त्तताम्।

दम—(सहसापसृत्य) सखि, अपि न लक्षयसि?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्प—लक्षयाम्येव।

दम—तत् किमभीता यथापूर्व्वमवतिष्ठसे ?

कल्प—यतो नाहमाक्रान्ता मदनचाण्डालेन।

दम—असम्बद्धभाषिणि, किमेवमसम्बद्धं प्रलपसि ?

कल्प—कथमसम्बद्धं नाम, अपि त्वमपि न जानासि, यथा मदनचाण्डालग्रस्तानामिव कमलानि, कमलदलानि, कुसुमानि, सुधाकरकिरणाः, मलयमारुतप्रवाहाः, भ्रमरगुञ्जनानि, कोकिलकाकलीप्रभृतयश्च तापाय परिकल्पन्त इति, न तु स्वस्थे स्थितानामपि।

दम—मुग्धे नाहं कमलादिशोभामधिकृत्य तथा ब्रवीमि।

कल्प—किमन्यदितो रमणीयतरमस्मिन् यद् भवत्या मदनपरवशाया भीतिमुत्पादयेत् ?

दम—रमणीयतरं न वा तत्र न विशेषज्ञास्मि, किन्तु पश्य नातिदूरे बालसहकारतरुं समया पुरुष इवायं दृश्यते, तत् कथमत्र नाहशस्य सम्भावनापि।

कल्प—(दृष्ट्वा विस्मयं रूपयित्वा) अहो एवं सम्वृत्तासि ? अद्य न केवलमन्तःकरणे वहिरपि सर्व्वं पुरुषमयं वीक्षसे ? कुत्र वा पुरुषो भवत्याः ?

दम—(नलदिशमङ्गुल्या निर्द्दिश्य) सखि, अलं विकल्पेन, एष खलु दृश्यते। नाहं मिथ्या वदामि, अपि अहमुन्मत्तास्मि, येनैवमवधारयसि ?

कल्प—उन्मत्ता एव, अन्यथा शून्येऽपि सहकारतले किमेवं पुरुषशङ्कामुपलभसे। इदम् अन्तःपुरं परिरक्षन्ति परःशताः सावधानाः प्रहरिणः, अत्र नास्ति प्रवेशः कथञ्चन पतङ्गानामपि का कथा पुरुषाणाम् ? तदलमद्य समुत्कण्ठाविडम्बनाप्रसूतेन विभ्रमेण।

दम—(आत्मगतं) अये सत् किमहं महति विभ्रमपङ्के पतितोऽस्मि,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यथा कथं कल्पलता तमिमं न वीक्षेत, (प्रकाशम्) सखि, मुग्धास्मि प्रकृतवृत्ते।

नलः—(आत्मगतं) अहो सन्देहगता दमयन्ती दुःखमास्ते, तदस्याः सख्या अपि दृष्टिमनुवर्त्ते। देवप्रसादात् दमयन्तीसख्या अपि दृष्टिमात्मा मे नातिवर्त्तताम्।

कल्प—(दृष्ट्वा सहसा अपसरति) सखि, दमयन्ति, सत्यमेव ब्रवीषि, पश्याम्येनमपूर्व्वं पुरुषमिदानीम्। तत् कोऽयं कथं वास्य शुद्धान्तप्रवेशः ?

दम—सखि, महदिदं सन्देहपदं वर्त्तते, दूरे च अस्मत्परिजनाः, तदेहि पर्य्याप्तमेतावद्भिरेव कुसुमैरम्बिकापूजनकृत्यम्, अलमनन्तरं कमलसञ्चयेन, यावदितः सुदूरमपसरावः। (इत्यपसरतः)

नलः—भद्रे, अलमसम्भ्रान्तो भयेन, नाहं मायावी, परं वृत्तशेषमनन्तरं कथयामि, परिश्रान्तोऽस्मि, एष भवत्योरातिथ्यमभिलषामि, तदिदानीं क्रियतामादौ यथोचितमतिथिसत्कारः।

कल्प—सखि, दमयन्ति, अशक्यमिदमिदानीं परिहातुम्, यतः खलु "आतिथ्यं परमो धर्म्म" इति शास्त्रविहितः संसारिणां मार्गः। तदनुष्ठीयतामनुष्ठेयम्। (नलं प्रति) महाभाग, इदं सुमार्जितं तीरतरुनिच्छिन्नकुसुमालङ्कारसुभगं - मलयानिलोपनीजितं शीतलं, शिलातलं, तदत्र उपविश्य परिश्रमं विनोदयतु महाभागः।

दम - (शृङ्गारलज्जां नाटयति)

कल्प - सखि, किमेवमुदासीनेव प्रतिभासि, समाहर पादोदकमस्य अहमित एव दूर्व्वापुष्पफलानि समाहरामि।

दम (मन्दं गच्छन्ती) अये, को नामायं कन्दर्पसमानरूपः पुरुषः अपि यथाहं चिन्तयामि तथायं स्यात् ?

नलः भवति, अलमनया पर्य्याकुलतया, कृतमातिथ्यं मे सरोवरनीरसम्पर्कशीतलेन शरीरस्पर्शिना एतेन मलयानिलेन, तदिदानीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदीये वक्तव्ये भवत्योरवधानं दीयमानमभ्यर्थये।

कल्प—कथयतु महाभागः दत्तावधाने स्वः।

दम—(आत्मगतम्) रमणीयमस्य चारित्रं, मन्ये सर्व्वथायं निषध-नाथमनुकुर्व्वीत।

नलः—इदमादौ पृच्छामि, अपि इयमेव विदर्भराजनन्दिनी, भवती च सखी तस्याः?

कल्प—सुष्ठु, ज्ञातं महाभागेन।

दम—(शृङ्गारलज्जां नाटयति)

नलः—कथमेतावन्ति कुसुमानि भवतीभ्यां संगृह्यन्ते इति न चेद्रहस्यं श्रोतुमिच्छामि।

कल्प—आगामिदिवसे सख्या मे स्वयंवरमहोत्सव इति अद्य अम्बिकायाः पूजनार्थम्।

दम—प्रगल्भे, अम्बिकायाः पूजनार्थमित्येतावन्मात्रमेव न किं पर्य्याप्तमुत्तरदाने? कथं यावदेव विवृणोषि?

नलः—अथ भवत्यौ सहसा मामिह पुरुषमदृष्टपूर्व्वमालोक्य नूनं विस्मयं प्राप्ते?

कल्प—महाभाग, अथकिम्।

नलः—अलमत्र विस्मयातिशयेन।

कल्प—कथमिव?

नलः—श्रूयताम्, अहं प्रहितः पुरन्दरहुताशवरुणपितृपतिभिर्देवैः त्वदीयां सखीं प्रति दूतरूपेण। तैरेव च शुद्धान्तप्रवेशमनुकूलयितु मन्तर्द्धिविद्या मे दत्ता। अत एव आदावदृश्यः शुद्धान्तं प्रविश्य अनन्तरमिच्छामात्रेण भवत्योरक्षिगोचरतां प्राप्तोऽस्मि।

उभे—भगवन् अभिवादये। भवति मानुषबुद्ध्या कृतमपराधं कृपया आवयोः क्षन्तुमर्हसि। (प्रणमतः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—भद्रे, अलमनया मयि दैवतबुद्ध्या, नाहं देवः, परं देवानां दूतरूपेणोपस्थितो मानुष एवास्मि। तदिदानीं देवादेशमाकर्णयितुमर्हसि।

उभे किममी ममाज्ञापयन्ति?

नलः—इदं विज्ञापयन्ति, यथा—

कालादुदञ्चोः प्रभृति मातिशयं भवत्याम्,
रागो महान् भवति मानसमन्दिरे नः।
अस्माकमद्य न ततोऽमृतलम्भिरास्ते,
त्वत्प्राप्तिरेव परमा प्रतिभाति बाढ़म्॥

दम—(अक्षिभङ्ग्या सखीम् उत्तरदानाय नियोजयति)

कल्प—महाभाग, प्रियसखी मे विदर्भराजनन्दिनी देवतानामीदृशं भणितं परमप्रसादमेव मन्यते। श्रुतञ्च तथा तथा बहुश एव दूतीजनानां मुखनिःसृतं वस्तु। नूनमिदं शुभादृष्टमेव निदानयति यदहो देवतानामीदृशं करुणापरत्वं नाम। को वा न तस्मै स्पृहयति?

दम—(जनान्तिकम्) असम्बद्धभाषिणि किमिदं ब्रवीषि? अपि मुग्धासि त्वं कारणान्तरेण?

कल्प—सखि, अलं कल्पलतायाः मनोरथविपरीतप्रदानाशङ्कया, विरम्यताम्, आलोक्यतामधुना कृत्यजातं ते सखीजनस्य।

नलः—सूक्तमिदं वैदर्भीप्रियसखीजनोचितम्। को वा देवानां महिमानं न जानीते। तद् भद्रे, तथा प्रयतस्व यथा आगामिदिवसे स्वयंवरसभामुपगतेषु देवदानवगन्धर्वयक्षराक्षसनागनरेषु अन्येषु च रसिकभावं गतेषु सर्वतः समुत्कर्षेण भवत्याः प्रियसखी पुरन्दरहुताशनपितृपतिवरुणानामेकतमं वरणस्रजा बहुमन्येत, तेन हि देवताप्रीतिसम्पादनहेतुकः परमपुण्यलाभः, स्वस्य च सुतरां सुखसम्भोग इति द्वयमेव काम्यभूतं निष्पद्येत। तदियं शुभैव ते वचनपरिपाटी। (हर्षं नाटयति, दीर्घञ्च निश्वसिति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्प—महाभाग, प्रियसखी मे व्याहरति, यत् जानामि देवाना-मीदृशं समुत्कर्षं, किन्तु अन्यत्र संक्रान्तहृदया कथमन्यत्र वरणस्रज-मर्पयेयम् ? शास्त्रविपरीतमिदमार्य्यनारीणाम्, जानन्त्ये व सर्व्वं सर्व्व-मनोरथदर्शिनो देवास्तथापि किमेवं मामद्य विडम्बयन्तीति ?

नलः—भद्रे सर्व्वमनोरथदर्शिनो देवा इत्यत्र को वा सन्देहः ? तथापि स्वाभिलषितलाभाय यदिमां पुनः पुनरेव याचन्ते तत्र प्रभावः कामस्यैव । तत् परिपूरयतु ते प्रियसखी देवानां मनोरथम्। सफलतामेतु वसुधायां तस्या नारीजन्म । पश्य

अनन्तजन्मार्जितपुण्यसम्पदा तपस्विनो विभ्रति यत्र कामनाम् ।
स्वर्गः स एवाद्य करे भवत्सखीं स्वयं समाकर्षति किं निवर्त्तते ॥

दम—सखि, अभिवाद्य महाभागं देवप्रतिनिधिं विज्ञापयस्व, काहं कामिनी देवानात्मना पर्य्युपासितुम् ? यदि मे दयावन्तो देवाः तदभ्यर्थये कृताञ्जलिरस्मि यथा दीयतां मयि करुणया मनोरथ-फलमिति ।

नलः—राजनन्दिनि, सत्यमेव दयावन्तस्त्वयि देवाः, अन्यथा कथं सर्व्वसुखसारं स्वर्गमपि अनुभावयितुमयं प्रयत्नः स्यात् ? तद् भद्रे न केवलं भवतीं प्रति करुणैव परन्तु भवतीमधिकृत्य नित्यमेव तथा तानुन्मादयति भगवान् मानसजन्मा यथा त्वदीयलाभमन्तरेण नास्ति तेषामन्यो मानसशान्तेरभ्युपायः, तदलं निर्ब्बन्धातिशयेन ।

दम—सखि, जानामि, यत् मां प्रति सुतरामनुरज्यन्ति पुरन्दरादयो देवाः, तथापि यदि तेषामन्यतमं वृणुयाम्, तेनापि परेषां त्रयाणां न मानसतोषः, तथा कृतेऽपि यदि न शक्यो देवकोपः परिहर्त्तुं तदा कथं मया परिह्रीयतां नारीधर्म्मः ।

कल्प—महाभाग, युज्यते सूक्तमिदं प्रियसख्याः, तदत्र कीदृश-मुत्तरमुपादीयताम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषद: अष्टमवार्षिकमहोत्सव:

वर्त्तमानवर्षीयसौराषाढ़स्य द्वाविंशदिवसे सौरवासरे सायं पञ्चवटिकायां 'यूनिभार्सिटी-इन्ष्टिटिउट्' भवने परिषद: अष्टमवार्षिकमहोत्सव: सुसम्पादित: समजनि परिषत्परिचालकानां सुमहता प्रयत्नप्रबन्धेन। तत्र हि महोत्सवे नानाशास्त्रनिष्णातमतय: प्राचीनमहर्षिकल्पा भट्टपल्लीप्रभवा भारतवर्षरत्नभूता: सुगृहीतनामपदा: श्रीमन्त: पञ्चाननतर्करत्नपादा: सभाधिपत्यमत्यनुग्रहेण समधिगत्य प्रत्यायितवन्त: सत्यमेव गीर्व्वाणवाण्या धन्यतामन्यभाषाविलक्षणलक्षणाम् समक्षमक्षिमताम।

तत्रादौ सम्मिलिते सानुग्रहमाग्रहवति सज्जनसम्प्रदाये, प्रस्तुते महामहोपाध्यायश्रीप्रमथनाथतर्कभूषणपादै: परिषद: स्थायिसभापतिभि: सादरं तर्करत्नपादानां प्रकृतमहोत्सवसभाधिवेशनाधिपत्ये, समर्थिते च महामहोपाध्यायश्रीमत्पद्मनाथविद्याविनोदभट्टाचार्य्यमहाभागैस्तत्प्रस्तावे, समनुगृह्णीते च पूज्यपादैस्तर्करत्नपादै: सुखासिकया सभापतिपदे प्रचारितं सुचारुविचारसङ्कारं परिषद: अष्टमवार्षिककार्य्यविवरणं तदन्यतरसम्पादकै: श्रीमत्पशुपतिनाथशास्त्रिभट्टाचार्य्यै: एम्-ए-वि-एल्-पि-एइच्-डि, पदमानसम्मानितै:—येन परिषत् कृत्यकलापमालोचयतां सौमाजिकानां समुत्पन्न: परिषदि प्रभूततरगौरवविज्ञानसमुद्रेक:।

अथ परिषदो व्यतीते अष्टमसंवत्सरे परिषत्सदस्येष्वेषां श्रीयुक्तद्वारकानाथचक्रवर्त्तिनां तथा श्रीयुक्तमन्मथनाथमुखोपाध्यायानां कलिकाताप्रधानतमन्यायालये प्राड्विव.कपदलाभसम्मानात् श्रीयुक्तप्रभासचन्द्रमित्रमहोदयानां स्यर् इत्युपाधिपदप्राप्तिगौरवात् श्रीमताम् आशुतोषशास्त्रिमहाभागानां महामहोपाध्यायोपाधिपदमाननात् तथा श्रीयुक्तविमलाचरणलाहामहोदयानां पि-एइच-डि-सम्मानपदसमन्वयात् विहितं परिषदा सानन्दमभिनन्दनं वाचिताश्च विविधाभिनन्दन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धाः सुललितपद्यमया यथाक्रमं श्रीजानकीनाथसाहित्यशास्त्रि श्रीयोगेन्द्रमोहनविद्यारत्न,—श्रीकृष्णप्रसन्नतर्कवागीश,—श्रीदुर्गामोहन काव्यसांख्यपुराणतीर्थ एम् ए, श्रीवामाचरणकाव्यतीर्थमहाभागैः।

अथ सभापतिनिर्देशात् विश्वविद्यालयाध्यापकैः वेदान्तविशारद विरुदालङ्कृतैः श्रीमद्भिः अनन्तकृष्णशास्त्रिपादैः समावेदिते गीर्वाण वाङ्मयेन परिषदो भूतपूर्व्वसभापतीनां स्वर्गतानां महामहोपाध्याय कालीप्रसन्नविद्यारत्नभट्टाचार्य्याणां जनरञ्जनगुणवादे, प्रचारिते तथैव परिषदाचार्य्य-श्रीकालीपदतर्काचार्य्यैः परिषत्सदस्यभूता स्वर्गतानां जयचन्द्रसिद्धान्तभूषणमहाभागानां विविधप्रशस्तिपर्य्या तयोः स्मृतिरक्षणाय निरावरणीकृतं तैलचित्रयुगलं सभापतिपादैः तत्र प्रथमं चित्रं परिषदा भूतपूर्व्वस्थायिसभापतीनां शिष्यबान्धवादि कियन्तमर्थं संगृह्य निजकोषाच्च कियन्तमर्थमुत्सृज्य चित्रशिल्पि प्रवराणां श्रीमत्सुरेन्द्रनाथवाग्चीमहोदयानां सुतरामुदारतया स्वल्प व्ययेन तैरेव निर्म्मापितमास्ते। अपरञ्च कुमारटुलीवास्तव्यान सुगृहीतनामधेय-स्वर्गगतवैद्यप्रवर-निशिकान्तसेनकविरत्न-महोदयान सुयोग्यपुत्रैः श्रीकालीभूषणसेनकविराजवरैः सर्व्वथा निः व्ययेन कारयित्वा परिषदे समर्पितम्। प्रशस्तम्भावदित्थम्भूतगुणान महाजनस्मृतिरक्षणानुरागो लोकेषु।

ततो यथाकालं विज्ञापितानि वर्त्तमानवर्षीयनूतनकार्य्यपरिचालन समितिसभ्यादीनां नामानि परिषदोऽन्यतमसहकारिमन्त्रिणा श्रीमता दीनबन्धुसाहित्यशास्त्रिमहोदयेन।

अथ प्रचारं नीते सभापतिभिरतिगभीरतत्त्वार्थसुभगे सुललितपद सम्पदादिनिरन्तरे मनोहरे निजाभिभाषणनिबन्धे, चित्रार्पितास्व इव सानुरागमधिगतवति सदुपदेशराशिं सभाजनगणे, समावेदिते च तत्र करतालिकादिसन्तोषपिशुनप्रयत्नेन प्रभूते समाग्रहे, विदित मभूदद्यापि लोकानां साधुजनोपदेशश्रवणपारतन्त्र्यमन्तरवृत्तीनाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च वाक्प्रपञ्चे सार्थकनामपदैः परिषदन्यतरसम्पादकैः श्रीगोष्ठपतिरायचतुर्धुरीणकाव्यतीर्थैः सुविस्तरसुललितवङ्गवाङ्मयेन वितीर्णाः सभापतीनां प्रशस्तिवादाः समभ्यर्थिताश्च सज्जनाः परिषद्भवननिर्म्माणसाहायकार्थम्। किं बहुना तेनैव प्रवृत्तसभाधिवेशनकृत्यं 'मधुरेण समापये'दिति विधिवहिर्भावं नाङ्गीकुरुते।

अथ प्रवर्त्तितः परिषदनुग्राहकैः कतिपयैः सदस्यैः श्रीभासकवेरनभिनीतपूर्व्वस्य बालचरितनाटकस्य रसभावादिसौभाग्यवानभिनयः। तत्र भूमिका गृहीतवतां प्रायेण सर्व्वेषामेव दृष्टो भूयान् नाट्याभिनयप्रकर्षः। एकतस्तावद् भासकवेरभिनयनैपुण्यप्रदर्शनानुकूलं काव्यम्, अन्यतश्च सुनिपुणाः सविशेषरसभावादिवेदिनः परिषत्सदस्या अभिनेतारः, तदत्र लोकोत्तरप्रकर्षे को वा विस्मयावकाशः? परं तत्र कंसवधवृत्तान्ताभिनयं यावत् यथा लोकोत्तरमभिनयचातुर्य्यं न तथा तदुत्तरमित्यत्र तत्तद्भूमिकामास्थितवतामनुशीलनस्वल्पतैवापराध्यतीति वस्तुवेदिनां वक्तव्यम्। परिषदा नूतनतया प्रदर्शितः, प्रकर्षातिरिक्तः संस्कृतनाट्याभिनये सङ्गीतनृत्यप्रबन्धस्य, तत्र बालचरितनाटकनिबद्धहल्लीशक्रीड़ा सुतरां निदर्शनम्। मधुरशब्दादिघटिते तत्र सङ्गीते गोष्ठपतिगिरां वस्तुतो माधुर्य्यमनन्यसुलभमुन्नीयते। अभिनयेऽस्मिन् भूमिकामवलम्बितवत्सु दामोदरकंसनन्दगोपवृद्धगोपवज्रबाहुदामकारिष्टर्षभगोपकन्यकादयो विशेषेण समुल्लेख्याः प्रशंसावादे। तदेवं मन्यामहे यत् एतदनन्तरं यदि परिषत्सदस्याः साग्रहमनुशीलनवश्याः पुनरिदं बालचरितमभिनयेयुस्तदा सर्व्वथैव प्रकर्षभाजस्ते भासकवेरितिनाट्यनिर्म्माणं सार्थकयन्तः सुरसरस्वत्या लोकोत्तरमुत्कर्षं नाट्यबन्धे प्रत्याययेयुरिति।

एवं क्रमेण निःशेषमवसिते महोत्सवे सानन्दहृदयाः सहृदयाः सामाजिकाः प्रायेण रात्रेर्दशमघटिकायां संस्कृतनाट्यमाधुर्य्यमन्तरेण श्लाघयन्तः स्वगृहान् प्रति प्रातिष्ठन्तेति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामहोपाध्यायोपाधिपदलाभः

विदितमस्तु यथाकालमिदं पाठकमहोदयानां यथा प्रतिवर्षमेव भारतवर्षे भारतवर्षीयविद्याद्रविणादिप्रसिद्धेषु राजप्रतिनिधिभिः सम्मानकरोपाधिपदानि वितीर्य्यन्ते । अस्मिन्नवसरे नानाविद्याद्योतितमतयः सुतरामध्यापनादिनिष्णाताः पण्डितमहत्तमाः कलिकाताराजकीयसंस्कृतमहाकलाशालाध्यक्षचराः श्रीमन्त आशुतोषशास्त्रिपादाः तथा विविधशास्त्रतत्त्वेषु निपुणवेदिनो निखिलभारतवर्षीयसंस्कृतमहासम्मेलनप्रधानमन्त्रिणो लाहोरसंस्कृतमहाकलाशालाध्यक्षाः श्रीमन्तो गिरिधरशर्म्मचतुर्व्वेदिनः पण्डितोचितेन महामहोपाध्यायेतिसम्मानपदेन नृपतिप्रतिनिधिभिः सम्मानिता वर्त्तन्ते ।

तत्र प्रथमनिरुक्ताः श्रीमन्तः शास्त्रिपादाः शैशवात् प्रभृत्येव प्रदर्शितलोकोत्तरविद्याप्रकर्षाः प्रथमतः कियतो वत्सरानात्मनः शिक्षापदे संस्कृतमहाकलाशालायाम् अध्यापकपदमङ्गीकृत्य नित्यमेवात्युत्तमविचक्षणतां प्रतिपाद्य सकलकलाशालाप्रधानभूते "प्रेसिडेन्सि"-महाविद्यालये कतिचन वत्सरानध्यापनाख्यमलङ्कृत्य पुनः स्वीयशिक्षाक्षेत्रे कलिकाताराजकीयसंस्कृतमहाकलाशालायामध्यक्षतामधिकृतत्र स्मारितवन्तः सुगृहीतनाम्नो विद्यासागरपादान् । सम्प्रति ततस्ते लब्धावसरा ईदृशेन राजसम्मानेन सम्मानिता भवन्तीति यत्सत्यं परितुष्टा वयं विशिष्टशिष्टजनसम्मानपक्षपातिनः । साम्प्रतमेषां विद्याप्रकर्षो विश्वविद्यालयविद्यार्थिभिः प्रतिपदमनुभूयते, प्रचरति च समन्ततस्तन्निवन्धनस्तेषां महिमा ।

द्वितीयनिरुक्ता अपि श्रीयुतचतुर्व्वेदिमहाभागाः सुविदिता एव संस्कृतविद्यानुरागवताम् । एते हि नानाप्रकारविकारसन्निपातेन सम्मूर्च्छितप्राये संस्कृतविद्याप्रकर्षे, निमीलितप्राये सनातनधर्म्मानुरागे विपर्य्यस्तप्राये च संस्कृतविद्यायाः सुविहितप्राचीनशिक्षाक्रमे, विलुप्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राये च प्रकृष्टपण्डितजनानां विलक्षणसम्मानप्रपञ्चं निखिलभारतवर्षीय संस्कृतमहासम्मेलनप्रतिष्ठानप्रतिष्ठापनेन संस्कृतविद्यामुन्नमयितुकामाः प्रकाममद्य विरसतया प्रतीयमानाया अपि गोर्व्वाणवाण्याः सुतरां धन्यताप्रख्यापनेन, नानादेशीयविदुषामेकत्र समागमसम्पादनेन तथा संस्कृतविद्याविभूतिसम्पादकवहुविषयसमुद्भावनेन प्रयोजयन्ति गरमिव प्रजागरं परिहरन्त्या सुरसरस्वत्याः शुभानुगुणजागरणानुगुणम् । ते हि विविधविद्यानिष्णातमतयो लाहोरसंस्कृतमहाकलाशालाया मतिप्रशंसया सुचिरं शिष्यानध्यापयन्तः स्वमाध्यक्ष्यं सार्थकयन्ति । तदेतेषां, प्रथमनिरूक्तानां शास्त्रिपादानाञ्च महामहोपाध्यायपदलाभः सुतरामस्माकमानन्दसन्दोहमनुकूलयते । आशंसामहे यथा एतादृशमनस्विनां गुणगरिमाणमादर्शीकृत्य इतःपरमपि तथा सम्मानपदप्रदानेन राजप्रतिनिधीनां गुणातिशयवेदितां प्रकाशमासादयिष्यतीति । प्रथमनिरुक्ता महात्मानः खल्वस्माकं सौभाग्ययोगात् समीपे परिप्राप्ता यथायोग्यमभिनन्दितगुणा अस्माभिः परं चतुर्व्वेदिमहाभागा दूरावस्थायिनो यथाकालमसुलभसाक्षात्कारा इति पत्रद्वारैव ते सान्तःकरणसमाग्रहमभिनन्द्यन्ते । परमेश्वरकरुणया ते ते निरामया निर्व्विघ्नकर्म्माणः परिजनादीनां शर्म्मणा समुत्साहितमर्म्माणः संस्कृतविद्याया लोकोत्तरमुत्कर्षं लोके वितीर्य्य सुदीर्घं जीवनं लभमाना भारतवर्षहर्षं परिवर्द्धयन्त्विति शम् ।

---

15 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यानिधिः श्रीकृष्णमाचार्य्यः

न खल्वनतिपरिचिता स्यात् पाठकमहाभागानां मद्रपुरीतः प्रकाश्यमाना 'सहृदया' नाम संस्कृतपत्रिका। तस्या एव सुविद्वान् सम्पादकचरोऽत्र चित्रात्मनाऽत्रोपस्थापितो यशःकायशेषः श्रीकृष्णमाचार्य्यः। आत्मनो जन्मना मण्डितमद्रमण्डलोऽयमतिबाल्य एवाधीतकाव्यनाटकालङ्कारकदम्बो राजभाषायामपि कृतश्रमो विश्वविद्यालयतः संस्कृतएम् ए बिरुदमधिजग्मे। तदनु च लब्धप्रवेशः स्वदेशगतराजकीयशिक्षाविभागे विविधपदगौरवन्तत्र सुदीर्घमनुभूय राजकीयकर्म्मणा इदानीं प्राप्तविरतिर्मधुरागतरामेश्वरदेवस्थानमहापाठशालाया अध्यक्षस्थानमप्यलञ्चकार। रघुवंशकुमारसम्भवमेघसन्देशयादवाभ्युदयादिमहाकविग्रन्थान् विमृशन्नसौ प्राचीनव्याख्यातृभिरनुल्लिखितानप्याशयविशेषांस्तत्र तत्रोपस्थाप्य स्वकीयनिबन्धग्रन्थेषु, 'वासन्तिकस्वप्न' नाम कमनीयं नाटकमनन्यानि च सरससंस्कृतवस्तून्युपहारीकृत्य संस्कृतरामणीयकवेदिषु सर्व्वथा प्रादर्शयदलौकिकं पाण्डित्यमनन्यसुलभं ग्रन्थसमालोचनकौशलमसाधारणं प्रतिभानञ्चात्मनः। भाट्टसारगद्यत्रयभाष्यकृष्णाभ्युदयादिविशिष्टग्रन्थानां सपरिष्कारं प्रकाशनेन, सुचिरमतिनिपुणं संस्कृतपत्रिकायाः सम्पादनेन तथा विविधैरुपायान्तरैश्च पण्डितमणिरसावाभ्युदयसंस्कृतोज्जीवनाय प्रयत इत्येतादृशस्य महाप्रयाणेन सुतरां खेदमापन्नाऽद्यसंस्कृतविद्येति किं वात्र वाच्यम्। खेदोऽस्याः सुदूरीक्रियतां तथाविधपुरुषनिर्माणेन भगवता परमेश्वरेणेति प्रत्याशैव नः शरणमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

(Registered under Act XXI of 1680.)

उद्देश्यम्—

समितिरियं संस्कृतभाषायास्तन्मूलकप्राकृतादीनाञ्च सम्यगालोचनया यथावत् प्रसारप्रतिपादनाय प्रतिष्ठापिता ।

तदर्थमद्य यावदवलम्बितानि साधनानि—

१ । प्रतिमासं नियमेन, व्यवस्थापितायां विद्वत्समितौ संस्कृतभाषया विविधविषयमधिकृत्य विलिखितानां निबन्धानामनुवाचनम्, तत्समालोचनम् पक्षप्रतिपक्षतया विशेषज्ञानां तथा छात्रादीनां परस्परं शास्त्रार्थविचारश्च ।

२ । परःसहस्राणां पिपठिषूणां कौतूहलनिवर्त्तनाय विद्याप्ति-सौकर्य्याय च हस्तलिखितमातृकाग्रन्थानां तथा भारते तद्बहिश्च मुद्रापितानां पुस्तकानां समृद्धेः सञ्चयनम ।

३ । परिषद्भवने प्रतिष्ठापितायां संस्कृतपाठशालायामध्यापकैः प्राचीन-चतुष्पाठीरीत्या विद्यार्थिनामध्यापनम् ।

४ । अमुद्रापितानां संस्कृतग्रन्थानां प्रकाशनम्, भाषान्तरनिबद्धाना-मुत्तमपुस्तकानां संस्कृतभाषायामनुवादनं मुद्रापणञ्च ।

५ । प्रतिमासं 'संस्कृतसाहित्यपरिषत्पत्रिका' प्रचारः ।

६ । जनमनांसि संस्कृतं प्रत्यनुकूलयितुमभ्यन्तरा रङ्गेषु संस्कृत-रूपकाणां यथोचितं प्रयोगः ।

संस्कृते बद्धादरा ये केचिदन्यूनं रूप्यकत्रयं प्रतिवर्षं प्रदद्युस्ते एव सदस्यत्वमाप्नुयुरस्याः परिषदः । सदस्या मूल्यं विनैव प्रतिमासं पत्रिकां लभेरन्, परिषत्प्रकाशिता ग्रन्थमालाश्च तेषां सुलभतराः स्युः, परिषत्कृत्येषु च सर्वेष्वेव ते लब्धितसम्पर्काः सम्पाद्येरन्निति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

मुद्रिता ग्रन्थाः

१। **कपालकुण्डला**—बङ्किमचन्द्रस्य प्रसिद्धकथाया अनुवादरूपा। मूल्यम् १) रूप्यकमात्रम् परिषत्सदस्यानाम् ॥० पादोनरूप्यकम्।

२। **कालीतन्त्रम्**—सटीकानुवादम्। मूल्यम् ॥≠० दशानकाः, सदस्यानाम् ॥० अष्टानकम्।

३। **गीतशङ्करीयम्**—जयदेवकृत 'गीतगोविन्द'मनुसृत्य कविजयनारायणविरचितं देवीस्तुतिरूपम। मूल्यम ।≠० षड़ानकाः, सदस्यानाम् ।० चतुराणकम्।

४। **मुक्तिवादः**—गदाधरभट्टाचार्य्यविरचितः टीकाद्वयोपेतः वङ्गभाषाभाष्यसहितः सविस्तरभूमिकया तथा प्राचीनमुक्तिवादेन समलङ्कृतश्च। मूल्यम् २) रूप्यकद्वयम्, सदस्यानां १॥० सार्द्धरूप्यकमात्रम्।

५। **दुर्गापूजातत्त्वम्**—रघुनन्दनभट्टाचार्य्यविरचितम अष्टाविंशतितत्त्वातिरिक्तम् विस्तृतभूमिकासहितंशारदीय दुर्गोत्सवपद्धतिरूपम्। मूल्यं १।० सपादरूप्यकम्, सदस्यानां रूप्यकमात्रम्।

मुद्र्यमाणा ग्रन्थाः।

६। **कारकोल्लासः**— भरतमल्लिकविरचितः सोदाहरणकारकनिर्णयरूपः ललितपद्यमयो ग्रन्थः।

७। **पितृदयिता**—महाराजवल्लालसेनगुरुभिरनिरुद्धभट्टैर्विरचिता अतिप्रामाणिकसामवेदीयसन्ध्याश्राद्धादिपद्धतिरूपा।

८। **दुर्गोत्सवविवेको वासन्तीविवेकश्च**— महामहोपाध्यायशूलपाणिविरचितौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কলিকাতা ব্রাঞ্চ — ৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট,
৭১।১ রসা রোড ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইণ্ডিয়া ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৷৷৹, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৷৷৹ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৷৷৹ দেড় টাকা, ৩ শিশি ৩৵৹ আনা। ৬ শিশি ৭৷৷৹ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये
श्रावणे
August 1924.

Reg. No. C. 1073.

७म वर्षस्य
४र्थं संख्या।
Vol. VII. No. 4

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—काव्य-सांख्य-पुराणतीर्थ-श्रीदुर्गामोहनभट्टाचार्य्यः M.A.।

सभापतेरभिभाषणम्	१२१	आयुर्व्वेदस्य महिमा	१४३
अष्टमवर्षकार्य्यविवरणम्	१२८	सोमं प्रति ताराया:	१४७
आयव्ययसंक्षेपलिपि:	१३७	गुरुशिष्यसंवाद:	१५०
कार्य्यपरिचालकानां नामानि	१३८	जैनजीवनम्	१५८
वर्षाविलास:	१४०	सन्देशा:	१५९

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम्।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम्॥
छात्र-पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটা চিত্ত প্রফুল্ল থাকে। কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ সত্বরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ২৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজ-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসক নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড্।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अष्टाविंशत्युत्तराष्टादश शततमशकाब्दीयश्रावणाचितः)



संस्कृतसाहित्यपरिषदः अष्टमवर्षीय महोत्सव सभापतिः
श्रीपञ्चाननतर्करत्न भट्टाचार्य्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये श्रावणे, ७म-वर्षस्य ४र्थ-संख्या

संस्कृतसाहित्यपरिषदः

अष्टमसंवत्सरमहोत्सवे

सभापतेरभिभाषणम्

(सभापतिः—श्रीपञ्चाननतर्करत्नभट्टाचार्य्यः)

सूक्ष्मं ज्योतिर्धाम सारस्वतं यत्
स्थूलज्योतिर्जित्वरध्वान्तहन्तृ ।
विश्वोद्भासि स्वप्रकाशस्वरूपं
सत्यज्ञानानन्दमाद्यं प्रपद्ये ॥

इयं हि संस्कृतसाहित्यपरिषद् विद्वद्वृन्दालङ्कृतालङ्कारभूता च विदुषां परस्परगुणाधानविनियुक्तपरस्परसङ्गतिर्निशाकरसमुज्ज्वला विभावरीव वरीवर्त्ति। एतया चास्मिन् महोत्सवाधिष्ठाने शावेव देवत्वेन नेहतया नामाहं प्रतिष्ठितोऽस्मि। अनया हि मत्प्रतिष्ठया सत्यामपि तद्गौरवस्य हानौ सपरिकरस्थिरनेतुर्गुणवैभवेन न चिरादेवोपचयो भविष्यति यथावलक्षपक्षसम्पर्कादसितपक्षक्षीण-श्रियो मृगाङ्कमूर्त्तेरित्ययं मे महानाश्वासः। उपजाताश्वासस्य च मे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिद्वचनं श्रवणानुग्रहेण सफलजन्म सम्पाद्यतां सभाजन भाजनैः सभास्तारैः। तथाहि कलियुगमेतत्। कलिर्नाम कलहो नैकसाध्यः, नापि सभा ; न चानेकजनसंस्थानमधुना प्रायेण कलि-विहीनं सम्पद्यते तद् यदेतत् कलियुगं सभायुगमेव तदर्थः ; दृश्यते च भूमण्डले संस्थितिरगणितानां सभानां वर्षागमे छत्राकाणामिव सततमुद्भवो नवनवानां सभानाञ्चात्र भारतवर्षे, विशेषतो वङ्गेषु। न चैकापि तासां निष्प्रयोजना, प्रयोजनं पुनः प्रच्छाद्यते प्रायेण, यदेकस्य कस्यचित् प्रयोजनं तदपहृत्य विशिष्टसंघातप्रयोजनभाविनोद्घोषणमत्र प्रच्छादनम्। न चैवंविधाः प्रच्छादनपराः सत्यस्था भवितुमर्हन्ति नाप्यसत्यस्थाः श्रेयसे कर्म्मणे कल्पन्ते। तदेव श्रेयः कर्म्म यत्-कल्याणोपधायकम्। एवमश्रेयसि सभायुगे यास्तावदङ्गुलिपर्व्व-संख्येयाः सभाः श्रेयसि कर्म्मणि विनियुक्तप्रवृत्तयः प्रभासन्ते तासां शिरोरत्नभूतेयं संस्कृतसाहित्यपरिषत्। कथम् ? स्थितिहेतु-त्वाल्लोकस्य। लोकस्थितिर्धर्म्मेणैव भवति—"यत् स्याद्धारणसंयुक्तं स धर्म्म इति निश्चय" इति स्मृतेः ;—धर्म्मस्थानं हि देववाणी, सात्त्विकाः खलु देवाः, सत्त्वमयश्च धर्म्मः, वाणी तावद् यादृशगुणभूयिष्ठा तादृशगुणकर्म्मास्वेव साधयन्ती चरितार्था भवति, वाण्यां गुण-सम्बन्धश्च प्रयोक्तृगुणापेक्षः। अत एव सर्व्वधर्म्ममूलवेदादीनि देव-वाण्यां प्रतिष्ठितानि। सैव यज्ञीया वागित्युच्यते, वाङ्नाम प्रवृत्ति-पद्धतिः, वाचैव प्रवृत्तयः सञ्चरन्ते। न च चौर्य्यादिषु कुकर्म्मसु दत्तरतयः समुज्ज्वलालोकदीप्तेन सुरक्षितेन राजमार्गेण प्रवर्त्तन्ते ; किन्तर्हि, तिमिरावृतेनारक्षितेन छद्मवर्त्मना ; श्रेयसि कर्म्मणि दत्त-रतयस्तु वैपरीत्येनेति यथा तथैव देववाणी न दुष्कृतिनां प्रवृत्तिपद्धतिः किन्तु सुकृतिनाम्। वाणी खलु चिरसंसेविता स्वाश्रितगुणेनोपस्कुरुते सेवकान् ; सा यदि देववाणी सत्त्वेन, आसुरी चेत् असत्त्वगुणाभ्यां रजसा तमसा तदुभयेन वा, न तावदसत्त्वभूयिष्ठो लोकः स्थितिमान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति; शान्तिप्रधाना हि स्थितिः, न चान्तरेण सत्त्वं शान्तिः सम्भवति। दृश्यतां प्रतीची, विविधशिल्पविज्ञानकलोज्ज्वलाप्य-शान्तिविक्षोभसन्ताड़िता वात्यानिपीड़ितोल्केव न तमःसंघात-विध्वंसाय प्रभवति, प्रत्युत प्रतिपदं स्वयमेव संशयदशामापद्यते। तद्वाणीवर्त्मना च पुण्येऽस्मिन् भारतवर्षेऽपि तदुचितभावः समायातः। शान्तिविक्षोभः सर्व्वतः प्रसरति। यस्य चरमफलं लोकस्थितिविध्वंसः। न हुरत्पथप्रतिपन्नानां परलोकदृष्टिशून्यानामन्योऽन्यविमर्द्दाय प्रयतमानानां नाममात्रेणास्तित्वं स्थितिसंज्ञां लभते; सा हि स्थितिः, यया किल मानवाः शमप्रधानाः सर्व्वमद्रङ्कर-ज्ञान-विज्ञानपारदृश्वानो भवन्ति। एवंविधा तु स्थितिर्दैववाणीमञ्जूषानिबद्धा रत्नराजिरिव चकास्ति। इयञ्च परिषत् तन्मञ्जूषाया निर्बाधरक्षणस्थानमतो लोकस्थितिहेतुः।

अदेववाणीगरलपानापहृतविवेकोऽयमद्यतनो जनपदः परपदाङ्कमनुसरन् स्वपूर्व्वजानां कृतिञ्च कीर्त्तिञ्च विलुम्पति, वैदेशिकत्वं मन्यते, वर्णसङ्करदुष्टिं निश्चिनोति, परम्परागतञ्च सदाचारं सद्यस्कतया प्रमाणयन्नवजानाति, स्वमतञ्च परानपि ग्राहयितुं प्रयतते, तद् यथा आर्य्याः किल कृषीवलाः देशान्तरादागत्य भारतवर्षमधिकृतवन्तः, तदानीन्तनांश्च भारतवासिनो दास्यमुपग्राहयामासुः, दासीभूतास्त एव भारतस्य प्रथमे स्वामिनः, साम्प्रतं ये तावदन्त्यजाः अन्त्यावेतिव्यपदिश्यन्ते त एव प्रथमानां कुलमभिरक्षन्ति। इदानीमपि भारते तेषां संख्याधिक्यम्, आर्य्याणां विशेषेण ब्राह्मणानां निपीड़नात् संख्याधिका अपि ते न्यञ्चो दृश्यन्ते, यदि वेदानीमार्य्याश्चानार्य्याश्च ब्राह्मणाश्च तदितरे चेति वा देशान्तरपरतन्त्राः समावस्था एव भवन्ति, तथापि दुर्निवारब्राह्मणप्रभावात् राजपारतन्त्र्यसाम्येऽपि उत्कर्षापकर्षनिःश्रेणी समाजसौधसङ्गता कांश्चिदारोहयति अवरोहयति चान्यान्, इमे चारोहणावरोहणे जातिलक्षणे न गुण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपेक्षेति। हंहो भारतस्य प्रथमाधिकारिणो जाग्रत, ब्राह्मणशासन-निगड़ादात्मानमुन्मोचयत, निपीड़नवृत्तीन् ब्राह्मणानभिभवत इत्येवं भाषमाणा बहवो विचेष्टन्ते, प्रगल्भन्ते चापरे यदन्ये पुनरार्य्य-जातीयाः पितृधिष्ण्यमपहाय प्रतीचीमाश्रिताः अस्मद्विजेतारो यत्-कुलजा भवन्तीति। अपिच देवकुलं देवमूर्त्तिसंघटनञ्च नार्य्याणा-माचारपरम्परासिद्धं किन्त्वनार्य्यैः संसर्गात् तत एवार्य्याचारेषु सम्पा-तायातम् इति जल्पन्ति। शिरःसंस्थानभेदो जातिविज्ञानलक्षणम्; आर्य्येषु यादृक् संस्थानं न तदनार्य्येषु, वङ्गीयमानवानां शिरःसंस्थानं नार्य्योचितं प्रायेण भवति तदेते नूनमनार्य्या इत्युद्घोषयन्ति।

शास्त्रीयसदाचाराः किल जवनपारतन्त्र्यदशायां वङ्गेषु ब्राह्मणै-रुद्भाविताः प्रवर्त्तिताश्च स्वेषां प्राधान्यपरिरक्षणायेति च साम्प्रतमदेव-भाषासंसरणसमायातमोहप्रमाददम्भविजृम्भितमातन्यते देववाणी-दुहितरि वङ्गभाषायामपि कोविदमानिभिः कैश्चित्।

तावदेवेदं दुर्विलसितमवस्थास्यते यावदस्याः परिषदः सम्भाव्य-मानोऽभ्युदयो नोपसीदति। कथमिदमाशास्यते इति चेत्—मोह-प्रमाददम्भनिर्मूलनक्षमत्वात् संस्कृतसाहित्यस्येति ब्रूमहे। संस्कृत-साहित्यं हि सुसम्बन्धा देववाणी। तथाविधसम्बन्धस्य श्रुत्यात्मना स्मृत्यात्मना वा तदनुगामिप्रकरणात्मना वा सन्दृब्धिः। तच्च स्वोप-निहिततत्त्वसमुद्भासनेनातत्त्ववेदनमपाकरोति। किन्तावत् तत्त्वम्? भारतवर्षमेवार्य्याणामादिस्थानम्। भारतञ्च पूर्वतनमद्यतनभारता-दधिकायामम्। इत एव निष्काशिता हैहयादयो निजधर्म्मविवर्जिता म्लेच्छत्वमलभन्त। मूलतस्ते जवनादिदेशसम्बन्धात् जवनादिसंज्ञाः क्षत्रिया एवासन्। प्रतीच्यानां मानवानां केचित् पूर्वपुरुषास्तत्-कुलप्रभवतया भाषादिष्वंशतः साम्यमद्यापि नापहातुं प्रभवन्ति। यच्च श्रुतौ हिमानीसंप्लववार्त्तादिकं वैदेशिकमुपन्यस्यते तद् यायावरमुनि-परिदृष्टोपवर्णनलक्षणं न तु देशान्तरस्थितिलिङ्गं तत्; वैदिकनदी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैलनगराणामत्रैवोपलम्भात् प्रतीच्योपनिवेशवादप्रवृत्तेर्बहुशतवाय-नीतः पूर्वं क्षत्रियविशेषाणां निष्काशनवार्त्तायाः संवेदनात् तावतैवोपनिवेशवादप्रमाणानामन्यथयितव्यत्वाच्च ।

न हि वर्णा वा जातयो वा कल्पिता येन पुरुषेच्छया कदाचिदन्यथाकारः सम्भाव्येत, कल्पनायाः पुरुषतन्त्रत्वात् । कथं पुनस्ते ? सनातनाः, प्रवाहरूपेण नित्याः सृष्टाश्च स्वयं भगवतैव । तत्सङ्करश्च व्यभिचारेण वर्णानाम् अवैद्यावेदनेन स्वकर्म्मणाश्च त्यागेन भवति नत्वन्यथा । सङ्करदुष्टाश्च व्यश्चो भवन्ति त एवान्त्याश्चान्त्यजादयश्च वा व्यपदिश्यन्ते । न तु बलात् विजितानां दासीकृतानाञ्च पूर्वस्वामिनां द्वेषामर्षकृता तावत् संज्ञा ।

तथात्वे तेषामियता महता कालेन समुच्छेदः स्यात् प्रध्वंसेन वा विजेत्रन्तर्भावेण वा । न चानादिजातिभेदस्मृतिर्नवीनकल्पनामनुवर्त्तमाना भवति । जातिव्यक्त्योरन्योन्यसम्बन्धः पारम्पर्य्यागतकुलस्मृत्येव प्रमाणीक्रियते । अदृष्टमेव तदुत्कर्षापकर्षमूलम् । भाविनि जन्मन्युत्कर्षमिच्छूनामपकर्षं प्रतिरुरुत्सताञ्च अत्र सुकृतमाचरितव्यं निवर्त्तितव्यञ्च प्रतिषिद्धकर्म्मणः । न खलु ब्राह्मणानां कूटकर्म्मणैमावुत्कर्षापकर्षौ, नापि वृत्तयो ब्राह्मणानां स्वैराचारगृह्याः किन्त्वदृष्टमूलजातिभेदनियताः । सत्येवं वृत्तिभेदनियमे कदाचिदपि वृत्तिसङ्करो न घटते, न वा तन्निमित्ताभिबुभूषा, ययान्योन्यं निपीड्येत । अथ यन्त्रसंसाधितेन शिल्पेन पराजीयेरन् हस्तशिल्पकरा मैवं महायन्त्रशिल्पस्य महायन्त्रप्रवर्त्तनमित्युपपातकगणने पठितवद्भिर्मन्वादिभिः प्रतिषेधात्, क्षुद्रयन्त्रञ्च प्रायेण तुल्यशक्तिकं निपुणहस्तेनेति सामान्यतो न तत्प्रतिषेधः । चक्रजमृण्मयपात्रादीनां विनिन्दितत्वेन क्षुद्रयन्त्रविशेषस्य प्रतिषेधश्च ।

नन्वेवं वृत्तिव्यवस्था ब्राह्मणानां श्रममन्तरेण जीवातवे विहिता इति चेन्न । ब्राह्मणेषु शिलोञ्छवृत्तेरतिश्रमसाध्यायाः प्रशंसनात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिग्रहादेर्निन्दितत्वात्, अनापद्यन्यदीयवृत्तेरनाश्रयणीयत्वेनोपदेशाच्च। यच्चोच्यते देवकुलं प्रतिमापूजनञ्च नवीनं बुद्धनिर्व्वाणाद् गते वर्षशतषट्के प्रथमप्रवृत्तिरनयोरुपलभ्यते इति तन्न। शिष्यपरिपृष्टेन भगवता तथागतेन प्रतिमापूजनस्य प्रतिषेधात्। प्रसक्तं हि प्रतिषिध्यते। यदि प्रतिमापूजनं प्रागसदेव तत्र विकल्पस्यैवानवकाशः। तस्मात् प्रसक्तं तद्बुद्धावस्थानकाले। न च प्रसक्तं तदितरजनेषु इति शङ्क्यम्। प्रधानानामाचारस्य अनुकरणीयतया तदाचारसिद्धप्रतिमापूजनस्यैव प्रतिषेधयोग्यत्वात्; तदुक्तं "यद् यद् आचरति श्रेष्ठस्तत्तदेवेतरो जन" इति। आटविकानां तदानीं प्रतिमापूजनसद्भावाभ्युपगमे इदानीमपि तदनुवृत्तिरव्याहता स्यात्। न तावदिदानीं तादृशाः वर्णबाह्याः केवलाटविकादयो दृश्यन्ते येषु स्वातन्त्र्येण प्रतिमापूजनं प्रचरति। यच्चोक्तं वङ्गीयैर्ब्राह्मणैः परिकल्पिताः शास्त्रीयत्वेन सदाचाराः जवनपारतन्त्र्यदशायां स्वेषां प्राधान्यपरिरक्षणायेति तदपि न विचारसहम्। मन्वादिप्रणीतानां संहितानां जवनपारतन्त्र्यकालादतिप्राचीनत्वात्, कामधेनु-कल्पतरु-हेमाद्रिप्रभृतिनिबन्धॄणां शरण्यत्वेन तत्प्राचीनतायां विवादाभावात् निखिलभारतव्यापकत्वाच्च। अपि च कायपरीक्षण न तावत् आर्य्यानार्य्यभेदप्रतिपत्तये पर्य्याप्तं व्यभिचारदर्शनात्। इत्येवं विचारधारा प्रतीच्यरीत्यविसंवादिपरीक्षया प्रमाणपद्धतौ संस्कृतसाहित्यपरिषदा संस्थापयिष्यते इत्यस्माकमाशा।

प्रतीच्याः शास्त्रवचनानां स्वच्छन्दानुवर्त्तनेन प्रामाण्याप्रामाण्ये व्यवस्थापयन्तोऽस्मत्पूर्व्वजगुणगौरवस्य अर्व्वाचीनत्वस्थापनाय प्रयतन्ते। तत्प्रक्रिययैव तन्मतप्रत्यादेशनाय संस्कृतसाहित्यपरिषदा नित्यमवहितया भवितव्यम्। तत्राद्यं कर्म्म विलुप्तविलुप्यमानशास्त्रग्रन्थानां विचयनम्, इष्टवाह—(इटावा) नगरपरिसराश्रमश्रीमद्ब्रह्मानन्दस्वामिशिष्याद्यन्तिके दक्षप्रतिनिधिप्रेरणादिना तत्‑

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दनुलेखनमनुसन्धानञ्च अद्यतनं विस्पष्टसाधनम्। सति च तत् साफल्ये तत्तद्ग्रन्थार्थसंग्रहाय केचन विद्वांसो नियोक्तव्या यैः प्रतीच्य-कृतं कुव्याख्यानं व्यक्तदोषप्रदर्शनेन परिहर्त्तुं शक्येत। शिल्पादि-विविधकलानुशीलनं कैश्चिदारब्धव्यम्। यत्परिपाके प्रतीच्य-कलायुक्तिर्हीयेत। न चेदमाशंसनं द्वेषबुद्धिदुर्विलसितम्। किन्तु स्वानुबन्धिभक्तिप्रीतिमूलं सत्यफलम्। यथैवमुत्कर्षाय प्रयत्नः तथा क्रमापकर्षप्रतिरोधाय प्रयत्नः प्रथमत्वेन परिषदोऽस्याः समाश्रयणीयः। वैदेशिकशिक्षामोहेन विकलया द्रविणपिपासया वा देववाणी-शिक्षायतनानि निदाघतापभरेण सरांसीव क्रमेण परिशोष्यन्ते, परीक्षाविधयश्च छद्मपूर्णाः प्रायेण नैकृतिकलभ्यमानशुभफलाः न तथा विद्यार्जनाय प्रवर्त्तन्तेऽन्तेवासिनः यथा परीक्षोत्तीर्णतायै कूट-साधनावलम्बनचातुर्य्याय। इमौ विद्याचारिचापकर्षौ वर्णाश्रमिषु प्रवर्द्धमानौ परिषदानया सर्व्वतः प्राङ् निरसनीयौ यथेदानीमत्र अध्यापनव्यवस्था विचारव्यवस्था च स्वल्पाकारेण सम्पाद्यते तथा पुरस्तात् तत्प्रवर्द्धनं महतायासेन सम्पादनीयम्। देशान्तरसमाहृत भाषान्तरनिबद्धकलाग्रन्थानां स्वोचितरीतिमनतिक्रम्य अनुवाद साधनमपि परिषदः कर्त्तव्यान्तरम्। इत्यादिविविधकर्म्मसम्पादनं भूरिद्रव्यसाध्यमिति जानन्तोऽपि भगवतीं देववाणीं वरिवस्यन्तो दुःसाध्यमिदमिति नैव मन्यन्ते। अद्यापि महर्षिकुलशोणितं प्रस्यन्दते ब्राह्मणेषु, अद्यापि योगबीजमनन्यलङ्घ्यसत्त्वं भस्मावृत-वह्निकणवत् अप्रकटमपि नैकान्तेन जहाति भारतीयान्, अद्यापि देववाणी गायत्रीमन्त्रेण सर्व्वानेव द्विजान् एकतया बध्नाति, तीर्थादि-सङ्कल्पवाक्येन सर्व्वेषामेव वर्णाश्रमिणां सम्मेलनसूत्रं दधाना च सा समवतिष्ठते। क्षुत्क्षामदेहा पिपासाविशुष्ककण्ठोष्ठपुटा तावदिय-मस्माकं जननी सन्तानवात्सल्येन तद्रक्षणाय कथमपि म्रियमाणा निष्पन्दापि स्नेहतरलां दृष्टिं तनयेषु निक्षिपन्ती दुर्गतिसमयमति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातयति। एवमेवालोकयन् को नाम मानुषमानी अर्थकस्यवर्त्तं-विनिमयेन प्रतिदानं मातृस्नेहस्य, परिरक्षणं मातृजीवनस्य, परिपूजनं मातृचरणस्य न कर्त्तुमुत्सहते।

आशा हि जीवनबन्धनं मानवानाम्। प्रायेण सर्व्वतो नैराश्यविह्वलता ज्वरन्तो वयम् एकामेव देववाणीसमभ्युदयाशां न मुञ्चामः। सत्यां च सफलायां तदाशायां सर्व्वं एव समभ्युदयाः सेत्स्यन्ति। तस्मात् सर्व्वानेव देशवासिनः समाहूय भूयोभूयो विनिवेदयामि—

देवीं वाचं पालयन्तो भवन्तः
सर्व्वां पृथ्वीं शान्तिपीयूषवर्षैः।
स्निग्धां पूतां साधु कुर्व्वन्तु नित्यं
लुप्तप्राणा येन शत्र्यागमाः स्युः॥

अपिच

दैव्या वाचः परिषदो ये प्रतिष्ठाविधायिनः।
ते कायेन च कीर्त्त्या च भवन्तु चिरजीविनः॥

इति—

संस्कृतसाहित्यपरिषदः

अष्टमवर्षकार्य्यविवरणम्।

नवधाराधरोत्कृष्टश्यामसुन्दरविग्रहम्।
यशोदानन्दनं वन्दे परिपूर्णतमं प्रभुम्॥

मङ्गलमयस्य भगवतो नारायणस्य कृपया संस्कृतसाहित्यपरिषदोऽतीतमष्टमं वर्षम्। येषामैकान्तिकी चेष्टा, शुभमाशीर्वचनम्, तथा आनुकूल्यञ्चैव परिषदः केवलमवलम्बनं तान् अक्लान्तकर्म्मणः परिचालकान्, हितैषिणः सदस्यान्, महानुभावान् संवर्द्धकान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथायोग्यं प्रणम्य, नमस्कृत्य, सादरं सम्भाष्य च प्रकाश्यते नीयते-ऽस्माभिर्गतवर्षीयं कार्य्यविवरणम् ।

प्रारम्भे एव काचिद् गरीयसी शोकवार्त्ता दुःखाकुलचित्तं भवद्भ्यो विज्ञाप्यते। अद्य तावत् अष्टवर्षाणि गतानि अस्याः परिषदः प्रतिष्ठितायाः। परिषदियमेतानि वर्षाणि निरन्तरं यस्याश्रये सुखमवातिष्ठत, यस्य स्नेह-वारिसिचनेन वृद्धिं प्राप्ता, यस्य च महत्त्वमासीदस्याः सततं शरणम्, परिषदः स एकोऽधिष्ठाता पूजनीयो महात्मा महामहोपाध्यायः कालीप्रसन्नभट्टाचार्य्य एम्-ए, महोदयो नियतेः कठोरविधानेन परिषदं शोकसागरे निमज्ज्य परलोकं प्रस्थितः। सुदुर्लभः खलु तत्सदृशः सुविनीतः शान्तो निर्विवादः परहितैषी जनः। अतस्तस्य परलोकगमनात् परिषदः सञ्जाता अपूरणीया संक्षतिः।

शोकसन्देशः

भद्रमहोदयाः, विदितं भवतां यत् संस्कृतसाहित्यस्य तथा प्राचीनविद्यायाः शिक्षार्थं प्रसरणार्थञ्च सञ्जाता परिषदोऽस्याः प्रतिष्ठा। तदुद्देश्यसाधनार्थञ्च अवलम्बिता वक्ष्यमाणाः उपायाः :—

परिषदः उद्देश्यम्।

(१) सभासु संस्कृतभाषया गवेषणामूलकानां प्रबन्धानां पाठः, शास्त्रविचारस्तदालोचनञ्च।

(२) संस्कृतविद्यालयस्थापनेन शास्त्राध्यापनम्।

(३) ग्रन्थागारे मुद्रितानाममुद्रितानाञ्च संस्कृतग्रन्थानां संग्रहः।

(४) अमुद्रितानां ग्रन्थानां प्रकाशः।

(५) प्रतिमासं संस्कृतभाषायां पत्रिकाप्रकाशः।

(६) अन्यैः संस्कृतप्रतिष्ठानैः सहकारिता, तेषां साहाय्य-करणञ्च।

(७) संस्कृतनाटकाभिनयश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगते वर्षे आषाढ़स्य मध्यमे भागे साड़म्बरं सुसम्पन्ना सप्तम-वार्षिकोत्सवसभा। प्रख्यातनामानो महामहोपाध्यायाः श्रीहरप्रसादशास्त्रिण एम्, ए, सि, आइ, इ—महोदयाः सभापतिपदमलञ्चक्रुः। सुप्रसिद्धानां बहूनां विदुषां सज्जनानाञ्च समागमैनेयं सभा अत्यौज्ज्वल्यं रामणीयकञ्च भेजे। यथावत् सम्पन्नेषु महामहोपाध्यायानां चन्द्रकान्ततर्कालङ्कार महोदयानां चित्रोन्मोचनादिषु सभाकर्म्मसु, नाट्यकुशलैः पारिषदैरभिनीय प्राचीनस्य कवेर्विशाखदत्तस्य मुद्राराक्षसं नाम नाटकं, सन्तोषितानि सामाजिकजनमनांसि।

वार्षिक उत्सवः।

अपरञ्च, सुसम्पन्नमस्मिन् वर्षे एकादशानां साधारणसभानां तिसृणां विशेषसभानाञ्चाधिवेशनम्। मासिकसाधारणसभानामष्टसु पठिताः प्रबन्धाः पुरातत्त्वकाव्यदर्शनादिविविधतथ्यपूर्णाः।

मासिक सभा।

मासे	प्रबन्धः	लेखकः
१। वैशाखे	षष्टितन्त्रम्	श्रीसदानन्दभादुड़ी एम्, ए
२। ज्यैष्ठे	भवभूतिः	श्रीसारदारञ्जनराय एम्, ए
३। „	परितोषः	„
४। श्रावणे	द्रौपदीचरित्रम्	श्रीदक्षिणारञ्जनशास्त्री एम्, ए
५। आश्विने	संस्कृतसाहित्ये धर्म्मप्रधानता	श्रीचिन्ताहरणचक्रवर्त्ती वि-ए
६। कार्त्तिके	जैनदर्शने आत्मा	श्रीमक्खनलालजैनन्यायालङ्कारः
७। अग्रहायणे	गोलवृत्तिः	श्रीकालीपद भट्टाचार्य्यः
८। पौषे	तन्त्रेषु आत्म-चतुष्टयम्	श्रीसतीशचन्द्रसिद्धान्तभूषणः

प्रतिसभं प्रबन्धपाठानन्तरं उपस्थितैः सदस्यैश्छात्रजनैश्च यथावत् समालोचितः स प्रबन्धः। एतेन यथा प्रबन्धस्य गुणदोषविचारेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतसिद्धान्तस्थापने भवति सहायता, तथा वृद्धिं गच्छति समालोचकानां संस्कृतवक्तृताशक्तिः। अनेनैव परिषदो बहवश्छात्रा अधुना जाताः संस्कृतभाषायां मनोगतं प्रकाशयितुं समर्थाः। प्रबन्धपाठस्य स्थाने प्राचीनविचारप्रथाप्रवर्त्तनाय आग्रहं प्रकाशयत्सु केषुचित् सदस्येषु, फाल्गुनस्य चैत्रस्य च सभायां कृता वेदान्तशास्त्रीयविचारव्यवस्था। पूर्व्वसभायां सञ्जातोऽध्यापकानां शास्त्रविचारः। परं विचारश्छात्राणां फलवत्तरो भविष्यतीति कृत्वा द्वितीयसभायां प्रवर्त्तितश्छात्राणां विचारः। परिषदोऽन्यतमेन विद्योत्साहिना सदस्येन श्रीमता ललितकुमारमित्र एम्, ए, महोदयेन समुत्साहितास्ते कृतविचाराश्छात्राः पुरस्कारप्रदानेन। सभाद्वये एव सञ्जातो बहुजनसमागमः।

अभिनन्दनम्।

वर्षेऽस्मिन् परिषत्सदस्येषु पण्डितप्रवरयोः श्रीयुक्तकृष्णचरणतर्कालङ्कार—श्रीयुक्तचण्डीचरणस्मृतिभूषणयोर्महामहोपाध्यायोपाधिप्राप्तौ, श्रीयुक्तादित्यनाथमुखोपाध्याय एम्, ए, पि, एच्, डि, महोदयस्य संस्कृतकालेजाध्यक्षपदप्राप्तौ, श्रीयुक्तपशुपतिनाथशास्त्रि एम्, ए, वि, एल् महोदयस्य च पि, एइच्, डोत्युपाधिप्राप्तौ अभिनन्दिता एते महोदयाः साधारणसभासु।

विशेषसभा।

विद्यासागरकालेजस्य अध्यक्षाय श्रीयुक्तसारदारञ्जनराय महोदयाय उपाधिप्रदानार्थमेकस्यास्तथा भूतपूर्व्वस्य सभापतेर्महामहोपाध्यायस्य कालीप्रसन्नभट्टाचार्य्यमहोदयस्य, पण्डितवर्य्यस्य जयचन्द्रसिद्धान्तभूषणमहोदयस्य च परलोकगमने शोकप्रकाशनार्थमपरस्याः, परिषदोऽकृत्रिमबान्धवस्य श्रीयुक्त डब्लु, डब्लु, हर्णेल् एम्, ए, सि, आइ, इ, महोदयस्य भारतवर्षत्यागावसरे च अन्यस्या विशेषसभायाः सञ्जातमधिवेशनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षेऽस्मिन् कार्य्यनिर्व्वाहकसमित्या मिलित्वा पञ्चदशवारान् सम्पादितं परिषत्कार्य्यजातम्। कार्य्यनिर्व्वाहकसमितिसदस्यैः सभाकार्य्ये प्रदर्शितो यादृशः समाग्रहः तत् खलु सर्व्वथा आशाजनकमेव।

कार्य्यनिर्व्वाहकसमितिः।

अधुनास्मिन् प्रदेशे चतुष्पाठीसंख्या महान्तं ह्रासं गता। प्राचीनशिक्षापद्धतिं प्रति महत् प्रयोजनं च सहानुभूत्याः। न तावत् सम्भवति अन्यया कयाचित् पद्धत्या शास्त्रेषु गभीरज्ञानसञ्चयः। अतः खलु परिषदा परिपरिपालनीया काचित् आदर्शस्थानीया चतुष्पाठी। वर्षेऽस्मिन् परिषत्पाठशालायां पञ्चविंशत्या छात्रैरधीतानि विविधानि शास्त्राणि। द्विविधास्तावत् छात्रा अत्र वर्त्तन्ते। केचित् केवल संस्कृतशास्त्राध्यायिनः, अपरे च आङ्गलविद्यालयस्य अध्यापकाः च्छात्राश्च। स्वल्पेनैव कालेन पाठशाला एषा अध्यापनकौशलख्यातिं गता। अत्र तावत् छात्राणां विशिष्टो लाभः यत्तैरधिगम्यते परिषत्-पुस्तकालयस्य ग्रन्थानां साहाय्यम्। वर्षेऽस्मिन् पञ्च छात्राः परिषदो वृत्तिं समधिगताः। पञ्चदश छात्राश्च नाना विषयेषु राजकीयपरीक्षायाम् अवतीर्णाः। वर्त्तते च पाठशालामन्तरेण परिषदोऽन्यदपि कर्त्तव्यजातम्। सामर्थ्यवृद्ध्या च यतिष्यते परिषत् सम्यक् तत् पालयितुम्।

संस्कृतपाठशाला।

परिषद्ग्रन्थागारञ्च क्रमेणोन्नतिपथमेव आरोहति। क्रीता गते वर्षे ७११ मुद्रामूल्यका ग्रन्थाः। संगृहीताश्च बहवो मातृकाग्रन्थाः खुल्ना-हुग्ली-वर्द्धमान मण्डलेभ्यः।

ग्रन्थागारम्।

संस्कृतशिक्षावनत्या सह दृश्यतेऽनादरबाहुल्यं हस्तलिखित ग्रन्थेषु। अधुना वंगमध्ये केनापि संस्कृतचर्चा न क्रियते इति अवलोक्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृकाग्रन्थाः। पण्डितवंशोया अपि अनावश्यकभारत्वेन मन्यन्ते हस्तलिखितग्रन्थराशीन्। श्रूयते च तेषामपव्यवहारवार्त्ता निरन्तरमेव। शर्म्मण्यदेशीयैस्तावत् संगृहीताः पूर्व्वमेव अस्माद्देशात् बहवो ग्रन्थाः, राजपुरुषैश्च बहुशः संगृह्य अधुनात्र भज्यते आलस्यम्। किं नास्त्यत्र विषये देशवासिनां किमपि कर्त्तव्यम्? मन्ये समागतोऽयमेव पश्चिमः कालः। अतः परं खलु चिराय लोपं गमिष्यति बहु अमूल्यं वस्तु। आशास्यते अस्मिन् कर्म्मणि परिषदियं सर्व्वेषामेव समानुभूतिं सहायताञ्च समधिगमिष्यतीति।

ग्रन्थप्रकाशः। मुद्रापणमेव ग्रन्थरक्षणस्य प्रधानतम उपायः। विगते वर्षे प्रकाशितं कालीतत्त्वं नाम अप्रकाशितपूर्व्वं पुस्तकम्। वर्षेऽस्मिन् सम्पादितं गीतशङ्करीयं नाम गीतगोविन्दानुकरणग्रथितं गीतिकाव्यम्। प्रकाशितश्च नववर्षारम्भे परिषदाचार्य्यवर्य्येण श्रीयुक्तकालीपदतर्काचार्य्येण स्वरचितया टिप्पन्या सह गदाधरभट्टाचार्य्यकृतो मुक्तिवादः शिवरामकृत—प्राचीनटीकासहितः। पूर्णानन्दवंशीयेन पण्डितश्रीसतीशचन्द्रसिद्धान्तभूषणेन च रघुनन्दनभट्टाचार्य्यकृतम् अष्टाविंशतितत्त्वबहिर्भूतं दुर्गापूजातत्त्वं स्वरचितेन देवीमूर्त्तिपूजाया इतिहासेन सह प्रकाशतां नीतम्। वर्त्तन्ते च मुद्र्यमाणास्त्रयो ग्रन्थाः। (१) अनिरुद्धभट्टाचार्य्यकृता पितृदयिता। रघुनन्दननिबन्धेषु बहुश एव दृश्यते पितृदयिताया उल्लेखः। सा तु पितृदयिता अद्य यावत् कुत्रापि न परिदृष्टा। समधिगतश्च अस्याः कश्चित् ग्रन्थः परिषत्संगृहीतेषु पुस्तकराशिषु। अन्यतरेण परिषत्पुस्तकालयाध्यक्षेण श्रीदक्षिणाचरणभट्टाचार्य्येण च प्रयत्नतः सम्पाद्यते सा पितृदयिता। (२) भरतमल्लिककृतः कारकोल्लासः। मुग्धबोधस्य कारकांशाप्राचुर्य्यात् रचित एष ग्रन्थः प्रसिद्धनाम्ना भरतमल्लिकेन मुग्धबोध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठिनामुपकाराय। परिषदोऽन्यतरेण पुस्तकालयाध्यक्षेण श्रीजानकीनाथसाहित्यशास्त्रिणा च सम्पाद्यते एष ग्रन्थः। (३) शूलपाणिविरचितो दुर्गापूजाविवेकः। सम्पाद्यते चैष ग्रन्थः पूर्णानन्दवंशीयेन श्रीयुक्तसतीशचन्द्रसिद्धान्तभूषणेन। एतत् ग्रन्थत्रयं शीघ्रमेव प्रकाशतां गमिष्यति। आशास्यते च अतःपरं परिषत् प्रतिवर्षं सहस्रपत्रकान् ग्रन्थान् प्रकाशयितुमलं भविष्यतीति। एते च ग्रन्था: सर्वेषामेव सुलभाः पारिषदानाञ्च सुलभतरा भविष्यन्ति।

संस्कृतपत्रिका।

विभिन्नप्रदेशवासिनां पण्डितानां मध्ये नानाविधानां मतवादानां, व्याख्यानविशेषाणां च विनिमयो, विविधानां सिद्धान्तानां प्रचारश्च अस्याः पत्रिकाया मुख्य उद्देशः। सौभाग्यमेतत् यदेतदाशयोऽनेनैव कालेन अंशतः सिद्धिं गतः। नानादेशीयाः पण्डिता एतदर्थं रचयन्ति विविधान् प्रबन्धान्। एतदपि सौभाग्यं संस्कृतसेविनाम् यत् ते एकामपि संस्कृतपत्रिकां वर्षषट्कं यावत् यथावत् परिचालयितुं समर्था जाता इति। आगामिनो वर्षात् पत्रिकेयं देशप्रसिद्धानां पण्डितानां चित्रैः समलङ्कृता भविष्यति। प्रायेण पण्डिताः स्वचित्ररक्षायां भवन्ति समुदासीनाः। नास्ति च संशयोऽस्य प्रयोजनीयतायाम्। विविधसरसविषयसमावेशेन पत्रिकामेतां हृदयग्राहिणीं कर्तुं वर्त्तते वर्त्तिष्यते च अस्माकं यत्नविशेषः।

अभिनयः।

संस्कृतनाटकानां रङ्गमञ्चे पुनः पुनरभिनयः समपेक्षते समुद्योगबाहुल्यम् अर्थव्ययश्च। अतः परिषद्भवने एव निर्म्मिता काचिद् क्षुद्रा रङ्गभूमिः। कदाचित् मासिकसभायां कदाचित् सज्जनमहत्तरस्य शुभागमनमुपलक्ष्य अत्रैव कस्यचित् क्षुद्रस्य रूपकस्य अङ्कविशेषस्य वा अभिनयः शक्यते अनायासेनैव सम्पादयितुम्। वर्षेऽस्मिन् अत्र भासरचितानां मध्यमव्यायोगदूतघटोत्कचोरुभङ्गानां, महेन्द्रविक्रमकृतस्य मत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलासस्य, नूतनकविश्रीकालीपदतर्काचार्य्यकृतस्य स्यमन्तकोद्धारस्य च अभिनयः सञ्जातः। अन्यच्च, वाराणसीसंस्कृतमहासम्मेलने, संस्कृतकालेजस्य शताब्दीमहोत्सवे च आमन्त्रितैः पारिषदैः कृतो नाटकानामभिनयः। भद्रमहोदयाः, संस्कृतनाटकानां रचना अधुनापि न अतीतं वस्तु। अधुनापि बहवः कवयो रचयन्ति संस्कृतरूपकाणि। प्रदत्तोऽस्माभिः पूर्वमेव परिषदध्यापकश्रीकालीपदतर्काचार्य्यकृतस्य कस्यचित् नाटकस्य परिचयः। आशास्यते च अन्येषामपि अर्वाचीनानां कवीनां रूपकाणां परिचयोऽपि कालेन परिषदा दातुं शक्येत।

कर्म्मान्तराणि। यथापूर्वमस्मिन् वर्षेऽपि परिषदा गृहीतः पूर्ववङ्गसारस्वतसमाजस्य कलिकाताकेन्द्रे परीक्षाभारः। वर्षेऽस्मिन् वाराणस्यां जातमष्टमं संस्कृतमहासम्मेलनम्। तत्र निमन्त्रितया परिषदा सम्मेलनकर्म्मणि कृता यथासाध्यं सहायता। अन्यच्च, अस्मिन् वर्षे पूर्वेभ्यो वर्षेभ्यः समधिकतराः संस्कृतसाहित्यपरिषत्पत्रिकाः चतुष्पाठीषु पुस्तकागारेषु दरिद्रेभ्यः पण्डितेभ्यश्च शुल्कं विनैव वितीर्णाः। वर्त्तन्ते बहवस्तावत् सुयोग्याः पत्रिकापाठार्थिनो ये खलु नालं शुल्केन पत्रिकां ग्रहीतुम्। तेभ्यः पत्रिकादानं परिषदो महत् कर्त्तव्यम्। सामर्थ्यवृद्ध्या च सह परिषदा पत्रिकादानसंख्या नूनमेव वर्द्धनीया।

साहाय्यलाभः। पूर्व्वस्मिन् वर्षे वङ्गीयराजपुरुषैः परिषदः साहाय्यार्थं प्रदत्तं अष्टशताधिकं सहस्रम्। विगते वर्षेऽपि सहस्रत्रयदानेन जातास्ते अस्माकं कृतज्ञताभाजनम्। अपरञ्च संस्कृतकालेजस्य अवस्थापर्य्यालोचनसमितावपि परिषत्प्रतिनिधिग्रहणेन सम्मानिता एषा परिषद् राजपुरुषैः। ग्रन्थागारस्य साहाय्यार्थं कलिकातामिउनिसिपालमहासमित्या पञ्चाशदधिकशतत्रयं, दानवीरेण श्रीयुक्ततुलारामगोयेङ्कामहोदयेन च प्रतिश्रुतस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवशिष्टं सार्द्धशतद्वयं प्रदत्तम। दिगम्बरजैनसिद्धान्तप्रकाशिनीसंस्थया, वङ्गीयसाहित्यपरिषदा च तत्प्रकाशितमहार्घपुस्तकानि मुल्यं विनैव प्रदत्तानि। अतो जाता एते अस्माकं धन्यवादभाजनम्। त्रिवाङ्कुरराजपुरुषाः वरोदाराजपुरुषाश्च तत्प्रकाशितान् संस्कृत-ग्रन्थान् प्रदाय जाता अस्माकं धन्यवादास्पदम्। अन्ये च ये तावत् पत्रिकापुस्तकादिदानेन परिषद्वार्त्ताप्रचारेण वा सर्व्वदैव परिषदो महोपकारं साधयन्ति, विज्ञाप्यन्ते तेऽपि भूयोभूयोऽस्माकं धन्यवादाः। सुप्रसिद्धचित्रकारः श्रीयुक्तसुरेन्द्रनाथबागचीमहोदयो महामहो-पाध्यायानां चन्द्रकान्ततर्कालङ्काराणां तथा कालीप्रसन्नभट्टाचार्य्याणां चित्रं स्वल्पवर्त्तनेन विलिख्य जातश्चास्माकं धन्यवादपात्रम्।

परिषदः कार्य्यजातं क्रमेण वृद्धिं गतं गच्छति च। यत्र गृहे परि-षदधुनावस्थिता न पुनस्तद् गृहं पर्य्याप्तमधुना परिषत्कार्य्यजातस्य।

गृहव्यवस्था। भद्रमहोदयाः,परिषदियं कर्म्मणाकृष्टवती भवतां मनांसि। एतदेवास्याः परमं सौभाग्यम्। सुरचितया चानया परिषदा वङ्गेषु गौरवमयेन प्रतिष्ठानेन भवितव्य-मित्यत्र नास्ति सन्देहावसरः। भगवत्कृपया अर्हतु एषा परिषद् भवतामनुरागं लब्धुम्। ततोऽपगमिष्यन्ति अस्याः सर्व्वे अभावा इति शम्।

श्रीपशुपतिनाथशास्त्री
श्रीगोष्पतिकाव्यतीर्थश्च (सम्पादकौ)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदो वार्षिको आयव्ययसंक्षेपलिपिः ।

आयः	
वृत्तिरूपेण संगृहीतम् —	२३३२=)
प्रावेशिकरूपेण प्राप्तम् —	६॥)
पत्रिकाविज्ञापनलब्धम् —	९८)
पुस्तकविक्रयलब्धम् —	२७॥)
सामयिकदानरूपेण प्राप्तम्	४२१६॥।≡)
पत्रिकाप्रेरणव्ययार्थं लब्धम् —	१६॥)
पत्रिकामूल्यरूपेण प्राप्तम् —	।)
पुस्तकालये न्यस्तम् —	८)
शुल्कपत्रविक्रयलब्धम् —	॥।)
सेभिंस्‌व्याङ्कागाराद्गृहीतम्	१८०९)
कुसीदरूपेण प्राप्तम् —	५०)
कालीप्रसन्नस्मृतिभाण्डारे लब्धम्	१४)
प्रत्यर्पणलाभः —	१०५)
	८६८४॥/)

व्ययः	
गृहशुल्कम् —	४१६॥/-
पुस्तकप्रकाशव्ययः —	२५२=≡
पत्रिकाव्ययः —	११६२/≡
वेतनव्ययः —	८२२)
पाथेयव्ययार्थम् —	७३॥।=)
शुल्कपत्रक्रयार्थम् —	३२॥।)
मुद्रणव्ययः —	२९४॥/)
गृहोपकरणक्रयार्थम् —	४२१।—
विविधेषु —	३१/=
पुस्तकालयव्ययः —	७२१=)
देवपूजासु —	६७।=-
विशेषसभासु —	२३९॥।=≡
वार्षिकोत्सवेषु —	१३७।/≡
राजस्वम् —	४)
प्रचारार्थम् —	३७३।/)
सेभिंस्‌व्याङ्के दत्तम् —	१३००)
Postal Certificate —	१५००)
सारस्वतपरीक्षाव्ययः —	१७॥=≡
लेखाद्युपकरणम् —	४२।=)
संस्कारादिषु —	३।)
चतुष्पाठीषु —	५०३॥/)
अग्रिमदत्तम् —	५०।)
कालीप्रसन्नस्मृतिभाण्डारेदत्तम्	७०)
विज्ञापनसंग्रहव्ययः —	३९॥)
	८५७६/=

आयव्ययरक्षकः —

श्रीवामाचरणकाव्यतीर्थः

आयव्ययपरीक्षकः —

श्रीअवनीन्द्रनाथमित्र B.Sc.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदो नवमवर्षीयकार्य्यपरिचालकानां नामानि ।

सभापतिः—महामहोपाध्यायः श्रीयुक्तप्रमथनाथतर्कभूषणः

सहकारि-सभापतयः
- महामहोपाध्यायः श्रीयुक्त लक्ष्मणशास्त्री (द्राविड़ः)
- ,, ,, दुर्गाचरणसांख्यवेदान्ततीर्थः
- वेदान्तविशारदः— ,, अनन्तकृष्णशास्त्री
- श्रीयुक्त राधारमणविद्याभूषणः
- प्रभुपादः— ,, सत्यानन्दगोस्वामी
- श्रीयुक्त द्वारिकानाथन्यायशास्त्री
- ,, जगदीशवेदव्यासः

सम्पादकौ
- श्रीयुक्त पशुपतिनाथशास्त्री एम्-ए, बि, एल्, पि-एच, डि,
- ,, गोष्पतिरायचतुर्धुरीणकाव्यतीर्थः

सहकारि-सम्पादकाः
- श्रीयुक्त वामाचरणकाव्यतीर्थः
- ,, दीनबन्धुसाहित्यशास्त्री
- ,, जानकीनाथसाहित्यशास्त्री
- ,, चिन्ताहरणकाव्यतीर्थः वि-ए,

कार्य्यनिर्व्वाहकसदस्याः—

श्रीयुक्त जगन्मोहनज्योतिर्व्विनोदः
,, चितीशचन्द्रचक्रवर्त्ती एम्-ए, वि-एल्,
,, अक्षयकुमारशास्त्री
,, आशुतोषविद्याभूषणः
,, ताराचरणआयुर्व्वेदशास्त्री
,, वामापदविद्यारत्नः
,, महेन्द्रनाथभट्टाचार्य्य एम्-ए,
,, जानकीनाथकाव्यतीर्थः
,, कृष्णप्रसन्नतर्कवागीशः
,, अमरेश्वरठाकुर एम्-ए,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीयुक्त अम्बिकाचरणसाहित्याचार्य्यः
,, नगेन्द्रनाथठाकुरसिद्धान्तरत्नः
,, प्रभातचन्द्रकाव्यतीर्थ एम्-ए,
,, श्रीधरव्याकरणतीर्थकाव्यविनोदः
,, दुर्गामोहनकाव्यसांख्यपुराणतीर्थ एम्-ए,
,, दक्षिणारञ्जनशास्त्री एम्-ए,
रायः ,, ललितकुमारमित्र एम्-ए,
कविराजः ,, हेमचन्द्रसेनकविरत्नः
,, दक्षिणाचरणभट्टाचार्य्यः
,, कालीपदतर्काचार्य्यः

विभागीय-कर्म्मपरिचालकाः—

आरव्ययलिपिरक्षकः—श्रीयुक्त दक्षिणाचरणभट्टाचार्य्यः
,, परीक्षकः—श्रीयुक्त अवनीकान्तमित्रः बि-एस्-सि, बि-एल्
आचार्य्यः—श्रीयुक्त कालीपदतर्काचार्य्यः

पत्रिकासम्पादकौ { महामहोपाध्याय श्रीयुक्त दुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीयुक्त कालीपदतर्काचार्य्यः }

पत्रिका सहकारिसम्पादकः—श्रीयुक्त दुर्गामोहनकाव्यसांख्यपुराणतीर्थ एम्-ए,
नाट्याचार्य्यः— श्रीयुक्त गोष्पतिकाव्यतीर्थः
सहकारि नाट्याचार्य्यः— श्रीयुक्त जानकीनाथकाव्यतीर्थः

अभिनयसम्पादकौ { श्रीयुक्त जगन्मोहनज्योतिर्व्विनोदः
,, वामापदविद्यारत्नः }

सङ्गीताचार्य्यः— ,, अपर्णाचरण वन्द्योपाध्यायः

ग्रन्थालयाध्यक्षौ { श्रीयुक्त जानकीनाथसाहित्यशास्त्री
,, वामाचरणकाव्यतीर्थः }

ग्रन्थरक्षकः— ,, चिन्ताहरणकाव्यतीर्थः बि-ए
पत्रिकारक्षकः ,, रामकृष्णचक्रवर्त्ती बि-ए

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतुविलसिते वर्षाविलासः

पूर्व्वतोऽनुवृत्तः

(लेखक :—श्रीलक्ष्मीनारायणद्विवेदी)

पयोमुचि स्वैरमलं जलं रते, प्रवर्ष्य ग्रीष्मैरुपरञ्जिता मही ।
प्रियेव रोमाञ्चितगात्रशालिनी, प्रियेण मुक्ता परिरभ्य राजते ॥३८॥
गिरी सचोलाविव विस्तृतस्तनौ, परावरौ चालितगैरिकारुणौ ।
निरम्बुसाम्बुम्बुधराम्बराञ्चितौ, विराजते क्ष्मा दधतीव नायिका ॥४०॥
यथा मनो नाद्य विशन्ति दन्तिनो, नदीषु पङ्कादिविभीतचेतसः ।
न चातिवेगोद्धतधाग्रधारया, रयन्ति साकं मकरा मदोत्कटाः ॥४१॥
स्फुटन्महावर्तमपेतशैवलं, नदीषु दुर्दर्शतरङ्गसङ्कुलम् ।
प्रवाहविध्वस्ततटं समुच्छलज्जलं रयाद्धावति भूरिपङ्किलम् ॥४२॥
समीरवेगोद्धतवारिवारितास्तरन्ति नावः कठिनं सकम्पनाः ।
पदे पदे मज्जनभीतयो रयात्, प्रवाह्यमाना बहुधा च धारया ॥४३॥
प्रवाहवेगेन समं प्रवाह्यमाना विभग्नास्तटजातवृक्षाः ।
मुहुर्धुनाना इव हस्तपादं, शाखप्रशाखैर्विसरन्ति मग्नाः ॥४४॥
महीधरेभ्यः कृतभीषणस्वनं नितान्तदुर्दर्शरयेण निर्झराः ।
अनेकधारं समधारमुन्नतान्, निपातयन्तीः परिवर्जयन्त्यपः ॥४५॥
बलाहका भूमिधरैर्धृतासुभिर्विशालकालायसपर्वतोपमाः ।
महाघनश्यामवनैर्न ते भिदामधिष्ठितास्थानकृतां विहायते ॥४६॥
विपक्वनीलप्रसवौघशालिनः, कलोच्चशिञ्जानविहङ्गमाकुलाः ।
गलत्पयोबिन्दुचलद्वरिद्दला मनांसि जम्बूतरवो हरन्ति नः ॥४७॥
विलासिनीवाक्यविलासहारिणा, रसालशाखान्तरिताध्वयायिनाम् ।
समाह्वयन्तीव कलेन कोकिला, मनःसु नूनं विदधाति सम्भ्रमम् ॥४८॥
सुशीतलो वाति मनोरमोऽनिलः, स्पृशन् पलाशाञ्जगतीरुहामिव ।
करान् प्रियाणामिव जीवयञ्जगत्, सुदुर्बलानामपि पोषयन्वपुः ॥४९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समानयन्वारिधरानितस्ततो, मनांसि भूयो मदयन् विलासिनाम् ।
प्रफुल्लमल्लीजनितं च भूद्भवं, वहन् सुगन्धं सुरमालजम्बुजम् ॥५०॥
हरिन्मणिश्यामलशष्परञ्जितं, प्रफुल्लयूथीषु षडङ्घ्रिगुञ्जिते ।
कलस्वरं कोकिलकोरकूजिते, धरोत्थपुष्पोत्थसुगन्धभाविते ॥५१॥
शनैः शनैर्वाति सशीतमारुते, प्रवर्ष्य निर्धौतमले कृतेऽम्बुदैः ।
जलप्रसेकार्द्रतले मनोहरे, प्रयाति पाथोऽधिपतेर्दिशं रवौ ॥५२॥
करे गृहीत्वा प्रमदाकरं मुदा, विकस्वरं काञ्चनरत्नभूषितम् ।
मृदु युवानो विहरन्ति सस्मराः, स्मितं लपन्तो द्रुमवाटिकाङ्गने ॥५३॥
उपायमानेऽस्तमिते मनोरमं, सहेन्द्रचापं वृणुते नभस्तलम् ।
क्वचिद्घनाः कुङ्कुमकेशरारुणा जलेषु बिम्बारुणिमान(१)मञ्जते ॥५४॥
अयं परीतोऽरुणिमा समन्ततस्तमम्बुवाने धरणीतलं जले ।
निवृष्टतोयेषु पयोधरेषु च, ददाति विध्वस्तनिदाघदर्शनम् ॥५५॥
अदर्शयित्वैव मुखं दिवाकरः, शनैरगादस्तगिरेः पदाश्रयम् ।
महामहाकृष्णपयोमुचांचयास्तमो निपुष्णन्ति घनं(२) निशामुखे॥५६॥
दिशावलम्बाम्बुमुचां चयादिवाञ्जना( )त्समञ्जद्वरणीं शिलोच्चयात् ।
समुत्थितं व्योमगवेष्यतारकं, घनं तदाप्नोति तमो निशामुखे ॥५७॥
सरःसु सङ्गत्य सहस्रशो निशामुपेत्य विश्रब्धतरं महास्वरम् ।
रवं प्रकुर्वन्त्यहतं हि दर्दुरा, दिगन्तराणां भिदुरं सुदुःश्रवम् ॥५८॥
प्रतीयते नात्र समासमं स्थलं, समं धरित्रीवलयं तमोवृतम् ।
न चन्द्रमा रम्यकरैर्वराङ्गनामुखानि संस्प्रष्टुमिहोपसज्जते ॥५९॥

क्व भान्ति(४) वृत्ता क्व गृहाणि गर्तका-
दिकं क्व शैलाः क्व जनाः क्व वा जलम् ।

---

(१) बैम्बारु० इति पाठान्तरम् । कर्मधारयः ।
(२) भृशमिति च ।
(३) दिशावलम्बाम्बुमुचामिवाञ्जनाच्चयात् इति वा पाठः ।
(४) सन्ति इति वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुतोऽप्यनासादितवैभवैरहो,
निरर्थकत्वं किल लोचनैर्मतम् (१) ॥६०॥

क्षणं क्षणं क्ष्माम्बरयोस्तलं लघु प्रकाशयन्ती क्षणदासमागमे ।
क्षणप्रभा दर्शयते स्वभावजं, भुवि प्रसिद्धं क्षणिकत्वमम्बुदे ॥६१॥
शतह्रदाह्रादविचेतचेतसां, नितम्बिनीनामुरुभीरुतायुजाम् ।
न्यपाति गर्भैः सममिव भैरवेह्युग्रपथ्थितेऽस्मिन् समये दुरासदे ॥६२॥
वितारकं घोरतमोवृतं नभो, न भाति भीमं घननादपूरितम् ।
सराक्षसीकाऽपि निशा भयावहा, निशाट-रावाकुलिता ससाध्वसा ॥६३
वने वनेऽनारतझिल्लिकारवैः क्षणे क्षणे कौशिकफेरु-विस्वरैः ।
पदे पदे श्वापदनर्दितैः सरीसृपादिसंसर्पणफूत्कृतिस्वनैः ॥६४॥
निशीथवाताहतपर्णशब्दितैर्यदा कदा वाऽविरतं प्रवर्षणैः ।
दुरुद्धरं धारयति निशीथिनी, तमो वपुर्भीमतमं महाघनम् ॥६५॥
अहो असुखिन्नपि मन्मथार्दिता निशीथकाले किल काचनाङ्गना ।
जनैरयातेन पथाऽसहायिनी, प्रयातुमीष्टे सहसैव वल्लभम् ॥६६॥
निशीथकाले पृथुलैः प्रवर्षति, पयोधरे बिन्दुभिरुन्नतस्वनैः ।
विलासिभिः कामपरीतमानसो, विहारमङ्गीकुरुतेऽङ्गनाजनः ॥६७॥
नितम्बिनीनृत्यविधौ न वारिदः, पृषत्स्वनैर्दुन्दुभिमन्द्रगर्जनैः ।
मयूरनादैश्च समीरणस्वनैः करोति नो वाद्यसहायतामयम् ॥ ६८॥
शनैरुपायाति समीरणो वहन् मनोज्ञगन्धं कुटजादिसम्भवम् ।
सशीकरो वर्षनिशावतंसनः, प्रगाढनिद्रां वितरञ्छ्रमं हरन् ॥६९॥
वितत्य वासो मशकादिवारकं, महार्हशय्यासु विलासिनामिह ।
श्रमापहा वीतनिदाघतस्रयः, सहाङ्गनाभिर्व्यतियन्ति रात्रयः ॥७०॥
भवन्ति नव्यानि शिवान्युषांसि, कूजन्ति वृक्षेषु मुदा पतङ्गाः ।
हरित्पलाशानि वनान्तराणि, विभाति सुस्नातवतीव भूमिः ॥७१॥

---

(१) कुतोऽप्यनासादितविभवेन हो निरर्थकत्वं किल चक्षुषामतमिति वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजःशुचितया नवेव युवतिर्धरातरलितोन्मुखो विलसति ।
विधूतपुलिना रयेण महता सरन्ति सरितो जलोद्धतगति ॥७२॥
नद्यः पूर्णा वारिणा भूश्च सस्यैः पूर्णा पूर्णास्सर्वलोकाभिलाषाः ।
कारुण्यार्द्रे न्यायवृत्ते जनेशे, लोका कामैरेव पूर्णा भवन्ति ॥७३॥

सन्तर्प्याम्भो नव नव धारापूरै
भूमिं त्यक्त्वा गगनवितानं यान्ती ।
दिग्द्वाराणीन्दुसरणमार्गं दत्त्वा,
भूयाद्भूत्यै जलधरमालाऽसौ वः ॥७४॥

कान्ताभिः संयोज्य वियुक्तानुपतप्तां
स्तापैर्नैदाघैर्हरयित्वाऽवनिजातान् ।
लोकानाजीव्याद्य चलन्मत्तमयूरो
वर्षर्तुर्भूत्यै भवताद्दै भुवनानाम् ॥७५॥

आयुर्व्वेदस्य महिमा ।

(महामहोपाध्याय कविराज श्रीगणनाथसेन महाशयस्य वाङ्मयम्)

[अनुवादकः—K. A. रामलिङ्गशास्त्री]

दाक्षिणात्यवैद्यसङ्घस्य आदरेण ३०—१०—२३ तम दिवसे सायं मद्रपुरी—(Madras) क्रैस्तवच्छात्रसङ्घस्य उपकार्यायाम् वङ्गदेशाभिजनैर्महामहोपाध्यायकविराजश्रीगणनाथसेनमहोदयैः आयुर्वेदम् अधिकृत्य किमपि वाङ्मयं मधु व्यकीर्यत ; आगता अपरिमिताः श्रोतारः ; (Captain) सेनानीः श्रीनिवासमूर्त्ति Dr. लक्ष्मी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पति वैद्यपण्डितः M. दुरैस्वामि अय्यङ्गार् प्रभृतयः मद्रपुरीवास्तव्या आयुर्वैदिका आङ्ग्लभिषजश्चात्र समभिलन्। डाक्टर, लक्ष्मीपतिः अग्रासनाधिपत्यम् आवहन्, उपन्यासकमहाशयम् कलिकातावासिनं प्रख्यातम् आयुर्वैदिकम्, आयुर्वेदमहामण्डलाध्यक्षं सदस्येभ्यः समसूसुचत्।

अनन्तरं वाङ्मयी सुधा सस्यन्दे ; तद्यथा—

अयि महनीयाः! श्रीमतां पुरतोऽस्माकम् आलापावसरलाभो महता भागधेयेन उपनत इत्याकलयामि ; महाविषयो हि आयुर्वेदः ; स च शास्त्रीयः ; अशास्त्रीय इति प्रतिमुहुः केश्चित् प्रलप्यते ; नैतद् युक्तम् ; यद्ययं स्यादशास्त्रीयः, वृथैवैतत्कथाऽधुना ; पाश्चात्यचिकित्सानुवर्तिनः किल—आयुर्वैदिकान् तृणाय मन्यन्ते ; नार्हन्ति बहवो ह्येषु आयुर्वेदीयशास्त्राणि विज्ञातुम् ; एभिरज्ञातभाषाया हि निबद्धाः सन्ति बहवो निबन्धाः ; भाषाविवर्त—(Translation) पाठेन बहवो हि प्रतारिताः ; तथ्यभूता विवर्ता यतो दुर्दर्शाः अतोऽवधेयमखिलैः ; पाश्चात्यचिकित्सकसुहृदस्तु कतिचित् शर्मण्य—(German) पारसीक—(French) भाषामयान् ग्रन्थान् केवलम् आपाततः पठितवन्तः ; कुतो नु नामैते संस्कृतग्रन्थान् न पठन्ति? सुलभा भाषा हि गैर्वाणी! एतस्यास्त्वध्ययनं न क्लेशावहम् ; अतोऽनधीत्य भाषान्तरविवर्तान् संस्कृतभाषामयायुर्वेदनिबन्धाध्ययनेनैव तत्त्वम् अवगन्तव्यम् ; एवं कृते नास्मान् आङ्ग्लागदङ्कारा अवधीरयेयुः ; अस्माकं परस्पराभिमान आवश्यकः ; आयुर्वेदचिकित्सा हि जनानाम् अल्पव्ययेन सुलभा ; नातिव्ययापादिका ; आयुर्वेदभिषज्यायां नैवास्ति स्खलितं किञ्चित् ; आयुर्वेदानुवर्त्तिनाम् अश्रद्धैव अपवादस्य हेतुः ; आयुर्वैदिकभैषज्यं शक्तिमच्च, भारतवर्षीय जनतानुगुणं च, 'यस्य देशस्य यो जन्मो तज्जं तस्यौषधं हितम्' इत्यभियुक्तोक्तेः ; बहूनि निदर्शनानि निर्दिश्य,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वैदिकौषधानां प्रशस्ता गुणाः प्रकाशयितुं शक्याः ; गुद-द्वारा 'एनिमा(Enema)नाम्नः साधनस्य अन्तःप्रवेशनेन आङ्ग्लचिकित्सकैः आरच्यमाना आन्त्रशोधना अनिदम्प्रथमप्रवृत्ता, इतोऽपि श्रेयस्यो रीतयः सन्त्येव।

चरित्रपूर्वकं कमपि इह विषयं कथयामि ; आयुर्वेदोऽयं वेदसमनन्तरसमयः, वेदसमप्रामाण्यश्च ; 'आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्' इत्यादिवचनप्रामाण्यात् ऋग्वेदस्य उपवेदतया आयुर्वेदोऽयम् उपगीयते ; वेदसमनन्तरसमयः संहितायाः ; निर्णेतुं समयमिमं प्रारम्भा बहवः प्रारेभिरे ; यद्यपि असौ प्रयत्ना विफलाः, तथापि, क्रिस्त्वब्दतरणस्य हायनानां सहस्रात्, सहस्रद्वयाद्वा अर्वागिति समयमेनं निश्चिक्युः ; सञ्जितासु बृहतीषु पञ्चाशति षष्टौ वा संहितासु, अष्टधा व्यभाजि आयुर्वेदः ; शास्त्रस्य, प्रसवस्य, उन्मादस्य, कुमारस्य च चिकित्सा इत्येवमादयश्च सन्ति कतिचन भेदाः ; एकैकस्यापि अपरिमिताः प्रबन्धा विलिखिताः ; तेषां बहवो भागाः, अस्मदुपलब्धेषु व्याख्यानेषु अन्तर्हिताः ; अगस्त्यसंहिता भूयशो द्रविड़देशेषु वरीवर्तीति विज्ञायते ; शस्त्रचिकित्सा पुराऽस्फायत ; इदानीन्तन शस्त्रचिकित्सासाधनेषु (Instruments), शते नवतिः साधनानि पुरातने काले ध्रुवमुपायुज्यन्त ; करणानि इमानि किञ्चिद्दीर्घाणि अथवा ह्रस्वाणि स्युरिति सम्भाव्यते ; किन्तु, सत्यैव तत्सत्ता ; (इतीरयन् करणानि कानिचित् प्रादर्शयत्) अपूर्वा आयुर्वैदिकग्रन्था नैके केरलेषु विलसन्तीति अधुनैवाहं जाने ; अरेबिया (Arabia), ईजिप्ट् (Egipt) प्रभृति देशाः आस्माकचिकित्साप्रकारान् बहुलम् उपायुञ्जत ; यद्यपि असौ देशा भारतवर्षीय बहु धारयन्ति, तथापि, आस्माकीन आयुर्वेदः चोणचोणः ; पाश्चात्याः तत्र महतीं समुन्नतिं संलेभिरे।

धातुद्वारा आमयनिर्णयः अस्मदीयचिकित्सारीतिषु प्रशस्तः ;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरीचिस्पृष्टबेराऽऽर्द्रकादिभेषजशक्तिं पाश्चात्याः संजानते ; आस्मा-कीनरसायनतन्त्रनैपुण्यं नात्र वक्तुमावश्यकम् । जानपदक्षोभ-जन्य-राज्यविपरिवृत्तिप्रभृतिभिर्हेतुभिः आयुर्वेद इदानीं दुर्दशासुपगमि-तोऽस्ति ; क्रमेणास्य परां काष्ठामारूढोऽप्यायुर्वेदः समूलघातमहत इत्येतन्ननु चित्रम् ! एतद् विचिन्त्यैव अस्माभिस्तृप्तिः कर्तव्या ; दक्षिणभारतवर्षस्य केवलं, न महती विनष्टिः ; यतो दाक्षिणात्याः सामान्यतः स्वीयान् निबन्धान् चिकित्सारीतीश्च परिपालितवन्तः ।

यूनानिवैद्यकं हि सुतरामायुर्वेदानुविद्धम् ; हकिम्, अज्मलखान् प्रभृतिभिर्मेधाविभिः, यूनानिभैषज्यरीतिरतितरां प्रशस्तेति निग-द्यते ; आयुर्वेद-यूनानि-रीत्योः महदैकमत्यं सहर्षं संसूचयामि, राम एव रहिमान् परिणेमे यथा, ननु तथैव आयुर्वैदिक्य ओषधयो बह्व्यः यूनान्यादिपरिभाषान्तरे भिन्नभिन्ननाम्ना आहूयन्ते ; मोहम्म-दीयानुशासनसमये आयुर्वेदमाहात्म्यमुपन्नाय, तदनुसारेण यूनानि-रीतिर्भूयसी निरमीयत ; यतो वयमधुना आयुर्वेदस्य महिमावगमने बद्धकङ्कणाः, अतः, इतःपरमपि वा अभ्युदय आविर्भवेदिति ध्रुवं विश्वसिमः ; प्राचीनेतिह्यावगतिरेव आयुर्वेदाभिवर्धने चोदनायते ; आयुर्वेदाभिवर्धने अद्य यावद्वयमश्रद्धाना एव आस्म ; इतः परं न तथा वर्तितव्यम् ; प्राचीनसमुन्नतिः कीर्तेश्च पुनरुद्धरणे यतितव्यम् ; शास्त्रधोरण्या पाश्चात्यरीत्यनुसारम् आयुर्वेदरीत्यभिवर्धने कियान-स्त्यवकाश इति आयुर्वैदिकैरवधेयम् ; "न कुत्सनीया रीतिः सा या हि शास्त्रानुसारिणी ; रीतिभ्यः परकीयाभ्यः समीचोऽंशस्य सङ्ग्रहः । कार्यं इत्येतदेवाद्य पाण्डित्यं मन्महे वयम् ॥" एतत्कालानुकूलानि आयुर्वैदिकपुस्तकानि सञ्चीयन्त बोधनीयानि ; बहून् नव्यान् आमयान् भुवने प्रसृतान् विविच्य, नूतनचिकित्साविशेषोपयोजने श्रद्धेयम् ; ननु तदैव आस्माकीनचिकित्सारीतिरितोऽपि समुन्नमेत् ।

आयुर्वेदस्य सकलोऽप्ययं महिमा, अधुना न शस्त्रचिकित्सायत्तः;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तर्हि ? साधारणमेवच्चरीतिरिक्तैव विशिष्य अनुष्ठानगोचरताम् आपद्यते ; आयुर्वेदनिरूपिता शस्त्रचिकित्सा कियत् प्रशस्तेति, मन्यामहे—कतिचिदेव भवन्तू जानीयुरिति। (इतीरयित्वा पश्चाच्छदपूर्वाणि शस्त्रचिकित्सासाधनानि निदर्शयामास) बहूनि सन्त्यपि साधनानि पुरातने हि समये आयुर्वेदिकैरुपायोजितानि ; साधनानां नामधेयमेव तदीयमाकारं विशदयति ; (एकैकस्यापि करणस्य नाम निर्दिश्य, तदीयं च कृत्यं निरदिचत्) अतः, मान्याः ! सगौरवम् आयुर्वेदतत्त्वजिज्ञासुभिः तन्महिमावगतिनं क्लेशसाध्या भवेदिति शम्। ('स्वदेशमित्र'पत्रादि विषयोऽयमनूदितः)।

सोमं प्रति तारायाः

लेखकः—श्रीयामिमीकान्तसाहित्याचार्यः

किं लेखनि ! त्वमधुना विलिखिष्यसीमं
शिष्ये गुरोः प्रणयिनो-प्रणयापवादम्।
दासः करो हि मनसो भवसि त्वमस्य
दासी, वृथा परिजने वचनीयतास्ति॥

चित्तं पतित्वमधितिष्ठति देहयष्टे
स्तत् साम्प्रतं मदनदस्युवशं प्रयातम्।
सापि प्रभोः पदमधीत्य मनोभवस्य
दास्यं सुदुःसहतरं वृणुते वराकी॥

चेतःसरित्पतिरसौ मम मथ्यमानो
मन्थाचलेन मदनापरनामकेन।
धैर्याख्यकौस्तुभमुखान् हि मणीन् प्रसूय
हा !! साम्प्रतं रतिविषं विषमं प्रसूते॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्माद्दिनात् प्रभृति सोम मदीयभर्त्ता
शिष्येषु शास्त्रनिवहं वितरीतुमीष्टे।
तस्मादहं निशि दिवा शतशो नवीनाञ्
शिष्यानिहाश्रमपदे परिलोकयामि॥
ते भक्तितो 'जननि हे प्रणमामि तुभ्य'
मित्यं वदन्ति यदि, निर्म्मल-मातृभावाः।
चित्तात्तदा वहति मे शतधा सुखेन
गङ्गाप्रवाह इव विष्णुपदात् पवित्रः॥
किन्तु प्रियोत्तम यदा प्रभृति त्वदीयं
रूपं परं निरुपमं वत लोकयामि।
शुष्का तदा प्रभृति मे हृदि गाङ्गधारा
जागर्त्ति तत्र विषमो हि विषप्रवाहः॥
हे चित्त! नैतदुचितं भवतः कथञ्चि-
दित्यात्मनां शतशतीमनुशासनानाम्।
यच्छामि मुग्धमनसे सततं विनीय
मत्तो न शाम्यति हितैर्व्वचनैः कदापि॥
ताराहृदीश्वर! महान् समरः समाप्तो
मामेव रत्नममलं प्रति लोभमित्य।
मच्चेतसा मनसिजस्य महाबलस्य
लब्धा परं विजयिता मकरध्वजेन॥
आसीत् पुरा मम दृशोस्तपसो वनं यत्
रामायुधं रतिवचः क्षणदाचराणाम्।
त साम्प्रतं तव निशाकर! रूपमूढ़-
मच्चक्षुषोः प्रतिचकास्ति रतेर्निकुञ्जम्॥
या कौमुदी शरदि पूर्व्वमपूर्व्वशोभा
देहे मम प्रियसखीव सुशीतलासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा साम्प्रतं त्वततनौ सहसा लगन्ती
सापत्नरोषदहनं हृदये तनोति॥
'द्रक्ष्यामि नो कुमुदिनी'मिति भावबद्धा
सायं सखे! सरसि यामि निमील्य नेत्रे।
सा ते शशाङ्क! करसङ्गतदेहभारा-
यत् सुन्दरं हसति, तद्धि मया न सह्यम्॥
आसीत् प्रिय! प्रथमदर्शनदानकाले
तारापते! तव यथा नु तथास्ति तारा?
नाऽऽलोकसे किमु विशेषलवं हि तस्या
देहेषु कर्मसु तथा वचनेषु बन्धो!॥
पुष्पाणि चेतुमनसा भवता प्रभाते
गत्वा हि पुष्पविपिनं न विलोक्यते किम्?
एकत्र सञ्चितमहो! नवपुष्पराशिं
मन्नेत्रसम्भवजलेन हिमेन सिक्तम्॥
शास्त्रं यदा गुरुमुखात् प्रिय हे शृणोषि
सानन्दमानसमलिन्दतले निषण्णः।
दासी गृहान्तरगता तृषिता चकोरी
रूपामृतं पिबति नेत्रपुटेन मुग्धा॥
पाठात् परं प्रिय! यदा नमसि त्वमेनां
दासीं सखे! भुवनसुन्दर! तं प्रणामम्।
नेत्रे निमील्य कलयामि तव प्रयत्नं
प्रेमाभिमानमपनेतुमहो ममैव॥
रात्रौ गुरोः सहचरत्वमहं सुधांशो!
त्वामेव चेतसि निधाय दधामि नित्यम्।
का कामिनी ननु नवीनवयाः स्वभर्त्त-
र्वार्द्धक्यरुग्णवपुषि प्रणयं दधाति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धो गुरुस्तव यदा हि पतिव्रताना
माचारपद्धतिमिद्धो वत भाषते माम्।
तस्मिन् क्षणे मम सुधामय ! कर्णयुग्मं
कण्ठामृतं मृगयते तव हे मृगाङ्क !॥
आचार्य्ययज्ञसमिदाहरणाय बन्धो !
पर्य्यायतो भवति याति वनं विदूरम्।
धूमस्य दोषमभिधाय पिधाय नेत्रे
संवारयामि विपुलां वत लोकलज्जाम्॥
निद्रातु निर्दयमिदं तव नेत्रयुग्मं
तारानवीनवयसः कति वासराणि ?
जानीहि यौवनमिदं बुधकामिनीनां
कादम्बकोरकमिव क्षणशोभमानम्॥
किंवाधिकं लिखतु मे ह्यत लेखनीयं
यद्यत् परं सकलसुन्दर ! सर्व्वमेव।
नीत्वानुमानसरणिं कुरु तन्मतं यद्
दासीकृति व्रतवधो रमणीवधो वा।

गुरुशिष्यसंवादः।

(लेखकः श्रीशरत्कमलन्यायस्मृतितीर्थः)

गुरुः। वैदिके युगे ब्राह्मणादिवर्णविभागो नासीदिति श्रीमतां यस्तावत् पूर्व्वपक्षस्तस्योत्तरं कथितमेव, तथापि स्मरणार्थं श्रीमतां तत्समाधानसंक्षेपः पुनरपि कथ्यते। तथाहि—

१। "ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत"॥ (पुरुषसूक्तम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२ । "तं ब्रह्माणं सुमेधां करोमि" । (देवीसूक्तम्)

३ । "विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।"

(निरुक्तधृता श्रुतिः)

"यस्मादेते मुख्यास्तस्मान्मुखतो ह्यसृज्यन्त ।"

(पूर्वोक्तश्रुतिव्याख्याने शतपथब्राह्मणम्)

४ । ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्नव्यभवत्

तच्छ्रेयोरूपमत्यसृजत

क्षत्रम्, स नैव व्यभवत् स विशमसृजत, स

शौद्रं वर्णमसृजत । (बृहदारण्यकश्रुतिः)

५ । "तद् य इह रमणीयचरणा अभ्याशोह्रि रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा, य इह कपूयचरणा अभ्याशोह्रि यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा ।" (छान्दोग्यश्रुतिः)

पूर्व्वोक्तेषु वेदवाक्येषु ब्राह्मणादिवर्णनामश्रवणाद् वैदिके युगेऽपि ब्राह्मणादिवर्णविभाग आसीदेव इत्यस्मिन् विषये नास्ति सन्देहलेशोऽपि ।

"जन्मना जातिरुच्यते"—अयमपि सिद्धान्तः पूर्व्वमेव प्रतिपादितः । अपिच वैदिकादपि आचारात् तादृशः सिद्धान्तः प्रमाणीकृतः । तथाच वेदः—

"स होवाच अजातशत्रुरेतावदनु३ इत्येतावद्धीति

नैतावता विदितं भवतीति स होवाच गार्ग्यः उपत्वायानीति,

स होवाच अजातशत्रुः प्रतिलोमञ्चैतद् यद् ब्राह्मणः

क्षत्रियमुपेयात्

ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति, तं

पानावादायोत्तस्थौ ।"

पूर्व्वोक्तश्रुत्या अब्रह्मज्ञो ब्राह्मणो गार्ग्यो ब्राह्मणपदेनाभिहितः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मज्ञः अजातश्चत्रुश्च क्षत्रियपदेनाभिहितः। अपि च ब्रह्मज्ञो ब्राह्मणेतरः (क्षत्रियादिः) अब्रह्मज्ञं ब्राह्मणं नोपनयीत, प्रत्युत तादृशेन (ब्रह्मज्ञेन) क्षत्रियादिना तादृशः (अब्रह्मज्ञ) ब्राह्मणः सम्मानार्ह इत्यपि स्पष्टतोऽवगम्यते। एतेन "गुणकर्म्मविभागश" इति वचनद्वारा यस्तावत् पूर्व्वपक्षः कृतस्तस्यापि सुसमाधानमुपपन्नम्।

अपिच ब्राह्मणादिसन्तानो यदि ब्राह्मणत्वादिजातिविशिष्टो न भवति तदा विवाहगोत्रादिनिरूपणमपि नोपपद्येत। तथाच—

"असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने॥"

इत्यादि स्मृतिरप्यनुपपन्ना स्यात्। ततश्च एतदुक्तं भवति पूर्व्वजन्मनः शुभाशुभकर्म्मानुसारत एव जीवः शुभाशुभब्राह्मणचण्डालादिजन्म लभत इति। एतदेव सूत्रितं भगवता पतञ्जलिना—

"सति मूले तद्विपाको जात्यायुर्भोगाः।"

व्याख्यातमेतद् वेदव्यासेन भगवता "जन्मप्रायणान्तरे कृत······ पुण्यापुण्यप्रचय······प्रायणाभिव्यक्तः एकप्रघट्टकेन मरणं प्रसाध्य एकमेव जन्म करोतीति। अयमेव सिद्धान्तः सूत्रितः परमर्षिणा आपस्तम्बेनापि—

"धर्म्मचर्य्यया जघन्यो वर्णः पूर्व्वं पूर्व्वं वर्णमापद्येत
जातिपरिवृत्तौ।"

अपिच "अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत" (१) "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं शरदि वैश्यम्"—(२) इत्यादि तैत्तिरीयश्रुतिरपि गुणकर्म्मानुशीलनयोग्यताप्राप्तेः प्रागेव तत्तद्वर्षे तेषामुपनयनं व्यवस्थापितवती। ब्रह्मवर्चसकामस्य पञ्चमवर्षेऽप्युपनयनं दृश्यते। यदि नाम तथाकथितगुणकर्म्मानुशीलनजन्यजातिः स्वीक्रियेत तदा उपनयनस्य विद्याभ्यासस्य वा भूमिकायाः पूर्व्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणत्वादिजातिर्न सम्भवत्येव। अपिच तादृशगुणकर्म्मभिर्ब्राह्मणत्वादिः, ब्राह्मणत्वादिना च तादृशकर्म्माधिकारः इति अन्योन्याश्रयोऽपि दुष्परिहर एव। ततश्चैवमुपनयनादिकर्म्मानुष्ठानं ब्राह्मण्यादिनिरूपणञ्च एतदुभयमपि निरूपयितुं न शक्यते। एवं नामकरणाद्यन्त्येष्ट्यन्तकर्म्माणि प्रतिवर्णं पृथक् पृथगेव विहितानि। नामकरणादिकर्म्म केवलेन मनुष्यनाम्ना कुत्रापि न विहितम्। अतो गुणकर्म्मविकाशात् पूर्वं यदि जातिनिरूपणमसम्भवं स्यात्तर्हि पूर्व्वोक्त इतरेतराश्रयदोषोऽपरिहार्य्य एव भवेत्। मरणावधिर्गुणकर्म्मविकाशसमयः कर्म्मानुशीलनावकाशश्चावतिष्ठते। अतो मृत्योः प्राक्समयेऽपि जातिनिरूपणं न सम्भवति, अन्त्येष्टिक्रियायामेव केवलं ब्राह्मणादीनां जातिगतवैशिष्ट्यमुपलभ्यते।

अपिच "ब्राह्मोऽजातौ" (६।४।१७१) "चत्वादयः" (४।१।१७) इति सूत्रद्वयेन भगवता पाणिनिना ब्राह्मणादिपदानि अपत्यप्रत्ययान्तानि व्युत्पादितानि। एतेन ब्राह्मणस्य पुत्रो ब्राह्मणः, क्षत्रियस्य पुत्रः क्षत्रिय" इत्यादिसिद्धान्त एव समर्थितो भवति। पदानामर्थनिरूपणे व्याकरणं खलु सर्व्ववादिसम्मतं प्रधानतमम् प्रमाणं षड़ङ्गानामन्यतममङ्गञ्च। एतेनापि प्रमाणेन "जन्मना जातिरुच्यत"—इति सुष्ठुपपद्यते।

प्रथमः शिष्यः—यदुक्तमाचार्य्यपादेन तेन "जन्मना जातिरुच्यत" इति सिद्धान्तः सम्यगवगतोऽस्माभिः। तथापि साम्प्रतमपि संशयः सम्यग् न गतः।

गुरुः—वत्स! कीदृशः पुनः संशयः, त्वं ब्रूहि, यथाशक्ति अपनयामि।

प्रथमशिष्यः—यदि जन्मना जातिरिति सिद्धान्तः स्यात्तर्हि—

सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः॥

५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूद्रे तु यद् भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥

इत्यादि शास्त्राणां का गतिः ? तथाहि पूर्व्वानुरूपवचनानि शास्त्रेषु बहुषूपलभ्यन्ते । ततश्च तैस्तैर्वचनैर्जातिस्तथाकथितगुण-कर्म्मानुशीलनजन्येति सुस्पष्टमुपलभ्यते ।

गुरुः—श्रुतस्ते पूर्व्वपक्षः । समाधानमुच्यते श्रूयतां सावधानम् । यथा श्रीमत्प्रदर्शितवचनानि दृश्यन्ते तथा वचनान्येतान्यपि शास्त्रेषु यथा—

(१) देवो मुनिर्द्विजो राजा वैश्यःशूद्रो निषादकः ।
पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः स्मृताः ॥

अत्रिः ।३६४ ।

(२) जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्यः सर्व्वभूतानामतिथिः प्रसृताग्रभुक् ॥

महाभारतम् । अनुशासनपर्व्व ।

(४) ये योनिशुद्धाः सततं तपस्याभिरता भृशम् ।
दानाध्ययनसम्पन्नास्ते वै पूज्यतमाः स्मृताः ॥

अत्र प्रथमवचनेन "विप्रा दशविधा" इत्यवगम्यते । तस्यैव परिगणनं "देवो ब्राह्मणः" (१) "मुनिब्राह्मणः" (२) "विप्रब्राह्मणः" (३) "क्षत्रियब्राह्मणः" (४) "वैश्यब्राह्मणः" (५) "शूद्रब्राह्मणः" (६) "निषादब्राह्मणः" (७) पशुब्राह्मणः" (८) "म्लेच्छब्राह्मण" (९) "चाण्डालब्राह्मणश्चेति" (१०)) । एतेषां लक्षणमपि कृतं यथा—

सन्ध्या स्नानं पूजा होमं देवतानित्यपूजनम् ।
अतिथिर्वैश्वदेवश्च देवब्राह्मण उच्यते ॥
शाके पत्रे फले मूले वनवासे सदा रतः ।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत् ।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥
अस्त्राहताश्च धन्वानः संग्रामे सर्वसम्मुखे ।
आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते ॥
कृषिकर्म्मरतो यश्च गवाञ्च प्रतिपालकः ।
वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते ॥
लाक्षालवणसम्मिश्रकुसुम्भक्षीरसर्पिषाम् ।
विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥
चौरश्च तस्करश्चैव सूचको दंशकस्तथा ।
मत्स्यमांसे सदा लुब्धो विप्रो निषाद उच्यते ॥
ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्व्वितः ।
तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥
वापीकूपतड़ागानामारामस्य सरःसु च ।
निःशङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते ॥
क्रियाहीनश्च मूर्खश्च सर्व्वधर्मविवर्ज्जितः ।
निर्दयः सर्व्वभूतेषु विप्रश्चाण्डाल उच्यते ॥

अत्रिसंहिता । ३६५—३७४ ।

यदि जन्ममूलकं ब्राह्मण्यमलीकं स्यात्तदा शूद्रम्लेच्छनिषाद-चाण्डालादिब्राह्मणगणना नोपपद्येत एव। तथाच जन्मब्राह्मण एव (जातिब्राह्मणः) पूर्व्वपूर्व्ववचनोक्तनिन्दितप्रशंसितकर्म्मभिस्तत्तद् ब्राह्मणसंज्ञां लभत इति सिद्धान्तः । ततश्च श्रीमत्पूर्व्वपक्षीभूतानां

"न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः"

इत्यादिवचनानामयमर्थः—यस्तावच्छूद्रस्तादृशगुणसम्पन्नः स गुणेन "ब्राह्मणो" ब्राह्मणतुल्यः इत्यर्थः जात्या तु शूद्र एव, यस्तावद् ब्राह्मणो न तादृशगुणसम्पन्नः स "न ब्राह्मणो" न गुणब्राह्मणः जात्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु ब्राह्मण एव। तथा च—अयमेवार्थो वचनान्तरेण महाभारत एव स्पष्टमुक्तम् । यथा—

तपः श्रुतं योनिश्चाप्येतद् ब्राह्मण्यकारणम् ।
त्रिभिर्गुणैः समुदितस्ततो भवति वै द्विजः ॥

अपि चात्र स्पष्टतरं वचनमप्युपलभ्यते यथा—

तपः श्रुतञ्च योनिश्च एतद् ब्राह्मणकारणम् ।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥

ततश्च तपः (१) श्रुतं (२) योनिश्च (३, यस्मिन् ब्राह्मणे विद्यते स मुख्यो ब्राह्मणः, पूर्व्वोक्तकारणत्रितयं यस्मिन् नास्ति स गौण इति फलितम् । ब्राह्मणकुलसम्भूतस्तु जात्या ब्राह्मण इत्यत्र सन्देहो न कर्त्तव्य इति बहुधा प्रतिपादितम् । एवं रीत्या क्षत्रियादिवर्णेऽपि गौणमुख्यभावो वेदितव्यः । महात्मा विदुरो गुणब्राह्मण आसीदित्यत्र नास्ति सन्देहलेशोऽपि किन्तु स (विदुरः) तादृशोऽप्यात्मानं स्वयं शूद्रमुद्घोषयामास यथा —

"शूद्रयोनावहं जातो नातोऽन्यद् वक्तुमुत्सहे ।
कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम् ॥
ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् ।
न तेन गर्ह्यो देवानां तस्मादेतद् ब्रवीमि ते ॥"

यस्य (विदुरस्य) माहात्म्यं पुराणादिशास्त्रै र्बहुद्घोषितम्, यः खलु ऋषिभिरपि सर्व्वदा सम्मानितः, यस्य गृहे स्वयमेव भगवान् राजातिथ्यं परिहृत्य आतिथ्यं स्वीचकार, तादृशो भगवद्दर्शनकारी ब्रह्मविद् विदुरः कथमात्मानं ब्राह्मणं नोवाच ? भवदुक्तगुणकर्म्मानुशीलनजन्यं तादृशं खलु ब्राह्मण्यं विदुरे नितरामव्याहतमेव तथापि सः—"अहं शूद्रयोनौ जातः, अतः अन्यत् (ब्रह्म) वक्तुं न उत्सहे"— इति कथयन् जन्मगतब्राह्मण्यादेरेव मूलत्वं वर्णाश्रमोचिताधिकारतत्त्वमपि सुस्पष्टमाविश्चकार । साम्प्रतं समाजस्य यादृशो खल्ववस्था

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(विदुरादीनां समये) नैतादृशीति सर्व्वेषामेव स्वीकर्त्तव्यम् । तदा खलु धर्म्मपुत्रो युधिष्ठिरः वर्णाश्रमाणां रक्षिता राजा, मानवदेवता हि भीष्मो ब्रह्मचारी ब्रह्ममानसपुत्रस्याङ्गिरसो वंशधरो ब्रह्मविद् द्रोणाचार्य्यो रणनेता, कर्णः खलु दाता (योहि निरतिशयप्रियानु-पेक्ष्य आत्मप्राणान् देवराजाय स्वकवचं प्रादात्, अतिथिसत्कारार्थं स्वपुत्रस्यापि शिरश्छेदं चकार)। पतिच्छन्दानुवर्त्तिनी द्रौपदी खलु सहधर्म्मिणी (या हि जीवनावधिमरणपर्य्यन्तं पतिसङ्गमभिलषन्ती लाञ्छनादिदुःखमशेषविधं शृणोति स्म सुखमिव, कुरुसभायां यस्या लज्जारक्षणार्थं स्वयं भगवान् वस्त्ररूपेणाविर्बभूव, दुर्व्वाससः पारणा-काले ययाहूतो भगवान् ररक्ष पाण्डवसम्मानम्) एवं रीत्या तात्-कालिकसमाजस्य यत्रैव दृष्टिः पतिता तत्रैव बहुविधं गौरवमेवोप-लभ्यते, गौरवकीर्त्तिमण्डिते खलु तादृशे युगे युधिष्ठिरादिभिः समाज-नेतृभिर्गुणब्राह्मणा अपि विदुरादयो जातिब्राह्मणत्वेन कथं नोन्नीताः ? रामायणवर्णितसिद्धशवरीगुहादयो न जातिब्राह्मणाः, पुराणशास्त्र-वक्तारो न जातिब्राह्मणाः। यदि नाम तथाकथितगुणकर्म्माण्येव ब्राह्मण्यादिप्रयोजकं कथं तर्हि तात्कालिकभारतवर्षेण सिद्धशवर्य्या-दीनां ब्राह्मणत्वं नोद्घोषितम् ? यस्मिन्नेव महाभारते "न वै शूद्रो भवेच्छूद्रो ब्राह्मण" इत्यादि प्रमाणमुपलभ्यते तस्मिन्नेव महाभारते "जन्मनैव महाभागो ब्राह्मणो नाम जायते" इत्यादिप्रमाणं दृश्यते, ततश्चैतत् परस्परविरोधिवचनसमाधानं मत्प्रदर्शितपक्षे एवोपपद्यते नतु भवत्प्रदर्शितदिशि ।

(सावशेषः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैन-जीवतत्त्वम् । *

[लेखकः—वादीभकेशरि-श्रीमक्खनलालन्यायालङ्कारः]

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं
साक्षाद्येन यथा स्वयं करतले रेखात्रयं साङ्गुलि ।
रागद्वेषभयामयांतकजरा लोलत्वलोभादयो
नालं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ॥ १

यो विश्वं वेदवेद्यं जननजलनिधेर्भङ्गिनः पारदृश्वा
पौर्वापर्याविरुद्धं वचनमनुपमं निष्कलङ्कं यदीयम् ।
तं वन्दे साधुवन्द्यं सकलगुणनिधिं ध्वस्तदोषद्विषन्तं
बुद्धं वा वर्धमानं शतदलनिलयं केशवं वा शिवं वा ॥ २

श्रीमद्विद्वन्माननीय-सभाध्यक्ष-महोदयाः, तथा विद्वद्वर—विचक्षण-विपश्चितश्च,

सर्वद्रव्येषु सारभूतोऽन्यतमः अस्ति खल्वनाद्यनिधनः जीवः स्वतन्त्रपदार्थो युक्तिप्रमाणसिद्धः, इत्यत्र नास्ति विवादः सर्वेषाम् आस्तिक्यवादिनामिति ।

निखिलपदार्थसन्दोहः नित्यः कस्यापि कदापि क्षयो न भवितुमर्हति किन्तु विशेषस्त्वयमेव यदेकामवस्थां विहायान्यावस्थामवगाहमानः सन्तिष्ठते यथा, तथा जीवोपि बलीवर्दपरिघूर्णितारिचक्रवन्नरनारकादिपर्य्यायेष्वितस्ततः परिभ्रमन्नपि स्वस्वरूपं जीवनगुणं कदापि न जहाति एको मृतोऽन्यो लब्धजन्मेत्यादिविवेचनं पर्य्यायपेक्षयैवाखिलं समीचीनं प्रतिभाति । द्रव्यदृष्ट्या तु सर्वं नित्यं विवक्षाद्वयमधिकृत्यैव पदार्थमात्रे कथञ्चिन्नित्यत्वानित्यत्वव्यवस्थावस्थानम् । (सावशेषम्)

---

* संस्कृतसाहित्यपरिषदो मासिकाधिवेशने वाचितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देशाः

१। **साहाय्यलाभः**—विदितमस्तु परिषच्छुभकामिनां यद् वङ्गीयराजकीयशिक्षाविभागाधिकृताः परिषद्गुणग्रहणसन्तुष्टाः प्रोत्साहनार्थं संस्कृतानुशीलनस्य विशेषतः संस्कृतग्रन्थप्रकाशनसौकर्य्याय वर्त्तमाने खेस्ताब्दे परिषदे रूप्यकाणां (२०००) सहस्रद्वयमुत्सृष्टवन्तः। कलिकाता-मिउनिसिप्यालमहासमितिश्चास्या ग्रन्थागारसमुन्नतये वर्षेऽस्मिन् सार्द्धत्रिशतमुद्राः (३५०) प्रदत्तवतीति। ततः परमकृतज्ञताऽवर्जितमानसेयं परिषत् चिरानुग्रहपरेभ्यस्तेभ्यो भूयोभूयः केवलं साधुवादानर्पयति; उत्सर्पिणी खलु महतां प्रार्थनेति कविजनोक्तिस्मरणात् पारिषदास्तेभ्यश्चिरमेव कृपापारवश्यमेवमाशंसन्ते चेति।

२। **पत्रिकायां चित्रसन्निवेशः**—नूनं पत्रिकापरिचालकानां सङ्कल्पमिममवगम्य परिषदनुग्राहकाः सन्तोषमनुभवेयुर्यदितः परमन्तराऽन्तराऽत्र पत्रिकायां प्रसिद्धविद्वद्वराणाञ्चित्रमूर्त्तयो नियमेन प्रकाशमाप्नुयुरिति। तत्रास्मदीयसभापतिचराणां स्वर्गत-महामहोपाध्याय-कालीप्रसन्नभट्टाचार्य्यपादानां, विविधाप्रकाशित-ग्रन्थप्रकाशकानामनन्तशयन (त्रिवाङ्कुड़) वास्तव्यमहामहोपाध्यायानां श्रीमतां गणपतिशास्त्रिमहोदयानां, संस्कृतसाहित्यपरिषत्संरक्षकाणामनेकविद्याविभूषितानां दिवंगत-सार् आशुतोषमुखोपाध्याय-महाभागानां तथा विख्यातनिबन्धनिर्म्माणकुशलानां स्वर्यात-'सहृदया' सम्पादकानां मद्रमण्डलमण्डनक्षणमाचार्य्यविद्यानिधीनां प्रतिकृतयोऽत्र यथाक्रममितः प्रागेव प्रकटीकृताः। अस्मिंश्चावसरे विश्रुत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रीयग्रन्थटीकाभाष्यादिकृतां विद्याब्राह्मण्यविज्ञातमहानुभावानां श्रीपञ्चाननतर्करत्नभट्टाचार्य्यपादानां प्रतिमूर्त्तिः श्रीमतामुपनीयते। एत एव महात्मानः परिषदोऽस्या अष्टमसंवत्सरमहोत्सवे सभानायकपदमध्याश्रिता गुर्वर्थवाङ्मयैः सर्वान् समतोषयन्निति।

३। **परिषच्छात्रसमितिः**—परिषदुन्नतिकामिनः पाठकमहाभागाः, विदितमेवेदं यथाकालं भवतां यथा परिषदि नातिचिरं प्रतिष्ठापिता काचन छात्रसमितिरभिनवं स्यमन्तकोद्धारं नाम रूपकमभिनीय स्वमुत्कर्षं पारिषदेषु प्रतिपादितवतीति। कतिपये दिवसाः समभवन्नस्या भासकृतं कर्णभारं तथा भट्टनारायणकृतस्य वेणीसंहारस्य तृतीयाङ्कं सुनिपुणमभिनीतवत्याः। छात्रसमितिसभ्येषु बहवः सुयोग्या विद्यार्थिनो दृश्यन्ते, ये न केवलमभिनयेषु परं शास्त्रेष्वपि सुगृहीतार्थाः। ते प्रायेण प्रतिमासमेकं छात्रसम्मेलनं कारयित्वा गीर्व्वाणवाण्या निबन्धादिकं वाचयन्ति, तथैव परस्परं संवादादिकमारचयन्ति, अन्तराऽन्तरा च नूतनं वा पुरातनं वा रूपकमभिनीय पारिषदानां चेतो रमयन्ते। एतस्या नातिचिरेणैव तथा समुन्नतिरस्माकमानन्दसन्दोहमनुकूलयन्ती सुतरामाशास्थानमभूत् संस्कृतरसिकानाम्। ज्यैष्ठे मासि समितेरस्या एकमधिवेशनं सुसम्पन्नम्। तत्र पण्डितवर्य्यः श्रीमान् जगन्मोहनज्योतिर्विनोदः सभापतिपदमलमकार्षीत्, वाचितश्च तत्र 'भारते नाट्यानुशील'नामधेयो निबन्धः परिषच्छात्रेण श्रीमता सतीशचन्द्रचक्रवर्त्तिना। तदेवमाशास्महे यथा छात्रसमितिरियं क्रमेण लब्धाभ्युदया संस्कृतसाहित्यादीनां महान्तमुपकारं तदैव सर्वथा साधयितुं शक्नुयात्, यदि विद्यालयान्तरवर्त्तिनो विद्यार्थिनोऽपि सानुग्रहमिमामनुकूलयेयुः। अत्रत्यमहायतनपुस्तकालयादिसाहाय्येन विद्यार्थिनां तेषामसमः खलु उपकारी भवेदिति तानत्र सम्मेलनाय वयमाकारवाम इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

मुद्रिता ग्रन्थाः

१। **कपालकुण्डला**—बङ्किमचन्द्रस्य प्रसिद्धकथाया अनुवादरूपा। मूल्यम् १) रूप्यकमात्रम्, परिषत्सदस्यानाम् ॥० पादोनरूप्यकम्।

२। **कालीतन्त्रम्**—सटीकानुवादम्। मूल्यम् ॥≠० दशानकाः, सदस्यानाम् ॥० आनकाष्टकम्।

३। **गीतशङ्करीयम्**—जयदेवकृत-'गीतगोविन्द'मनुसृत्य कविजयनारायणेन विरचितं देवीस्तुतिरूपम। मूल्यम ।≠० षडानकाः, सदस्यानाम् ।० चतुराणकम्।

४। **मुक्तिवादः**—गदाधरभट्टाचार्यविरचितः टीकाद्वयोपेतः बङ्गभाषाभाष्यसहितः सविस्तरभूमिकया तथा प्राचीनमुक्तिवादेन समलङ्कृतश्च। मूल्यम् २) रूप्यकद्वयम्, सदस्यानां १॥० सार्द्धरूप्यकमात्रम्।

५। **दुर्गापूजातत्त्वम्**—रघुनन्दनभट्टाचार्यविरचितम अष्टाविंशतितत्त्वातिरिक्तम् विस्तृतभूमिकासहितं शारदीयदुर्गोत्सवप्रमाणप्रयोगतत्त्वालोचनरूपम्। मूल्यं १।० सपादरूप्यकम्, सदस्यानां १) रूप्यकमात्रम्।

मुद्र्यमाणा ग्रन्थाः।

६। **कारकोल्लासः**— भरतमल्लिकविरचितः सोदाहरणकारकनिर्णयरूपः ललितपद्यमयो ग्रन्थः।

७। **पितृदयिता** - महाराजवल्लालसेनगुरुभिरनिरुद्धभट्टैर्विरचिता अतिप्रामाणिक सामवेदीयसन्ध्याश्राद्धादिपद्धतिरूपा।

८। **दुर्गोत्सवविवेको वासन्तीविवेकश्च**— महामहोपाध्यायशूलपाणिविरचितौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

দুর্গাপূজাতত্ত্বম্।

রঘুনন্দনভট্টাচার্য্যবিরচিতম্।

(মূল্য ১।০ পাঁচ সিকা, পরিষৎ সদস্য পক্ষে ১৲ এক টাকা)

স্মার্ত্ত ভট্টাচার্য্যকৃত তিথিতত্ত্বের অন্তর্গত দুর্গোৎসবতত্ত্বে 'পূজায়াং বিশেষস্তু দুর্গাপূজাতত্ত্বে অনুসন্ধেয়ঃ' এই উক্তিতে দুর্গাপূজাতত্ত্বের পৃথক ভাবে উল্লেখ থাকিলেও তৎপ্রণীত অষ্টাবিংশতিতত্ত্বের অতিরিক্ত এই গ্রন্থের অস্তিত্ব এতকাল অনেকেরই অজ্ঞাত ছিল। শ্রীশ্রীজগদম্বার কৃপায় আমরা আজ সাধারণের সমক্ষে এই দুর্লভ গ্রন্থ উপস্থিত করিতে সমর্থ হইলাম। কলির অশ্বমেধ শারদীয় দুর্গোৎসব বঙ্গদেশেই সমধিক অনুষ্ঠিত হইয়া থাকে, এই জন্য গ্রন্থখানি বাঙ্গালা অক্ষরে মুদ্রিত হইয়াছে। এই গ্রন্থের উপযোগিতা সম্বন্ধে স্বয়ং গ্রন্থকারই বলিয়া গিয়াছেন—

ব্যবস্থায়াঃ প্রপঞ্চস্তু বিজ্ঞেয়স্তিথিতত্ত্বতঃ।
পূজাবিধেশ্চ সম্যক্ত্বং জ্ঞাতব্যং কোবিদৈরিহ॥

রঘুনন্দনকৃত নিবন্ধ বিষয়ে ইহার অধিক কোনরূপ বিজ্ঞাপন চপলতা মাত্র।

ইহার উপর গ্রন্থসম্পাদক শ্রীমৎপূর্ণানন্দবংশীয় শ্রীযুক্ত সতীশচন্দ্র সিদ্ধান্তভূষণ মহাশয় বহুতথ্যপূর্ণ সুবিস্তৃত বাঙ্গালা ভূমিকা দ্বারা পুস্তকখানির উপযোগিতা আরও বৃদ্ধি করিয়াছেন। ইহাতে দুর্গাপূজার ইতিহাস, অকালে দুর্গোৎসবের কারণ এবং দেবীপূজার প্রবর্ত্তনকাল প্রভৃতি অতি জ্ঞাতব্য বিষয়সমূহ নিপুণভাবে আলোচিত হওয়ায় দুর্গোৎসবসম্বন্ধে প্রচলিত বহু ভ্রান্ত ধারণার নিরাস হইয়াছে। ভূমিকা বাঙ্গালা ভাষায় লিখিত; সুতরাং ইহার দ্বারা সংস্কৃতানভিজ্ঞ ব্যক্তিও দুর্গোৎসবের সকল তত্ত্বে অভিজ্ঞ হইতে পারিবেন। ইহা প্রত্যেক হিন্দুর—বিশেষতঃ দুর্গোৎসবের অনুষ্ঠাতা প্রত্যেক গৃহস্থের এবং প্রত্যেক পুরোহিতের অপরিহার্য্য পাঠ্য পুস্তক।

প্রাপ্তিস্থান—সংস্কৃতসাহিত্যপরিষৎ, শ্যামবাজার ব্রিজ রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

মহাভৃঙ্গরাজ তেল ৬৲ সের

স্থাপিত ১৩০৮ ঢাকা

শক্তি ঔষধালয়

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রঙ্গপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট,
৭১।১ রসা রোড, ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভব করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিসপেপসিয়া প্রভৃতি অনেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার।

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয়, এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।
২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।
संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।
मुद्रणस्थान—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋते ज्ञानान्न मुक्तिः
पुस्तक सं० Reg. No. C. 1073.
आगत सं०..............
तिथि० ....
गुरुकुल ग्रन्थालय कांगड़ी.

१८४६ शकीये
भाद्रे
September 1924.

७म वर्षस्य
५म संख्या
Vol. VII. No. 5

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्यश्च
सहकारिसम्पादकः—काव्य-सांख्य पुराणतीर्थ-श्रीदुर्गामोहनभट्टाचार्यः M.A.।

मतिमञ्जरी (आलोचनम्)
जैनजीवतत्त्वम्
दीपहस्ता (कविता)
प्राचीनभारतेभृत्यसंव्यवहारः
गुरुशिष्यसंवादः
पुष्पाञ्जलिः (कविता)
धर्मकल्पतरुः
संस्कृतसाहित्ये विज्ञानवैचित्र्यम्
श्रीकृष्णाष्टमी (कविता)
संस्कृतसाहित्यस्य धर्मप्रधानता
सन्देशाः

प्रतिखण्डमूल्यं ।० चतुरानकम्]   [वार्षिकमूल्यं २) रूप्यकद्वयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता ।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে। কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুণ। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সারসঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড।

[illegible] লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रविः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

१८४६ शकीये भाद्रे, ७म-वर्षस्य ५म-संख्या

मतिमञ्जरी।

संस्कृतपरीक्षाफलम्—ऐषमः संस्कृतपरीक्षाकालात् मासषट्केन परीक्षाफलं निःशेषतया बहिरवतीर्णम्; न जानीमहे—वृत्तिपुरस्कारादिलाभसूचना कदा विद्यार्थिभिः तदुपाध्यायैश्च समासाद्येत। इदमवश्यमालोचनीयं यदेतावता परीक्षाफल-वृत्तिलाभादि-सूचनाविलम्बेन विद्यार्थिनो गुरवश्च सुतरामनिष्टमनुभवन्तीति। तथाहि विद्यार्थिनः परीक्षाफलमविदित्वा यावच्छीघ्रं नैव नूतन-विषयाध्ययने रमन्ते, तथा मासिकवृत्तिपरिमाणमनुसृत्यैव भोजन-वासस्थानादिदानेन विद्यार्थिपरिपोषका दैन्यमापन्नास्तदुपाध्याया यथाकालं पोषणीयविद्यार्थिसंख्यानिरूपणाय नोपयुज्यन्ते, तेन च सर्व्वथा संस्कृतशास्त्रसमुन्नतिस्वल्पतैव दत्तहस्ता स्यात्; अतः परीक्षापरिचालकमहाभागानां यथाऽत्र सुतीक्ष्णा दृष्टिरनुग्राहिका भवेत्, तथा वयं साग्रहमभिकामयामहे। बहुष्वेव विषयेषु सम्पादित-समुत्कर्षैस्तथाविधैरिदं विधित्सितं नैव दुष्करं भविष्यतीति।

अन्यच्च प्रतिवर्षमेव संस्कृतपरीक्षाफलमादौ कालीघट्टवार्त्तावहे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(Calcutta Gazette) आङ्गलभाषामये नियमेन प्रकाशमेति, अनन्तरञ्च वङ्गभाषादिमयतत्तत्पत्रिकासु तत्तत्पत्रिकासम्पादकाभिमतदेशकालानुरूपं प्रकाश्यते, नाऽपि वा प्रकाश्यते ; तेन च प्राचीनभावमात्रोपजीविनामाङ्गलभाषामविदुषां संस्कृतविद्यालयसम्बन्धिनामुपाध्यायानां विद्यार्थिनाञ्च महदसौकर्य्यं सम्पद्यते परीक्षाफलादिविज्ञाने। तदेवं वयं प्रस्तुमः, यथा यदि परीक्षासमितिः प्रतिवत्सरं परीक्षाफलादिमात्रोपकरणां संस्कृताक्षरमयीम् एकां पत्रसञ्चिकां मुद्रापयित्वा यथाकालं साधारणेषु प्रकाशयेत्, तदा सुमहत् सौष्ठवं स्यात् ; तद्विनिमयेन च विद्यार्थिप्रभृतिभ्यः किञ्चित् द्रव्यमपि जिघृक्षितं न दुष्प्रापं तया भवेदिति।

नारीकृतित्वम्—आशा नाम काचन वङ्गकुमारी वाराणसीहिन्दुविश्वविद्यालयविद्यार्थिनी नातिचिरमतीतां 'एम्, ए' परीक्षां संस्कृतविषयमधिकृत्य समुत्तीर्णा प्रथमपदमुत्तीर्णानामाससाद। यद्यपि नेदं चित्रं भारते वर्षे यत्र पूर्वं लीलावती-गार्गीप्रभृतयो ललना विशिष्टविद्यासम्भारसम्भृताः प्रादुर्भूय विलक्षणगौरवमुदपादयन्, तथापि सुरसरस्वत्यां सविशेषं लब्धाधिकारान् पुरुषानतिक्रम्य नारी समवर्त्ततेति विस्मयकरमिदमस्माकम्। संस्कृतशास्त्रसमुन्नतिमभीप्सताम् इत्थं स्त्रीजनेष्वपि सुरभारतीसमुन्नतिसूचनां परिलक्षयतां नः सुमहानेवात्र परितोषः।

विद्यासागरवाणीभवनम्—नारीशिक्षासमितिपरिचालिते विद्यासागरवाणीभवने सनातनधर्म्मानुगतानां विधवानां कृते कतिपयवृत्तयो व्यवस्थापिता वर्त्तन्ते। तत्र विधवानां शिक्षा विधिवद्विधीयते, तदर्थञ्च किमपि शुल्कं नोपादीयते। व्यवस्थापितवृत्तिमात्रेणैव च तासामाहारादिव्ययः पर्य्याप्तो भवति। अत्र वयं ब्रूमः—यथा बहुत्रैव तथाविधानां नारीसमितीनां प्रतिष्ठानं शिक्षामिषेण शिक्षाया विक्षोभमेव निर्वर्त्तयति ; परमस्मिन् प्रतिष्ठाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातःस्मरणीयनामपदानां विद्यासागरपादानां नामसम्बन्धः कलङ्कितो यथा न स्यात्, यथा च प्राचीनब्रह्मचर्य्यादिपालनं कुर्वाणानां तत्रत्य-विधवानां शिक्षाविधयो निर्वर्त्तिता भवेयुस्तथैव परिचालकैरवहितै-र्भवितव्यम्। अन्यथा निष्फल एव प्रयत्नशतैरपि सदर्थनिष्पादनाभि-लाषस्तत्रभवतामिति।

प्राथमिकशिक्षाव्यवस्था—सुन्दरवने प्राथमिकशिक्षा-प्रथनाय या पद्धतिः प्रस्तुतपूर्व्वा सेदानीं फलसम्बन्धमङ्गीकुरुते। वाखरगञ्जप्रादेशिकसमितिः (District Board) सुन्दरवने दश प्राथमिकविद्यालयान् प्रतिष्ठापितवती। तत्र साम्प्रतं चतुर्नवत्य-धिकशतसंख्यका बालका दश च बालिका यथानियमं शिक्षा-मधिगच्छन्ति। तदिदं सुतरामाश्वास्थानमस्माकम्। परमिदमत्र विज्ञाप्यते यदि समुन्नतशिक्षापि लोकानामन्तरानुरागमधिकुरुते तदैव समीचीनं स्यात्। क्रमेण समुन्नतप्राचीनशिक्षापद्धतिविलोप एव भारतस्य दौर्भाग्यहेतुः। न केवलं निम्नतमशिक्षा एव पर्य्याप्ता भारतीयानामैहिकपारत्रिकयोरुभयोरेव सदर्थयोराविष्करणे तद्-यथा प्रतिपदमधिकाधिकस्तस्या निर्वन्धो निम्नतमशिक्षाप्रसाराय तथैव युनिवर्सिटिप्रभृतिप्रवर्त्तितसमुच्चशिक्षाप्रथनायापि यदि प्रयासः स्यात्, तदैव सत्यमुपकारः कृतो भवेत् प्रदेशानाम् इति।

मङ्गलग्रहः—मङ्गलग्रहः पृथिव्याः पञ्चविंशतिकोटिक्रोशा-न्तरेषु अवतिष्ठते। ज्योतिर्विदो वदन्ति यथा आगामिनि अगस्तमासि मङ्गलग्रहो गतिक्रमेण पृथिव्याः सुतरां सान्निध्यमुपलभेत। पृथिवी-मङ्गलग्रहयोः प्रायेण तदा सार्द्धत्रिकोटिक्रोशार्द्धैरन्तरमवतिष्ठेत। अस्मिन्नवसरे पाश्चात्यज्योतिर्विदः परीक्षितुमुपक्रमन्ते यथा मङ्गल-ग्रहो लोकानामधिवासभूमिर्न वेति। सा चेयं परीक्षा समुच्च-शिखरात् 'अल्पस्' पर्वतात् प्रवर्त्तिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहवः पण्डिता व्याहरन्ति यथा ग्रहोऽयं लोकानामधिवासभूमिरेव। किन्तु नाद्यापि तत्र किमपि दृढं प्रमाणमुपलभ्यते। तेषां मते मङ्गलग्रहस्थिता मानवाः पृथिवीमानवापेक्षया विद्यादिविषये प्रवीणतराः। यदि तैः साकमस्माकं सम्बन्धः संस्थापितो भवेत् तदा नूनमस्माभिः ततो विलक्षणज्ञानादिकमर्जयित्वा पृथिव्या महोपकारः साधयितुं शक्येत इति। भगवत्कृपया जड़विज्ञानादिषु तथा समुन्नतानामेषाम् अयमपि प्रयत्नो नूनं सफलतामण्डितो भूयादित्याशास्महे।

जैन-जीवतत्त्वम्

(पूर्वतोऽनुवृत्तम्)

[लेखकः—वादीभकेशरि-श्रीमक्खनलालन्यायालङ्कारः]

जीवस्यासाधारणं लक्षणं चेतना। सा च ज्ञानदर्शनोपयोगरूपो जीवगुणः गुणसमुदाय एव पदार्थोऽनन्तगुणानामखण्डपिण्डो वेत्यपि वक्तुं शक्यते। गुणाश्च गुणवतो न भिन्नाः तादात्म्यसंबन्धत्वात्तयोर्गुणगुणिनोरिति। नानाकार्यदर्शनान्नानाशक्तीनामनुमानं क्रियते गुणिषु अतएव भेदविवक्षातः गुणगुणिनोः कथञ्चिद्भिन्नस्तादात्म्यसम्बन्ध इति विवेचयितुं शक्यते; किन्तु यथा स्फोटोत्पादकत्वं पाचकत्वं प्रकाशकत्वं वा वह्नेरेव स्वरूपं, तद्भिन्नास्ते प्रकाशकत्वादयो न स्वतन्त्रस्वरूपाः पदार्थाः नापि तेभ्योऽतिरिक्तं वह्निस्वरूपं वा स्वतन्त्रं रूपं, तथा ज्ञान-दर्शन-सुख-वीर्य-चारित्र-वस्तुत्व-प्रमेयत्व-प्रदेशत्वेत्यादिसाधारणा साधारणानन्तगुणसमुदायाद्भिन्नो जीवोपि न कोपि स्वतन्त्रः पदार्थः। तेषां समुदाय एव जीवः यथा वा दल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्कन्ध-शाखा-फल-गुच्छादीन् विहाय नास्त्यपरः कोप्याधारभूतस्तेषां वृक्षः पदार्थस्तथा ज्ञान-दर्शन-सुख-चारित्रादीन् मुक्त्वा नास्त्यपरं किमपि जीवस्य निजरूपमिति ।

निष्कर्षश्चायमस्य कथनस्य यज्जीवस्य ज्ञानदर्शनसुखवीर्य्यादयो गुणाः सर्वस्मिन्नपि काले टङ्कोत्कीर्णपाषाणवत् जीवस्वरूपं न मुञ्चन्ति मुक्तावस्थायामपि तेषां विध्वंसो न भवितुमर्हति, किन्तु निरावरणरूपेण तत्रैव प्राकट्यं ज्ञानादीनां भवति, अन्यथा गुणनाशे गुणिनो जीवस्यापि नाशेनावश्यम्भाविना भाव्यमिति ।

संसारावस्थायाञ्च ज्ञानादीनां न्यूनाधिक्यमवलोक्यते, तस्य कारणं पूर्वोपार्जितं स्वकर्मपरमाणवः । कनकपाषाणस्याकरतो जायमानस्य यथा पूर्वतोऽशुद्धत्वमेव तथा नादितो निखिला जीवा अशुद्धा एव भवंति । यथा बीजवृक्षसम्बन्धः कार्य्यकारणभावतः प्रमाणतोनादिसिद्धस्तथा रागद्वेषतः कर्मबन्धो जीवस्य, कर्मबन्धतः पुना रागद्वेषोत्पत्तिस्ततश्च पुनः स इति कार्य्यकारणतोनादिसिद्धोऽशुद्धो जीवः, यद्यनादितः स तथा न स्यात्तदा मध्ये कारणाद्विना कुतोऽशुद्धता, मुक्तात्मस्वपि तत्प्रसङ्गः स्याद्यदि कारणतः सा, तदा तत्कारणं पूर्वतः कथन्नासीदिति सन्तानक्रमतोऽशुद्ध एव सिध्यति । तदेवाशुद्धत्वमेव तेषां संसारः, संसरणं संसारः परिभ्रमणमित्यर्थः । यं पर्यायमाश्रित्य सरागो जीवः स्वकर्मफलमनुभवति स एव संसारः, स्वध्यानाग्निना कर्मकाष्ठनिचयं यैस्तु निर्मूलतो निर्दग्धं, त एव मुक्ताः अनन्तज्ञानसुखाद्यपरिमितगुणकलिताः परमात्मत्वपदमाश्रिताः भवन्तीति ।

जीवानामनाद्यशुद्धत्वेऽनुमानञ्चेदमस्ति—

संसारी जीवो बद्धः परतन्त्रत्वात् ये ये परतन्त्रास्ते ते बन्धनबद्धा भवन्ति यथा आलानस्तम्भनिगड़बद्धो गजः । परतन्त्रोसौ हीनस्थानपरिग्रहवत्त्वात् । यो यो हीनस्थानपरिग्रहवान् स स परतन्त्रः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारागृहबद्धः पुरुषो यथा। हीनस्थानञ्च शरीरं आत्मनोदुःखहेतुत्वात् कारागृहवत् तत्परिग्रहवांश्च जीवः। क्षुत्पिपासाधिव्याधिजन्ममरणप्रभृतिदुःखानि तन्निमित्तत एव जायन्ते नान्यथा। यावत्कालपर्य्यन्तं कर्मशृङ्खला न त्रुटति तावज्जीर्णं शरीरं मुक्तापि नवं नवं शरीरं स्वकर्मपारतन्त्र्यात् गृह्णात्येवायं जीवः। भूतलेऽत्र न दरीदृश्यते स कोपि जीवो यो नारकादिदुःखस्थानं प्रति जिगमिषुः स्यात्तथापि स्वकर्मविपाकतः परतन्त्रः सन् गच्छत्येव तत्रेति निश्चीयते बद्धोयं संसारी जीवः कर्मणेति। य एव बद्धः स एव मुक्तो भवतीति संसारापन्नात्मैव संसारकारणं रागद्वेषादिकं निहत्य परमात्मपदपरिचितां शुद्धावस्थामग्निपरितापितकिट्टिकालिमादिमलवर्जितशुद्धस्वर्णवद्दधातीति।

शक्त्यपेक्षया सर्वे जीवाः समानाः, यथा ज्ञानदर्शनसुखादयः शुद्धात्मनि परमात्मनि विद्यन्ते तथैव ते संसारिणि। भेदस्त्वयमेव निरावरणरूपेण ते प्राकट्यं संप्राप्ताः। संसारिणि तिरोहिताः शक्तिरूपेण तिष्ठन्ति। वृक्षवनस्पत्यादिष्वपि जीवस्तत्रापि त एवानन्तगुणाः परमात्मतुल्याः सन्त्येव शक्तिरूपेण नतु व्यक्तिरूपेण। संसारिगुणानां कर्माहतत्वात्। कर्म(१)परिपाकतः संसारिणामखिलानां गुणेषु हीनाधिक्यञ्च वरीवर्ति। चेतनारहितस्य कर्मणः सचेतनात्मनि कथमीदृक् प्रभावः संभवतीति समस्या युक्त्या प्रसाध्यते तैलमृत्तिकापाषाण-काष्ठादिविनिर्मितपुत्तलिकादिवेषभूषादिसौन्दर्येणात्मानमाकर्षयति, अवलोक्य च रागभावानुरंजितं विरमेत् च

(१) षड्द्रव्येष्वन्यतमः पुद्गलपदार्थः स चाचेतनः तस्यैव पर्यायविशेषो जीवेनाकृष्यमाणः सूक्ष्मानंतपरमाणुसमूहस्कंधविशेषः कर्म इत्युच्यते, क्रियापि लोके कर्मशब्देन व्यवह्रियते, तद्भिन्नोयं कर्मपदवाच्यः पुद्गलपर्यायविशेषः। वर्गणाशब्दस्यापि स एवार्थः कर्मवर्गणाशब्दाभ्यां स एव पुद्गलस्कन्धविशेषो ग्राह्यः सर्वत्रास्मिन् प्रबन्धे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र चेत:, दूरवर्तिन: पदार्थस्य जड़स्य प्रभावोऽयमात्मोपरि । रणाङ्गणे रणवाद्योद्भूतशब्दमाकर्ण्यैव सैनिकानां चित्तोल्लास उल्लसतितरां प्राणदानादानार्थं युद्धे, कारणञ्चात्र वाद्यशब्दस्तस्यैवात्मनि प्रभाव:। शब्दश्च मूर्त: पौद्गलिक:(२) श्रोत्रेन्द्रियरन्ध्रेण प्रविष्ट: प्रेरयति तच्छ्रोतारमिति ।

अन्यच्च—ये परमाणव आत्मना सम्बध्यन्ते तेषां प्रभावाधिकारञ्च तत्रावलोकयते यथा ज्वराक्रान्तस्य ज्वरांकुशचूर्णसेवनेन ज्वरापहरणं भवति। ज्वराक्रान्तश्चात्मा न तु शरीरमिवान्यथात्मनि तद्वेदना दुःखस्वरूपा न स्याद्भवति च सैव्यत आत्मनि ज्वराक्रान्तत्वं सिध्यति, ज्वरौषधेन तदपहरणञ्च घृतदुग्धदाड़िमद्राक्षाद्युत्तमसात्त्विकपदार्थसेवनेन चारोग्यं बुद्धिनैर्मल्यञ्च निष्पद्यते तच्चात्मनो ज्ञानगुणस्यैव विकाश: जड़प्रभावत: प्रभवति। अयन्तु बाह्यस्थपदार्थानामुपरित: स्थूल: प्रभाव:। ईदृश्योऽपि सूक्ष्मपुद्गलपरमाणुवर्गणा:(३) सन्ति याभिर्जीव एकीभावं गत इव संजात: या जीवेन क्रोधादिकषायभावत: आकृष्यमाणा आत्मसात्कृतास्ता एव कर्मेतिनाम्ना घोष्यन्ते। तेनैव कर्मणा जीवस्य ज्ञानदर्शनादिगुणा: घात्यन्ते। तत्कर्माकर्षणञ्चात्मनोत्थं भवति यदात्मना मनसा शुभमशुभम्वा चिन्तितं, वाचा सुभाषितं दुर्भाषितं वा कायेन हिताहितरूपं यदाचरितञ्च तदेव भावानुसारि शुभाशुभरूपं पुण्यपापाख्याख्यापितं कर्मागमनं भवति। मनोवचनकायव्यापाराकृष्यमाणपुद्गलस्कन्धेषु आत्मकषायानुरूप एव रसोद्रेक: सञ्जायते अस्यायं प्रस्फुटार्थ: यदा चात्मनाऽयं जीवो हन्तव्य इति मनसा विचार्य्यते तदा तेन सह बद्ध्यमानकर्मपरमाणुषु तद्भावानुरूप: सप्रभाव: निपतति यस्मोप्यात्मा कालान्तरेऽन्यैर्निहन्यते।

(२) शब्द: पौद्गलिक: मूर्तिमत्पदार्थे व्याहतत्वात् ।

(३) परमाणुसमूह: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योन्यान् रक्षति सोपि बद्ध्यमान शुभकर्मफलेनान्यै रक्षितो भवति। यो यादृक्कर्म करोति तादृगेव फलं भुङ्क्ते इति लोकोक्तिस्तथैव।

कषायानुरञ्जितोयं जीवः क्रोधादिविपरिणामिनाभिनवं कर्म बध्नाति, तस्य पुरातनं च तत् स्वरसं प्रदाय वियुज्यते तदभिनव-कर्मोदयतः क्रोधादीनां पुनरुत्पत्तिस्ततश्च कर्मबन्ध इति संसारि-जीवानां न कर्मबन्धनविश्रान्तिर्यावज्जरोजागर्ति कषायोद्रेकः।

जड़स्वभावे कर्मणि क्रिया कथमुत्पद्यत इत्याशङ्कापनोदार्हा अनेके दृष्टान्ताः दरीदृश्यन्त एव भूतले। मेघा वर्षन्ति, चपला च स्वीयचापल्येन क्षणमूर्द्धं क्षणमधस्त्वरया गत्वा गत्वा स्वचाञ्चल्यं प्रदर्शयति। नर्मदायाः प्रस्तराणि कन्दुकवद्वृत्ताकारं कर्तारमनपेक्ष्यैव धारयन्ति। विद्युद्वाष्पयन्त्रैश्च नानावस्तुसमाकीर्णाति-गुरुधूमशकटं लघुवेगेन प्रचाल्यत इति सर्वैरनुभूयमानमेतत्, नेदं चेतनशक्तिकार्यं किन्त्वचिन्त्यशक्तिसमन्विताया: प्रकृतेरेव तदखिलं कार्यमिति।

ये कर्मस्कन्धाः जीवनिबद्धास्ते पञ्चविधाः सन्ति—

आहारवर्गणा, (१) भाषावर्गणा, मनोवर्गणा, तैजसवर्गणा, कार्माणवर्गणा। एताभिर्वर्गणाभिर्जीवस्य क उपकारो वा क्रियत इत्येव संक्षेपेण विविच्यतेऽधुना।

मनुष्याणां पशुपक्षिणां देवनारकाणां च शरीरेन्द्रियरचना—आहारवर्गणाभिर्भवति। यदा च मरणमापन्नो जीवः पर्यायान्तरं गच्छति तदा पूर्वशरीरान्निस्सृत्योत्पत्तियोग्यक्षेत्रं मातुरुदरं वा सम्प्राप्य

(१) पुद्गलद्रव्यस्य जैनसिद्धान्ते त्रयोविंशतिभेदाः प्ररूपिताः सन्ति तेषु निर्दिष्टपञ्चस्कन्धैरेव जीवसम्बन्धो नान्यैः। आहारादिवर्गणा च, तेषामेव पुद्गलपरमाणुस्कन्धानां पारिभाषिकी संज्ञा। शरीरमनोभाषादिपरिणमन-रूपशक्तियुक्तत्वात् तासां विभिन्नाभिधाविषयत्वं विशेषनिरूपणञ्च कर्म-सिद्धान्तग्रन्थेषु प्रतिपादितमास्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रस्थशरीरपरिणामपरिणमनोचितपुद्गलपरमाणूनात्मसात् करोति। त एव शरीराकारेण परिणमन्ति परमाणवः तेषामिवाहारवर्गणेति नाम। पश्चादुदराग्निः स्तन्य दुग्धजलवायुभोजनादिपरिपाकात् शरीरं वर्धते जीवस्य ततस्तेऽपि च दुग्धभोजनादिस्कन्धाः आहारवर्गणायामिवान्तर्भवन्ति।

दीप-हस्ता !!

लेखकः—श्रीहेमेन्द्रचन्द्र व्याकरणतीर्थः।

प्रदोषकाले हृतरक्तरश्मौ अस्ताचलं गच्छति पद्मबन्धौ।
व्रीड़ा विनम्रार्धकृतावगुण्ठा सिन्दूर-बिन्दूज्ज्वलभालदेशा॥ १

स्मेरानना नीलसरोजनेत्रा हेमारुणाङ्गी तरुणी सुवस्त्रा।
शान्तापरं प्रेमरसप्रसन्ना सदा विनीता कमनीयमूर्तिः॥ २

केयं सुपल्लीभवनस्य शोभा प्रदीपहस्ता खलु मन्दमन्दं!
प्रयाति भक्त्या तुलसी-समीपं? स्वर्गेऽपि नास्यास्तुलनामुपैमि॥ ३

रे नव्यभव्या नगरी-प्रसक्ताः! विलासिनः! पश्यतपश्य "तेयं
दिष्ट्या समेता भुवि क्वापि देवी" कुलाङ्गना वङ्ग-गृहस्य लक्ष्मीः॥४

प्राचीनभारते भृत्यसंव्यवहारः।

(पूर्व्वतोऽनुवृत्तः)

लेखकः—श्रीउपेन्द्रनाथ सेन काव्यतीर्थः।

दायभागव्यवस्थायां गृहदास्यस्त्वविभाज्याः—यथाह गोतमः—
"उदकयोगक्षेमकृतान्नेष्वविभागः स्त्रीषु च संयुक्तासु।"

(गोतमसंहिता २८ अः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दासान्नभक्षणे स्वामिनः पातकं नास्ति—तथाच याज्ञवल्क्यः—

शूद्रेषु दासगोपाल-कुलमित्रार्द्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥

(या। १६८)

आपदि ब्राह्मणः दासाद् बलमाश्रित्यापि धनं गृह्णीयात् तेन तस्य दण्डभयं नास्तीत्यपि किञ्चिन्मनुमतं दृश्यते, तथाच

विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत्।
नहि तस्यास्ति किञ्चित् स्वं भर्त्तृहार्य्यधनो हि सः॥

(मनुः ८।४१७)

अत्र टीकायां कुल्लूकः—"एवञ्चापदि बलादपि दासात् धनं गृह्णन् न राज्ञा दण्डनीय इत्येवमर्थमेतदुच्यते।" इति।

अधुना राजपरिपोष्यभृत्यानां पुरा कीदृशी संख्यासीत् तस्यैव विषयस्य दिग्दर्शनं क्रियते। कौटिल्यार्थशास्त्रे—अमात्य-मन्त्रि-पुरोहित-चारप्रणिधि-निशान्तप्रणिधि-गूढ़पुरुषप्रणिधि-कोशाध्यक्षाकराध्यक्षाक्षशालाध्यक्षसुवर्णाध्यक्षविशिखाध्यक्ष-कोष्ठागाराध्यक्ष-पण्याध्यक्ष-कुप्याध्यक्षायुधागाराध्यक्ष-तुलामानपौतवाध्यक्ष-शुल्काध्यक्ष-सूत्राध्यक्ष-सीताध्यक्ष-सुराध्यक्ष-सूनाध्यक्ष-गणिकाध्यक्ष-नावध्यक्ष-गोऽध्यक्षाश्वाध्यक्ष-हस्त्यध्यक्ष-रथाध्यक्ष-पत्त्यध्यक्ष-सेनापतिमुद्राध्यक्ष-विवीताध्यक्ष-नागरकप्रणिधिप्रभृतीनां राजपुरुषाणामुल्लेखो दृश्यते। शुक्रनीतिसारे तु राज्ञः दशप्रधानप्रकृतयः उक्ताः—तथाच शुक्रनीतिसारे द्वितीयाध्याये ऊनसप्ततितमश्लोकादारभ्य—

पुरोधाश्च प्रतिनिधिः प्रधानं सचिवस्तथा।
मन्त्री च प्राड्‌विवाकश्च पण्डितश्च सुमन्त्रकः॥
अमात्यो दूत इत्येता राज्ञः प्रकृतयो दश॥

(शु २।६९।७०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशानामेतेषां संक्षिप्तपरिचयोऽपि दीयते—एतेषां यथापूर्व्वं प्राधान्यञ्च ज्ञातव्यम् ।

तत्र राजराष्ट्रभृत् पुरोधाः (Premier) सर्व्वश्रेष्ठः स च

मन्त्रानुष्ठानसम्पन्नस्त्रैविद्यः कर्मतत्परः ।
जितेन्द्रियो जितक्रोधो लोभमोहविवर्ज्जितः ॥
षड़ङ्गवित् साङ्गधनुर्वेदविच्चार्थधर्म्मवित् ।
यत्कोपभीत्या राजापि धर्म्मनीतिपरोभवेत् ॥
नीतिशास्त्रास्त्रव्यूहादिकुशलस्तु पुरोहितः ।
सैवाचार्य्यः पुरोधा यः शापानुग्रहयोः क्षमः ॥

(शु २।७८।८०)

प्रतिनिधिः (Viceroy.)

कार्य्याकार्य्य प्रविज्ञाता स्मृतः प्रतिनिधिस्तु सः ।

प्रधानसचिवौ (Controller General and War Minister.)

सर्व्वदर्शी प्रधानस्तु सेनावित् सचिवस्तथा ॥

मन्त्रिपण्डितौ (Minister and High Priest.)

मन्त्री तु नीतिकुशलः पण्डितो धर्मतत्त्ववित् ।

प्राड़्विवाकः (Lord Chief Justice.)

लोकशास्त्रनयज्ञस्तु प्राड़् विवाकः स्मृतः सदा ॥

अमात्यः (Lord Chancellor.)

देशकाल प्रविज्ञाता ह्यमात्य इति कथ्यते ।

सुमन्त्रः (Accountant General.)

आयव्ययप्रविज्ञाता सुमन्त्रः स च कीर्तितः ॥

दूतः (Ambassador.)

इङ्गिताकारचेष्टाज्ञः स्मृतिमान् देशकालवित् ।
षाड़्गुण्यमन्त्रविद् वाग्मी वीतभीर्दूत इष्यते ॥

(शु।२।८४।८७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एते दश राजसेवकाः राजवद्गुणसम्पन्नाः प्रभूतपराक्रमान्विताश्च। तथा च प्रतिनिधिकार्य्यवर्णनप्रसङ्गेन शुक्राचार्य्येण उक्तम्,—

अहितञ्चापि यत्कार्य्यं सद्यः कर्त्तुं यदोचितम्।
अकर्त्तुं यद्धितमपि राज्ञः प्रतिनिधिः सदा॥
बोधयेत् कारयेत् कुर्य्यान्न कुर्य्याच्च प्रबोधयेत्॥ इत्यादि

(शु।२।८७।८८)

अपि च तेनोक्तम्—

विना प्रकृतिसन्मन्त्राद्राज्यनाशो भवेद्ध्रुवम्।
रोधनं न भवेत् तस्मात् राज्ञस्ते स्युः सुमन्त्रिणः॥
न बिभेति नृपो येभ्यस्तैः स्यात् किं राज्यवर्द्धनम्?

(शु।२।८१।८२)

अपि च शुक्रनीतिसारे—गजाश्वरथपादातपशूष्ट्राधिपतयः,—सुवर्णधान्य-पाकाराम-सौध-गृहसम्भार-देवतुष्टि-दानसाहसाधिपतयः, ग्रामनेतारः भागहारलेखक-शुल्कग्राह-प्रतिहार-पौराणिक-दैवज्ञ मान्त्रिकायुर्व्वेदवित्-कर्म्मकाण्डज्ञास्तान्त्रिकाश्च राजभृत्यत्वेन वर्णिताः। अन्यच्च ते तत्र दण्डधरवेत्रधरगायकवैतालिककविशिल्पज्ञनर्त्तक नपुंसकसेवकवारयोषिताञ्च नियोगो दृश्यते अन्येषाञ्च बहूनाम्। अर्व्वाचीने काले महासन्धिविग्रहिकमहाक्षपटलिकमहासामन्त-महासेनापतिमहाप्रतीहारमहाकार्त्ताकृतिकमहादौःसाधनिकमहादण्डनायकमहाकुमारामात्यराजस्थानीयोपरिकः दाशापराधिक-चौरोद्धरणिकदाण्डिकदाण्डपाशिकशौल्किकगौल्मिकक्षेत्रपप्रान्तपाल-कोट्टपालखण्डरक्षतदायुक्तकविनियुक्तकहस्त्यश्वोष्ट्रनौबलव्यापृतककिशोरवड़वागोमहिषाजाविकाध्यक्ष-दूतप्रेषणिक-गमागमिक-तरिकप्रभृतीनां राजसेवकानां ताम्रशासनादिषु समुल्लेखो दृश्यते। प्राचीनलेखमालागौड़लेखमालादिपाठकानां तत् सर्व्वं सुविदितमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधुना कीदृशः सेवको विनियोक्तव्यः तदुक्ता विरम्यतेऽस्माभिः। शुक्रनीतिसारे उक्तमुशनसा—

भृत्यं परोच्चयेन्नित्यं विश्वास्यं विश्वसेत् सदा ।
नैव जातिर्न च कुलं केवलं लक्षयेदपि ॥
कर्म्मशीलगुणाः पूज्यास्तथा जातिकुलेन हि ।
न जात्या न कुलेनैव श्रेष्ठत्वं प्रतिपद्यते ॥
विवाहे भोजने नित्यं कुलजातिविवेचनम् ।
सत्यवाक् गुणसम्पन्नस्तथाभिजनवान् धनी ॥
सुकुलश्च सुशीलश्च सुकर्म्मा च निरालसः ।
यथा करोत्यात्मकार्य्यं स्वामिकार्य्यं ततोऽधिकम् ॥
चतुर्गुणेन यत्नेन कायवाङ्मानसेन च ।
भृत्यैव तुष्टो मृदुवाक् कार्य्यदक्षः शुचिर्दृढ़ः ॥
परोपकरणे दक्षो ह्यपकारपराङ्मुखः ।
स्वाम्यागस्कारिणं पुत्रं पितरं वापि दर्शकः ॥
अन्यायगामिनि पत्यौ यतद्रूपः सुबोधकः ।
नाक्षेप्ता तद्गिरं काञ्चित् तन्न्यूनस्याप्रकाशकः ॥
अदीर्घसूत्रः सत्कार्य्ये ह्यसत्कार्ये चिरक्रियः ।
न तद्भार्य्यापुत्रमित्रच्छिद्रदर्शी कदाचन ॥
तद्वद्बुद्धिस्तदीयेषु भार्य्यापुत्रादिबन्धुषु ।
न श्लाघ्यते स्पर्द्धते न नाभ्यसूयति निन्दति ॥
नेच्छत्यन्याधिकारं हि निष्पृहो मोदते सदा ।
तद्दत्तवस्त्रभूषादिधारकास्तत्पुरोऽनिशम् ॥
भृतिस्तुल्यव्ययो दान्तो दयालुः शूर एव हि ।
तदकार्य्यस्य रहसि सूचको भृतको वरः ॥
विपरीतगुणैरेभिर्भृतको निन्द्य उच्यते ॥ इति

(शु।२।५४।६५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निपुराणेऽपि ऊनचत्वारिंशदधिकद्विशततमाध्याये "दक्षता भद्रता" इत्याद्यारभ्य इदमेवोक्तम्। तथा कामन्दकीये नीतिसारेऽपि अष्टमप्रकरणे तदेवोक्तमिति अलं तदुद्धरणेन। भृत्योऽपि सेव्य निर्द्धारणविषये—

"वृत्तस्थं वृत्तसम्पन्नाः कल्पवृक्षोपमं नृपम् ।
अभिगम्यगुणैर्युक्तं सेवेरन्ननुजीविनः ॥
द्रव्यप्रकृतिहीनोऽपि सेव्यः सेव्यगुणान्वितः ।
भवत्याजीवनं तस्मात् श्लाघ्यं कालान्तरादपि ॥
अपि स्थाणुवदासीत शुष्यन् परिगतः क्षुधा ।
न त्वेवानात्मसम्पन्नाद् वृत्तिमीहेत पण्डितः ॥"

(का । नी । ८।१।२)

इति कामन्दकवाक्यानि स्मरेत् । राजा स्वामी वा—

"स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ।" (या । ३३४)

इति महर्षियाज्ञवल्क्यवचनं स्मरन् भृत्यान् प्रजाश्च पालयेत्। अनुजीविनस्तु सर्वथा स्वामिनो मनोरञ्जनार्थं चेष्टेरन् तत्पार्श्वगताः चापल्यादिदोषान् परिहरेयुः राज्ञः स्वामिनो वा इङ्गिताद्यैः वाक्यादिभिश्च व्यवहारेण च सन्तुष्टिं विरक्तिं वा लक्षयेयुः सर्वमेतत् नीतिशास्त्रकारैः बहुशः आलोचितम्। अत्र त्वस्माभिः बाहुल्यभयात् परिहृतम्। निबन्धशेषे तु वक्तव्यमस्माभिः लोकयात्रानिर्वाहार्थं अर्थप्रयोजनं सर्व्वानिवानुरुन्धन्ति। यावत् संसारेऽस्मिन् अर्थप्रयोजनं वर्त्तिष्यते न तावत् केनचिदपि जगतो भृत्यत्वं दूरीकर्त्तुं शक्यते। अर्थस्तावदेतावानेव बलवान् यदेकदा कुरुकुलधुरन्धरः त्रिभुवनपूज्यो भीष्मोऽपि—

अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ।
इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥

(महा । भीष्म ४३।४१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युवाच। तस्यार्थस्य कृते बहुभिरेव सेवकत्वं गन्तव्यम्। अत: सेवावृत्तिं विनानन्यगतिभि: नीतिवाक्यमिदं स्मर्त्तव्यम्—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रय:।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ इति

राजभिरपि स्मर्त्तव्यमत्र यत्—

दुर्य्योधन: समर्थोऽपि दुर्मन्त्री प्रलयं गत:।
राज्यमेकच्छत्रकारोच्चै: सुमन्त्री चन्द्रगुप्तक:॥

अपि तु स्मर्त्तव्यं सर्वैरपि—

चक्रं सेव्यं नृप: सेव्यो न नृपश्चक्रवर्जित:।
पश्य चक्रस्य माहात्म्यं मृत्पिण्ड: पात्रतां गत:॥

वक्तव्यञ्चैतत् यत् यथाविधिसेवया न कश्चित् हीयते यौगन्धरायणादय: मन्त्रिण: भृत्यत्वमेव परिपालयन्तो जगत्यमरतां गता:।

न किल कश्चित् स्वामिनं सेवते, परमर्थं स्वप्रयोजनञ्च सेवते। "निरीहानामीशस्तृणमिव" इति यदुक्तं तत् सत्यमेव। परं यदा स्वामिस्नेहगुणाकृष्ट: लाभालाभेषु उदासीन: सन् तं सेवते तदा भगवत् सेवानुरूपा सा सेवा परत्र च हनुमद्गरुड़नन्दीकेश्वरादीनामिव तस्य शुभमुत्पादयति। अलमतिविस्तरेण, अत्र सेवकं—सर्वलोकपूज्यं हनुमन्तं प्रशस्य भगवता रामचन्द्रेण यदुक्तं तदुक्त्वा विरतिं विधास्याम:। तथा चोक्तं प्रभूणामादर्शभूतेन रामचन्द्रेण सेवकानामादर्शभूतं मारुतिमभिलक्ष्य—

"यो हि भृत्यो नियुक्त: सन् भर्त्तृकर्म्मणि दुष्करे।
कुर्य्यात्तदनुरागेण तमाहु: पुरुषोत्तमम्॥" इति (रामायणम्)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुशिष्यसंवादः

(पूर्वतोऽनुवृत्तः)

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थः ।

जायमानो ह वै ब्राह्मणस्त्रिभिः ऋणैः ऋणवान् इत्यादिश्रुतिरप्यत्र प्रमाणमवगन्तव्यम् । वैदिके युगे जातिभेद आसीदिति प्रतिपादितम् । अस्माकं मते तु "वैदिकयुग"—एतादृशः शब्द एव न सम्भवति अपौरुषेयनित्यवेदस्य युगसम्बन्धाभावात्,

(१) "अस्य महतो भूतस्य निःश्वसितमेतत्
ऋग्वेदोयजुर्वेदः"

(२) "न कश्चिद् वेदकर्त्तास्ति वेदस्मर्त्ता चतुर्म्मुखः"

इत्यादिप्रमाणाच्च । ततश्च वेदस्य ब्रह्मयोनित्वमपौरुषेयत्वमीश्वरोच्चरितत्वं वा एतस्मिन् कस्मिन्नपि मते वेदस्य युगसम्बन्धित्वं नोपपद्यते अपौरुषेयस्य कालसम्बन्धायोगात् (१) ब्रह्मण ईश्वरस्य च कालातीततया तत्सम्बन्धिनो वेदस्यापि तथात्वात्, एवं रीत्या वैदिक युगशब्दस्यालीकतया तादृशशब्दप्रतिपाद्यवैदिकयुगपदार्थस्यापि सिकतातैलादिवदलीकत्वमायातमिति तत्र जातिभेदविचार एव निष्प्रयोजनतामावहति गगनकुसुमगन्धविचारवच्च प्रतिभातीति मन्यताम् । स्यादेतत्, शिवदासस्य प्रश्नमिदानीमालोचयामि । वत्स ! शिवदास ! उपक्षिप्यतां ते वक्तव्यम् ।

द्वितीयशिष्यः । सम्प्रति यादृशः समयः समुपस्थितस्तादृशे खल्वस्मिन् समये वर्णाश्रमधर्म्मस्य किमप्युपयोगित्वं नोपलभ्यते इति मे वक्तव्यसारः ।

गुरुः । नैवमुच्यतां श्रीमता । मया तूपलभ्यते यदस्मिन्नेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्युगे वर्णाश्रमधर्म्मतत्त्वप्रचार एव सर्वथोपयोगी। तत्तत्त्वप्रचाराभावादेव साम्प्रतमीदृशो दुःसमयः समुपजातः। यदा खल्वस्मिन् भारतवर्षे मानवा वर्णाश्रमधर्म्मप्रतिपादिता"ऽष्टचत्वारिंशत्संस्कार" संस्कृताः पवित्रतमं जीवनमावहन्तः सन्तो जगतां शिक्षका अभाषन्त महतीं वाणीमिताम्—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"

तदा यादृशसुखसम्पदादि दृष्टमत्र, सम्प्रति तस्य लवमपि किमुपलभामहे? पुरावृत्तमपि नैतत् कथयति अपि तु विपरीतमेव। तथाहि भारतवर्षं यावद् वर्णाश्रमधर्म्मपथारूढं तावदेव विविधज्ञानगौरवादिमण्डनमखिण्डतमासीत्, यदैव तत्पथाच्युतं तदेव खकचभ्रष्टज्योतिष्कवन्म्लानतामापन्नः साम्प्रतिकमनुज्ज्वलरूपं क्रमिकमावहति। यदि नामास्य स्यादभिलषितं पूर्वरूपं तर्हि वर्णाश्रमधर्म्मपथ एवाश्रयितव्यः। बहुविप्लवपरीक्षितं प्राचीनतमं पन्थानमिमं परिहरता गच्छता खल्वपरीक्षितां नवीनां सरणिं भारतवर्षेण यत् सुखमुपलप्स्यते नाम तत्तु सत्यमभारतीयमेव। भुवनमङ्गलविधायकपरहितपरायणपरमकारुणिकपरमर्षिगणपरिसेवितपरमपूतवर्णाश्रमधर्म्मपरिहारो मृत्योरिव नामान्तरमवगच्छामः। विहाय च स्वकीयविशिष्टताभूषणं परकीयभूषणमण्डनममण्डनमेव, विड़म्बनमपि; नहि खलु कुरूपमपि स्वपतिमवहाय परपतिं सुन्दरं भजमाना सुखमावहति सती। ततश्च "स्वधर्मे निधनं श्रेयः परधर्मो भयावह" इत्ययमुपदेशः सर्वथा सर्वदा श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च। तादृशश्रवणमनननिदिध्यासनपथारूढ़ं सुदृढ़ं खलु वर्णाश्रमधर्म्ममुपदेक्ष्यति स्वयमेव स्वकीयमुपयोगित्वं भवादृशामस्मिन्नपि युगे। साम्प्रतमयं धर्म्मो नैव श्रूयते मन्यते ध्यायते च। ऋते च श्रवणमननध्यानधाराभिरुपयोगित्वं कस्यापि वस्तुनो नोपलभ्यते किमुताऽपि गहनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णाश्रमधर्म्मोपयोगित्वम्? ततश्चास्य धर्म्मस्य बहूनि तत्त्वानि प्रतिभान्ति; तेषामष्टचत्वारिंशत्संस्काराणामुपपाद्य तत्त्वमादर्शयामः साम्प्रतिकमुपयोगित्वमस्य (वर्णाश्रमधर्म्मस्य)। तथा च संस्काराणामुपयोगित्वं वर्णयति—

"चित्रं कर्म्म यथानेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्व्विधिपूर्व्वकैः॥"

(अङ्गिराः)

सामान्यतः संस्काराणामुपयोगव्याख्या।

प्रथमतः सर्वेषामेव संस्काराणामुपयोगित्वं सामान्यतः समासतश्चाह—"चित्रं कर्म्म" इत्यादिना। यथा अनेकैरङ्गैश्चित्रं कर्म्म शनैरुन्मील्यते तद्वत् विधिपूर्वकैरनेकैः संस्कारैर्ब्राह्मण्यमपि शनैरुन्मील्यत" इति समुदितार्थः।

"अनेकै"रित्यनेन संस्काराणां बहुत्वमुक्तम्। ते च बहवः संस्कारा धर्म्मशास्त्रेण प्रतिपादिताः। तथा चात्र विष्णुस्मृतिः—

"यस्यैतेऽष्टचत्वारिंशत् संस्काराः" इति।

तथा च—तैरष्टचत्वारिंशत्संस्कारैर्ब्राह्मण्यादि चित्रकर्म्मवत् क्रमश उन्मील्यते इति। के च तेऽष्टचत्वारिंशत् संस्कारा इति सर्व्वान् तान् व्याख्याय चित्रकर्म्मादिसादृश्यमप्यत्र सम्यगुपपाद्य ब्राह्मण्यादिक्रमविकाशमप्युपपादयिष्यामि। सर्व्वेषामेषामुपपादनेन वर्णाश्रमधर्म्मस्य सार्व्वकालिकमुपयोगित्वं यथा प्रतिपादितम्भवेत्तथा यतिष्ये; अद्य तावदारचयामि भूमिकामात्रमिति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पाञ्जलिः (कथा)

लेखकः—श्रीतरणीकान्तचक्रवर्त्ती।

भवानीमन्दिरम्। मन्दिरस्यानतिदूरेऽवस्थितो हरिपुरग्रामः। अनतिविस्तृतोऽयं क्षुद्रो ग्रामः अतीतानेकसंख्यकवत्सरस्मृतिमुरसि निधाय दूरात् पथिकचित्तमाकर्षति। अन्तरा च इमे कियद्विस्तृतवनस्थानम्। लोकालयादस्मात् प्रतिदिनं नानापूजोपकरणैरनेन वनपथेन पुरोहितो जनार्दनशर्म्मा भवानीमन्दिरमागत्य तत्स्वभावसिद्धशीघ्रहस्तेन मन्दिरप्रतिष्ठाप्तदेवीपूजां विधाय पुनर्गृहं प्रत्यावर्त्तते। तत्र लोकेषु तत्रत्येषु कश्चित् प्रवादोऽश्रूयत यत् "अमुक्तप्रेतात्मा संप्राप्तापमृतीनामुपजनयति भयमन्तरान्तरा तत्रागत्य क्षुद्रप्राणांश्चापहरति श्रान्ततपस्विनामिति"।

जीवनस्य प्रथमावसरे जनार्दनशर्म्मा सर्वेष्वात्मसाहसिकतां विज्ञाप्य लोक-लोचनेषु निर्भीकस्तिष्ठन् यथेच्छं परिभ्रमति स्म। दैवायत्तत्वात्तत्र दीर्घपञ्चहस्तप्रमाणो विशालवपुर्जनार्दनः स्वादृष्टोपनिबद्धकर्म्म फलमुपभोक्तुमिवागच्छत्। यद्यपि स पल्लीप्रान्तवासिनः कस्यचित् प्रवीणाध्यापकस्य चतुष्पाठीमधिकृत्य दीर्घदिनं विद्यादेवीमसेवत तथापि अध्यापकपदवीमारोढुं समर्थो नासीत्; किन्तु समानवयःस्वन्येषु च "कर्म्मवीरो जनार्दन" इति तस्य विशेषख्यातिर्बभूव। सर्वत्र सर्वेषाञ्च परोपकारितैवेदृक् ख्यातिमूलमिति मन्यते। भवत्वित्थं प्रशंसितोऽपि स तु प्राक्तनजन्मसंस्कारादेव ध्रुवमध्यापकप्रतिष्ठां नागमदिति। अस्मिन्नेव काल एकदा जनार्दनस्तस्य पुस्तकजातं चिराय नमस्कृत्य तच्च कर्पटखण्डेन संबध्य गृहं प्रत्यागतः। एवं कालेऽकृतविद्यो जनार्दनः प्रतिवासिजनानुरोधेन पूर्व्वोक्तमन्दिराधिपतिना पुरोहितपदे वृतो भवानीमन्दिरमागतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैव तेन सहास्माकं प्रथमपरिचयः। अस्मादेव सदा प्रसन्नो ब्राह्मणो जनार्दनोऽत्र प्रतिदिनं नित्यपूजां विधाय भवानीदेव्या मनसि किं विचिन्तयन् मलिनाननो गृहं प्रतियाति। वयमवश्यमनुसन्धानेन पश्चाद् ज्ञातवन्तोऽस्य मूलकारणम्। प्रकाशयिष्यामश्च तद् यथा-स्थानमिति नास्ति प्रयोजनं पाठकानां चित्तोत्कण्ठायाः।

मन्दिराधिष्ठात्रीयं देवी भवानी बहुकालादेवात्र पूजितासीत्, नानादिग्देशादागत्य मातृभक्ता आदाय विविधपूजोपकरणानि अर्च्चयन्ति ताम् स्वाभिलषितानि च मातरि सम्प्रार्थ्य प्राव्रजन् पुनः स्वालयम्। एवमनेनैकदा मन्दिरस्य श्रीवृद्धिरजायत। कालप्रभावादद्य मन्दिरमिदं पूर्व्वस्मृतिपरिक्षीणमिव विलुप्तशोभं प्रतिभाति। अद्यापि तत्र अन्तरान्तरा बहुदूरादागत्य मातृभक्ताः केचित् सविशेषाड़म्बरेण मातृपूजां विदधति। किन्तु अत्र पूर्व्ववदानन्दोत्सवो न दृश्यते। कोलाहलोऽपि भक्तमुखविनिर्गतो दिगन्तमधुना न प्रतिध्वनयति न चालोड़यति तादृशं लोकमानसम्। अहो सर्व्वं खलु कालमाहात्म्यम्, सर्व्वत्र कालस्यैव विचित्रा लीला प्रभवति। एकदा यत्रोदयात् पुनरुदयं यावद्दिनमणेः आनन्दध्वनिरुत्थितोऽभूत्, तत्राद्य प्रकृतेर्घननिस्तब्धता काममप्यतीतवार्त्तां स्मृत्वा व्यथाकुलेव कमप्यनागतकालमपेक्ष्य सूचयत्यात्महृदयवेदनाम्। मन्दिरस्येदृशी दुर्भावनीयावस्था न खलु बहुपूर्व्वानुगता। अदीर्घेणैव कालेनास्य हेमकान्तिर्विलुप्ता, मन्यते तु कतियुगयुगान्तरादत्र लोकसमागमो नोपजातः।

अथैकदा तत्र किमिवोपपन्नं दैवेन। पूर्व्वोक्तप्रवादवाक्यारम्भान्मन्दिरस्य पलायितः पूर्व्वः पुरोहितः। ततो दूरिता साम्प्रतीतिः कथमपि पूजाकार्य्यस्यापि सम्पादनमत्र भवान्या दुर्लभप्रायमभूत्। एवं दुराराध्यः पूजानुष्ठानभारो यदा मन्दिरस्य समुत्पीड़यन् लोकमनांसि तेषां क्लेशमुपजनयति स्म, अत्रान्तरे पाठं समाप्य अस्माकं प्राक्परिचितजनार्दनशर्म्मणा परिगृहीतं पूजाकार्य्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दिराधिपतिरपि तस्मिन् दुर्दिने सुमहायकमेकमधिगम्य भवानी-पूजायां तं नियुक्तवान् पाठकानां तदु विदितमस्ति।

अद्य वासन्ती पूर्णिमा, पर्व्वोपलक्षेऽस्मिन्नहनि मन्दिरे महानुत्सवोऽनुष्ठितः। कतिपयभक्तहृदयन्तत्र विदेशात् सम्मिलितम्। तत्र प्रातः समारभ्य भक्तहृदयमालोड्य गीतिध्वनिर्व्योमतलं स्पृशति। तेषां सुकण्ठनिनादितानन्दकोलाहलो मृदङ्गध्वनिमधुरः सर्व्वतः परिव्याप्तो जनयति सुखं जनानां स्रोतसः—प्रवहति च सर्व्वजनहृदये आनन्दामृतरसनिस्यन्दिनी मधुरधारा। देवीनामकीर्त्तनमुग्धमनोहरकण्ठरवापूरिते देशे तत्र न श्रूयते कथा एकस्यापरेण। अत्रान्तरे काचिदेका रूपवती बाला मूर्त्तिमतीव भवानी परिलक्ष्यमाणा निधाय तस्याः करकमले परिमृष्टापूर्व्वविरचितकुसुमस्रक्चन्दनचर्च्चितार्घपात्रम् आयाति स्म मन्दिराभिमुखम्। ताञ्चागच्छन्तीं समीक्ष्य पर्य्यपूरयत् जनकोलाहलः समधिकोच्चकण्ठध्वनितो दिग्देशान्। उत्थितश्च सर्व्वत्र "जननी समायाति भवान्येवेयमि"त्येवं जयशब्दः। इत्यन्ते उच्चैर्ध्वनिं कुर्व्वाणास्तामनुगच्छन्ति स्म। दूरात् सर्व्व एव तां प्रणेमुः। किन्तु देवीज्ञानेन कोऽपि तां नास्पृशत्। क्रमेण कोलाहलो मन्दिरसामीप्यमलभत। अथ विरचितकुसुमाञ्जलिर्युवतिः सा मन्दिरद्वारमुपस्थिता यावदतिष्ठत्तावत्, सहसाधिककोलाहलवर्द्धितविस्मयविस्फारितलोचनः पुरोहितो द्वारं प्रति दृष्टिं निक्षिपन्नेव तस्य निर्जनमन्दिर-सहचरीं पूर्व्वपरिचितामवेक्ष्य ताम्, तदा पृच्छत् "कमले कथं त्वमद्य जनसमाकीर्णपथेन समायाता"? जनार्दनेन न्यूनाधिकं व्याकरणमधीतम् येन "कमले" इत्यभिधाय तस्य व्याकरणव्युत्पत्तेः प्रदर्शिताभिज्ञता इत्यलं पाठकानां विस्मयोदयेन।

अथैवं पृष्टा सा पुरोहितेन तस्याः स्वभावसुकोमलेनाद्य अधिकविस्मयानन्दविकम्पितेन विनीतकण्ठस्वरेण अवदत् "आर्य्य! अद्यैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मे पूजावशेषः” इत्युक्त्वा पूजकस्यापरतः यथास्थानं पूर्व्वाभ्यासरीत्या-सनोपविष्टा अभवत्। वयमत्र कौतूहलनिवृत्तये पाठकानां केयं मन्दिरमागता कमलाभिधेया कमलेव बाला जनार्द्दनशर्म्मणापि परिचितेव सम्बोधिता अत्र कथञ्चित् तत्परिचयं विज्ञापयिष्यामः।

किञ्चिदधिकपञ्चदशवत्सरपूर्व्वकालीना कथेयं यन्मन्दिरेऽस्मिन् बहवः साधुजना निवसन्ति स्म। किन्तु उत्थितात् पूर्व्वोक्तजनप्रवादात् अधुना कोऽपि तत्र वस्तुं न यतते। कथितमितदेकदा अस्या एव कमलायाः पतिरपि मन्दिरादस्मादन्तर्हितोऽभवत्।

माधवमिश्रो हरिपुरग्रामस्य प्रथमाधिवासी। मध्यमवित्तसम्पन्नोऽयं माधवमिश्रो निरन्तरं धर्म्मकर्म्माश्रित्य पुण्यानुष्ठानमाचरत्। तस्यैव पवित्रवंशोद्भवो धार्म्मिको रघुनाथमिश्रः प्रभावत्यां भार्य्यायां यथासमयमेकं सुलक्षणान्वितं पुत्ररत्नमलभत। स एवास्माकं मन्दिरमागतायाः कमलायाः पतिरिति। अस्य भाग्यवती जननी प्रभावती तनयप्रसवात् कियद्दिनानन्तरमेव शङ्खसिन्दूरबिन्दुविभूषिता पतिपुत्रयोर्विद्यमानयोराननमवलोकयन्ती स्वर्गगता बभूव। अतो बाल्यादेव शिशोरस्य पालनभारः पितृहस्ते संन्यस्तः। विषयकर्म्मविरतप्रायो रघुमिश्रोऽपि बाल्ये पुत्रस्य शिक्षां व्यवस्थाप्य उपस्थिते यौवने अनयैव कमलया पुत्रस्य वैवाहिककृत्यं सम्पाद्य निश्चिन्तो बभूव। कमलापि पतिहृदयानुरूपा सरला धार्म्मिकस्वभावा च आसीत्। किन्तु कृतदारोऽपि अपत्यसर्व्वस्वरघुमिश्रस्यैकः पुत्रो भवानीकान्तः स्वाभिलषितं सुखं न प्राप। आत्मजनपरिवेष्टितमपि गृहं, रूपवती युवतिभार्य्या, संसारसुखलालसादिप्रलोभनजनकव्यापाराश्च तस्योन्मुक्तमानसवेगं प्रतिरोद्धुं नाशक्नुवन्। अथैकदा मन्दिरमेत्य भवानीकान्तः पुनर्गृहं न प्रत्यागतः। अस्मादेव क्रमेण जनश्रुतिः समन्ताद् विस्तृतिं गता लोककर्णेषु।

वृद्धो रघुनाथस्तदेकमात्रपुत्रशोकेनाधीरोऽभवत्। एवमतिक्रान्तेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कतिषु दिनेषु पुत्रविच्छेदविक्षुब्धो रघुनाथो वार्द्धक्यादिव हृतज्ञानः कुललक्ष्मीं लक्ष्मीमिव कमलामेकदा स्वामिदुःखभाराक्रान्तां तां पुत्र-निधननिमित्तं विधाय क्लेशकरञ्च वाक्यवाणं प्रयोज्य विषज्वालयेव दुःखज्वालया पीड़यामास। कमला अद्य अश्रुजलं परिरक्षितुं नालम्बभूव। अत्र सा दुर्व्विसहव्यथां प्राप्य अश्रु विमुञ्चन्ती स्वर्गतां तस्या जननीं स्मारं स्मारं दीर्घनिःश्वासञ्च परित्यजन्ती स्थातुमशक्ता अक्रन्दत्। हतहृदया कमला तत्र मनसि प्रतिज्ञां व्यदधात्। "स्वामिन् हृदयनाथ! विविधविघ्नविड़म्बितेन त्वया परित्यज्यास्मान् अधिगतमधुना स्वाभिलषितं स्थानम्। यत्र कुत्रचित् कृतावस्थितिं त्वामिवोद्दिश्य स्मृत्वा च त्वत्पदकमलं प्रतिजानेऽहमपि अद्यारभ्य संवत्सरं यावत् त्वत्प्रस्थानस्थानं तन्मन्दिरमेव गत्वा तवैवाभ्युपगमाय "भवानीव्रत"माचरामि। पश्य नाथ, संवत्सरान्तेऽपि चिराश्रित-जनोऽयं दर्शनं ते लभताम्। अन्यथा चेज्जीवनानिलेन नूनं परि-त्यक्ष्यते" इति। अथ क्षणं स्थिता "मातर्भवानि! त्वमपि कन्यां परिपालये" त्यभिधाय उदतिष्ठत् संसारकार्य्यञ्च पर्य्यत्यजत्। ततः कयाचित्तदनुरागाकृष्टया वृद्धयानुगम्यमाना भवानीमन्दिरमुपगता। तत्रोपस्थितापश्यत् कश्चिन्मन्दिरद्वारमवरुणद्धीति। परिचयेन तं मन्दिरपुरोहितमवगम्य हृदयवेगोद्वेल्लिता दुःसमयादिव परिहृत्य कुलवधूजनलज्जां "कन्येवायं जनः आर्य्यं शरणमिति। व्रताचरणाय एवागताहं भवानीपदेऽर्पयितुं कुसुमाञ्जलिम्। कृपयाधुना पूरयतु मे मनोरथ" मिति तं सगद्गदमवोचत्। ततस्तत्करुणप्रार्थनां निशम्य सोऽपि पुरोहितो मन्दिरद्वारं पुनरुदघाटयत्। अथ कथञ्चित् समा-श्वस्ता सा दत्ताञ्जलिर्भवान्यै पुनः गृहं प्रत्यागता। एवं सांवत्सरिकं व्रतमादाय कमला अनुदिनमात्मपरिजन-परिचर्य्यां विधाय स्वहस्तावचितकुसुमाञ्जलिञ्च विरचय्य भवानीमन्दिरे गमना गमनमारेभे। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्मकल्पतरुः।

लेखकः—संस्कृत-कामधेनु-सम्पादकः के, ए, रामलिङ्गशास्त्री।

संसारदावसन्तापनिर्वापणविचक्षणम्।
पुण्डरीकाक्षमथवा निटिलाक्षमुपास्महे॥ १

महेश-मोहिनीरूपदम्पत्योस्तनुसम्भवम्।
प्रणम्य धर्म(१)शास्तारं रच्यते कल्पपादपः॥ २

प्रथमः पल्लवः।

सम्पदस्थिरा।

प्रेयस्या षड्रसैर्भोज्यैः पोष्यमाणो धनाधिपः।
दैवस्य दुर्विलासेन निर्धनः स्यात् स्व(२)मध्रुवम्॥ ३

श्रमसम्पादितं वित्तं विद्भ्यो दत्स्व च भुङ्क्ष्व च।
चक्रनेमिक्रमेणैतद् भ्राम्यन्नैव स्थिरं क्वचित्॥ ४

गजाधिरूढो धवलातपत्रेणापि मण्डितः।
क्षीणे पुण्येऽरिभिर्भूपो महिष्याद्यपहारयेत्॥ ५

आयुषस्ते कला मर्त्य! गता मृत्युः समागतः।
आलोच्य नश्वरं सर्वं युक्तं धर्मं समाचर॥ ६

अनिधाय धनं भूमौ तेन (३) धर्माचरिष्णवः।
यमपाशविनिर्मुक्ता मुक्ता यान्ति परं पदम्॥ ७

अतीत्य याम्यां संसूचीं (४) न सञ्जीवति कोऽपि हि।
धर्मं चरत वित्तेशाः! कालो हि दुरतिक्रमः॥ ८

---

(१) हरिहरपुत्रम्। (२) धनम्। (३) धनेन। (४) दिनचर्यापुस्तकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पित्रा (५) मानेन (६) हि यम आयूंषि चपयत्यत:।
धर्मं चरित्वाऽप्रमितं जन्मसाफल्यमश्नुत ॥ ९
न चिन्त्य (७) नाकनरकावैहिकामुष्मिकौ तथा।
धनिकम्मन्यमूढ़ानां श्रीस्तड़िद्वद्विनश्यति ॥ १०
वित्तेश्वरो न चाश्नाति स्थितिं कीर्तिं न बिन्दति।
नं स धर्मं चाचरति तद्धनेनाऽधनो हि सः ॥ ११
सद्दस्त्वं सदन्नं च-नोपयुज्य प्रयास्य च।
स्थोयं कार्यं धार्मिका ये न ते न मधुमक्षिका: ? ॥ १२

संस्कृतसाहित्ये विज्ञानवैचित्र्यम्

लेखक:—कविरत्नमखिलानन्दशर्म्मा।

प्रादोषिकं महमुपेत्य महोन्नतानि
यत्पादयो: प्रतिदिनं नमयन्ति देवान्।
देवा: शिरांसि तमुमापतिमात्मनिष्ठं
दिव्यं सभांगनमुपेत्य वयं नमाम:॥ १

यत्पादपद्ममकरंदपिपासुभि: प्रा-
गिन्दिन्दिरायितमहो विबुधैरपि द्राक्।
तामुत्तमोत्तमपदावलिभव्यरूपां
वागीश्वरीमपि वयं सदसि स्मराम:॥ २

जम्बूफलभ्रमवशान्नभस: पतन्तीं
यो विस्मयाच्छुकततिं विमुखीचकार।
विद्राव्य गण्डपतितभ्रमरानभद्रं
दूरीकरोतु स गणाधिपति: सभायाम् ॥ ३

(५) सूर्य्येण। (६) मानसाधनेन। (७) अविचिन्त्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आराधिता भगवती वचसामधीशा
यैरादरादहरहः सकलं विहाय।
लोकोत्तरं सुखमनन्यतयात्मबुद्ध्या
विप्रान्वयं सदसि तान् पुरतो नमामः॥ ४

यामुद्दिधीर्षुरवनिं भरतेन गुप्तां
दुग्धोदधावशिथिलीकृतकल्पनिद्रः।
भक्तैरहर्निशमुपास्य बहुस्वरूपो
दामोदरोऽप्यवततार नवस्वरूपः॥ ५

व्यासादिमुख्यमुनिनिर्मितदर्शनौघै-
रध्यात्मतत्त्वमितरेष्वपि सन्निवेश्य।
द्वीपेषु या भगवती द्विविषन्नमस्या
दिव्यामवाप गुरुतां गुणपारवश्यात्॥ ६

तामुत्तमोत्तमगुणावलिसम्प्रसूतिं
गङ्गादिपुण्यसरिदम्बुपवित्रभागाम्।
भव्यां स्वजन्मभुवमादरतः प्रणम्य
किञ्चिद्विवक्षुरधुना समुपस्थितोऽहम्॥ ७

माननीया विदां वरिष्ठाः!

द्विविषन्नमस्येऽस्मिन्विद्वत्कदंबे "विषयोऽयमभिनव" इति मत्वा यदि किञ्चिदुच्यते तदा तु मादृशस्य मितदृशः प्रत्यक्षमेव गजनिमीलनम्।

यतो हि व्यासोच्छिष्टं जगत्सर्वमिति नये जागरूके, मुहुर्मुहुरामृष्टसमस्ततत्त्वे च भवादृशविद्वन्निकुरंबे, किन्नाम भारत्या औपनिषदं व्यङ्ग्यं यत्सर्वथाप्यक्षुण्णमिव भवेत्।

तस्मादिहदनुज्ञापालनमावश्यकं मत्वा, स्वनामधन्यलोकमान्य-मालवीय-महोदयसनाथे महनीयेऽस्मिन् सुरभारतीमहोत्सवे समा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतविद्वन्मात्रप्रेक्ष्यतामङ्गीकृत्य योऽयं "संस्कृतसाहित्ये विज्ञानवैचित्र्य"मिति परिष्कृताभिधो निबन्धः प्रस्तूयते, तस्येदमवतरणम् ।

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।

इत्यभिधानान्मोक्षविषयिणी धीर्ज्ञानमिति व्यपदिश्यते। धीशब्दश्चायं बुद्धिपर्य्यायेषु कोषकारैः पठ्यते। "बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मति"रित्यभिधानात्। दार्शनिकैश्चायं बुद्धिशब्दो ज्ञानापरपर्यायेषु पठ्यते। तस्मादेव "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति" तैः सूचितम्। ऋते ज्ञानान्न मुक्तिरित्यादिस्तत्प्रयोगविषयः। मोक्षविषयकधियः स्थलादन्यत्र शिल्पशास्त्रयोर्वाचकं ज्ञानमेव विज्ञानम्। विविधं विशिष्टं वा ज्ञानं विज्ञानमिति तन्निरुक्तिः।

निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥ १

इति वाररुचपद्यस्मरणाद्वेरत्रोभयार्थप्रदत्वम्। शास्त्रविषयकं तदेतद्विज्ञानं द्विविधम्। पाश्चात्त्यं पौरस्त्यञ्च। तयोः पाश्चात्त्यं यूरोपीयमहोदयैरुद्भावितम्। पौरस्त्यञ्च भारतीयमहोदयैः।

डार्विन-कान्ट-न्यूटन-लैगलो-टाम्सन-ष्टीफनसन-एडीसन-जेम्लिन-प्रभृतयो महोदया वैज्ञानिकेषु यूरोपीयाः। तेषु डार्विनमहोदयो विकासवादप्रवर्तकः। न्यूटनमहोदय आकर्षणविकर्षणाविष्कारकः। लेगलोनामा वायुयानप्रवर्तकः। टाम्सनश्च विद्युद्वैचित्र्यविवेचकः। ष्टीफनसनमहाशयो वाष्पीययानाविष्कर्ता। एडीसन महोदयो ग्रामोफोनयन्त्रपंडितः। स्वनामधन्याः सर्वेऽपीमे विज्ञानवैचित्र्यविवेचकप्रवराः।

पौरस्त्येषु—गोतम-कणाद-जैमिनि-पतञ्जलि-कपिल-व्यासा भारतीयाः। यैरत्र विज्ञानप्रदानि-न्याय-वैशेषिक-मीमांसा-योग-सांख्य-वेदान्तानि व्यतन्यन्त। तेषु मननशीलत्वान्मुनिपदमन्वर्थं कुर्वन् स्वनामधन्यो गोतममहोदयस्तर्कमात्रबीजोद्भावकः। कणाद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामा मुनिप्रवरस्तत्त्वज्ञानप्रवर्तकः। लोकपरलोकधर्मणे क्रियाकलापमातनोज्जैमिनिः। आध्यात्मिकसमुन्नतिसंप्रयोक्ता पतञ्जलिः। प्रकृतिवादप्रकाशकः कपिलदेवः। ब्रह्मतत्त्वविवेचकः श्रीमान् द्वैपायनः। स्वनामधन्याः सर्वेपीमे भारतीय-विज्ञानमन्दिरपूजकाः।

भारतीया न केवलमेतावन्त एव किन्तु भरत-वात्स्यायन-कौटिल्य-चरक-नल-नील-मयप्रभृतयः परःशता अन्येपि। तेषु नाट्यकलाप्रवर्तको भरतः। कामकलाकलापकोविदो वात्स्यायनः। केवलमर्थशास्त्रप्रबन्धकः कौटिल्यः। वानस्पत्यविज्ञानचणश्चरकः। शिल्पकलाप्रवर्तकौ नलनीलौ। चित्रणकलामयो मयः। सर्वेपीमे भारतीयविज्ञानमन्दिरनिर्मातारो भारतीया एव।

पुरातत्त्वविद्भिरुद्भावितानि दर्शनान्यपूर्णानीति मत्वाऽद्यत्वे कैश्चन नवीनविज्ञानगवेषणापरायणैस्त्रिचतुराणीतराण्यपि दर्शनान्युकल्प्यन्त। तेष्वाद्यं कनखलनिवासिना केशवानन्देन (मण्डलेश्वरेण) प्रणीतं निराकारमीमांसाभिधम्। द्वितीयं भारतधर्ममहामण्डलाध्यक्षेण सम्पादितं दैवीमीमांसाख्यम्। तृतीयमपि तेनैव ज्ञानानन्देन सम्पादितं भरद्वाजदर्शनम्। चतुर्थन्तु स्वनामधन्यैः साहित्याचार्यैः श्रीरामावतारमहोदयैः प्रणीतं परमार्थदर्शनं नाम यन्नवीनेषु चतुर्ष्वप्यसाधारणम्।

सैषा नवीना दार्शनिकी सृष्टिः। तस्यामस्यां नूतनविज्ञानसृष्टौ पुरातनैराचार्यैरनुद्भावितं किं नाम तत्तत्त्वं यन्नवीनतया नूतनैरुद्भावितमित्यद्यापि न वक्तुं शक्नुमः।

अथेदं विचार्य्यते—यदिदमद्यत्वे दृश्यमानमसाधारणं विविधकलाकौशलं तत्कस्मिन्नंशे पौरस्त्यकलाकलापाद्भिन्नमिति।

मदनमतौ तु—यैरद्यत्वे पाश्चात्यं समभ्यस्यते विज्ञानं नावलोक्यते च गृहोदरगतमपि भारतीयं पौरस्त्यं वा वैदिकं विज्ञानं त एव पाश्चात्यविज्ञानडिंडिमायमानाः केचन पौरस्त्यं विज्ञानमधिक्षिपन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं ये तु परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्यास्तेषां मते समस्तमपि पाश्चात्यं विज्ञानवैभवं पश्चग्रप्रायमेव ॥ तद्यथा—

स्थानेन्तरतम (१।१।५०) इति सूत्रभाष्ये किमिदमान्तर्यमिति विवृण्वता भगवता भाष्यकारेण—"लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्य्यग्गच्छति नोर्द्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्य्यतः" इति यदाकर्षणसम्बन्धि रहस्यमुपपादितं तदेव वृक्षादधः पतत् फलमवलोक्यैतत्कारणकलापदत्तदृष्टिर्नवतनु"न्यूटन"महोदयो प्यदर्शयत्। तदिदं तदन्वेषणं न पुरातत्त्वविज्ञः पुरातनेभ्यो भारतीयेभ्यो विभिन्नमिति विवेचयन्तु स्वमनस्येव विदांवरिष्ठाः।

योयमद्यत्वे वरीवर्त्ति विकासवादीयः प्रबलसिद्धान्तः स चापि नूतनतया न पाश्चात्यैरुद्भावितः प्रत्युत पौरस्त्यप्रवरपरोक्षित एव दृश्यताम्।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधिभ्योन्नम्। अन्नाद्रेतः। रेतसोयं पुरुष इति" वैदिको मन्त्रः विकासवादसिद्धान्तमाविष्करोति। डार्विनमहोदयोप्यमुमेव विकासवादमाविष्कर्तुमुद्यतोऽभूत्। किमत्र विषये तस्याभिनवं गवेषणम् किं वा पुरातत्त्वविज्ञेभ्यो विभिन्नं वैचित्र्यम्।

अपरञ्च—"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। प्रकृतेर्महान्। महतोऽहंकारः। अहंकारात् पञ्च तन्मात्राणि। तन्मात्रेभ्यः स्थूलभूतानि। तेभ्यः पुरुष (१।६१) इति कापिलदर्शनविदां मतेपि नायं विकासवादः पाश्चात्यैरुद्भावितः। प्रत्युत पौरस्त्यप्रवरैरेव। मतान्तराण्यप्येवमेव पाश्चात्यविज्ञानविदाम्। यानि नातिरिच्यन्ते पौरस्त्येभ्यः।

वार्तासम्प्रापक—वायवीयवैद्युतयन्त्रयोर्विषये येषां विज्ञानवैचित्र्यमुपलभ्यते तेप्यत्र विषये पौरस्त्यमानसयन्त्राविष्कारकेभ्यो न गरीयांसः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तादृशयन्त्राविष्कारकसाधनाभावसम्भवात्। बहिरंगसाधनादतिरिक्तमन्तरङ्गसाधनमत्यावश्यकं मत्वा यैः पौरस्त्यैर्मानसी समुन्नतिरासादिता तैर्लोके मनसैव दूरस्थानामत्रत्यानां लोकान्तरवासिनाञ्च सर्वमपि शुभाशुभं वृत्तमवगत्य परानिष्टचिन्तनं परशुभाशंसनञ्च प्रत्यक्षतया व्यवहृतम्। यदद्यत्वे वैज्ञानिकैरपि न कर्त्तुं शक्यते।

मानसी शक्तिरतिशेते सर्वमपि भौतिकं यंत्रजातम्। नानुभूतं चेदिदमत्र निदर्शनम्। अस्मादवसराद् व्यतीयाय कश्चिदेवावसरो यत्र मद्रप्रदेशे समभूदिदमिति वृत्तम्। मुम्बयीनगराद्गच्छति दीर्घवेगवति पत्रसंवाहके वाष्पीययाने पुण्यपत्तनं जिगमिषुः कश्चिन्नवयुवकस्तपस्वी तत्संबद्धं प्रथमश्रेणीमञ्चमारुह्य तदुचितमूल्यवत्पत्रमनासाद्यैव प्रतस्थे। दैवयोगेन मध्येमार्गं, समवरुद्धे तादृशधूमयाने यानारूढजनजातमूल्यवत्पत्रालोचकैः स तपोधनो युवा मूल्यवत्पत्राभावेन यानादवाताय्यत। स चापि नातिदूरे कञ्चित्तरुमासाद्य तन्मूल एव तिष्ठन्निकटस्थितयानाकर्षकवाष्पीययन्त्रे नियोजयामास सर्वतोभावेन निरुद्धां निजदृष्टिम्। तद्दृष्टिविष्टब्धं तद्यन्त्रं मुहुर्मुहुश्चाल्यमानमपि यदाणुमात्रं नाचलत्तदा तत्कारणपर्यालोचनावसरे तपोधनस्य दृष्टिसंयम एवात्र कारणमिति सर्वैरप्यमन्यत। येन केन प्रकारेण तत्रैव तं पुनरपि निवेश्य यदा यन्त्रमचालयन्नगच्छत्तदा पूर्ववत्तद्यानमिति मुद्रितसमाचारपत्रदृष्टं वृत्तम्।

तदिदं मानसं यन्त्रमस्तं ह्यप्रतिष्ठञ्च। वेदे तादृग्विधमन्त्रोपलम्भात्। मनसैव सर्वमात्मवश्यं विदधतां पौरस्त्यानां, भौतिकयन्त्रपारवश्येन तत्तत्कार्य्यमासादयतां पाश्चात्यानां च कियदन्तरमिति स्वयमेव विचारयन्तु विद्वांसः।

वात्स्यायनप्रणीते कामसूत्रे चतुःषष्टिकलानिरूपणावसरे मानसी"तिसङ्केतेन यन्नाम निर्दिष्टं तन्मनोव्यापारविषयकं मानसमेव यन्त्रम्। तद्द्विविधम्। दृश्यादृश्यभेदात्। तत्र दृश्यं भूलोकव्यव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरणञ्चमम्। अदृश्यं चाकाशगतनानालोकव्यवहृतिसाधनभूत मित्येतावान् भेदः। उभयविधमप्येतत्पौरस्त्यैरेव प्राकट्यमनायि न पाश्चात्यैः।

येयमद्यत्वे विमानविभूतिरवलोक्यते पाश्चात्यैस्तदाविष्कर्ता "लैंगली" महोदयः प्रख्याप्यते। परन्तु नेदं तदन्वेषणं तत्कृतमस्ति। वेदे तादृग्विधायोजनवर्णनात्।

हिरण्मयी नौ रचरद्धिरण्यबन्धना दिवि ६।८५।२

इति मन्त्रे हिरण्मयबन्धनवत्याः हिरण्मय्याः नावः द्युलोके गमनमुपलभ्यते। वर्त्तमानसमये यद्वायुयानमवलोक्यते तदपि तथाविधमेव। किमत्र विषयेऽमुना महाभागेन पौरस्त्येभ्यो विशिष्टं तत्वमुत्प्रेक्षितमिति सूक्ष्मेक्षिकयापि न वीक्षयामः।

ये पन्थानो बहवो देवयाना
अन्तरा द्यावापृथिवी सञ्चरन्ति।
ते माजुषंतां पयसा घृतेन
यथा क्रीत्वा धनमाहरामीति॥ ३।१५ २

मन्त्रे द्यावापृथिव्योरन्तराले विद्यमाना बहवो देवयानाः पन्थानो निर्दिष्टाः। येषु विमानविहरणमासीत्। तेष्वेव भारतीया वणिजो घृतादि व्यापारमकुर्वन्। व्यापारप्राप्तं द्रव्यमपि विमानैरेवाऽनयन्। नासीदत एव भूपृष्ठेऽहरहः परःशतप्राणिविध्वंसकं किमपि वाष्पयानम्।

अद्यत्वे पत्रसंवाहकं यद्वाष्पयानमितस्ततो गच्छदवलोक्यते तत्र वायुयानापेक्षया महानतिक्रामति समयः परस्पराघट्टनवशेन शतशो भवन्ति जना गतासवः। स्थलं च महदपेक्ष्यते। सर्वमेतदवलोक्यैवेदानीन्तना यूरोपदेशीयाः पत्रसंवाहकं वायूयानमेव व्यवहरन्ति। यत्पौरस्त्यैः सर्वतः प्राग्व्यवहृतमासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित्पथा सञ्चरते सुराणां
क्वचिद्घनानां पततां क्वचिच्च।
यथाविधो मे मनसोभिलाषः
प्रवर्त्तते पश्य तथा विमानम् ॥ रघुवंशे १३।१९

पद्येऽस्मिन्मनोरथपथानुगं विमानयन्त्रमन्तराले द्यावापृथिव्योः क्वचिद्देवमार्गेण क्वचिन्मेघमार्गेण क्वचित्पततां पथा गच्छदुत्प्रेक्ष्यते। मार्गाणां भिन्नतया नात्र प्राणिनामुपमर्दः शङ्क्यते। न च परस्परा-घट्टनभयम्। यदुभयमिदानीमत्रोपलभ्यते।

(सावशेषम्)

श्रीश्रीकृष्णाष्टमी

लेखक—श्रीकालीपदतर्काचार्य्यः।

कृष्णा घोरविभावरी विषधरी कृष्णं नभो व्यायतं
कृष्णाम्भोधरभैरवव्यतिकरं निश्चन्द्रतारोत्करम्।
कृष्णा काननमण्डली सुनिविड़ा मध्ये नदत्कौशिका
कृष्णा भूधरभीषणाः परिसरा भूमिः समन्तादमी ॥ १
वातो वाति मदोद्धतो दिशि दिशि व्याविद्धसर्व्वद्रुमो
हिंस्रास्त्यक्तवना बहिर्वनभुवो धावन्ति भीताः परम्।
धाराध्वानविशेषिताः प्रतिदिशं तेषां सुभीमा रवाः
संहाराय किमद्य रौद्रविषमां मूर्त्तिं नु धत्ते हरः ॥ २
तस्यामानकदुन्दुभिः स्वभवनात् सुप्तप्रतीहारतो
रात्रौ किञ्चन कृष्णविग्रहमहः स्नेहान्निजाङ्के वहन्।
शङ्कापङ्किलमानसः प्रतिपदं कंसं स्वपुत्रद्विषं
स्मारं स्मारमितस्ततो निरगमन्मार्गे दृशम्प्रेषयन् ॥ ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गे निर्गत एष नो व्यगणयद् वर्षोद्भवां दुर्गतिं
यत्नादङ्कतले निधाय तनयं तूर्णं ययौ व्यायतः ।
शेषो भोगसहस्रकेण निभृतं प्रच्छाद्य शीर्षं स्थितः
किं वा तेजसि योगिचिन्त्यचरिते चित्राय सम्पद्यते ॥ ४

सम्प्राप्तो मथुरापुरीपरिसरे भीमां तरङ्गायितां
कालिन्दीं नवनीलनीरदरुचिं नैराश्यमासादयत् ।
दीर्घेयं यमुना प्रभञ्जनजवो भीमस्तरङ्गा भृशं
नास्ते हा तरणी कथं तटभुवं यायामिति व्याकुलः ॥ ५

नात्युच्चं तटनाविकं तटगतो भूयः समाकारयत्
नो कस्यापि च सूचनां समगमच्छून्या दिशो दृष्टवान् ।
वाताघातवशात् प्रतिध्वनिरभूद्दूरे तदा विस्तृत-
स्तस्मात् कंसभयेन मौनमवहत् किंकर्त्यमूढश्चिरम् ॥ ६

यावत् सूरसुतातटे भगवतस्तातस्तथा व्याकुलो
मायाविक्रमतः स्वबाहुशयितं नाबोधि नारायणम् ।
किन्त्वेकान्तहृदा परेशमभजद् भक्तो विपन्मुक्तये
तावत् क्वापि शिवा शिवाय सहसा नीरे पदं व्यक्षिपत् ॥ ७

प्रत्यक्षं शिवया तया रविसुतानीरे तरङ्गोद्धुरे
चित्रं यातमथाश्रितं प्रतिपदं वीचिर्बबाधे न ताम् ।
आलोक्यानकदुन्दुभिर्मुदमधात्तज्जानुमात्रं पयः
केयं दैवदया यदद्य यमुना पादेन तार्य्या स्थिता ॥ ८

एवं दैवनिदेशनादिव शिवासंसूचितां पद्धतिं
कालिन्द्यामनुसृत्य पारमपरं यातो निशीथे ततः ।
प्रत्यावर्त्त्य मुखं स्थितां रविसुतां दृष्ट्वा तथैवाकुलाम्
स्वं तीरोत्तरणं विचिन्त्य सुतरामाश्चर्य्यमासेदिवान् ॥ ९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यातोऽयं किल गोकुलं सुनिभृतं सुप्तं ततः सर्व्वतो
नन्दागारमुपागतः शिशुमुखं कृत्वा सुदृष्टं चमो।
तस्यामेव निशि प्रसूततनया याभूद् यशोदा सती
तस्याः क्रोड़तले निधाय तनयं तत्कान्यकामाददे॥ १०
दूरस्था मथुरापुरी प्रतिपदं दत्तावधाना भटाः
कालिन्दी बहुवीचिसूचितभया गुप्तं गतिर्गोकुले।
तत्कालक्षयमन्तरेण मथुरा गम्येति चिन्ताकुलो
भूयस्तां तनयां निजाङ्कशयितां कृत्वा प्रतस्थे ततः॥ ११
इत्थं भूतलभारहारिहरिणा सम्भाविते गोकुले
क्षौणी चालितकल्मषेव सुतरामानन्दमग्नाभवत्।
कंसश्चेतसि भीतिभूतिवशतः सुप्तिं यदा त्यक्तवान्
प्रागादानकदुन्दुभिः स्वभवनं कन्यां दधानस्तदा॥ १२
श्रीकृष्णस्य पुरा धरावतरणं यस्यां तिथौ सा तिथिः
सर्व्वासां प्रथमं पदं गतवती श्रीकृष्णजन्माष्टमी।
देवक्यष्टमगर्भसङ्गतिवशात्तन्नूनमेषा जनै-
र्विज्ञाता तिथिरष्टमीति न पुनः संख्याक्रमासादनात्॥ १३

संस्कृतसाहित्यस्य धर्म्मप्रधानता

(आषाढ़ादनुवृत्ता)

लेखकः—श्रीचिन्ताहरणकाव्यतीर्थः वि, ए।

औशनसादिराजनीतिग्रन्थानां राजधर्म्मनिर्द्देशमूलकतया प्रजाधर्म्मनिरूपकतया च धर्म्मपराधीनता निर्व्विकल्पैव। अथच स्मृतिपुराणादिष्वपि प्रसङ्गतो राजधर्म्मादयो वर्ण्यन्त इति स्मृत्यादीनां नीतिशास्त्राणां यत्नैव तुल्यविषयतेति सिद्धे स्मृत्यादीनां धर्म्मपारतन्त्र्ये सुघटमेव धर्म्मपरत्वं राजनीतिविषयकग्रन्थानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र युद्धादीनां चारपुरुषनियोगादीनां कथम् धर्म्मपरतेति चेदुच्यते—एते नाम विषयाः क्षत्रियाणां धर्म्मत्वेनैवाभ्युपगताः, अन्यथा राज्यविपत्तौ प्रजानां दुःखोदयात् राज्ञः पापोत्पत्तेः अधर्म्मयुद्धानां सर्व्वथा शास्त्रप्रणेतृभिर्निषिद्धतया धर्म्मयुद्धे कूटयुद्धे च आश्रितास्त्रपरिहीनप्रहरणादिदुष्टकर्म्मनिचयानामकर्तव्यतायाः प्रतिपादिततया च सङ्गच्छते एव सोऽभ्युपगमः सुतराम्। राज्यपरिपालनार्थम् अनभिप्रेतस्यापि समरस्य कदाचित् कदाचिदवलम्बनीयत्वेऽपि यथा तेन अत्याहितमतिगर्हितं वा न सम्पाद्येत तथा शास्त्रकृद्भिः कृतो नियमः। अत्रैव संस्कृतयुद्धशास्त्रादीनां वैशिष्ट्यं धर्म्मपरत्वञ्च।

न च कामादिशास्त्राणाम् अधर्म्मपरत्वं वाच्यम्,

'धर्म्मार्थकामाः सममेव सेव्याः।
यो ह्येकसक्तः स जनो जघन्यः॥'

इति कामस्यापि सेव्यत्वप्रतिपादनेन, प्रजोत्पादनादिकामकर्मणां पितृणशोधनरूपधर्मसाधनप्रयोजनवतां धर्म्मत्वकथनात् केवलकामवासनापरितर्पणस्य निषिद्धत्वं तदर्थञ्च दारादिसंग्रहस्याप्यधर्म्मत्वप्रतिपादनात् कामादिशास्त्रस्यापि धर्मपारतन्त्र्यं सनातनधर्ममतानुसरणरतैरभ्युपगम्यते कृतधीभिः।

चौर्य्यशास्त्रस्येदानीं प्रायेणानुपलभ्यमानस्य नामतो वाधिगम्यमानस्य धर्मार्थमप्रवर्त्तमानस्य केवलस्याधार्मिकत्वेऽपि न संस्कृतसाहित्यस्य धर्मप्रधानताहानिराशङ्कनीया, प्राधान्येन व्यपदेशा भवन्तीति न्यायात् प्राधान्येन संस्कृतसाहित्येषु धर्म्मप्रभावे सिद्धे अङ्गमात्रस्याधार्मिकत्वेऽपि नाङ्गिनो धर्मपारतन्त्र्यहानिरापद्यते।

परं चौर्य्यशास्त्रेऽपि ब्राह्मणहननदरिद्रसत् कुलोत्पन्नजनवस्तुहरणादिधर्म्मविरोधिकृत्यजातस्य अकरणीयत्वोपदेशदर्शनेन चौर्य्यकार्य्यप्रवृत्तानां कार्त्तिकेयादिदेवनामसंकीर्तनपुरःसरं कार्य्यारम्भावलोकनाच्च न धर्मविहीनत्वं कल्पयितुं पार्य्यते चौर्य्यशास्त्रस्यापि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(चौर्य्यशास्त्रस्य अस्माभिरदृष्टतया मृच्छकटिकरूपकोपवर्णित चौरशर्विलकवचनात् अनुमीयतेऽयं विषयः) अपरञ्चात्रावधेयं यथा चौर्य्यशास्त्रप्रणेतृभिरपि हेयत्वमनादरणीयत्वं च सर्व्वथैव चौर्य्यस्य प्रकटयद्भिः केवलं चौराणां कृत्यकौशलं सम्पादयितुमेव शास्त्रं प्रणीतमिति।

धर्म्मानुष्ठानाय शरीरस्यापेक्षिततया शरीररक्षणार्थञ्च गृहादीनाम् आवश्यकतया गृहादिनिर्म्माणस्यापि परम्परया धर्म्मापेक्षिता इति वास्तुशास्त्रस्यापि धर्म्मपारतन्त्र्यं सिध्यति। वस्तुतश्च गृहनिर्म्माणारम्भे गृहसमाप्तौ धर्म्मानुष्ठानं वास्तुशास्त्रेषु बाहुल्येन विहितमिति वास्तुशास्त्रस्य धर्म्मपरिहीनता कथं वा वक्तुं पार्य्यते।

गीतवाद्यनृत्यनाट्यानां कलानां धर्म्मपरत्वं—

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः॥"

'त्रिवर्गसाधनं नाट्यम्' इत्यादिवचनात् घटत एव। एतेषां च वस्तूनां धर्म्माभिवृद्ध्यर्थमेव प्रवृत्तिरिति अभिप्रेयन्तः शास्त्रकाराः अत्राधर्म्मवस्तूनां सन्निवेशं निवारयन्ति। तथा च धर्म्मप्रतिकूल गीतादीनां श्रवणादिकमपि अधर्म्मायैव इति शास्त्रकृतां मतम्।

अपि च कलानामखिलानां ज्ञानाहरणचित्तैकाग्र्यसम्पादनरूप प्रयोजनवतां ज्ञानचित्तैकाग्र्यादिसाध्यधर्म्मार्जनोपयोगवतां धर्म्मे उपयोगित्वलक्षणं पारतन्त्र्यं कथञ्चिद् अभ्युपेयम्, कलालोचनस्यैव चरमोद्देश्यवत्ताभावात् तदालोचनस्यापि धर्म्मोत्कर्षार्थमभिप्रेतत्वात्।

अनया नाम शैल्या निखिलभाषासाहित्यस्यैव सुकरं धर्म्मपारतन्त्र्यप्रतिपादनमिति चेद् ब्रूमः—अभ्युपगतेऽपि तादृशे सौकर्य्ये निर्व्विवादमेवैतत् वैशिष्ट्यं संस्कृतसाहित्यस्य यद् यथा धर्म्मपारतन्त्र्यम् अभ्युपगच्छन्तः संस्कृतसाहित्यरसिका आचार्य्याः अत्राधर्म्मभावस्यानुप्रवेशं निवारयितुमलम्बभूवुर्न तथा भाषान्तराचार्य्या भाषान्तर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्येषु ; यथा चैवं धर्मपारतन्त्र्यात् संस्कृतसाहित्यस्य भारतीयानां मनोवृत्तिः धर्मविषयसमुन्नतिशीर्षदेशं समारूढ़वतो न तथा देशान्तरीयजनानाम् इति वैशिष्ट्यविशेषं समालोकयतां संस्कृतसाहित्यस्य धर्मपारतन्त्र्यप्रतिपादनप्रयासो नोन्मादविलसितमित्यनवद्यं वचः ।

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त' इति च शास्त्रनिदेशात् धर्मार्थप्रतिपादनैकलक्ष्याणां लौकिकार्थप्रकटनपराणां वा सर्व्वेषामेव संस्कृतसाहित्यनिबद्धशास्त्राणाम् आदिमध्यान्तेषु माङ्गल्यविषयसन्निवेशसद्भावात् धर्मपराधीनत्वमेतेषां सर्व्वेषामेव यथा घटते न तथा भाषान्तरीयसाहित्यशास्त्राणामिति चासंशयमेव वक्तुं प्रभवामः ।

विषये चात्र पाश्चात्यविदुषामपि सम्मतिः समालोक्यते । यथाचोक्तं Macdonell महोदयैः—'Vedic literature is essentially Religious ; Sanskrit literature, abundantly developed in every other direction is profane. But doubtless as a result of the speculative tendencies of the Upanishads, a moralising spirit at the same time breathes through it as a whole...............Sanskrit poetry is pervaded by Weltschmerz resulting from the now universally accepted doctrine of transmigration. (Sanskrit Literature p. 276)............Sanskrit literature has mainly achieved greatness in religion and philosophy............Every step in the evolution of religion and philosophy can be traced in Saskrit literature.

वैदिकसाहित्यं प्राधान्येन धर्मपरतन्त्रम् । लौकिकसंस्कृतं विभिन्नविभागेषु समुन्नतिं भजमानं धर्मपरिहीनम् । परमुपनिषदां विचारप्रभावेण सर्वत एव संस्कृतसाहित्ये नैतिकप्रभावो विलोक्यते । सकलसम्मतोपनिषदजन्मान्तरवादप्रचारात् जागतदुःखालोचनपूर्णः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकविताग्रन्थः। धर्मेषु—दर्शनेषु चैव तथा प्राधान्येनाधिगतप्रतिष्ठं संस्कृतसाहित्यं यथा—विभिन्नधर्मदर्शनसमुत्पत्तेः प्रत्येकमपि क्रमाः संस्कृतसाहित्येऽपि उपलभ्यन्त इति।

एवञ्च, संस्कृतसाहित्यस्य सकलानामिवाङ्गानां धर्मप्रधानतास्माभिः प्राचीनाचार्य्यानुमोदितसरण्या प्रतिपादिता। सत्यं, संस्कृतसाहित्यात्यन्तानुरक्ता वयमत्र पक्षपातदोषदुष्टाः, परमपक्षपातिनः पाश्चात्त्यपण्डिता अपि यदस्माभिस्तुल्यमता इति विचारयन्तः सुधियो नास्मान् अभियोक्ष्यन्तीत्याशास्महे इति शम्।

सन्देशाः

पण्डितराजप्रयाणम्—निर्वर्त्तितप्रायमुद्राङ्कणायां पत्रिकायां सहसाऽस्मासु समापतितेयं शोकवार्त्ता यत् प्रवर्त्तमानसौरभाद्रस्य सप्तमे दिवसे महामहोपाध्याय-पण्डितराज यादवेश्वरतर्करत्नपादा नश्वरं कलेवरं श्रीकाश्यां परिहाय श्रीमत्काशीश्वरचरणं सम्प्राप्ता इति। इत्यमीदृशविद्वज्जनवियोगेन विरलबान्धवा क्रमेण निरवलम्बतामापद्यते भगवत्यमरभारतीत्यहो! दशावैषम्यम्! न जानीमहे—कियन्ति वाऽवशिष्यन्ते तादृशसरसभणितिदक्ष-सहृदय-पण्डितरत्नान्यद्य भारते वर्षे। प्रसिद्धमेवासीदेतेषामसाधारणं शास्त्रनैपुण्यमनुपमं कविताकौशलमनन्यसुलभञ्च व्याख्यानप्रावीण्यं लोकेषु। पण्डितराजसाहाय्यकवञ्चितानां शोकविहतानां नः केवलमिदमिदानीमाश्वासनं—

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥ इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कलिकाता म्युनिसिप्याल कर्पोरेशन' संज्ञकनगर-संस्थापकसङ्घकर्त्तृकं परिषत्परिदर्शनम्।

विगते सौरश्रावणस्य पञ्चविंशदिवसे रविवासरे सायं सप्तमघटिकायां परिषत्परिदर्शनार्थं समुपस्थास्यतां कलिकातानगरसंस्थानकसङ्घ-पारिषदमहत्तमानां समाहृता काचन रमणीया सभा यत्र समवेताः सङ्घस्य केचन प्राज्ञाः (Aldermen) पारिषदाः (Councillors) परिचालकमुख्यमहोदयाश्च (Chief Executive Officer) सभागौरवातिरेकं सम्पादितवन्तः। परं नितरामेव दौर्भाग्यकारणमितन्नः—यत् शारीरास्वास्थ्यहेतोः संघनायकाः श्रीमन्तः चित्तरञ्जनदाशमहोदयाः सभायामुपस्थातुं नापारयन्त इति।

गृहीतासनेषु सदस्यवर्य्येषु गीते च मनोहरे कस्मिंश्चिदुद्बोधनसङ्गीतके परिषदाचार्य्येण श्रीमता कालीपदतर्काचार्य्यमहोदयेन रमणीयवचनसमुदायैः परिषदुद्देश्यादीनि समासतो निर्द्दिश्य वाचितमधस्तनं स्वागतसम्भाषणश्लोकषट्कं सवङ्गानुवादम्।

स्वागच्छत स्वार्थविमुक्तचित्ता युक्ताः स्वदेशस्य महोपकारे।
युष्माकमद्याद्य समागमेन प्राप्ता प्रहर्षं परिषत् सुदीना॥
युष्मद् यशो गायति मेदिनीयं सुधायते चन्द्रसुधापि सौम्या।
नाल्पेन पुण्येन समागमो वो विना निदानं न फलप्रसूतिः॥
स्वच्छन्दमुत्कर्षविधानकल्पे देशस्य यूयं विनियोजिता यत्।
ततः पुनः प्राक्तनभावयोगाद् वसुन्धरेयं भविता प्रसन्ना॥
पुरातनं सर्वमभूद्विलुप्तं सुप्तश्चिराद् भारतवर्षहर्षः।
संस्कारशक्तिं स्वकरे दधानाः प्रवर्त्तयन्तां कुशलं भवन्तः॥
भवत्प्रभावेण पुनश्च लोके प्रवर्त्ततां प्राक्तनचित्तशक्तिः।
तामन्तरेण प्रशमोपचारां न भारतस्यास्य भवेद् विभूतिः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्कर्षहीना किल देवभाषा हीनं ततो भारतवर्षमेतत्।
स्मरन्तु तां कल्पशतान्तराले तस्या भवन्तः शरणं धरायाम्॥

ततश्च परिषदन्यतरसम्पादक-श्रीयुक्त गोष्पतिकाव्यतीर्थमहाशयाः सरलवङ्गभाषया परिषदितिवृत्तवर्णनपुरःसरं परिषत्सदस्यैः प्रयोज्यमानस्य मदाकविभासकृतेर्मध्यमव्यायोगस्य दूतवाक्यस्य च वस्तु सरलमधुरया गिरा प्रतिपादितवन्तः। एतदनन्तरञ्च परिषद्रङ्ग एव प्रयुक्तं तद्रूपकद्वयम्, यन्नाम प्रयोगं प्रत्यक्षीकुर्वन्तः सामाजिका नितरां हृष्टचेतसः समजायन्त। अभिनयावसाने च हस्तलिखित पुस्तकादिपरिषत्संगृहीतवस्तुजातमवलोकयन्तः प्रमुदितमानसाः पारिषदाः प्रस्थितवन्तो रात्रे द्वितीये यामे।

मासिकाधिवेशनम्।

विगत सौरश्रावणस्य सप्तविंशद्दिवसे सायं सम्पन्नं परिषदो मासिकमधिवेशनम्। परिषदाचार्य्यैः श्रीमद्भिः कालीपदतर्काचार्य्यमहोदयैरलङ्कृतं सभापतेरासनम्। तत्र पूर्व्वसभाविवरणपाठादिषु अवसितेषु सभाया नित्यकृत्येषु राजसाही-संस्कृतपाठशालाध्यापक-श्रीयुक्तगिरीशचन्द्रवेदान्ततीर्थमहोदयेन विरचितं 'वङ्गपतन'-शीर्षकं निबन्धं श्रीमन्तो दुर्गामोहनभट्टाचार्य्य (एम्, ए) महोदया वाचितवन्तः प्रबन्धकर्त्तुरनुपस्थितेः सभायाम्। विविधेषु शास्त्रेषु अनतिप्राचीनेऽपि काले यन्नामासीत् महत् वैशिष्ट्यं तदेव प्रतिपादितं प्रबन्धकर्त्रा स्वीये प्रबन्धे। प्रबन्धवाचनान्ते सभापतिना प्रबन्धमधिकृत्य कृतं किञ्चन समालोचनम् यस्यानन्तरमवसितम् अशेषं सभाकृत्यम्।

विगत सौराषाढ़ीय-कार्य्यनिर्वाहकसभायां कार्य्यनिर्व्वाहकसदस्यत्वेन निर्व्वाचिताः कविराजशिरोमणि—श्रीयुक्त श्यामादासवाचस्पतय स्तत्पदमङ्गीकृतवन्त इति वयं सप्रमोदं विज्ञापयामः पारिषदानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

मुद्रिता ग्रन्था:

१। **कपालकुण्डला**—बङ्किमचन्द्रस्य प्रसिद्धकथाया अनुवादरूपा। मूल्यम् १) रूप्यकमात्रम्, परिषत्सदस्यानाम् ॥० पादोनरूप्यकम्।

२। **कालीतन्त्रम्**—सटीकानुवादम्। मूल्यम् ॥≠० दशानका:, सदस्यानाम् ॥० अानकाष्टकम्।

३। **गीतशङ्करीयम्**—जयदेवकृत-'गीतगोविन्द'मनुसृत्य कवि-जयनारायणेन विरचितं देवीस्तुतिरूपम्। मूल्यम् ।≠० षड़ानका:, सदस्यानाम् ।० चतुराणकम्।

४। **मुक्तिवाद:**—गदाधरभट्टाचार्य्यविरचित: टीकाद्वयोपेत: बङ्ग-भाषाभाष्यसहित: सविस्तरभूमिकया तथा प्राचीन-मुक्तिवादेन समलङ्कृतश्च। मूल्यम् २) रूप्यकद्वयम्, सदस्यानां १॥० सार्द्धरूप्यकमात्रम्।

५। **दुर्गापूजातत्त्वम्**—रघुनन्दनभट्टाचार्य्यविरचितम् अष्टाविंशति-तत्त्वातिरिक्तम् विस्तृतभूमिकासहितं शारदीयदुर्गोत्सव-प्रमाणप्रयोगतत्त्वालोचनरूपम्। मूल्यं १।० सपादरूप्यकम्, सदस्यानां १) रूप्यकमात्रम्।

मुद्र्यमाणा ग्रन्था:।

६। **कारकोल्लास:**— भरतमल्लिकविरचित: सोदाहरणकारक-निर्णयरूप: ललितपद्यमयो ग्रन्थ:।

७। **पितृदयिता**— महाराजवल्लालसेनगुरुभिरनिरुद्धभट्टै र्विरचिता अतिप्रामाणिकसामवेदीयसन्ध्याश्राद्धादिपद्धतिरूपा।

८। **दुर्गोत्सवविवेको वासन्तीविवेकश्च**— महामहोपाध्याय-शूलपाणिविरचितौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

দুর্গাপূজাতত্ত্বম্ ।

রঘুনন্দনভট্টাচার্য্যবিরচিতম্ ।

(মূল্য ১।০ পাঁচ সিকা, পরিষৎ সদস্য পক্ষে ১৲ এক টাকা)

স্মার্ত্ত ভট্টাচার্য্যকৃত তিথিতত্ত্বের অন্তর্গত দুর্গোৎসবতত্ত্বে 'পূজায়াং বিশেষস্তু দুর্গাপূজাতত্ত্বে অনুসন্ধেয়ঃ' এই উক্তিতে দুর্গাপূজাতত্ত্বের পৃথক ভাবে উল্লেখ থাকিলেও তৎপ্রণীত অষ্টাবিংশতিতত্ত্বের অতিরিক্ত এই গ্রন্থের অস্তিত্ব এতকাল অনেকেরই অজ্ঞাত ছিল। শ্রীশ্রীজগদম্বার কৃপায় আমরা আজ সাধারণের সমক্ষে এই দুর্লভ গ্রন্থ উপস্থিত করিতে সমর্থ হইলাম। কলির অশ্বমেধ শারদীয় দুর্গোৎসব বঙ্গদেশেই সমধিক অনুষ্ঠিত হইয়া থাকে, এই জন্য গ্রন্থখানি বাঙ্গালা অক্ষরে মুদ্রিত হইয়াছে। এই গ্রন্থের উপযোগিতা সম্বন্ধে স্বয়ং গ্রন্থকারই বলিয়া গিয়াছেন—

ব্যবস্থায়াঃ প্রপঞ্চস্তু বিজ্ঞেয়স্তিথিতত্ত্বতঃ।
পূজাবিশেষশ্চ সম্যক্ত্বং জ্ঞাতব্যং কোবিদৈরিহ ॥

রঘুনন্দনকৃত নিবন্ধ বিষয়ে ইহার অধিক কোনরূপ বিজ্ঞাপন চপলতা মাত্র।

ইহার উপর গ্রন্থসম্পাদক শ্রীমৎপূর্ণানন্দবংশীয় শ্রীযুক্ত সতীশচন্দ্র সিদ্ধান্তভূষণ মহাশয় বহুতথ্যপূর্ণ সুবিস্তৃত বাঙ্গালা ভূমিকা দ্বারা পুস্তকখানির উপযোগিতা আরও বৃদ্ধি করিয়াছেন। ইহাতে দুর্গাপূজার ইতিহাস, অকালে দুর্গোৎসবের কারণ এবং দেবীপূজার প্রবর্ত্তনকাল প্রভৃতি অতি জ্ঞাতব্য বিষয়সমূহ নিপুণভাবে আলোচিত হওয়ায় দুর্গোৎসবসম্বন্ধে প্রচলিত বহু ভ্রান্ত ধারণার নিরাস হইয়াছে। ভূমিকা বাঙ্গালা ভাষায় লিখিত; সুতরাং ইহার দ্বারা সংস্কৃতানভিজ্ঞ ব্যক্তিও দুর্গোৎসবের সকল তত্ত্বে অভিজ্ঞ হইতে পারিবেন। ইহা প্রত্যেক হিন্দুর—বিশেষতঃ দুর্গোৎসবের অনুষ্ঠাতা প্রত্যেক গৃহস্থের এবং প্রত্যেক পুরোহিতের অপরিহার্য্য পাঠ্য পুস্তক।

প্রাপ্তিস্থান—সংস্কৃতসাহিত্যপরিষৎ, শ্যামবাজার ব্রিজ রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্য রিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

স্থাপিত ১৩০৮

ঢাকা

শক্তি ঔষধালয়

মহাভৃঙ্গরাজ তৈল ৬৲ সের

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটী, চট্টগ্রাম, শিলেট, রঙ্গপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ – ৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূত করিতেছ হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিসপেপসিয়া প্রভৃতি রোগে প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিসপেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়া সকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইণ্ডিয়া ফার্ম্মাসি, ... ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৷৷০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৷৷০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৷৷০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭৷৷০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋते ज्ञानान्न मुक्तिः
पुस्तक सं०..............
Reg. No. C. 1073.
आगत सं०..............
तिथि०..................
गुरुकुल ग्रन्थालय काँगड़ी.

१८४६ शकाब्दे
आश्विने
October 1924.

७म वर्षस्य
६ष्ठ संख्या
Vol. VII. No. 6

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—काव्य-सांख्य-पुराणतीर्थ-श्रीदुर्गामोहनभट्टाचार्य्यः M.A.

गौरीसमागमः (कविता)
मतिमञ्जरी
संस्कृतसाहित्ये विज्ञानवैचित्र्यम्
तारां प्रति सोमस्य (कविता)
द्रौपदीपञ्चस्वामिकतारहस्यम्
जैनजीवतत्त्वम्
पुष्पाञ्जलिः (कथा)
सिद्धान्तभूषणजीवनचरितम्
सन्देशाः

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।

Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল



এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ - সুশ্রুত-সংহিতা ই এসংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पण्डितवर—

जयचन्द्र सिद्धान्तभूषण भट्टाचार्य्याः ।

जन्म	प्रयाणम्
१७७१ शकाब्दे	१८४५ शकाब्दे
चैत्रशुक्लचतुर्थ्याम्	मार्गशीर्षशुक्लनवम्याम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये आश्विने, ७म-वर्षस्य ६ष्ठ-संख्या

गौरीसमागमः

(लेखकः—श्रीयोगीन्द्रनाथसांख्यस्मृतितीर्थः)

(१)

विकाशिकाशचामरैः सुवीजयन्त्यहो मही
प्रफुल्लचन्द्रिकावली-विशोभिनीलिमाम्बरा।
विलीनभृङ्गतारक-प्रसारिपद्मनेत्रका
कुलाङ्गनासमा शरत् समेति पुष्पवर्षुका ॥

(२)

जड़ोऽपि पादपोऽधुना सपुष्पहास्यसम्मदो
हिमाम्बुभिर्मुदश्रुभिर्युताङ्गको द्रवान्तरः।
सरक्तपल्लवाञ्जलिर्विहङ्गकूजनच्छलात्
स्तवीति मातृमङ्गलं तथापि किं जड़ः स हि ॥

(३)

भवेऽत्र मानसं सरः सुनिर्म्मलद्रवान्तरं
शिवाभिवन्दनेऽधुना प्रचेष्टमानमानसम्।
कुमुद्वती प्रकाशनैः स्थली स्थलाम्बुजैश्चणैः
परस्परं समीहते परां श्रियं विनिन्दितुम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

गिरीशनन्दिनी शिवा गिरीशवाससन्निभं
समेति भारतश्रिया तदीयभारतं प्रिया।
नियोजयत्यतः शिवः शिवाप्रसादने तनूः
प्रियानुकूलतामितः प्रियो जनो हि सर्वथा॥

(५)

निदाघभास्करैरिव प्रतप्तविग्रहाऽनले-
रजस्रवर्षणोदकैर्विलीनदीनदेहिका।
गृहीतपङ्कजाञ्जलिर्जगत्प्रसू-प्रतुष्टये
तपस्यतीव किं धरा स्वशस्यपाकवाञ्छया॥

(६)

विधात्रमात्रभक्तितः क्षतद्रवाम्बुविग्रहा
तरङ्गहस्तसङ्गतप्रवाहनृत्यभङ्गिमा।
कुलुस्वनैस्तरङ्गिणी प्रगीतमातृगीतिका
स्वभर्तृगामिनी सती-पथं परिष्करोति किम्॥

(७)

असंख्यजीवमेहिकं शिवेति भावयन्नसौ
सुगन्धपुष्परेणुभिः स्वलङ्कृतस्वविग्रहः।
समीरणः समीरयन्नसंख्यतालवृन्तकं
शिवाश्रमं विनोदयन् निरन्तरं प्रवाति किम्?॥

(८)

शिवार्चने हुतं हविर्वहन् सुरप्रतिच्छविः
हुताशनो निरन्तरं शिवास्तुतिं स्तुवन् किमु।
त्रिनेत्रनेत्रतां वहत्यदेहदेहदाहिनीं?
समर्चनीयवन्दना ह्यभीष्टदा नते जने॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

अनन्तरत्नसन्निभ प्रकाशितारहारको
घनात्यये सुनीलिमाम्बरस्वविग्रहः किमु ?
प्रकाश्य चन्द्रभास्करौ समुज्ज्वले विलोचने
समीक्षते जगत्प्रसूं चिरात्परं समागताम् ॥

(१०)

परे: दिनेऽधुनोचितं स्वकर्म्म कार्य्यमित्यतो
कृतं नहि त्विदं ततस्त्रितापदुःखमेव नः ।
अतीत्य वत्सरं शिवा समेति वाच्यमत्र किं
विचिन्त्य याजकोऽधुना शिवार्च्चने यतेत किम् ? ॥

(११)

हृदन्धतामसाद् घनाद् विमुक्तिमित्य दीप्तिमान्
शिवार्च्चनाय पङ्कजं विकासयन् करैः शुभैः ।
प्रभाकरः करं किरत्यहो महैककारणं
नहि क्वचिद् शुभाशयः शुभाशयेऽवसीदति ? ॥

(१२)

'निशाकरोऽधुना करैः प्रकाश्य कैरवं स्थितः
त्रितापतापनाशिनीपदं समर्च्चितुं मुदा ।'
इतीर्ष्यया करं ददौ प्रहस्य तारकाऽधिकं
स्वशक्तितोऽखिलोऽर्च्चितुं शिवापदं यतेत हि ॥

(१३)

त्रितापवह्निवर्च्चसा विदह्यमानमानसं
स्वशोकरोगतापितं सुषुप्तिलुप्तचेतनम् ।
प्रबोधय प्रबोधय त्रितापतारिणि ! प्रभो !
समेहि भारतं शिवे ! तवैव भारतिस्थलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१४)

हृयश्च नो मनोव्यथा निपीड़यत्यहर्निशं
वयं हि शक्तिपुत्रकास्तथापि हीनशक्तिकाः ।
अनन्तशक्तिके ! हिते विधेहि शक्तिमत्र नः
स्ववृत्तिवृत्तिभिः स्वतो निजस्व-हीनचेतसाम् ॥

(१५)

चराचरस्थिता त्मिकाः किमाह्वयामि वो विभूः
यदि स्वतोऽनुकम्पया समेत्य वो निजालयम् ।
निरस्य तामसावृतिं प्रदीयते जनेप्सितं
तदैव सार्थको भवेत् कृतक्रियः किलात्मजः ॥

(१६)

रोगशोकपापतापतप्यमानदेहकं
शक्तिभक्तिरक्तिहीनदीनभीतचित्तकम् ।
रक्ष रक्ष दक्षपुत्रि ! भुक्तिमुक्तिदायिके !
मातरेहि शर्म्म देहि शान्तिवारिधारिके ! ॥

मतिमञ्जरी

संस्कृतपत्रिकाः—विगतकर्कटमासस्यैकत्रिंशद्दिवसीय-'मञ्जुभाषिणी'-पत्रिकायां संस्कृतभाषामयपत्राणां दशाविचार-मधिकृत्य सम्पादकीयलेखोपक्रमे इत्थमालोचितमवलोक्यते—

कतिपयवर्षेभ्यः पूर्वं बह्व्यः संस्कृतभाषापत्रिका भारतेऽस्मिन् प्रकाश्य-माना अभूवन् । क्रमेण ताः सर्व्वा अन्तर्हिता अभूवन् । इदानीं त्वङ्गुलि-परिमिता अपि ता न सन्तीति महदिदं दुःखस्य स्थानं संस्कृतभाषाभिमानि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम्। पत्रिकाभिवृद्धेर्मूलं ग्राहकाणामाधिक्यम्। दशविंशतिवर्षापेक्षयाऽद्य संस्कृतभाषायाः प्रचारोऽधिक इत्येव बहुविदो मन्यन्ते। तत्र तत्र च संस्कृतविद्यालयानां नवनवानां स्थापनं क्रियमाणं शृणुमः पठामश्च पत्रिकासु। पूर्वमेकत्र द्वयोर्वा प्रान्तयोर्विश्वविद्यालयेन संस्कृतभाषोपाधिपरीक्षा क्रियमाणाऽभूत्। इदानीं त्वेकं द्वौ वा प्रान्तौ मुक्त्वा सर्वत्र सा विश्वविद्यालयैः प्रवर्त्त्यते। एवञ्च सति संस्कृतभाषायाः प्रचारोऽधिकोऽद्येत्यनुमानस्य हेतवः सुदृढ़ा इत्यत्र कः सन्देहः। अथापि संस्कृतभाषापत्रिकाणां ह्रासोऽद्य जातः किमवगमयति ?

१। संस्कृतभाषाप्रचारस्य वाह्याड़म्बरमात्रमेतन्न वस्तुतः प्रचाराधिक्यं भवतीति वा,

२। अधिगतसंस्कृतभाषाज्ञाना अप्युदरपोषणमात्रविश्रान्ता जना इति वा,

३। अल्पमूल्यपत्रिकाक्रयणस्यापि शक्तिः संस्कृतज्ञानां नास्तीति वा,

४। समीचीनया प्रक्रियया सहृदयहृदयावर्जनपटीयस्यो न प्रचाल्यन्ते पत्रिका इति वा,

अस्माभिर्निर्णयः कर्त्तव्यो भवति।

दैनिकपत्रिकायाः संस्कृतभाषामय्याः कैव प्रसक्तिः। साप्ताहिकी पत्रिका इयमेकैव मञ्जुभाषिणी। जनार्दननाम्नी कापि संस्कृतसाप्ताहिकपत्रिका नवीनतयाऽवतारिता काश्यामिति कतिपयदिवसेभ्यः पूर्वमस्माभिः श्रुतम्, नास्माभिस्तस्या दर्शनं प्राप्तम्, न वा कोऽपि वृत्तान्तस्तत्सम्बन्धी श्रूयते। मित्रं नाम किमपि पाक्षिकं पत्रं मुजफ्फरपुरादवतरति वह्निः। गीर्वाणपत्रन्तु मासिकं नागपुरादवतारितं मृत्युमुखं प्रविष्टमिति मन्यामहे। कलिकातायां प्रकाश्यमाना "संस्कृतसाहित्यपरिषत् पत्रिका" एका मासिकी समये प्रकाश्यमाना मोदयत्यस्मान्। सहृदया बहोः कालात् प्रागेव प्रतिरुद्धावतरणा सम्पादकमहाभागनिर्याणात् परं कस्यां दशायां वर्त्तत इति न वयं प्रभवामो ज्ञातुम्। संस्कृतकामधेनुरपि न दृश्यत इदानीम्। संस्कृतरत्नाकरश्च बहुनाविर्भावतिरोभावाननुभूय पाटलीपुत्रे नवीनतयाऽवतारितापि न समये दर्शनं ददाति। कलिकातायां संस्कृतमहामण्डलेनोपक्रान्तं मासिकं पत्रमद्य न प्रकाश्यत इति मन्यामहे। संस्कृत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती त्रैमासिकी परं प्रकाश्यते बहुजनसाहाय्येन। एतावन्त्येव नामानि संस्कृतभाषापत्रिकाणामस्माभिर्ग्रहीतुं शक्यन्ते *। एतासां दशाश्च वर्णिता एवास्माभिः। यदुक्तमस्माभिरस्य लेखस्योपक्रमे अङ्गुलिपरिमिता अपि ता न सन्तीति, तदेतस्य लेखस्य वाचकानां हृदयङ्गमं भविष्यतीति मन्यामहे। मातृभाषेयं भारतवासिनां सर्वाङ्गसुन्दरी सर्वगुणसम्पन्ना चेत्यत्र कस्य वा विप्रतिपत्तिर्भविष्यति। नानाविधेषु निरर्थकेषु कार्य्येषु धनं धनिका उपयुञ्जाना दृश्यन्ते। कस्याश्चित् संस्कृतभाषामय्याः पत्रिकायाः प्रचाराय न कोऽप्युद्युङ्क्ते राजा महाराजोऽन्योऽपि वा धनिन इति दुःख्यामो वयम् इति।

वयमत्र ब्रूमहे—धनिकानां हस्तावलम्बोऽपि यदि कदाचित् सुलभः सम्पद्येत, तथापि मञ्जुभाषिणीसम्पादकैः प्रागुपन्यस्त—१।-२।-३।-४।-सङ्केतचिह्नितकारणजातान्येव संस्कृतपत्राणां चिरस्थितिं प्रत्यक्षं प्रतिबध्नन्ति। संस्कृतपत्रिकाः प्रायेण "समीचीनया प्रक्रियया सहृदयहृदयावर्जनपटीयस्यो" नैव सम्पाद्यन्ते, तत्र च पुनर्विशेषविदुषां सुखासिकैव नः परम्परया निदानभूतेति प्रतीयते। निबन्धनिर्माणादिषु विना स्वेच्छोपहृतयोग्यपुरुषसाहायकं संस्कृतपत्रिकासमृद्धिरशक्यसम्भावनेत्ययमस्माकं दृढ़ः प्रत्ययः।

मीमांसामहाविद्यालयः—पुण्यपत्तने तत्रत्यमहापाठशालाश्रितः कश्चन मीमांसामहाविद्यालयः सम्प्रति प्रतिष्ठापितो मुम्बयीविश्वविद्यालयाधिकृतैः शुभकामिभिः शिक्षापारिषदैः। तत्र

---

* वर्षाप्रदेशादवतारितं 'बहुश्रुत'पत्रं प्रायेण वर्षचतुष्टयादूर्द्ध्वं स्वरूपं प्रदर्शयदेव तिरोधानमध्यकार्षीत्। नातिचिरञ्च बहुतरकृत्य-घोषणामङ्के निधाय श्रीकाश्या निरगमत् 'सुप्रभातम्'। तत्र बहुश्रुतपत्रं मञ्जुभाषिणीसम्पादकवर्णितं दशाविपर्यासमेवापन्नमित्यवितथम्। सुप्रभातन्तु प्रथमतः प्रभृत्येव यथानियमप्रचारादिविरहेण सविशेषमस्माकमानन्दमनादधानं जीवनाशामावमद्यापि समुज्जीवयते। बहुकालतो निवृत्तप्रकाशाः 'आर्य्यप्रभा' 'शारदा' 'मित्रगोष्ठी' 'विद्योदय' 'संस्कृतचन्द्रिका' 'विज्ञानचिन्तामणि' प्रभृतयस्तु स्मृतिपथमारूढ़ाः केवलमद्य नश्चित्ते दुःखमुत्पादयन्तीति किं वा कथयामः।

सं—सा—प—सम्पादकाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि काचन अग्निहोत्रशालाऽपि सन्निधापिता वर्त्तते। सत्स्वप्यद्यापि भारते वर्षे कतिपयेषु प्राचीनशास्त्रशिक्षामन्दिरेषु नूतनमेवेदं मीमांसाशास्त्रसमुन्नतये स्वतन्त्रतया समुपयुक्तसामग्रीसञ्चितस्य तथाविधमहाप्रतिष्ठानसम्बन्धिविद्यालयस्य प्रतिष्ठापनम्। मीमांसाशास्त्रतत्त्वविवेकमन्तरेण सुतरामशक्यमेव वेदार्थसमवबोधपुरःसरं पुण्यकर्म्मनिष्पादनेन लौकिकमलौकिकञ्च सुखजातमनुकूलयितुम्। अद्यापि भारते नैकान्ततया विलुप्ता धर्म्मबुद्धयः, परं सत्यामपि धर्म्मबुद्धौ सरणिविज्ञानसौकर्य्यविरहेणापि नैके सत्कर्म्म समाचरन्तः शुभभागिनो भवितुमर्हन्ति। तदाशास्महे यदेतेन मीमांसामहाविद्यालयेन परमोपकृतं भारतवर्षमिदं पुनरपि धर्म्म्येषु कर्म्मसु वैलक्षण्यमात्मनस्तिरोहितप्रायं समुपलभ्य प्राक्तनप्रशस्तसमृद्धिमधिगच्छेत्, एतस्माल्लब्धोपदेशा भारतीयाश्च स्वाभिलषितक्षेमाख्यचिरं समासादयितुं शक्नुयुरिति। किं बहुना; शुभोऽयमारम्भः परमेश्वरेण समृद्धश्च वीतविघ्नश्च फलानुगृहीतश्च क्रियतामिति।

वाणिज्यविद्यासमुन्नतये दानम्—विदाङ्कुर्वन्तु श्रीमन्तः पाठकमहाभागाः, यथा सुगृहीतनामधेया बहुविधसदर्थनिष्पादनप्रवणा भारतीयविद्या-ब्राह्मण-साहित्यादिपक्षपातिनः परमोदारचरिता लालगोलाधिपतयः श्रीमन्महाराज-योगीन्द्रनारायणराय-बाहादुरमहोदया वहरमपुर-महाकलाशालायां वाणिज्यशिक्षाविभागसमुन्नतिविधानाय चतुःसाहस्रिकमुद्राः समुत्सृष्टवन्त इति। ते हि महात्मानो विश्रुतगुणप्रकर्षा भारतभूमौ सुधाधवलयशोभासितदिङ्मण्डलाः प्रथमं पदमधिगतवन्तो माण्डलिकानामिति नायं बहुवादः। एते खलु महाभागाः क्षुधार्त्तानन्नदानेन परिपोषयन्ति, पूर्त्तविधिना पिपासार्त्तानामार्त्तिं द्रवयन्ति, सत्कृत्यसम्पादने सप्रयत्नानामनेकविधानुपकारान् अनुतिष्ठन्ति, किञ्च त एव महात्मान ऐतरेयब्राह्मणादिप्राचीनग्रन्थानामनुवादप्रचारमनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूलयन्तः शास्त्रचर्चामाचरन्ति, वङ्गीयसाहित्यपरिषदादिप्रतिष्ठान-साहायकेन साहित्यविद्यामभिवर्द्धयन्ति ; किं बहुना, यद् यदेव भारतं वर्षमुत्तमं पदं गमयितुमीष्टे, तत्र तत्र सर्वत्रैव प्रायेण दृष्टः श्रीमतां सानुरागो मानसनिर्बन्धः। तदद्यत्वे यदमी सर्वत्र विदित-प्रकर्षपर्य्यायाः श्रीमन्तो महाराजाः वाणिज्यशिक्षासमुन्नतये प्रभूतं धनमुपहारीकुर्वन्ति वङ्गीयवहरमपुर-कलाशालायां तन्नातिचित्रमिव प्रतिभाति। पुरा प्रवृत्तेऽप्येतत्प्रदेशेषु वाणिज्यनिबन्धनप्रकर्षे साम्प्रतं देशान्तरीणजनतुलनया सुतरामपकर्षमुपागमद् भारत-वर्षीयं वाणिज्यमिति सुमहद् दुःखं भारतीयानाम् ; तदेतादृशां महतां तथा वाणिज्यादिसौभाग्यसम्पादनप्रयत्नः परमस्माकमाशास्थानमुद-पादि। केवलमिदानीं व्यवस्थाकारिणां नैपुण्यमेव तदुत्कर्षनिष्पादने प्रमाणमिति भावयन्तो वयमुत्कर्षविशेषदर्शनकाम्यया सोत्कण्ठा वर्त्तामहे इति।

कलिकाता-विश्वविद्यालये उपाध्यक्षनियोगः—

विदितपूर्व्वमेवेदं श्रीमतां पाठकमहोदयानां यथा विपुलप्रभा-वाणां तत्रभवतामाशुतोषमुखोपाध्यायमहाभागानाम् आकालिक-परलोकप्रस्थानेन कलिकाताविश्वविद्यालयः सुतरां दैन्यमापन्नो वर्त्तते। अपरञ्च तस्यैव विश्वविद्यापीठस्य उपाध्यक्षपदे कियन्तं कालं यावदवहिताः श्रीमन्तो भूपेन्द्रनाथवसुमहोदयाः सम्प्रति जरामयादिदुर्बला जीवन्तोऽपि तदेव दुःखमस्य वर्द्धयन्तस्तदुपाध्यक्ष-पदादवसरं गृहीतवन्त इति। तत्र च सम्प्रति कलिकाताप्रधान-न्यायालयाधिकरणिकाः श्रीमन्तः ग्रीव्स् महोदयाः समुन्नीता वर्त्तन्ते। ते खलु महान्तो न्यायालये यथा प्रकर्षमर्जितवन्तस्तथैव विश्वविद्या-लयसमुन्नतिमपि यथाशक्ति साधयिष्यन्तीति सम्भाव्यमेव सर्वैः। परमिदमत्र सानुशयं प्रकाश्यमेव यद् बहुतिथं कालं यस्य महा-विद्यालयस्याधिपत्यं भारतीयानां प्रकर्षाधायकं समपद्यत, तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रति कोऽपि भारतीयस्तथा योग्यो नावधारितः, येन भारतस्यास्य गौरवं शिक्षासमुन्नतिश्चेति द्वयमेवातिरोहितं सम्पादयितुमशक्य-तेति।

यमुनानदीसंस्कारः- कालिन्दीकलकल्लोलकोलाहलकुतूहलिनो वृन्दावनबान्धवस्य नियतलीलाक्षेत्रे श्रीवृन्दावने कृतसञ्चाराणां विदितमेवेदं सुकृतिनां यथा नेदानीं यमुना वृन्दावन-पादमूलं प्रक्षालयन्ती प्रवर्त्तते, तेन च सममेव विलोपं प्राप्ते शोभासमृद्धिश्च स्वास्थ्यञ्च श्रीवृन्दावनस्येति। मथुरापुर्य्यामद्यापि यमुनायाः सन्निकर्षेण तदुभयमबाधितं संलक्ष्यते। तत्रत्यानां न तथा जलाभावजनिता दुर्गतिर्यथाऽत्र तीर्थधर्म्मकामनया प्रवासमङ्गीकुर्वताञ्च सामयिकसञ्चारमनुभवताञ्चेति किं वा बहु वक्तव्यम्। श्रीभगवतो वासुदेवस्य लीलाप्रसङ्गेन साकं यमुनाया निरन्तरः सम्बन्ध इति पुराणादिविदां सुविदितम्। सेयं तत्सन्निहितैव भक्तानां दृढां भक्तिमनुकूलयते, विप्रकृष्टा तु वृन्दावनबान्धवस्य स्मृतिसम्पादनं प्रति सम्यक्तया नानुगुणा वृन्दावनस्य स्वच्छन्द-सञ्चारञ्च भगवत्स्मृतिसमुपयोगिताञ्च नियमाभिषवप्रभवपुण्यसमु-पार्जनञ्च प्रतिरुन्धाना न भक्तादिकानाम् अभीष्टफलमादित्सितं प्रसोतुमर्हतीति।

सर्व्वमिदं विशदं पर्य्यालोच्य काशिमवाजाराधिपति-श्रीमन्महा-राज-मणीन्द्रचन्द्रनन्दि-वाहादुरप्रमुखा नैके महाभागा अन्येद्युः कलिकाता यूनिवार्सिटि-इन्ष्टिटिउट् इत्याख्यसभामन्दिरे काञ्चित् परिषदमधिवेशितवन्तः। तत्र च यमुनाया यथापूर्वं वृन्दावनचरण-सञ्चारं प्रत्यापादयितुं यथापेक्षितसंस्कारादिसम्पादनाय काचित् समितिः प्रतिष्ठापिता। सनातनधर्म्ममनुवर्त्तमानानां तदुन्नतिकृते प्राणैः पणैः प्रयत्नमाचरतां महाराजमणीन्द्रचन्द्रप्रभृतीनां सुचिर-मेव दृष्टस्तथाविधार्थेषु भूयान् प्रयत्नः; तदाशास्महे—भगवान् यमुना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहारी स्वसम्बन्धिवस्तुसंस्कारप्रयत्नमिममेतेषां निर्विघ्नमेव सफलीकुर्य्यादिति।

प्राच्यदेशीयव्याधितत्त्वविज्ञानम्—प्राच्यदेशीयव्याधिसमूहानां तत्त्वानुसन्धानाय लण्डननगरे 'रस्-इन्ष्टिटिउट्'-संज्ञकं किञ्चिद् गवेषणागारं प्रतिष्ठापितमास्ते। तत्र सम्प्रति भारतीयप्रधानतमसम्राट्प्रतिनिधयः सहस्रमेकं तथा नेपाल-महाराजाः सार्द्धैकसहस्रं रूप्यकाणां वितीर्णवन्त इति समाचारपत्रिकातो विज्ञायते। 'शरीरमाद्यं खलु धर्म्मसाधन'मित्यादिभिर्धर्म्मं प्रति शरीरस्य, शरीररक्षां प्रति च व्याधिप्रतीकारस्य, व्याध्युपशमं प्रति च व्याधितत्त्वविज्ञानस्य निदानतया तेषां प्रदातृवराणां प्राच्यदेशीयधर्म्मोपकारकत्वेन प्रशस्तिः सुतरामुन्नीयते। भगवान् भूतभावनस्तेषां मङ्गलं विदधीतेति शम्।

वङ्गीय-साहित्यपरिषत्सभापतिः—ऐषमः श्रीयुक्त-हीरेन्द्रनाथदत्तवेदान्तरत्नमहोदयो वङ्गीयसाहित्यपरिषदः अध्यक्षपदं ग्राहितो वर्त्तते। सुयोग्य एव जनस्तत्र पदे सन्निवेशितः सुनिपुणबुद्धिभिः परिषत्परिचालकमहाभागैः। यतः श्रीमन्तो वेदान्तरत्नमहाभागाः संस्कृतशास्त्रे सम्यक् लब्धप्रवेशाश्च वङ्गभाषायामतिप्रवीणाश्च धीरजनोचितबुद्धिसम्पन्नाश्च नानाविधदर्शनार्थसुनिष्णातमतयश्च। वङ्गभाषायाः सम्यक्तया समुत्कर्षे साधयितव्ये भारतवर्षोचितगौरवसंरक्षणे च कर्त्तव्ये तथाविधानां महात्मनामाधिपत्यमेव तत्र सुतरामुपयुज्येत। विशेषतश्च परिषदध्यक्षचराणां तत्रभवतां महनीयप्रभावाणां महामहोपाध्याय-श्रीयुक्त हरप्रसादशास्त्रिपादानां पदसमलङ्करणाय तादृशानामेव महतामुपयोग इति सानन्दहृदया वयं विज्ञापयामः।

निखिलप्रदेशयीदार्शनिकसम्मेलनम्—व्यतीते वर्त्तमानवर्षीयवैशाखमासे इटालिप्रदेशे निखिलप्रदेशीय-दार्शनिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषदः पञ्चममधिवेशनं सुनिष्पन्नमभूत् । तदिदमधिवेशनं प्रतिवर्षपञ्चकादनन्तरम् एकशः सम्पद्यते । तत्र विभिन्नप्रदेशीया दार्शनिकाः सम्भूय परस्परं दार्शनिकभावविनिमयेन जगतो महोपकारमनुकूलयन्ति । पूर्वमितस्तत्र भारतीयदार्शनिकानामावाहनमस्माभिर्नोपलब्धं, परमस्मिन् संवत्सरे एव प्रथममावाहनं तत्र भारतीयदार्शनिकानाम् । तेन च कलिकाताविश्वविद्यालयपक्षमाश्रित्य श्रीयुक्तसुरेन्द्रनाथदासगुप्त-(एम्, ए, पि एइच्, डि)महाभागा इटालि-परिषदमुपेत्य भारतीयदर्शनतत्त्वप्रचारेण पाश्चात्त्य दार्शनिकानां महान्तं विस्मयमुत्पाद्य भारतीयदार्शनिकगौरवमतिमात्रं वर्द्धितवन्त इति परं नः प्रमोदस्थानम् । ते हि दर्शनसुनिष्णातमतयो वाक्प्रपञ्चलब्धवर्णाः स्वीये निबन्धे प्रतिपादितवन्तो यथा भारतवर्षे बहुयुगकालादूर्द्धं यानि दर्शनतत्त्वानि प्राचीनदार्शनिकैः समुद्भावितानि तान्येव साम्प्रतं परःसहस्रवत्सरानन्तरं पाश्चात्त्यैः परिस्पृश्यन्ते । एते हि साम्प्रतिकानामिटालिप्रदेशीयसर्वोत्तमदार्शनिकानां 'क्रुस्' इत्याख्य-महाविदुषां मतं वौद्धदर्शनमततुलनया पर्य्यालोच्य तयोरुभयोरेव प्रायेण साम्यमुपपादितवन्तः । परं यत्रैव तयोरुभयोः पार्थक्यमास्ते तत्र सर्वत्रैव वौद्धदर्शनमतं समीचीनतरमित्यपि प्रदर्शितवन्तः । इदमत्र विशेषेणावधेयं यत्तत्र तथाविधनिबन्धपाठपरिषदि त एव दार्शनिकशिरोहीराः क्रुस्-महाभागाः सभापतिपदमध्यासीना आसन् । ते च दासगुप्तमहाभागस्य निबन्धपाठादूर्द्धं कामपि प्रतिवादवाचं न व्यसर्जयन् परं महान्तं सन्तोषमेव प्राकाशयन् सभ्यसमाजे । विस्मितास्तत्रत्याः पाश्चात्त्यदार्शनिका भारतीयदार्शनिकमहाप्रभावेण, प्रतिष्ठितश्चाभूत् सुनिर्मलं यशोजातं वैदेशिकसमाजे भारतस्य । दासगुप्तमहाभागाः खल्वेते पूर्ववङ्गीयवरिशालप्रदेशान्तर्गत-गैलाख्यग्रामस्य सुप्रसिद्धे संस्कृतभाषाप्रवीणवैद्यवंशे जन्म परिगृहीतवन्तः संस्कृतशास्त्रप्रवीण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तायामस्माकं न कश्चन विस्मयमुत्पादयन्ति। पाश्चात्त्यविद्यायामपि सुनिष्णातास्ते विदेशीयदर्शनविषयप्रकर्ष-प्रकाशनेन 'पि-एइच्, डि,' पदभाजः सम्यक्तया प्राच्यपाश्चात्त्यदर्शनतुलनायामुपपन्नाधिकाराश्च। तत् वयमद्य भारतीयार्षदर्शनतत्त्वानामीदृशप्रकर्षप्रकाशनेन सन्नतं-ज्ञताकं ससम्मानं सोल्लासञ्च सुदीर्घं जीवनमेषां कामयमानाः क्रमेण इतोऽपि अधिकतरं गौरवञ्च भारतगौरवसम्पादनप्रयासञ्च प्राचीन-दार्शनिकतत्त्वाद्यभिनिवेशञ्च सुतरामाशास्महे इति।

संस्कृतसाहित्ये विज्ञानवैचित्र्यम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—कविरत्नमखिलानन्दशर्म्मा।

पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम्।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम्॥

याजुषे मन्त्रेऽस्मिन्नहमितिपदं प्रत्यक्षदृश्यतया कस्यचिन्महाभागस्य लोकत्रयगामितामावेदयति। स्वर्गलोकावस्थितिश्च भारतभूभागात् सहस्राश्वीनमितमार्गमिता। यतो हि "सहस्राश्वीने वा इतः स्वर्गो-लोक" इति (ऐ० ब्रा० ७।७) वैदिका आमनन्ति। प्रत्यहं तद्गमनागमनव्यापारवत्त्वात्। ये येन पथा गच्छन्ति त एव तन्मान-मपि विदन्ति। कथमन्यथा स्वर्गमार्गः केवलं सहस्राश्वीन एवेति कश्चिद्वदेत्।

सुत्रामाणं पृथिवीं द्यामनेहसं
सुशर्माणमदितिं सुप्रणीतिम्।
दैवीं नावं स्वरित्रामनागस-
मस्रवन्तीमा रुहेमा स्वस्तये॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रोऽयं ऋग्वेदे यजुर्वेदे च समानाक्षरपाद एव। स चायं बृहज्जलपोतवर्णनपरः। तादृशजलपोतोद्य यूरोपीयैः समुद्रे व्यवह्रियते। देवीं नावमित्यनेन देवसम्बन्धिनी दिव्यगुणवती द्युलोकगामिनी वेति नौरियं सूच्यते।

सुनावमारुहेयमस्रवन्तीमनागसम्।
शतारित्रां स्वस्तये॥ २१।७

पुनरुक्तभूतोऽयं याजुषो मन्त्रः पूर्वमन्त्रोपदर्शितां देवीं नावं शतारित्रामपि स्वयमेवादिशति। 'अरित्रं के निपातक' इत्यभिधानादरित्रशब्दोत्र "केन्दुवाल"वचनः। शतकेन्दुवाला सेयं देवी नौका दिव्यगुणवद्भिर्विद्युदादिद्रव्यैः समुद्रोदरे पौरस्त्यैः प्राक् सञ्चालितासीदिति वेदविदामाम्नायः।

तस्यामस्यां सुत्रामाणमितिपदेन रक्षासाधनसम्पत्तिर्निर्दिश्यते। पृथिवीमित्यनेन विस्तृताकारवत्त्वम्। द्यामित्यनेन प्रासादवत्त्वं द्युलोकव्यवहरणक्षमत्वं वा। अनेहसमित्यनेन तद्गतानां क्रोधराहित्यम्। सुशर्माणमित्यनेन कल्याणकारकसामग्रीसमारोहः। अदितिमित्यनेनाखण्डितत्वम्। सुप्रणीतिमित्यनेन सुन्दरता। अनागसमित्यनेन हिंसादिदोषराहित्यम्। अस्रवन्तीमित्यनेन च्छिद्रराहित्यम्।

दुस्तरवारिराशितरणाय प्रणीतः पोतोप्ययं वेदप्रतिदातित्वान्न पाश्चात्त्यैः कल्पित इति पौरस्त्यानामेव महिम्नः स्तोत्रम्। अद्यत्वे पोतवणिजां कृते ये पोताः समुद्रे सञ्चाल्यन्ते न ते कथञ्चिदप्यनागसो न चानेहसः। तेषु हिंसादिदोषसांगत्यात्। अत एव तद्गामिनामिदानीं प्रायश्चित्तार्हत्वम्। न प्रागासीदित्यर्थादापतितोऽर्थः।

अतःपरं पौरस्त्यानामन्यदपि कलावैचित्र्यं प्रदर्शयितुमक्षरमुष्टिका यन्त्रमातृका चेति प्रयोगद्वितयमुदाह्रियते। तत्राक्षराणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुष्टिरिव मुष्टिका गुप्तिरिति यावत्। इयमेवाद्यत्वे "शार्टहेन्ड" पदेन व्यवह्रियते। सेयं द्विधा। साभासा निराभासा च। तत्र साभासा अक्षरमुद्रेत्युच्यते। तथाकथनं गूढ़वस्तुमन्त्रणार्थं ग्रन्थसंक्षेपार्थं च। तदुदाहरणं यथा—

मेवृमिकसिंकतुवृधमकुंमी
मूधसवांसुशकनिधक आव्याः।
फाचै वैज्यै आश्राभाश्राकामापौमाश्वैव ॥१॥

रविगुप्तप्रणीते चन्द्रप्रभाविजयकाव्ये पद्यमेतत्। अत्राद्यपादे मेषाद्या राशयः। तृतीये फाल्गुनादयोमासाः। द्वितीये राशीनां लग्नादारभ्य मूर्त्ति-धन-सहज-बान्धव-सुत-शत्रु-कलत्र-निधन-धर्म्म-कर्माऽऽय-व्ययाः फलरूपेण कथिताः। इयमक्षरमुद्रा साभासा। निराभासा तु "भूतमुद्रेति" नामान्तरेण व्यवह्रियते। तत्प्रकारो यथा।

मुष्टिः किसलयं चेव छटा च त्रिपताकिका।
पताकांकुशमुद्राश्च मुद्रावर्गेषु सप्तसु ॥ १ ॥
अङ्गुल्यश्चाक्षराण्येषां स्वराश्चांङ्गुलिपर्वसु।
संयोगादक्षरं युक्तं भूतमुद्रा प्रकीर्त्तिता ॥ २ (

सेयं गुह्यवस्तुमन्त्रणार्था। यथा—"एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपक्षाभ्याम्। एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः" कण्ठाभरणकारेणोदाहृतं पद्यमेतत्। गूढ़लेख्यमपि तथाविधमेव।

यन्त्रमातृका नाम सजीवानां निर्जीवानां वा यन्त्राणां यानोदकसंग्रामार्थं घटनाशास्त्रं विश्वकर्मप्रोक्तम्। विश्वकर्मा चायं वैश्ययोनिजः। यद्वर्णनं विष्णुरहस्ये ३५ अध्याये ३० पद्ये समुपलभ्यते।

तत्र सजीवयन्त्रमातृकोदाहरणं यथा रघुवंशे —

ससत्वमादाय नदीमुखाम्भः
सम्मीलयन्तो विवृताननत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection; Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमी शिरोभिस्तिमय: सरन्ध्रै-
रूर्द्ध्वं वितन्वन्ति जलप्रवाहान्॥ १३।१०

इति। पद्येऽस्मिन्नैसर्गिकं जलयन्त्रमुपलभ्यते। तिमिर्नाम मत्स्यविशेष: शतयोजनायाम:। "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृत" इति प्रमाणोपलम्भात्। स चायं स्वभावत एव सच्छिद्रशिरस्क:।

यदाऽयं यादसांपतौ यादो ग्रहणाय विवृताननः सन्नन्तर्जलं ससत्वं नदीमुखाम्भः स्वानने बिभर्ति तदा यादोजलयोर्विश्लेषणाय मुखमारुतप्रेरितजलराशिमुच्चैरवस्थितनैसर्गिकशिरोविवरेण निःसारयतीति वैचित्र्यम्।

उत्पिल्लवोन्तर्नदभर्त्तुरुच्चै-
र्गरीयसा निःश्वसितानिलेन।
पयांसि भक्त्या गरुड़ध्वजस्य
ध्वजानिवोच्चिच्चिपिरे फणीन्द्राः॥

पद्यमेतदपि शिशुपालबधसम्बद्धं सजीवजलयन्त्रमातृकावर्णनपरम्। रचनाकल्पनयोरुभयत्रापि वैचित्र्यम्। कतरदनयोः प्रशस्तिमुपगूहतीति भवन्तः प्रमाणम्।

निशाः शशाङ्कक्षतनीरराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।
मणिप्रकाराः सरसञ्च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम्॥

कृतिरियं कविकुलगुरोः कालिदासस्य निर्जीवयन्त्रमातृकावर्णनपरा। धारागृहमिति यन्त्रमातृकाया एव नामान्तरम्। यल्लोके "फुवारा" पदेन निर्दिश्यते। अनयोर्निर्जीवं सजीवमुपजीवतीति प्रत्यक्षमेव विदुषाम्।

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघ। इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघे मेघीयं श्रीमतः सकलकलाकलापकोविदवरस्य तत्रभवतः कालिदासस्य विज्ञानम्।

तत्र धूमाग्निमारुतजलैः सम्पद्यते मेघ इति कालिदासमतम्। यज्ञाद्भवति पर्जन्य इति भगवद्गीतायां स्वमुखेनोद्गीर्णं भगवन्मतम्। पुष्करावर्तकादयो मेघमतल्लाः सर्वथा मेघकुलोत्पन्ना इति पुराणविदः। रासायनिकक्रियासमायोगात्पर्जन्योद्भव इति पाश्चात्त्याः।

अत्रेदं विचार्य्यते। यदिदमद्यत्वे यत्र तत्र जोघुष्यते पाश्चात्त्यं नाम मतं तन्न विचारसहम्। रासायनिकद्रव्याणां पञ्चमहाभूतेभ्यः पृथगवस्थानाभावात्। तादृग्विधपर्जन्यस्य च लोकोपकारकत्वाभावात्। न दृश्यते किमपि चैत्रं रासायनिकैर्मेघैः संसिच्यमानं न च कश्चिदारामः।

कल्पनापथमतिक्रम्य लोकोत्तरमनीषैर्मुनिभिरप्यननुभूतं पुराणविदां मतम्। न तत्र किञ्चिद्विवदामः। कथमिति चेत्। तादृशसामर्थ्याभावात्। उपजीवका वयमुपजीव्यकल्पनानां मान्यानां मतमधिक्षेप्तुं कदापि न प्रभवामः। (अवशिष्यते)

तारां प्रति सोमस्य

(लेखकः—श्रीउपेन्द्रमोहनसांख्यतीर्थः)

(१)

आचार्य्यपत्नि ! किमियं लिपिरद्य लब्धा
त्वत्तो मया विकृतभावविशेषजुष्टा।
विश्वस्तता ननु मया न यया निजाद्गो-
राधीयते, स्वपिमि वा प्रतिबोधितोऽपि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२)

न ज्ञायते कियदभद्रमुहूर्त्तलाभि
गेहं व्यगाच्छत मया पठितुं गुरूणाम् ।
त्वञ्चोपचीर्णचरणा जननीव साक्षात्
मच्चक्षुषोरतिथितामथवाऽध्यतिष्ठः ॥

(३)

वाचा विविक्तमुपनच्छति यत्त्वपाये
चित्तेन चिन्तितमघप्रचयं चिनोति ।
त्यक्त्वा कुलं क्षणमुदे प्रमदा नु का वा
पापावसायकमिदं विदधातु कृत्यम् ॥

(४)

आचारदेशसमयानवधूय धीरं
कामः समापयति पापमपापविज्ञम् ।
सत्कर्मशीलव्ययशः परिपन्थिनं तं
सन्तः प्रयस्य बहुधा परिवर्ज्जयेयुः ॥

(५)

वार्द्धक्यतस्तव गुरोः प्रतिपत्तिरेषा
मत्वेति नात्मकलुषं दलितुं यतेथाः ।
दृष्टा मया कति तथा रमणीषु पापा
याः स्वामिनं युवकमप्यवधीरयन्ते ॥

(६)

आलोक्यतामपरतः कति पूतभावा
रामाः पतीन् परिचरन्ति जड़ान् सुवृद्धान् ।
वृद्धस्य यौवनमशक्यविधानमस्मात्
साम्याय यौवनमपह्नुवते समेताः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७)

स्नेहः स चेद्भवति मय्यथ शिष्यबुद्ध्या
शिष्याधमस्तव तदा कृतकृत्य आस्ते ।
एवं हि शास्त्रमखिलं गुरुतोऽधिगम्य
ज्ञानेन मोहतिमिरं विनिवर्त्तयिष्ये ॥

(८)

तन्मे कृताञ्जलिरसावसि शापिता च,
नादेश्यमेवमिह शिष्यजने भवत्या ।
चेतः समर्पयतु भर्त्तृपदेऽद्य देवी,
स्वाध्यायकर्म्मणि चिरं कृपणः शशाङ्कः ॥

(९)

कामापविद्धहृदया प्रतिबध्य मोहं
वाचस्त्वमुत्तमतया न पुरस्करोषि ।
तत्स्नेह एव भविता मरणाय नूनं
यस्मादितोऽपसरणं शरणं तदा मे ॥

(१०)

कोऽर्थस्ततः समुदियादिति चिन्तय त्वं,
साक्षादयं ननु चिरादधुना जनस्ते ।
पश्चात्तु दर्शनकथा स्मृतिगामिनी स्यात्,
लाभः कलङ्ककलना वलते जगत्याम् ॥

(११)

विश्वासवश्यगुरुतः प्रतिपद्य विद्यां
तद्दारदोषमुपपाद्य निरस्तलज्जः ।
नाहं कथञ्चिदपि कापुरुषोपजुष्टम्
विश्वासघातकपदं परमाश्रयिष्ये ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१२)

पूर्व्वं कृताञ्जलिपुटः सकृदन्वनेषम्,
भूयः प्रसाद्य भवतीं विनिवारयामि ।
नैवं वचो रचयितुं पुनरुत्सुका स्याः,
धैर्य्यं जहाति हृदयं तनुकारणेन ॥

(१३)

मैवं कृथा मनसि मन्मथधर्षिताया
धैर्य्यं तवैव विहतं, ननु तन्ममापि ।
किन्त्वायसोपरचिते हृदि रुद्धवेगः
त्वद्वन्न मे सुतनु सोऽतनुरिद्धभावः ॥

(१४)

धैर्य्यं विजित्य परिभूय च लोकलज्जां
मद्दुष्कृतं कथय कं प्रतिबोधयामि ।
केनानलेन हृदयं मम दह्यतेऽदः
को वाऽपरो भगवतस्तदिहावधत्ताम् ॥

(१५)

दुःखाकरोति हृदयं मम रोहिणी सा
स्वाङ्के कुरङ्गरमणी च विलोलनेत्रा ।
शैत्यं निजं नियतदुःसहतापहेतु-
स्तारापतित्वमपि मेऽद्य दुनोति चेतः ।

(१६)

आस्तामिदं प्रलपितं गुरुवासवृत्ते-
र्धन्यः स यः प्रभवति स्वमनःप्रवृत्तेः ।
देवि त्वमद्य मकरध्वजभूविकारं,
तूष्णीं नियम्य हृदयं विनिवर्त्तयेथाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभारतीयकथायां—

द्रौपदी-पञ्चस्वामिकता-रहस्यम् ।

लेखकः—श्रीतारानाथन्यायतर्कतीर्थः ।

कदाचिन्नैमिषारण्ये देवाः सर्व्वे कयापि कामनया कश्चिन्-महायज्ञं समारब्धवन्तः, तत्र सत्रे तत्रभवान् धर्म्मराजो वैवस्वतोऽपि दोक्षित इति तदानीमसौ मर्त्त्यवासिनां मृत्युसाधनरूपे स्वाधिकारे विरतप्रवृत्तिरासीत्, तथा च नचिरान्मर्त्त्यलोके विपुला लोकवृद्धिः सञ्जातेति नितान्तं चिन्तितान्तःकरणाः सोमरुद्रकुवेरवरुणादयो देवाः पुरन्दरं पुरस्कृत्य पितामहान्तिकं गत्वा मर्त्त्यव्यापारं निवेदितवन्तः ; स च सर्व्वं समाकर्ण्य "यज्ञसमाप्तेः परमेव स्वाधिकारे व्यवहरन्नचिराद् वैवस्वतो मर्त्त्यानां साम्प्रतिकममरभावं विलोपयिष्यतीति सर्वथा निःशङ्कमेव भवद्भिः स्थातव्यम्" इत्येवमाश्वासवाक्यैः तान् सान्त्वयित्वा विससर्ज्ज । इन्द्रादयस्ततो निर्गत्य कियदवशिष्टं यज्ञस्येत्यनुसन्धातुकामा यज्ञस्थानं नैमिषारण्यं प्रति प्रस्थिताः । गच्छतां पथि विश्रामार्थं सुरम्यं मन्दाकिनीतटं समाश्रितवतामकस्माद् गङ्गाजले प्लवमानं काञ्चनपद्ममेकं तेषामालोकनपथमधिचक्रे । तदपूर्व्वं पद्ममालोक्य ते परं विस्मिता बभूवुः, देवराजस्तु कौतूहलातिरेकात् तदीयतथ्यमनुसन्धातुकाम आभिमुख्येन चरन्नतिमात्रप्रवाहशालिनि सुरधुनीवारिणि कामिनी काचिदवगाह्य रोदिति, तस्या एवाश्रुविन्दवो गङ्गाजले निपतितास्तथाविधं स्वर्णपद्मभावं प्राप्नुवन्तीत्यद्भुतं व्यापारं प्रसमीक्ष्य साश्चर्य्यं सन्निकृष्टस्तामपृच्छत्— भद्रे ! का त्वं ? किमर्थं वाऽत्र विगलितवाष्पधारं रोदिषि ? तया पुनः—"कियद्दूरं चेन्मया समं समागच्छति तर्हि सर्व्वमेव सविशेषं ज्ञातुमलं भविष्यति भवान्" इत्यभिहितः सुरेशः सह तया गच्छन्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतिदूरे शैलराजशिखरे स्वर्णसिंहासनसमासीनं लावण्यातिशयशालिन्या कयाचित् तरुण्या अक्षक्रीड़ापरं कमपि सुन्दरतरं युवानमपश्यत्, स तु समागतेऽपि देवराजे क्रीड़ामत्तोऽभ्यागतसत्कारविमुखश्चेति क्रोधपरीतचित्तो मरुत्वान् तमब्रवीत्—भोः प्रमादिन् ! त्रिलोकीश्वरं मामुपस्थितं दृष्ट्वापि क्रीड़ासक्ततया सत्कारवैमुख्यमिदं नितरां गर्हितं ते प्रतिभाति । तदाऽसौ पुरुषः सुरेशं रोषारुणं विलोक्य मन्दस्मिताननो यावत्तत्र दृष्टिपातमकरोत् तावदेव देवराजः स्थाणुवत् स्तब्धभावमासाद्य तस्थौ, महापुरुषस्त्वसौ यथेच्छं कृताक्षदेवनः परं रोरुद्यमानां तां रमणीं प्राह—मदन्तिकं समानीयतामयं स्तम्भायमानः पुमान्, यावदेनं तथा किञ्चिदुपदिशामि यथा पुनः कदापि नायं यत्र तत्र सत्काराभिलाषो गर्व्वं समापद्यते इति । ततस्तया स्पृष्टमात्र एवासौ शिथिलाङ्गसन्धिर्भूतले पपात । तदा भगवान् भूतभावनो मघवन्तं तथाविधं विलोक्य "शक्र ! न पुनः कदाचिदेवं विकत्थनो भव, साम्प्रतञ्च मदाज्ञया विपुलवलशाली त्वमेतं पर्व्वतराजमुत्तोल्य कञ्चिद् रन्ध्रविशेषं द्रक्ष्यसि, यत्र भास्करसमानभासो भवादृशाः केचिदवतिष्ठन्ते तत्र त्वयापि प्रवेष्टव्यम्" इत्यादिष्टवान् । इन्द्रोऽपि मन्त्रनियन्त्रित इव तथा पर्व्वतरन्ध्रमासाद्य तत्र स्वानुरूपानन्यान् चतुरो निरीक्ष्य "मयापि एवं भवितव्यम्" इति भावयितुमारेभे, पुनश्च भगवति भवानीपतौ क्रोधस्फारितलोचनं "देवराज ! अलं विचारितेन चापल्यान्मामवज्ञाय लब्धव्यमेव यथोचितं फलम्" इत्यभिदधाने चलपत्रकम्पितकलेवरो देवराजो भूधररन्ध्रमध्यं विशन् सविनयं शङ्करं प्राह भगवन् ! इतः प्रभृति सकलभुवनपर्य्यवेक्षणभारो भवतैव समुद्वाह्य इति, तदाकर्ण्य महादेवः सस्मितमवादीत् "नैतद् भवादृशामधिकारयोग्यं, प्राग् भवानिव एतेऽपीन्द्राः सगर्व्वा अभवन्, अतः सर्व्वेऽपि समानावस्थामापन्नाः, सम्प्रति स्वकर्म्मानुरूपं वो नरजन्म भविष्यति, कालक्रमेण च पुनः कर्म्मवशात् सम्भविष्यतीदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्लोकाधिपत्यम्" इत्येवं तन्निदेशं निशम्य पूर्व्वतना अमराधिपाः प्रोचुः—परमेश ! यद्यपि क्लेशबहुलं नरजन्मैव गन्तव्यं, तथापि धर्म्मपवनाश्विनीकुमारेभ्य एव यथा नः समुद्भवः स्यात् तथाविधानेन वयमनुग्रहीतव्या इति ; तात्कालिक इन्द्रस्तु नितरां विनयेनाब्रवीत्—भगवन् ! अहं स्ववीर्य्येण कञ्चिदसामान्यगुणभूयिष्ठं पुत्रं जनयिष्यामि, "स एवाह"मिति एतेषां पञ्चमत्वेनाङ्गीकर्त्तुं प्रसादः क्रियतामिति। एवं तस्यानुनयातिशयेन तथा पूर्व्वेषाञ्च यथाप्रार्थितं स्वीकृत्य महादेवस्तां रुदितपूर्व्वां तरुणीं मर्त्त्यलोके तेषां भाविनीं सहधर्म्मिणीं निरदिक्षत्। इयं हि स्वर्गराज्यलक्ष्मीः, भोगदेहमधिष्ठाय स्वाभिलाषानुरूपं पतिं वरयितुकामा मुनिकन्यारूपेण कठोरं तपः साधयित्वा महादेवं तोषितवती, स चाशुतोषः यावदस्यै वरं दातुमुपस्थितः तदासौ तपस्विनी व्यग्रतया "पतिं देहि" "पतिं देहि" इत्येवं पुनः पुनः प्रार्थितवती, तदा महादेवः प्राह "प्रार्थनानुसारेण ते पञ्च पतयो भवन्तु" इति। श्रुत्वैवं सा सवैक्लव्यमाह—भगवन् ! किमिदं लोकधर्म्मादिविरुद्धं नितरामनभिमतं मे विहितम् ? आशुतोषेणाभाषि "यतस्त्वया पञ्चकृत्वः पतिप्रार्थना कृता तस्मादेव मया तथा विहितम्; अलङ्घनीयमेतद् वचः, यदि साम्प्रतं ते न रोचते, तदा कथयामि मर्त्त्ये लब्धजन्मना त्वया अस्य वरस्य साफल्यमनुभवितव्यम्" इत्येवं प्राप्ताशुतोषनिदेशा मर्त्त्यवासचिन्ताविरसा विलापविवशा स्वर्गलक्ष्मीः सा अलङ्घ्येन समयेन तथैव भवितुं कृतमतिर्बभूव। ततश्च कालक्रमेण ते पूर्व्ववर्णिता गिरिगुहावलम्बिन इन्द्रभूताः पञ्च पाण्डुराजमहिष्योः कुन्तीमाद्रयोर्गर्भे क्रमेण धर्म्मराजादिवीजादुद्भवं लेभिरे ; ते एव युधिष्ठिरादयः पञ्च भ्रातरः, स्वर्गलक्ष्मीश्च स्वमहिमातिरेकात् अयोनिसमाश्रयं द्रुपदयज्ञभूमितो जन्म लेभे, सैवेयं याज्ञसेनीत्यपराभिधाना द्रौपदी। अहो विचित्रं दैवसंघटनं ! एतत्पञ्चस्वामिकताविषये "यद्वस्तु समानीतं तत्सर्व्वैर्भ्रातृभिः सम्भूय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुज्यताम्" इत्येवम् अन्तरालवर्त्तिन्याः कुन्तीदेव्याः पुत्रान् प्रति यदनुज्ञानं तत्तावत् लौकिकं निमित्तमात्रमासीत्, मूलीभूतमपूर्वं दैवरहस्यञ्च यथाकथितमेव वर्णितं महाभारतीयादिपर्व्वणि द्रौपदी-स्वयम्बरप्रस्तावे । इतिशम् ।

जैन-जीवतत्त्वम्

(पूर्वतोऽनुवृत्तम्)

[लेखकः—वादीभकेशरि-श्रीमक्खनलालन्यायालङ्कारः]

भाषावर्गणातः शब्दरचना सञ्जायते, जीवेन गृहीता भाषावर्गण परिगणितपरमाणवः शब्दरूपेण परिणमन्ति । मनोवर्गणातो द्रव्यमनः समुत्पद्यते, किन्नाम द्रव्यमनस्त्वमिति स्पष्टीक्रियते—

सर्वाण्यपीन्द्रियाणि द्रव्यभावभेदतः द्विधा विभक्तानि ; तत्रात्मनो ज्ञानविशेषस्य क्षयोपशम(१) एव भावेन्द्रियमिति कथ्यते । क्षयोपशमे सत्यपि सर्वात्मनि वाह्यद्रव्येन्द्रियनिर्वृतिं विहाय न समर्थोयमात्मा किञ्चित् ज्ञातुमतः स्पर्शन-रसना-घ्राण-चक्षुः-श्रोत्रमिति पञ्चेन्द्रियरचना शरीर एव कर्मानुसारतो यथायोग्यं भवति । दर्शनगुणव्यक्तौ सत्यां वाह्य-पक्ष्मपत्रविशिष्ट-श्वेत-कृष्णमण्डलाकारपरिणतनेत्रेन्द्रियद्वारेणैव सत्तावलोकनं करोत्यात्मा, नान्यथा । अभ्यन्तरदर्शनगुणव्यक्तौ सत्यामप्यन्धो द्रव्येन्द्रियप्राकट्याभावान्नावलोकयितुं समर्थः, एवमेवा-त्मनो ज्ञानविशेष एव भावमनः तद्धृदि स्थाने कमलदलवद्द्रव्यमनो-वलम्ब्य प्रादुर्भवति । तद्द्रव्यमनस्तु मनोवर्गणायाः पुद्गलात्मिकायाः परिणामः पाश्चात्यानां विचारस्थानं शिरसि, अस्माकं सिद्धान्ते तु हृदयं तत्रैव विचाराभिव्यक्तेः ।

---

(१) संसारिजीवानामेकदेशरूपेणैव यज्ज्ञानविकाशः स एव क्षयोपशमः, सोऽपि च नाना जीवेषु हीनाधिकरूपेण लब्धस्वरूपोपयोगभाग् भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थी तैजसवर्गणा—जीवितशरीरे तेजस्त्वापादकत्वमेव तस्याः कार्य्यं, सा च जीवेन सहैवापरपर्य्यायं गच्छति मृतशरीरे कान्तेरभावसत्त्वात्। पञ्चमी कार्मणवर्गणा—तयैवाष्टविधं कर्म्म निष्पाद्यते, येन जीवस्य ज्ञानगुण आच्छाद्यते तज्ज्ञानावरणं कर्म। ज्ञानमावृणोतीति ज्ञानावरणं, दर्शनमावृणोतीति दर्शनावरणं, सांसारिकसुखदुःखानुवेदकं वेदनीयं कर्म, ज्ञानबाहुल्ये सत्यपि यद्वशात् यथार्थतया वस्तु नावबुध्यते सच्चारित्रञ्च नाद्रियते तन्मोहनीयं कर्म्म, आत्मनः सम्यक्त्वगुणं चारित्रगुणञ्च मोहयतीति मोहनीयं, यदुदयाल्लब्धशरीरे नियतकालपर्य्यन्तं जीवनिरोधस्तदायुःकर्म्म। वयमखिलास्ताव- देवात्र काये तिष्ठामो यावद्भुज्यमानमायुःकर्म्म न शीर्य्यते तच्छीर्य्य- माणे च वर्त्तमानशरीरच्युतिः स्यात्। तदा च वर्त्तमानपर्य्यायं परित्यज्य चतुर्गतिषु यत्र कुत्राप्ययं गमिता, तद्योग्यं गतिकर्मायुः कर्म्म च वर्त्तमानपर्य्याय एव बध्यते भुज्यमानायुषि समाप्ते पर्य्यायान्तरगमनकाले बध्यमानायुरुदयमिति गतिकर्मायुः कर्मोदयप्रेरित एव जीवोऽपरपर्य्यायं गच्छति। कोपि मनुष्यपर्य्यायाविष्टो जीवः नरकगतियोग्यं कर्म्म बद्ध्वा मरणान्ते नरकं गच्छति, कोपि देवपर्य्यायाविष्टो जीवः मरणान्ते मनुष्यगतिं गच्छति, कोपि स्थूलशरीरो कोपि कृष्णवर्णः, कोपि यशस्वान् कोपि कुब्जकशरीरो, कोपि एकेन्द्रियोऽन्यो द्वीन्द्रियो परस्त्रीन्द्रियः कोपि रूपलावण्ययुक्तोन्यो विकृतवदनः कोप्याकाशगमनशक्तिशालीत्यादिनानानामकर्मविनिर्मितावस्थाविशेषान् सन्दधानः स्वकर्म्मपरिपाकमनुभवति।

मनुष्यपर्य्यायसमाने सत्यपि कोपि उच्चाचरणकुलोत्पन्न उच्चगोत्रः कोपि नीचाचरणकुलोत्पन्नः नीचगोत्रः भण्यते जनैरित्यपि पूर्वबद्धगोत्रकर्म्मकृतवैचित्र्यं, कोपि पुरुषः समधिकबलवान् कोपि च हीनशक्तिकः, तिर्यञ्चमपि सिंहादयो विशेषबलशालिनः परानवसादयन्ति इत्यपि वीर्य्यान्तरायकर्म्मसाह्वात्म्यमिति। यद्यपि बलवता शरीर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलाधानाद्भवति परन्तु तद्बलाधानमपि खलु कर्मणो बलवत्त्वात् एव प्राकट्यमायातीति निश्चेतव्यम् ।

विभिन्नकर्मोदयाज्जीवाश्चतुर्गतिषूत्पद्यन्ते । मनुष्यायुर्गतिनाम कर्मोदयतः जीवो मनुष्यगतिमभिगच्छति । तत्र स्वायुःप्रमाणाव-धृतकालमधिष्ठाय भवान्तरं गच्छति ।

तिर्य्यग्गतितिर्य्यगायुःकर्मण उदयात् तिर्य्यग्गतिमभिगच्छति । एकेन्द्रियादारभ्य चतुरिन्द्रियपर्य्यन्ताः सर्वे तिर्य्यग्गतिमन्तः पञ्चेन्द्रिये-ष्वपि पशुपक्षिणस्तिर्य्यञ्चः सन्ति ।

तिर्य्यग्गतिमनुष्यगतिस्थितजीवोऽन्यतरः कोपि तत्रैव देवायु-र्देवगतिनामकर्मबद्धो मरणान्ते तदुदयाद्देवगतिं याति । बद्धनरक-गतिश्च नरकगतिं याति । देवो नारको वा मृत्वा मनुष्यस्तिर्य्यग्वो-त्पद्यते, इति कर्मोदयपारतन्त्र्यपरवशोऽयं जीव इतस्ततश्च दुर्गतिषु परिभ्रमति । कथयन्त्येके यदत्रैव सुखसम्पन्नत्वात् स्वर्गसुखं, दुःखा-नुभवनान्नरकदुःखं नैतस्माद्भिन्नं नरकस्वर्गसंज्ञोपेतं किञ्चित् स्थानं, नैतद्विचारचतुरचेतसां वाग्विलसितं, अस्ति सांसारिकसुखपराकाष्ठा-धिष्ठिता देवगतिः । सांसारिकदुःखपराकाष्ठापन्ना नरकगतिश्चा-न्यथा देवनरकशब्दाः कुतः प्रोत्थिताः प्रसिद्धाश्चाभूवन् । जैनदर्शन-निदर्शितनरकस्वर्गव्यवस्था चेदृशी—मध्यलोकोयमसंख्यातद्वीपसमुद्र-वेष्टितस्तिर्य्यक्क्षेत्रविस्तृतः ततः सहस्राणि योजनान्यतीत्योप-र्य्यूर्द्ध्वलोके स्वर्गास्तत्र देवानामुत्पत्तिः लक्षाणि योजनान्यतीत्याधोभूमौ नरकास्तत्र नारकाणामुत्पत्तिर्भवति ।

वस्तुतो जीवः असंख्यातप्रदेशी, यद्यखिलान् प्रदेशानातनुयात् जीवस्तदा निखिलं लोकाकाशमसंख्यातप्रदेशं व्याप्नुयात् तथापि कर्मवशंगतः स यस्यां गतौ यादृशं शरीरमाप्नोति तस्मिन्नेव तच्छरीरं व्याप्य तिष्ठति, यदा च द्विपेन्द्रदेहं मुक्त्वा भ्रमरयोग्यकर्मनिमित्ता-त्तद्देहमधिकर्त्तुमायतते जीवस्तदा भ्रमरशरीर एव स्वात्मीयसर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदेशान् संहृत्य निवसति, यदा च मक्षिकादेहान्निःसृत्य करि-हरि-नर-हरिणाद्यन्यतम-शरीरग्रहण-योग्य-कर्मोदयतस्तत्र गच्छति तदा तदा तच्छरीर एव विसर्प्य स्वप्रदेशान्निवसति, इति गृहघटनिक्षिप्त-प्रदीपप्रदेशवद्वातवद्वा संहारविसर्पाभ्यामुपपन्नशरीरमेव व्याप्य तिष्ठति। यथा गृहे निक्षिप्तः प्रदीपः स्वप्रकाशप्रदेशान् तदधिष्ठान-मभिव्याप्य प्रसारयति। घटे च निक्षिप्तस्तन्मात्रक्षेत्रे स्वप्रदेशान् प्रसारयति। वातो वा गृहे व्याप्तस्तत्रैव सर्वत्र प्रसरति, कन्दुके भ्रियमाणश्च तत्रैव प्रसरति, तथैव दार्ष्टान्तप्रगतिः। न तु मक्षिकादि-लघुविग्रहे जीवप्रदेशनाशः नापि च करि-हरि-विग्रहे नूतनप्रदेशो-त्पत्तिः, कस्यापि कदापि नाशोत्पादौ न भवतः परिणमनमन्तरा, शरीरप्रमाणः शरीराकारश्च जीवो न तु व्यापकः शरीरमात्रसुख-दुःखानुभवनात् कर्मविनिर्मितक्षेत्रवर्तित्वाच्च।

यस्य जीवस्य कर्म्मभारोऽतिमहत्तमः तस्य ज्ञानमात्रातीव मन्दतमा जायते बाह्येन्द्रिययोग्यता च हीनतमैव प्रादुर्भवति। वृक्षवनस्पति-पृथ्वीकाय-(१)जलकायाग्निकाय-वातकायादिष्वपि जीवाः सन्ति तद्वृद्धिजलग्रहणादेरन्यथोत्पत्तेरभावात्। तत्पर्य्यायाक्रान्तो जीवः स्पर्शनमात्रेन्द्रियजनितबोधवान् सोऽपि बोधस्तस्याव्यक्तरूपेणैवा-विर्भवति अतिमन्दक्षयोपशमत्वात् वृक्षवनस्पत्यादिष्वपि जीवः संसारित्वात् कषायाविष्टोऽतः सोऽप्यनिच्छापूर्वकं मन्दरूपेणैव कर्म्म गृह्णाति। एकेन्द्रियेभ्यः किञ्चिल्लघुकर्म्मभारं वहन् यः स स्पर्शने-न्द्रियतः एकेन्द्रियमधिकं रसनाभिधं प्राप्तः, आत्मीयज्ञानविकाशोऽपि तस्य तद्योग्यस्ततः स स्पर्शयितुमास्वादयितुञ्च समर्थो भवति। ततो-ऽप्यधिकलघुतरकर्मभारवाहको बाह्याभ्यन्तरमधिकां योग्यतामावहति

---

(१) येषां पृथिव्येव शरीरं ते पृथ्वीजीवाः पर्वतादार्द्रपृथिवीषु जीवो-ऽस्तीति तद्वृद्ध्यानुमीयते, जलकायादिष्वपीदृशी व्यवस्था। इमे सर्वेऽप्येके-न्द्रियाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नासिकाभिधमिन्द्रियञ्च लभते शङ्ख-कर्ण-खर्जूरादयश्च सर्वे द्वीन्द्रियाः एतेषां केवलं स्पर्शो रसश्च विषयः कर्मभारबाहुल्यान्न तु घ्राणचक्षुः-श्रोत्रेन्द्रियाणां निर्वृत्तिः नापि तज्ज्ञानादिक्षयोपशमविशेषस्य योग्यता ।

वृश्चिक-पिपीलिकादयस्त्रीन्द्रियाः । नत्वेतेषां चक्षुःश्रोत्रादि-निर्माणं सम्पद्यते । भ्रमरमक्षिकादिजीवाश्चतुरिन्द्रियाः पूर्वनिर्दिष्टे-न्द्रियत्रयं चक्षुरधिकमावहन्ति । आ एकेन्द्रियाच्चतुरिन्द्रियपर्य्यन्ताः सर्वे जीवाः अमनस्का एव, न तु तेषां मानसं ज्ञानमिन्द्रियजनितमेव, पञ्चेन्द्रियेष्वपि केचित्सरीसृपादयः अमनस्काः सन्ति । परं तेभ्यो-तिलघुतरकर्म्मभारारोहिणः मनुष्याः गोमहिषवराहवृषभगजादयः पशवः काकोलूकवकपारावतादयः पक्षिणस्ते सर्वेपि पञ्चेन्द्रियाः समनस्काश्च । मनस्महितेष्वपि ज्ञानावरणकर्म्मणः क्षयोपशमतार-तम्यादस्ति हीनाधिक्यमन्यथा सहाध्यायिनोऽन्तेवासिनः समगुरु-सकाशाध्ययनाभ्यासिनः सूक्ष्मेतरबोधाः कथमवलोक्यन्ते तेभ्यः पाठकास्तेभ्यो विशेषा आविष्कारकास्ततोप्यधिकज्ञानातिशयं प्राप्ताः योगाभ्यासनिरता योगिनश्चोपपद्यन्त एव निष्कर्षश्चायमुक्तविवेचनस्य यज्जीवाः सर्वे समशक्तिमन्तोऽवतिष्ठन्ते, तच्छक्तीनां विकाशस्तु हीना-धिकतया संसारिषु कर्मातिरेकसामर्थ्याद्भवति, किन्तु यज्जानन्ति ततोधिकं वेत्तुं सर्वेभिलषन्ति ।

इच्छाधिक्यात्प्रयत्नविशेषाच्च समधिकबोधावबोधा उपलब्धाश्च पुरुषाः योगिनोपि बहुतरं ध्यानमध्यासीना निष्कषायपरिणामाः शत्रुमित्रसमदर्शिनो मुनयः परोक्षपदार्थमालिकामपि प्रत्यक्षी-कुर्व्वन्ति । एवमुत्तरोत्तरविकाशवृद्धिस्तावत्परिसमाप्यते यावन्नि-खिलपदार्थवेदनं हस्तामलकवत्प्रत्यक्षप्रतिभासि न स्यात्तावदेव पुरुषस्य ध्येयोद्योगश्च ।

वृक्षवनस्पतिस्थजीवादारभ्य केवलज्ञानात्सकल(१) पदार्थप्रत्यक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिभासकात् पूर्वं सर्वसंसारिजीवेषु क्रमश आत्मविकाशो वर्धते, मनुष्यगतौ तत्रापि पुरुषस्यैवात्मीयविकाशस्य पूर्णयोग्यता वर्त्तते। यत्र किल पूर्णविकाशोऽखिलगुणानां तत्रैवायमात्मा वीतरागः सर्वज्ञश्च भूत्वा परमात्मसंज्ञां सर्वलोकपूज्यां धत्ते। अनादिशुद्धः कोपि परमात्मा सृष्टेः कर्ता हर्ता च जैनानां सिद्धान्ते नास्ति, किन्तु भवव्यसनसङ्कटाकीर्णात्मैव पुण्योदयविशेषत उत्तमकुलोत्तमाचरणादीन् सम्प्राप्य दुर्धरतपसा कर्मनिर्मूलनिर्यातनं कृत्वा सकलगुणव्यक्तिव्यक्तत्वात् परमात्मपदवीं लभते, स च परमात्मा वीतरागो निरीहः सर्वजगद्द्रष्टा अतीन्द्रियो ज्ञानी च न तु तन्निर्माता। क्षुत्पिपासाधिव्याधिसर्वदुःखनिर्मुक्तः स्वात्मोत्थानन्तसुखास्वादी कृतकृत्यः स्वपरस्वरूपावलोकी स्वस्वरूप एव तिष्ठति। स च द्विधा विभक्तः सशरीरोऽशरीरश्च। सशरीरः परमात्मा जीवन्मुक्तोर्हन्नित्यपि कथ्यते। आयुः कर्म्मणोवशिष्टत्वाच्छरीरं एवाध्यास्ते स एवोपास्यते जैनजनैस्तद्गुणलब्धये नत्वैहिकसुखार्थम्। तस्येदानीं परोक्षत्वात् पाषाणमूर्त्तौ अर्हन्निति मत्वा सस्थापनानिक्षेप(२)तस्तद्गुणाराधनं कुर्वन्ति जैनाः स्वीयजिनालयेषु। तमेव परमोच्चादर्शं संपूज्य स्वभावनैर्मल्यमुत्पादयन्ति संपूजका धर्म्मवत्सलाः, न तु परमात्मा भक्तानितानुत्तारयति स्वकरावलोचनं दत्ते च किन्तु स तेषामुद्धरणे स्वात्मस्वरूपावलोकने तच्चिन्तने च निमित्तीभवति तन्निमित्तवशात्ते स्वयमुपादानशक्तिसमन्विताः भव्याः स्वकीयशक्तेर्व्यक्तिं नैर्मल्यरूपामातन्वन्तीतीदमेवाराधनस्य फलम् निकलपरमात्मानस्तु लोकावसाने विराजन्ते। जैनानां मते नास्ति परमात्मा इति ये मनोनीतसिद्धान्तं प्रकटीकुर्वन्ति ते स्वकीयां जैन-

---

(१) सर्वज्ञज्ञानात्।

(२) अतद्गुणे वस्तुनि काष्ठपुत्तलचित्रनिक्षेपादिषु सोयमिति स्थाप्यमाना स्थापना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तानभिज्ञतामपि सूचयन्ति, जैनानां नास्ति परमात्मेति कथनं महद्वैपरीत्यमिति। तत्सिद्धान्तस्यात्युदाराशयत्वात्, जैनानां सिद्धान्ते नास्त्येक एव परमात्मा किन्त्वनन्ता: परमात्मान: सिद्धपदवीमधिवसन्तस्तिष्ठन्ति लोकशिखरे, अनन्ताश्च गमिष्यन्ति समये समये। सर्वे जीवा: परमात्मत्वशक्तिसमन्विता: सन्ति। ये किल स्वपादैरुत्थायोद्योगशीला: सन्त: स्वशक्तिव्यक्तिकरणे समर्था भवन्ति, त एव परमात्मपदवीं लभन्ते। परमात्मोपासका एव यदा किल स्वात्मोपासनोपासका भवन्ति, त एव तदोपास्या भवन्तीति जैनसिद्धान्त:। जगच्च प्रकृति: कार्य्यं प्रकृतीनां परिणमनत: तन्निमित्तनैमित्तिकसम्बन्धात्कार्य्यकारणसम्बन्धाच्च सुतरामेव परिणामात्परिणामान्तरं धत्ते न कदापि सर्वथा प्रलयमुपगच्छति, परिणामसन्तत्यानाद्यनिधनत्वमेवास्ते।

इति समासतो जीवस्वरूपं निरूप्य विरम्यतेऽस्माभि: श्रुत्वा चेमं जैनसिद्धान्तविषयम् अनुगृहीता: वयं श्रीमद्भिर्विद्वद्भिः। केनोपायेनायं संसारी जीवो मोक्ष्यति यदाचरणमाचर्य्य स बन्धनमुक्तो भवतीत्यपि जीवभावाभिभावकोतीवसूक्ष्मगभीरो जैनदार्शनिको विषय:, सोप्यवकाशानुसारतो निवेदयिष्यतेऽस्माभि:।

पुष्पाञ्जलिः (कथा)

लेखक:—श्रीतरणीकान्तचक्रवर्त्ती।

कमला कुलवधू:, अनेन प्रतिदिनं सा भवानीमन्दिरं गच्छतीति प्रतिवासिजनेभ्यस्तन्नारोचत। अत्र कर्णजपानां वर्द्धितो महानुत्साह:। प्रथमन्तावत् प्रतिवासिनस्ततो ग्रामवासिनोऽपि समारेभिरे तां निन्दितुम्। एवं कर्णे कर्णे प्रतिवासिनां कथोद्घोषिता क्रमेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घनतां प्राप्य सर्व्वत्र सर्व्वमुखचापोपचिप्ता विचारणामारभत। तच्छ्रुत्वा व्यथितान्तःकरणा कमला भवानीस्मरणेन परमुच्छ्वसितेन दीर्घनिश्वासेन च नितरां गुरुभारं हृदयस्य किञ्चिल्लघुतामनयत्। किन्तु अपराह्णे कमलायाः सखी मोहिन्यपि तामुपेत्य अभाषत—, "सखि त्वां नित्यं मन्दिरं गच्छन्तीं विलोक्य नानाजनमुखगीतस्ते-ऽपवादः। मयापि तन्न समीचीनं मन्यते। भवतु, सखि! पृच्छामि तावत् तत्र गच्छन्त्यास्ते किं प्रयोजनम्? सर्व्वैरेवाश्रीयते कर्म्मफल-मिति"। "सखि! त्वमपीत्थं विजल्पसि?" इत्युक्त्वा कमला वस्त्राञ्चलेन मुखमावृणोत्। ततः क्षणं स्थित्वा मोहिनी उदतिष्ठत्। गमनावसरे तामपि प्रसन्नां नावलोकितवती कमला। अथात्मनः प्रभवितुमक्षमा शय्यामाश्रित्य पूर्व्ववत् विलपन्ती अतिष्ठत्। निःस-हायाया अतोऽन्यः कोवोपायः कमला तन्न विवेद।

ततो यदा कमला मुखं प्रत्यावर्त्त्य दृष्टिं न्यक्षिपत्, तदावलोकित-वती यद् रजनी अतीतप्रथमयामा। ततः शनैः शनैरुत्थाय कमला दीपमज्वालयत्। अथ प्रदीपहस्ता गृहभित्तावास्थितां स्वामिनः प्रतिकृतिमुपेत्य तामवलोकयन्ती स्थिता। क्षणमवलोकनानन्तरं विगलदश्रुनयना मनसि "अहो हतभागिनी सर्व्वैरेवाहमवज्ञातास्मी"-ति विभाव्य पुनर्गत्वा कमला शय्याश्रयमलभत।

किन्त्वत्र विधिविलसितादिव दुःसमयेऽस्मिन् कमलायाः, पुरो-हितजनार्दनशर्म्मा तां न प्रत्याख्यातवान्। तस्यैवानुकूल्येन सा प्रतिदिनं मन्दिरमेत्य गृहीतव्रतमुद्यापयितुम् अलम्बभूव। पाठक! अफलोदयमनोरथोऽपि जनार्दनशर्म्मा निष्कलङ्कचरित्रोऽभवत्। अत्र परदारेषु तस्य मातृज्ञानमेव साधनोपायः। तदर्थमेव मन्यते, भवानीपूजायां नियोज्यात्मानं जनार्दनो जीवितकालं स्वस्य सुखं नेतुकामः समाचचारेदृशमिति। नियतपुण्यकर्म्माचारैः क्रमेण तस्य मनोवृत्तिरपि तद्गतेवाभूत्। तदेवाद्य परदुःखविगलित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदयो जनार्दनोऽव्यक्तैरपि महद्भिर्दुःखसंवेगरञ्जितां विषादमलिनां कमलां मन्यमानः सहृदयरागं तत्कार्य्यमङ्गीचकार ।

अद्य स एव संवत्सरान्त्यो दिवसः । तत्रामोदयति पुनरद्य वासन्ती-पूर्णिमा नितरां लोकचेतांसि । तदुपलक्षे प्रभूतजनसमागमस्वा-भवत् । समयेऽस्मिन् कमला गृहाद् बहिरागत्य अपश्यत् मन्दिरपथो लोकाकीर्णः संवृत्त इति । "कथमनेन ममाद्य मन्दिर-गमनञ्चवेदिति" विचिन्त्य पर्य्याकुलाभूत् । अथ क्षणं विचिन्त्य कमला अस्फुटं "मातर्भवानि ! त्वय्येवार्पितं स्वामिनं पुनः प्राप्तुकामा अद्य संवत्सरं यावत् व्रतमाचरामि । न च अस्यार्थे दुःसहनीया लोकनिन्दापि न सोढ़ेति । किन्तु अद्यापि त्वं मे न प्रसीदसि, विगतायां रजन्यां स्वामी मे त्वन्मन्दिरमागत इति स्वप्नञ्च व्यलो-कयम् ।" अथैवं क्षणं स्थित्वा अर्द्धोच्चारितकण्ठेन "भवतु कन्यां कमलामद्य रक्षतु देवि" इत्यभिधाय जनकोलाहलमयपथेनैव तेन मन्दिराभिमुखमचलत्, ततो लोकनयनगोचरा सा कथं मन्दिरद्वार-मुपनीता पाठकैस्तत्पूर्व्वमेव विदितम् ।

पाठकाः ! सकृदागच्छत वयमप्यत्र भवानीमन्दिरं प्रविश्य कमला किमाचरतीति पर्य्यवेक्षामहे । किन्त्वतः पूर्व्वं मन्दिरपुरोहित-स्याचारविलोकनाय अस्माभिरत्र अनुरुध्यते ।

पुरोहितजनार्दनशर्म्मा आसनोपविष्टो देवीपूजायां निमग्नः । पूजा तु तद्दिवसस्य दीर्घकालं निनाय । तदहन्यगणितलोकसमा-गमनिर्भीको जनार्दनश्चिरमाविष्टः सन्नधिकं प्राप्तवानवसरं मन्दिरा-वस्थानस्य । अद्य स स्वाभिलाषानुरूपां कुर्व्वाणो देव्यर्च्चनां, कदापि तन्मयः पश्यति पुरोवर्त्तिनीं भवानीमूर्त्तिं, कदापि यच्छति समन्त्रक-पुष्पाञ्जलिं भावाविष्टश्च कदापि ददाति यथासुखं मन्त्रं विनापि भवानी-पदे प्रेमकुसुमाञ्जलिम् । सर्व्वतो मधुरता अद्य आवृणोति जनार्दन-हृदयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनार्दनस्यापरतः आसनोपविष्टा कमला। तस्मादपि भवानी-पूजा जनार्दनस्य अद्य अभिनवेव प्रतीयते। मुग्धनयना कमला क्षणं मातृमूर्त्तिं प्रति क्षणञ्च विदधाति दृष्टिं जनार्दनं प्रति। अथ "किमद्य प्रत्यर्पितं ते सन्तानहृदये प्राक् कदापि नेत्थमिदं प्रत्यक्षीकृतम्। मातर्विचित्रा खलु तव लीलेति" मृदु उच्चारयन्ती सापि भगवती-प्रीतिप्रफुल्ला निमीलितनेत्रा क्षणमतिष्ठत् अथ सा पुनश्चक्षुरुन्मील्य अपश्यत् ध्यानस्तिमितनेत्रो जनार्दनः, अश्रुसिक्तं तस्य वक्षः प्रवहति च नेत्रधारा प्रबलवेगेनेति निःष्पन्दतमा कमला अद्य कौतुकाविष्टा तत्पूर्व्वपरिचितं भवानीसेवकमोक्षते।

अहोरात्रमद्य पूर्णिमोत्सवश्चलिष्यति, तदवसितेऽपि दिवसभागे समागतानां काचित् क्लान्तिर्न दृश्यते। अस्तमितप्रायो देवो भास्करः। अथ सोऽपि शनैरस्ताचलमधिरुरोह।

अपरतो निशानाथो धरणीदुःखकातर इवाद्य तया सह समस्त-निशायापनाय प्रागेव स्निग्धज्योत्स्नामयीं दौत्ये नियोज्य ज्ञापयति धरित्रीं स्वागमनम्। अन्यतो दृश्यमाना तामसी सन्ध्यादेवी चिर-सखीं धरामालिङ्गितुमागत्यापि विधिनियमितात्मानमविस्तीर्य्य सखीप्रीतिच्छलेनेव तदा तस्मात् प्रस्थिता। समयेऽस्मिन् समाप्य पूजाकार्य्यमासनोपरि उपविष्टो जनार्दनः क्षणं विश्राम्यति। अत्र अवसरमासाद्य कमला तस्मै आत्मनिवेदनमकरोत् "आर्य्य! इयं समागता सन्ध्या स्वामी मे अद्यापि नोपायातः। शेषाञ्जलये मामत्र समादिशतु। अद्यैव मे शेषावसरो मन्दिरागमनस्य" इति। ततो भवानीमूर्त्तिं विलोकयन्ती "मातः! स यदि प्रच्छन्नस्त्वया पुनर्नाया-स्यति तन्ममापि रक्षणेन किन्ते भवेदित्यु"क्त्वा अश्रु परितत्याज। दृष्ट्वा चैवं जनार्दनस्तत्र हर्षोत्फुल्लोऽभाषत "नूनं सफलमनोरथा त्वं भवि-ष्यसीति देवीप्रसादेन ज्ञातम्। तत्समर्पयेदानीं भवानीपदे ते कुसु-माञ्जलिम्।" एवमादिष्टा कमला पूर्व्ववदञ्जलिमादाय भवानीपदे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दातुमुद्युङ्क्ते। जनार्द्दनस्तत्र मूर्त्तिमतीं भवानीमिव तामवेक्षमाणः अदूरे विस्मयाविष्टः सन् स्थितः। परक्षण एव अनागतपतिचिन्ताविषादमलिनानना कमला प्रबलाकाङ्क्षाप्रणोदिता देवीपदे ददात्यञ्जलिमत्रान्तरे द्वारदेशात् "कमले" इति प्रकम्पितकण्ठाह्वानमशृणोत्। तत्र मुखप्रत्यावर्त्तनेन यदपश्यत्तेन मारुतान्दोलिता लतेव कम्पितकलेवरा आगन्तुकस्य पदतले न्यपतत्।

पाठक! पश्य मन्दिरद्वारि विरचितविचित्रकुसुमाञ्जलिं करे निधाय धृताभिनवसन्न्यासिवेशो दण्डायमानः कश्चित् युवा तिष्ठतीति। अस्य दीर्घकेशकलापः, प्रीतिप्रफुल्लञ्चापि अव्यक्तगभीरचित्तोद्भिन्नं चारुवदनमण्डलम्, आपदं गैरिकवसनावृतो देहः हेमकान्ति-कमण्डलु-परिशोभित-वामकरश्च दर्शयन्ति महाशोभानिवहम् जनयन्ति च हृदि महान्तं कौतुकरसम्। पथश्रान्तादपि अस्य वदनतलात् क्षरतीव कापि तेजोधारा। तत्रोपस्थित एव दृष्टाञ्जलिहस्तां कमला माह्वयामास। कमला अपि श्रुत्वा परिचितकण्ठं, दृष्टिमात्रेणैव विज्ञायात्मस्वामिनम् रुद्धानन्दोच्छ्वासादिव आत्मना तदभिमुखे प्रचरितुमक्षमा भूमौ निपतिता। करभ्रष्टश्च कुसुमाञ्जलिरस्पृशत्तदागन्तुकसन्न्यासिपदम्। अभिधानं कोऽयमिति बाहुल्येन पर्य्यवसितं भवेत् पाठकानां यदयमेवास्माकं कमलापतिर्भवानीकान्त इति।

अत्र भवानीकान्तो निपतितप्रियाकरकमलं गृहीत्वा तामुत्तोल्य च करस्थिताञ्जलिं प्रदर्शयन् कथयति "कमले! विगतरजन्यां स्वप्नेऽवलोकितं यद्भवानी स्वयं मूर्त्तिं परिगृह्याह "वत्स! मासान्ते संक्रान्ति दिवसे मन्दिरमुपेत्य तत्रोपस्थितया भार्य्यया मम च प्रियसेवकया कमलया सह अञ्जलिं प्रयच्छ" अथ सा अन्तर्हिताऽभवत्। तदद्य शिविश्वरशैलादवचित्य स्वहस्तेन भवान्या प्रदर्शितानि प्रसूनानि समागतोऽस्मि सेवितुं भवानीपादपद्मम्। एहि आवां द्वावेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवानोपदेऽस्य "इममर्पयाव।" ततः सस्त्रीको भवानीकान्तो दत्त्वा कुसुमाञ्जलिं देवीं प्राणमत्।

सिद्धान्तभूषण-जीवनचरितम्

(लेखकः—श्रीगोपीचन्द्र काव्यरत्नः।)

निष्कलङ्ककुलशशलाञ्छनो देशभूषणं पण्डितकुलभूषणं द्वितीयो बृहस्पतिरिव साक्षादिव विभूतिभूषणः सिद्धान्तभूषणेति पदलाञ्छनो रूपलावण्यादिविनिन्दित-पुरन्दरकुमारमीनकेतनो जयचन्द्रशर्म्मठाकुरः किल १७७१ (शशधरस्वरमुनिचन्द्रमिते) शकाब्दे चैत्रीयशुक्लचतुर्थ्यां वङ्गदेशान्तर्गतनोयाखालीजिलाधीने 'घोषकामता'इतिविख्यातग्रामे सुप्रसिद्धसिद्धविद्याठाकुरवंशे साक्षादिव लक्ष्म्या मातुः शिवसुन्दर्य्या उदरात् भूमिष्ठो निखिलशास्त्रपारावारपारगामिनः पण्डितमण्डलीमण्डनस्य पवित्रकुलतिलकस्य पितुर्जयगोपालविद्याभूण-भट्टाचार्य्य-महोदयस्य गृहं शुभसमये समधिकमलञ्चकार।

जयगोपालविद्याभूषणभट्टाचार्य्यमहाशयस्य जनको रामलोचनसिद्धान्तपञ्चाननभट्टाचार्य्यमहोदयः खलु तत्काले सर्व्वेष्वेव शास्त्रेष्वसाधारणः पण्डित आसीत्। सकलगुणोपेतः सर्वशास्त्रसमविद्यस्तादृशस्त्विदानीं नासीदेवापरः। अयञ्चान्वयो निष्कलङ्कः पूतो वंशपरम्पराऽसाधारणपण्डितमण्डितो गौरवेणाधुनापि यशस्वी सर्व्वत्रैव सुपरिचितोऽपि क्रमश एवामूल्यरत्नसंहारात् शोकमलिनो मलिनो नलिनीव परिलक्ष्यते।

बाल्यात् प्रभृत्येव सिद्धान्तभूषणमहाशयस्य प्रत्युत्पन्नमतित्वं सञ्जिगीषा धर्म्मभीरुता मधुरभाषिता अध्ययनोत्साहः स्मृतिशक्तिरित्यादिकं साधारणेभ्यो विलक्षणं परिलक्ष्यते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैशवादेवासौ रसिककुलचूड़ामणिः साहित्यसेवको बहुविध कौतुकपरायणो गीतवाद्यादिषु निरतिशयाग्रहो नाट्यविद्याविशारदो विनीतः सुकण्ठः प्रमोदवान् नाट्यादिसमितेरध्यक्षतामापन्नो नैपुण्येनाभिनयं प्रदर्श्य जननिवहान् विस्मितान् चकार ।

बाल्ये विद्यारम्भानन्तरं साग्रहो निजनिलय एव पठितुमारेभे। इत्थं समतीते च कियति काले सार्द्धैकक्रोशदूरवर्त्तिन्यां सोनाड़ुड़ीतिविख्यातग्रामटिकायां निजवंशीयविद्वद्वरेण्य-मृत्युञ्जयठाकुर-महाशयसकाशे यथारीति कियदधीत्य व्याकरणादिकं स्वालय निकटवर्त्तितया अध्ययनप्रत्यूहमाशङ्कमानो द्रुतं चतुःक्रोशान्तरिते खिलपाड़ाभिधाने प्रसिद्धग्रामे व्याकरणादेर्विशिष्टाध्ययनार्थं तदानीं प्रधानपण्डितस्य वैयाकरणकेशरिणो रामगोविन्दतर्कालङ्कारमहोदयस्य शिष्यत्वं स्वीचकार। स्वालयवासकाले च पितुर्विद्याभूषण महाशयस्य सकाशे प्रायश एव स्मृतिज्यौतिषतन्त्रादिकं कियत्परिमाणं श्रीमद्भागवतस्य प्रथमदशमस्कन्धौ नैषधस्य सर्गद्वयं माघस्य प्रथमसर्गं इत्थमेव कुमारसम्भवादिकं कथञ्चित् किञ्चिदध्यैष्ट। साहित्यादिशास्त्रेषु महात्मनस्तस्य एतावत्येव विद्या। किन्तु यथासमये असाधारणप्रतिभाप्राखर्य्येण अनधीतानपि महाकाव्य-नाटकालङ्कारादिकान् यथानियममगणितच्छात्रान् सानन्दमनायासमध्यापयामास। अनधीतग्रन्थान् पाठयतीति न केऽपि परिज्ञातुं शेकुः। मथितनिखिलशास्त्रवारिधेर्महात्मनस्तस्य सकल-शास्त्र-समान-विद्यस्य लब्धप्रतिष्ठानाम्छात्राः महामहोपाध्याय श्रीयुक्तानन्दाचरणतर्कचूड़ामणिः श्रीयुक्तानन्दचन्द्रतर्कवागीशः श्रीयुक्त गोष्पति राय काव्यतीर्थः, आनन्दचन्द्र विद्यालङ्कारः श्रीयुक्त कमलकृष्णस्मृतितीर्थः एवमपरेऽपि अगणिता विद्यन्ते, नामोल्लेखः सर्व्वेषामेकान्ततोऽशक्य एव।

अथाध्ययनसमयादेव शास्त्रनैपुण्य-विचारचतुरताप्रभृतिसन्दर्श-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेन दर्शकाः श्रोतारश्च वैषयिकाः प्रकाण्डपण्डिता वा आनन्दिता विस्मिताः शुभाशीराशिं ववृषुः सिद्धान्तभूषणपादेषु।

रूपेण गुणेन वा विद्यया बुद्ध्या वा शोभनस्वभावेन धर्म्मशाध्य-नुष्ठानेन वा तदानीन्तनविद्यार्थिनिवहेषु सिद्धान्तभूषणमहाशय एव प्राधान्यमलभत। स्थाने स्थाने शास्त्रीयपाठस्तु असंलग्नो लच्यत इति यदि केश्चित् पण्डितवर्य्यैरप्युच्चार्य्यते तदान्तर्दुःखमनुभूय सानुनयो जयचन्द्रस्तानपि जिज्ञासते स्म महाशयाः! कथ्यता-मनुकम्पया क्व वर्त्तते ह्यसंलग्नः पाठ इति। बालकमुखादेवमाकर्ण्य गर्व्वनिहितमथ च मधुरभाषितं कोपनास्ते यदेवासंलग्नपाठ-मुल्लिलिखुस्तदैव सिद्धान्तभूषणमहाशयस्य अपूर्व्वव्याख्यया अव-नतमस्तका लज्जिता अपि सानन्दा निजाभिमानमदैधचेतसः संवृतवन्तः।

पाठ्यावस्थायामेव महाकविरुदारचेतसस्तस्य संस्कृतभाषया वाक्यालापः श्लोकरचना प्रबन्धलेखनं वक्तृताप्रदानमित्यादिषु निरति-शयोत्साहः शक्तिश्च समजनि।

यौवनप्रारम्भे नानारोगसमाक्रान्तो न बभूव सेविताशेषभेषजो-ऽपि रोगकवलाद् विनिर्मुक्तो जयचन्द्रः।

पितुरपि प्रतीकारः कथमपि न भवतीति वीच्य दैवानुष्ठानार्थे-वेच्छा बलवती सञ्जाता। पितुरौदासीन्यं गणयन् गभीर-रजन्या मात्मभावं गोपयन् कलिकातागमनार्थं निजनिलयाद्बहिर्जगाम। अथ मध्याह्ने षट्क्रोशदूरवर्त्तिनि कस्मिंश्चित् शिष्यालये विहित-नित्यकृत्यः कृताहारो भूयस्तस्मादपि बहिर्गत्य चाँदपुरनामकप्रसिद्ध यानविश्रामपदमागत्य यथाकालं जलयान(ष्टीमार)मारुरोह। गोयालन्दाभिधानयानविश्रामस्थानाभिमुखं चलज्जलयानं दैवात् पथिपुलिने संलग्नं दिनत्रयं बद्धमेवासीत्। विल्वपत्रस्याभावात् शिवपूजादिकमकुर्व्वाणस्य विशेषतश्चापूते कुलधर्म्मसमुच्छेदकताटश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थाने सन्ध्यावन्दनाहारादिकमत्यन्तमनुचितमित्यवगच्छतः सिद्धान्तभूषणमहाभागस्य अनाहारेणैव तानि खलु दिनानि समतीतानि।

चतुर्थदिवसे प्रागुक्तगोयालन्दाभिधानं स्थानमागतोऽपि जयचन्द्रः कथञ्चित् संगृह्य विल्वपत्रादिकं सन्ध्यापूजाप्रभृतिकं समाप्य सक्तु-कदलीशर्करादिकमेव यत्किञ्चिद् भक्षयिष्यतीति भावयन् तत्र चेष्टां चकार।

अथ तान्येव संगृह्य किञ्चिन्मात्रं भक्षयति जयचन्द्रे प्रतिकूलत्व-मासेदुषि च भगवति, भीषणप्रभञ्जन-वेग-विक्षिप्ते च भोजनीयवस्तुनि नानास्थाने, निर्दयव्यवहारेण च परमेश्वरस्य साभिमानं दृष्टे, शकटं खलु कलिकाताभिमुखे धावितुमुपक्रान्तम्। सिद्धान्तभूषणस्तदा सवेगं धावन्नपि शकटमारोढुमशक्तः सर्व्वेषामेव वचनमवहेलयन् प्रचलितशकटस्य पश्चात् पश्चात् पदव्रजेनैव परस्मिन् शकटविश्राम-स्थाने (राजवाड़ी ष्टेशने) समागत्य तच्छकटोपरि समासीनो भगवतः परीक्षामेव भावयन् यथाकाले चिरापरिचिते कलिकाता-भिधाने महानगरे अवतीर्य्य गङ्गातीर एव वर्त्तमानो दिवसचतुष्टयं सशर्करं गङ्गाजलं निपीयैव यापयामास। कलिकातास्थ-कविराज-कुलतिलकसुनिष्णात गङ्गाप्रसादसेन-महाशयस्य चिकित्सां कामय-मानो रचयन् * कति श्लोकान् तस्य साक्षाद्दर्शनलाभानन्तरमशेष

* यत्र तावपि श्लोकौ—

गङ्गाप्रसादवशतोऽखिल पापयुक्तो
मुक्तो भवेद् भवभयाद् ध्रुवमन्तकाले।
गङ्गाप्रसादवशतोऽखिल रोगयुक्तो
मुक्तोऽस्मि संस्थित इतः प्रयतान्तकाले॥
अर्शोविशोषबधिरो बलहारिमेहो
ग्रन्थिक्रियाहररसो ग्रहणी हृताग्निः।
वायुभ्रमी अहह मस्तकशूलशूली
गृह्णामि किं फलमतोऽध्ययनद्रुमेभ्यः?॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशंसां लभमानः परिश्रमिकमौषधमूल्यादिकञ्च विनैव सदाशयस्य सेनमहोदयस्य चिकित्साधीनतां गतः। सोऽपि सिद्धान्तभूषणमहाशयस्य नानाशास्त्रेष्वगाधपाण्डित्यं चित्तचमत्कारिणीं कवित्वशक्तिं विनिन्दितकुमारकलेवर-लावण्यं, खर्वीकृतकन्दर्पदर्पं देहसौष्ठवं, एकत्रैव पात्रे सौन्दर्य्यधैर्य्यमाधुर्य्यादिकञ्च दृष्ट्वा सुधाजलधौ निमज्जमान इव साभिनिवेशो यथासाध्यञ्च भेषजप्रयोगे यतते स्म।

यथाशास्त्रं चिकित्सितोऽपि नैकान्ततो रोगप्रशमनमनुभूय एकसंक्रान्तिमारभ्यापरसंक्रान्तिपर्य्यन्तं सङ्कल्पपूर्व्वकं गङ्गायां स्नातो निजरचितमेकैकं श्लोकं गाङ्गे तीर एव वसन् भक्त्या पठितुमारेभे। एवं त्रिंशच्छ्लोकात्मकं गङ्गास्तोत्रं विरचय्य पठन् प्रतिदिनमचिरादेव भक्तिप्रभावान्नीरोगो मृत्युपूर्व्वचणपर्य्यन्तमप्युल्लेखयोग्येन न केनापि रोगेणाभिभूतः।

अथैकदा रिक्तहस्तो जयचन्द्रः किमद्य पथ्यं भोक्तव्यमिति विभावयन् समर्प्य भगवति परमेश्वरे चात्मानमुपविश्यासने सन्ध्यापूजादिविधौ मनोऽभिनिवेशयामास। (सावशेषम्)

सन्देशाः

ग्रन्थागारसमृद्धिः—संस्कृतसाहित्यपरिषदो जन्मनः प्रभृत्य व परमसुहृदः श्रीमन्तो द्वारिकानाथन्यायशास्त्रिमहोदयाः सभावाजारराजकुलालङ्कारभूतस्य परमविद्योत्साहिनो राज्ञः स्वर्गत-विनयकृष्णदेवबाहादुरमहाभागस्य समृद्धग्रन्थागारात् निखिलानि हस्तलिखितपुस्तकान्याहृत्य परिषद्ग्रन्थागारे समर्पितवन्त इति शतशः साधुवादान् सादरन्तेभ्यः समुपहरामः। इह हि ग्रन्थसञ्चये साङ्ग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेद-वेदान्त-मीमांसा-न्याय-स्मृति-पुराणेतिहास-काव्यालङ्कार-नाटकादिविविधविषयकाः केचित् प्रकाशितपूर्वा बहवश्च समपेक्षित प्रकाशा दुर्लभाः प्राचीनग्रन्था विद्यन्ते। तेषु च कतिपयानां प्रकाशे नातिचिरमेव परिषत् कृतोद्यमेति संस्कृतसुहृदां महदाश्वासनम्। एतद्ग्रन्थानां पूर्व्वाधिकारिणः पूर्व्वपुरुषसञ्चितं रत्नकोषमेतत् सापेक्षजनसुलभं सम्पादितवन्तः श्रीमन्तः कुमार-प्रफुल्लकृष्णदेव-(एम्-ए) कुमार प्रमोदकृष्णदेव (बि-ए-) प्रभृतयो भ्रातरः सौभ्रात्रसम्मिलिता श्चिरं जीवन्तो जनमङ्गलं विदधत्विति नः श्रीमन्नारायणपादारविन्दे प्रार्थना।

उपाधिप्राप्तिः—परिषदः सदस्यवर्य्याः श्रीमन्तो भागवतकुमारशास्त्रि-(एम्-ए-)महोदया भक्तिशास्त्रस्येतिहासमतिनिपुणं समालोचितवन्तः कलिकाताविश्वविद्यालयाधिकृतैः सम्प्रति 'पि-एइच्-डि-'इत्युपाधिमानेन सत्कृता इति प्रमोदसम्भृतमानसा वयमेतान् समभिनन्दामः।

शोकविज्ञप्तिः—विज्ञापिताऽत्र पूर्वमेव विख्यातमहिम्नां भूपेन्द्रनाथवसुमहोदयानां जरामयादिदुर्बलतया विश्वविद्यालयस्योपाध्यक्षपदपरित्यागवार्त्ता। भारतभूमिरधन्यतया अनुपदच्छेदमिदानीं सशोकमस्माभिः प्रकाशनीयमापतितं यन्महाभागास्ते विगत सौरभाद्रस्यान्तिमदिवसे दुर्दमकरालान्तकेन भुवोऽस्याश्चिरायाऽपसारिता इति। नानाविधसत्कृत्यसम्पादनलब्धकीर्त्तयः सम्प्रति राजकीयसंस्कृतमहापाठशालासम्बन्धिविचारसमितेर्नायकत्वेनैते वङ्गेषु संस्कृताभ्युदयाशां समुज्जीवितवन्तो विशेषतः समवर्त्तन्त नः प्रत्याशास्थानम्। अनन्यगतिका वयमेतेषां परलोकनिर्वृतिं त्रिलोकाधीश्वरात् कामयामहे।

संस्कृतपाठशालासमितेर्नूतनाध्यक्षः—राजकीय संस्कृतविद्यालयसम्बन्धिविचारसंसदः पूर्वतनसभापतेरचिरं स्वर्गत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया विश्रुताभिधाः श्रीमन्तः सूरिरत्न-देवप्रसादसर्व्वाधिकारिणस्तत्-पदे प्रतिष्ठापिता इत्यद्याप्यस्माकं प्रत्याशा नहि समूलमुच्छिन्ना। संस्कृतसाहित्यपरिषदः प्रतिष्ठामारभ्य पदे पदे तां प्रत्यनुरागमाविष्कुर्वतां, तस्या द्वितीयसंवत्सरमहोत्सवसभायामध्यक्षपदमङ्गीकृतवताञ्च तेषां नियोगेन सुतरां सन्तुष्येयुः संस्कृतोज्जीवनकामाः पारिषदा इत्यलं तत्प्रख्यापनया। अपि चैतेषां ज्येष्ठताताः प्रख्यातनामानः स्वर्गत-प्रसन्नकुमारसर्वाधिकारिणः संस्कृतपाठशालायां सुचिरमध्यक्षपदमध्य-कार्षुरित्यतिमात्र समादरोऽत्र श्रीमतां स्वसम्बन्धिवस्तुन्यस्माभिः सम्भाव्यते।

मासिकसभा—विगत सौरभाद्रस्य एकत्रिंशदिवसे मङ्गलवासरे सायं सार्द्धषड्वादनतः प्रावर्त्तत परिषदो भाद्रीयम् अधिवेशनम्। तत्र संस्कृतपाठशालाध्यापकवरैः श्रीमद्भिः शितिकण्ठवाचस्पतिमहोदयैः समलङ्कृतं सभापतेरासनन्। तत्र पूर्वसभाविवरणपाठादनन्तरं महामहोपाध्याय-यादवे-श्वरतर्करत्न-पण्डितराजपादानां परलोकप्रयाणेन भारतीयानां विशेषतो वङ्गी-यानां तथा परिषदश्च अपूरणीयां हानिं प्रकटयन्तः श्रीमन्तः सीतानाथसिद्धा-न्तवागीश-कालीपदतर्काचार्य्य-भोलानाथमिश्रसाहित्यशिरोमणि-शरचन्द्रखान् एम्, ए, वि-एल् महोदयाः शोकमयीं वाचं प्रावर्त्तयन्त तदीय गुणावली-कीर्त्तनपुरःसरम्। तदनु परिषत्सम्पादकेन श्रीमता पशुपतिनाथशास्त्रि महोदयेन विज्ञापिते तद्दिनमध्याह्ने एव कलिकाताविश्वविद्यालयोपाध्यक्ष-चरणां श्रीमतां भूपेन्द्रनाथवसुमहोदयानां परलोकप्रयाणप्रस्तावे श्रीमन्तौ सीतानाथसिद्धान्तवागीश-गोष्पतिरायचतुर्धुरीणकाव्यतीर्थ महोदयौ तादृश महात्मनाम् अभावो दौर्भाग्यमेव सूचयतीदानीमखिलभारतानामिति वसु महोदयमरणात् गभीरं शोकं प्रकटितवन्तः। एतदनन्तरं श्रीमता दीनबन्धु साहित्यशास्त्रिमहोदयेन नाट्यचर्च्चेतिशीर्षको भारतीयनाट्यप्राचीनत्वरङ्ग-निर्म्माणशैली प्रभृति विविधविषय वर्णनात्मकः प्रबन्धः स्वरचितोऽनुवाचितः। प्रबन्धवाचनादनन्तरं श्रीमन्तः सीतानाथसिद्धान्तवागीश शरचन्द्रखान् चिन्ता-हरणचक्रवर्त्ति प्रभृतयः समालोचितवन्तः प्रबन्धविषयम्। ततः सभापति-साधुवादकीर्त्तनादनन्तरम् अवसितं सभाकृत्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

মহাভৃঙ্গরাজ তৈল ৬৲ সের

চ্যবনপ্রাশ ৩৲ সের

স্থাপিত ১৩০৮ ঢাকা

মকরধ্বজ ৪৲ তোলা

শক্তি ঔষধালয়

ঢাকা, কলিকাতা, ময়মনসিংহ, গৌহাটি, চট্টগ্রাম, রঙ্গপুর, পাটনা, জলপাইগুড়ি, শিলেট, সিরাজগঞ্জ, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূত করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशकौ मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामवाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस : १०७ कर्णवालिस ष्ट्रीट, श्यामवाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये कार्त्तिके
November 1924.

Reg. No. C. 1073.

७म वर्षस्य ७म संख्या
Vol. VII. No. 7

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः — काव्य-सांख्य-पुराणतीर्थ-श्रीदुर्गामोहनभट्टाचार्य्यः M.A.

मतिमञ्जरी
चन्द्रप्रशस्तिः (कविता)
कालिदासस्य अनुरूपवराय कन्यकादानम्
गुरुशिष्यसंवादः
राधिकाया मानभञ्जनम् (कविता)
संस्कृतसाहित्ये विज्ञानवैचित्र्यम्
यादवेश्वरप्रयाणम्
जयचन्द्रमहाप्रयाणम्
ग्रन्थपरिचयः
सन्देशाः

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षाप्रार्थिनां सताम् ॥
छात्र पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাজিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ - সুশ্রুত-সংহিতা ই এসংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ চার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।
১৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



महामहोपाध्याय पण्डितराज यादवेश्वर तर्करत्नम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

१८४६ शकीये कार्त्तिके, ७म-वर्षस्य ७म-संख्या

मतिमञ्जरी

भारतीयसमाजस्थितिः—लण्डनमहानगरे क्याक्स्टन्नामकसभागृहे कस्याश्चन परिषदः सम्मेलने वङ्गाधीश्वरचरा 'लर्डरोनाल्ड्‌शे' महोदयाः सभापतिपदमलमकार्षुः। भारतवर्षीयं चिराचरितमाचारव्यवहारादिकमधिकृत्य विमर्शवाचस्तत्र प्रावर्त्तन्त। सभायान्तस्यां कथाप्रसङ्गेन 'रोनाल्ड्‌शे'महाभागाः प्रास्तुवन्, यथा—"अद्यत्वे भारतीयेषु बहुष्वेव प्रदेशेषु जातिगतनियमानां कठोरता क्रमेण ह्रसमाना वर्त्तते। परं 'मुनसी'पदभाजा यदुक्तमीश्वरशरणमहोदयेन 'स्वल्पयैव कालकलया भारतवर्षाद् जातिगतवैषम्यस्य विलोपः सम्भविते'ति तन्न याथार्थ्येन प्रत्येमि। यद्यहं भारतवर्षीयोऽभविष्यम् तदा त्रिसहस्रवत्सरान् महाविघ्नसहस्रैर्बाध्यमानाऽपि या सामाजिकपद्धतिर्नैव सुतरां विलोपमासादितवती, तया सुमहद्गौरवमेवान्वभविष्यम्। पद्धतिरियम् अचिरेण तिरोहिता भवत्विति नाहमभिलाषमधारयिष्यम्। सत्यमपेक्ष्यते केषुचन विषयेषु संस्कारसम्पादनम्, तथापि तस्या महनीयसामाजिकपद्धतेरविवेकप्रसूतध्वंसकर्मणे मा तावद् व्यग्रा भवन्तु हिन्दुनामानो जनसम्प्रदाया" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र स्वातन्त्र्येण वयं किमपि नोपपादयामः, परं तथाविधमनीषिप्रवराणाम् आत्मजन्मना भारतमनलङ्कुर्वतामपि भारतीयसमाजस्थितिमधिकृत्य तादृशविमर्शवचनपर्य्यायो भारतीयानामवधानमाकर्षत्विति ब्रूमहे।

नेपालदेशे विश्वविद्यालयः—'समया'ख्य वङ्गभाषामयपत्रिकायां प्रकाशितमास्ते—यथा नेपालदेशे सत्वरमेव कश्चिद् विश्वविद्यालयः स्थापयिष्यते। सम्प्रति नेपालराज्ये कश्चित् मध्यमविद्याशिक्षणोपयोगी विद्यालयः (Intermediate College) वर्त्तते ; स च पाटलिपुत्रविश्वविद्यालयमभिनिविशते। स्वाधीनताप्रथिते नेपालराज्ये शिक्षाया अपि स्वाधीनव्यवस्था सर्वथा समुचिता। विश्वविद्यालयान्तरान्तर्गतत्वे तु स्वाधीनशिक्षाप्रसारस्य असम्भाव्यतैव दत्तहस्ता स्यात्; स्वाभिमतविद्यापीठान्तरपरिग्रहे च स्वजातिभाषादि समुचितशिक्षाप्रसारणेन देशसमुन्नतिरबाधितप्रसरा भवेत्। अद्यत्वे किल प्रायेण सर्व्वाण्येव सनातनधर्म्मानुगामिराजाधिकृतानि पुरुषान्तरादिपरतन्त्राणि नालम्भवन्ति सन्तमपि धर्म्माद्यनुकूलमभिलाषमात्मनां मङ्गलोदर्कतां नेतुम्। केवलमिदमेवाद्य नृपालराज्यं यदि भाग्यादेव भारतभूमेस्तथा न परतन्त्रं नापि च निमीलितसनातनधर्म्मरागं तदा कथमिव शिक्षादिमुखेन तदनुगुणकृत्यकदम्बकाड़म्बरेण तत्स्वातन्त्र्यचरितार्थतामवनीपालमुकुटमणयस्तत्रत्या नोपकुर्व्वीरन्। सैव सुतरां शिक्षायाः परिणतार्थता सनातनधर्म्मिणां यद्धि तस्याः सनातनधर्म्मवैशिष्ट्याधायकाचारविचारादि परिपालनं नाम। तदाशास्महे यदनाशंसितमपि अनुन्मीलितमपि नेदं तिरोहितं तत्रभवतां नृपालराज्यधुरन्धराणामिति।

संस्कृतविद्याशिक्षासमुन्नतये सर्व्वस्वदानम्—विदितमिदं श्रीमतां पाठकमहाभागानां यदासामप्रदेशीयाः महा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोपाध्यायपदभाजः स्वर्गतपण्डितमहत्तमा धौरेश्वरभट्टाचार्य्या महाप्रयाणसमये स्वीयाः सर्व्वा एव सम्पदः पाणिनिव्याकरणे विद्यार्थिनाम् शिक्षासौकर्य्याय कञ्चन विद्यालयं स्थापयितुमुत्सृष्टवन्त इति। पाणिनीयव्याकरणे अधीतिनां वङ्गेषु तथा शिक्षासौकर्य्यं नास्ति यथा देशान्तरेषु ; परं वर्त्तमानेभ्यः सर्व्वेभ्य एव व्याकरणेभ्यः त्रिमुनिव्याकरणस्यास्य सुतरां प्रामाण्यं सकलशिष्टजनानुमतम्। तत्र तथाविधसमुन्नतिरद्य सफला, यया देशान्तरीणपाणिनिव्याकरण-विदां समानतां वङ्गप्रभवा लभेरन्। तथात्वञ्च नूनमेतेन प्रयत्नेन सम्यक् सम्पद्येत। व्यतीते त्रयोविंशत्युत्तरैकोनविंशतितमखृष्टाब्दीये आगस्तमासि सोऽयं विद्यालयः प्रदातुः स्वदेशे प्रतिष्ठापितः परिचालकमहाभागैः। मजःफरपुरात् पाणिनिव्याकरणे परमभिज्ञः श्रीयुक्त गणेशझा नामकः कश्चन पण्डितः समुपनीतस्तदध्यापकपदे। सम्प्रति तत्र नियमेन त्रयोदश विद्यार्थिनः साग्रहं विद्यामधिगच्छन्ति। क्रमेणास्य परिपुष्टिरेव समाशास्यते।

तत्रत्य एवापरः श्रीमान् अभयारामचतुर्धुरीणनामा महात्मकुलमणिः त्रयाणां तद्विद्यार्थिनां परिपोषणादिकृते परिचालकेषु द्विसहस्रकमुद्रा वितीर्णवान्। तदिदमस्माकमाशास्थानं यदद्यापि तथा संस्कृतानुरागिणश्च दानशूराश्च सदाचारसम्मानपरतन्त्राश्च भारते नैव दुर्लभतामासादयन्तीति।

पाठकमहाभागाः! धौरेश्वरदेवशर्म्माणो दीनब्राह्मणपण्डिता आसन्, यावज्जीवं प्रयत्नमाचरन्तस्ते यावदेव वित्तं संगृहीतवन्तः तावत् सर्व्वमेव यदद्य विद्यासमुन्नतये समुत्सृष्टवन्तः किमिदं नात्यद्भुतमिव प्रतिभाति! ऐहिकस्वार्थमात्रपरायणजनबहुले तावदस्मिन् युगे पवित्रजन्मनां तथाविधानामुद्भवो भारतवर्षस्य पुनरपि सौभाग्यं सूचयति। तदत्र किमन्यदाशास्महे केवलं महात्मानो धौरेश्वरभट्टाचार्य्याः क्रमेण स्वोपक्रान्तकर्म्मसाफल्यं सुरपुरे वसन्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव दर्शं दर्शं सहर्षमेव सुरसम्मानभागिनो विजयन्तामिति। अमीषामिदं महत् कृत्यमनुकुर्व्वन्तस्त्वापरेऽपि मनीषिणो वा धनिका वा विद्यासमुन्नतये यदि प्रयतेरन्, तदैव चिरखिन्ना सुरसरस्वती विलुप्तखेदा सती प्राचीनप्रहर्षमनुभवन्ती शुभाय भारतस्य सम्पद्येत।

नारीशिक्षासाहायकम्—नागपुरविश्वविद्यालयस्य उपाध्यक्षः सार्-श्रीयुक्तविपिनकृष्णवसुमहाभागः समुद्घोषितवान् यथा किषणगड़राजकोषाधिपतिः (दिवानबाहादुरः) पोनास्कायः स्वीय पत्नीस्मृतिरक्षार्थं नारीशिक्षासमुन्नतये नागपुरविश्वविद्यालये सप्तदशसहस्रकमुद्रा वितीर्णवान्। तत्र वयमाशास्महे यथा तद्दानपत्रे अवश्यम् अक्षरात्मना 'नारीधर्म्मोपदेशसंवलितैव शिक्षा प्रवर्त्तिष्यते तत्रेति' निरूढ़मास्ते। अन्यथा नारीधर्म्मोपदेशमपहाय केवलं भूतत्त्वाकाशतत्त्वादिशिक्षावितरणं नारीणां महते संसारापकाराय सम्भवतीति निपुणवेदिनां सम्मतम्। तदत्र भारते य एव नारीशिक्षा समुन्नतिं कामयन्ते त एव यदि तथा विवेकवशीभूता भवेयुस्तदैव देशगौरवमुपहितं स्यात्, अन्यथा तु व्यर्थ एव परिश्रमस्तत्र भवतां नहि केऽपि प्रेक्षावन्तः स्वमनिष्टमुत्पादयितुं लेशमात्रमपि प्रयत्नमनुतिष्ठेयुरिति।

तिलुड़ीशिक्षाश्रमः—बाँकुड़ा-वर्द्धमानमानभूमप्रदेशानां सीमान्ते 'वेहारीनाथ' पर्व्वतसन्निहिते तिलुड़ीसंज्ञकपदे ऊनत्रिंशदधिकत्रयोदशशततमवङ्गीयाब्दे फाल्गुने मासि श्रीमत् सतीशचन्द्रसेन वि, ए महोदयप्रमुखैः कतिपयैस्तत्रत्यमहानुभावैः कश्चन समीचीनः शिक्षाश्रमः समारम्भि, स एवायं तिलुड़ीशिक्षाश्रमनाम्ना व्यपदिश्यते। यत्र किल पदे सुसम्पादितमाश्रमस्य प्रतिष्ठानम्, तदिदमतिमात्रपरिणाहमाश्रमस्य कृते कर्त्तव्यानां कृत्यसमूहानामुपयोगं सम्यक्तया समावहते। तत्रैव सरोवरस्य पुष्पफलभैषज्यानां-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुद्यानानि च सुवृहत्प्राङ्गणादिकञ्च कृत्योपयोगाय सुसम्बद्धानि सन्ति, सुविस्तृतं पदमिदं राजकीयविक्राङ्कितपत्रप्रमाणकं कृत्वा महात्मना श्रीयुक्तनलिनाचभट्टाचार्य्येण शिचाश्रमपरिचालकेभ्यः प्रतिपादितमास्ते । स्वल्पेनैव च कालेन पञ्चकोटराजकुमारादीना-मितरेषाञ्च समीपतः स्थावरास्थावरसम्पद्विषया प्रायेण चतुर्दशसहस्र-संख्यकानि द्रव्याणि समासाद्य काव्य-व्याकरण-दर्शन-स्मृतिप्रभृति-शास्त्राध्यापनव्यवस्थामायुर्व्वेदविद्याप्रतिपादनोपयोगं विद्यार्थि-भवनमातुराश्रमम् अतिथिशालादिकञ्च व्यवस्थापयितुमयमाश्रमः समर्थो जातः । तत्र आयुर्व्वेदसमुन्नतये सार्द्धैकसहस्रं रूप्यकाणां मूलधनरूपेण नियोजितमस्ति शिल्पविभागेऽपि सहस्रमेकं रूप्य-काणाम् । बहुकालादूर्द्ध्वमेव तत्र ग्रामे कोटालिपाड़वास्तव्य-पण्डितप्रवरश्रीयुक्तहाराणचन्द्रकाव्यव्याकरण-स्मृतितीर्थपरिचालिता काचन संस्कृतविद्याचतुष्पाठी समवर्त्तत सैवेदानीमाश्रम-सम्बन्धितया परिगृहीता क्रमेण समुन्नीयमाना सन्दृश्यते । तत्र विद्यार्थिनां यथानियमेन सन्ध्यावन्दनादिप्रवृत्तिरनुकूलिता भवति, प्राचीनरीत्यनुसारेण धर्म्मादिपरिपालनार्थ यथाकालमुपदेशा वितीर्य्यन्ते । आह्निककृत्य मनुसंहिताप्रभृतीनां धर्म्माचारप्रति-पादकग्रन्थानां तत्त्वानि नियमेन विद्यार्थिनो ग्राह्यन्ते । चरित्र-शिचानुगुणा व्यवहाराः प्रतिपदमभिलच्यन्ते । किं बहुना यादृशी खलु शिचा धर्म्मानुगुणा च वर्त्तमानसमयोपयोगिनी च शारीरमानसशक्तिसंवर्द्धनसाधिका च सैव तदाश्रमपरिवृढ़ैरनुगृह्यते निगृह्यते च तद्विरोधिनी समयवशतो नितरामभितः प्रवर्द्धमाना ।

प्रत्यचमवलोकितं तत्पदमस्माभिरभिज्ञातञ्च सम्यक्तया शिचा-पचपातवासितचेतसामतिमात्रमुपयुज्यमानं तत् । आश्रमोऽयं परितः पर्व्वतपरिवृते ग्रामाद् बहिः सुरम्ये पदे प्रतिष्ठापितश्च सदाचार-विद्याचारित्र्यादिगुणगणान्वित-प्रवीणाध्यापकादिप्रयत्नविशेषोपचरि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य इत्यतः को वा तत्र विस्मयः। तदस्य क्रमसमुन्नति-मीश्वरसमीपे कामयमानाः सोद्यमकर्म्मिणां सुदीर्घमनामयं जीवन-माशास्महे येन पुनरपि प्राचीनविद्याचारादिसम्भवो महिमा भारतमलंकुर्वीतेति।

चन्द्रप्रशस्तिः *

(लेखकः—श्रीमदभयापदचट्टोपाध्याय एम्, ए)

हिमालयेषु मालया विशालशैलमालया
निगूढ़गाढ़गौरवा सुदूरकीर्त्तिसौरभा।
तुलादिदानकोटिहोमधूमधूतपातका
सुरालयैः पुरातनैश्च मण्डिता सुपण्डिता॥ १॥
पयोदमन्द्रयुद्धवाद्यनर्त्तितास्त्रयोद्धृका
पटिष्ठकाष्ठचारुकारुरम्यहर्म्म्यवीथिका।
अनङ्गसङ्गविभ्रमाङ्गनाभ्रमैरलङ्कृता
समृद्धिशान्तिशालिनी नृपालराजधानिका॥ २॥ [युग्मकम्]
महोच्चसौधराजयोऽत्र सम्भृताः समृद्धिभि-
स्तुतासु सिंहदारवारनामभूपवासभूः।
अनन्तरत्नपूरिता सुतुङ्गतोरणोच्छ्रया
चतुर्म्महल्लमालिका महेन्द्रसद्मतर्ज्जिनी॥ ३॥
प्रशास्ति तत्र शत्रुदर्पहारिमित्रभाग्यभू-
ररातिभीतिदण्डनीतिशास्त्रशस्त्रकौशली।

---

* श्रीमन्नेपालाधिराजमहासचिव—श्रीमन्महाराजचन्द्रसम्सेरवर्म्ममहोदयानां जन्मदिनमङ्गलमहोत्सवे समभिनन्दनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुकृत्यमर्त्त्यशर्म्मसूतिधर्म्मरक्षर्म्ममर्म्मवित्
सुधांशुमौलितपंकसत्तत्त्वचन्द्रभूपतिः ॥ ४ ॥

श्रीटीशेखरसार्व्वभौमनृपतिर्यन्मित्रतां काङ्क्षते
यो ऽयं भारतवर्षहर्षकमहास्वातन्त्र्यदर्पोज्ज्वलः ।
यत्कीर्त्तिस्तुहिनाचलं धवलयत्युद्गीयमाना मुहुः
सानन्दान्तरकिन्नरीयुवतिभिः शश्वद्भृशं सम्मता ॥ ५ ॥

वाणीयं मुखरा चला च कमला सापत्न्यभावं स्थिते
कुर्व्वाते कलहं दिवानिशमहो कस्मै प्रदेये इमे ।
इत्यालोच्य हरिर्ददौ तदुभयं यस्मै द्वितीयात्मने
यत्रागत्य च धैर्य्यमास्थितवती वाणीन्दिरा निश्चला ॥ ६ ॥

प्राच्या विद्या प्रतीच्या सममिह वसतो यत्र राज्याश्रमर्षौ
मुक्तिर्भुक्तिश्च यस्मिन् विदुषि कृतपदे द्वन्द्वभावं विहाय ।
सर्व्वारम्भी बहिष्टादपि विपुलमतिर्योऽन्तरत्यन्तशान्तः
साक्षी पूर्णोऽपि लीलाधृतनृपतिवपुर्देवदेवप्रसादः ॥ ७ ॥

यच्चन्द्रज्योतिरेतद् विशदयति दिशं नित्यमेवोदितं सत्
पाशी पाशेन बद्धो वितरति सलिलं पौरवर्गेषु नित्यम् ।
वह्निर्वार्त्तां विधत्ते गमयति शकटं रज्जुयन्त्रोढभारो-
ऽजस्रं दस्रौ प्रदत्तः सकलगदहरं भेषजं यस्य वश्यौ ॥ ८ ॥

विद्यागारेषु यस्यानिशमभिरमते भारती बद्धभावा
शस्त्रास्थानेषु लोहं गलयति रिपुभिर्विश्वकर्मा सुकर्मा ।
प्रासादोयं विशालो जगति निरुपमस्त्वष्टृनैपुण्यसीमा
दत्तो येनोत्तरेभ्यः सुविपुलमनसा नित्यसत्तेकभाजा ॥ ९ ॥

सहस्राक्षः पश्यत्यखिलमपि यो लोकचरितं
ज्वलद्दीप्तिर्दुष्टान् दहति सकलान् पावकवपुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगत्प्राणः शम्भुर्भवति धनदो नि(?)ऋ तिरथो
प्रचेताः पापानां यम इति च यो लोकपमयः ॥ १० ॥

यः सम्पूर्णकलः कलङ्करहितोऽमितावसानोद्यत—
श्चन्द्रः संस्तुलितो विधातृशशिना भूमौ नतो गौरवात् ।
वीक्ष्याकाशगतिं विधोर्लघुतया वेलक्ष्यमचालयत्—
तस्यायं करुणानिधिः पशुपतिर्धृत्वा स्वके मस्तकम् ॥ ११ ॥

निःशेषारिकुलेन्धनोऽप्यतितरां दीप्तप्रतापानलो
दानेनार्द्रकरोऽपि यो नृपगजः संशोभते निर्मदः ।
सौमित्रोऽपि च शक्रजिद् रिपुषु यो भीमोऽपि दुर्य्योधनो
यश्चित्राश्विननिष्ठमूलभरणो नक्षत्रवत्संच्युतः ॥ १२ ॥

यस्मिञ् शासति राजनि प्रियजने दौःशासनं भारते
दण्डः शङ्करशिष्य एव हि पुनः कूटोन्नतिः पर्व्वते ।
उद्वाहेषु करग्रहाः कुटिलता रामाकटाक्षेषु वै
दृप्तानां द्विषतां शिरःस्ववनतिः स्त्रीषु स्थिता भीरुता ॥ १३ ॥

सौजन्याब्धिसुधाकरस्य विदुषो मन्दस्मिताभाषिणो
लोकक्षेमकृतो दिगन्तविततख्यातेर्नृपाणां मणेः ।
तस्यार्थस्य विशालकल्पदतरोश्छायां श्रिताः शीतलां
नो विद्मः सुकृता वयं कुशलिनस्तापस्य वार्त्तामपि ॥ १४ ॥

चतुर्विंशत्यब्दान् समुपबुभुजे मामकृपणो
महोत्साहः प्रयान् मयि समरसोऽद्यापि सदयः ।
इति प्रेम्णा लक्ष्म्या सुदृढमुपगूढोऽङ्कगतया
मुखं चुम्बत्यस्याः सरसनयनं यः स जयतु ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुपतिचरणाब्जे भृङ्गभूतस्य राज्ञो
जननदिवसमेतन्मङ्गलं भावि नूनम् ।
वयमिह तु महेशं प्रार्थयामोऽस्य भक्ताः
शतपरिमितमायुः शान्तिसौख्यं समृद्धिम् ॥ १६ ॥

कालिदासस्य अनुरूपवराय कन्यकादानम्

(लेखकः—क. अ. रामलिङ्गशास्त्री)

अधुना किल भारतवर्षे भूसुरवरेषु धनिका निर्धनाश्च लौकिका वैदिकाश्च साकल्येन क्लिश्यन्ते स्वीयकन्यकानां वराय प्रतिपादने। किमत्र निदानम् ? इति सूक्ष्मेक्षिकया पर्यालोचनायाम्—केचिन्महाशयाः कालस्य कुटिला गतिरिति कलिकालं दूषयन्ति ; अन्ये तु आंग्लकलाभ्यसनं निन्दन्ति ; परे तु वराणां पित्रोरर्थाशा-पिशाचिकावेशं हेतूकुर्वन्ति ; एवं बहवो विमर्शका बहुधा उन्निन्दन्ति ; कतिचित्तु बह्वोः कालात् पूर्वं वाणिज्यार्थं भारतमभ्यागतानामाङ्ग्लानां क्रमेण प्रशासने स्वायत्ते, राज्यधुरां निर्वोढुं साहाय्यकान्वेषणे, तत्तद्देशवासिभ्यः कलाशालादिषु स्वीयभाषास्वरूपप्रबोधनेन आयव्ययादिसङ्कलन-लेखन-प्रशासनादिपरिपाटीनिष्णातेभ्यो लेखक-(Writer) पर्य्यवेक्षक-(Inspector) गणक-(Accountant) माण्डलिक-(Collector) ग्रामणी-(Village-Munsiff) प्रभृतीनि स्थानानि दत्त्वा, 'तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि। अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मृष्टमश्नाति ॥' इति वर्णितरीत्या व्रीहिश्यामाकादिधान्यविनिमयेनैव आवश्यकवस्तूनि विक्रेतृभ्यः क्रीत्वा समनस्तृप्ति देहयात्रां निर्वर्त्तितवद्भ्यो मासिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेतनतया राजतानि रूप्यकाणि अपरिमितोत्कोचवन्ति समर्प्य, घृतसूपसमग्रभोजन-प्रतिग्रहमात्रलुब्धान् द्विजकुमारान् स्वीयकैङ्कर्ये परान् अर्थार्जनासक्तान् स्वधर्माचारशोलत्यागिनश्च अकुर्वन्नेते इति नेदं तिरोहितं नाम पुरावृत्तविदाम् ; तत आरभ्य स्वाभाविकी वित्तैषणा भारतवर्षीयस्य एकैकस्यापि चेतःसरसिजं सर्वदा परिपीडयितुमुपचक्रमे ।

एतस्मिन्नन्तरे राजकीयानामधिकृतानां कुमारेभ्यः ये खलु धनिकाः—स्वकीयाः कन्यका दित्सन्ति, त एते बहूनि यौतकानि राजतपात्राणि विलक्षणानि वैदेशिकवस्तूनि च वितरन्ति विवाहसमये ; एतद् दृष्ट्वैवान् अकिञ्चनोऽपि कश्चन द्विजः स्वकुमारस्य यस्मिन् कस्मिंश्चिदधिकरणे अधिकृतस्य दारक्रियायां सर्वथा आत्मना तुल्याद् दीनादपि कन्यापितुः सकाशात् प्रभूतानि यौतकानि लब्धुं प्रतीक्षते प्रभुवत् । एवमेव 'गतानुगतिक'न्यायेन 'यस्यां मज्जन्ति बहवो मनुष्याः' इत्युपदिष्टरीत्या धनाशाश्रयाशोऽयं सर्वत्रापि भारतवर्षे समुद्दीपितुमारेभे समस्तानामास्तिकानामपि मानसकुहरे ; नन्वत एव आस्माकीनं समीचीनं भारतवर्षम् अवसन्नप्रायं, स्वीयं प्राचीनाचारमूरीकर्तुं वा परकीयाचारं परिहातुं वा अशक्नुवानं त्रिशङ्कोः संस्थितिमनुभवतीति को वा जनो न जानाति ?

कन्यकानां पितृभ्रातृमातुलादयः खलु अद्यत्वे, जातकजालकमण्डितकराः, 'यस्मै कस्मैचित् कन्या देया' इति ग्रामाद्ग्रामान्तरं नगरान्नगरान्तरं च अनिशं निशाचरा इवाटन्तः, वातातपक्लेशमसहमाना मानातीतां तापपरम्परामिव हृदये उत्पादयन्तो निराशा गतागतानि कुर्वते ।

ईदृशी शोच्या दशा भारतवर्षस्य विवाहविषये समुपागतेति न कोऽपि मनीषी परिहर्तुमेतां प्रयतत इति हा ! हा !! कष्टतमम् !!!—इति अभिप्रयन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तु ; एतस्या दुरवस्थायाः को नाम भो निवर्त्तकोपाय इति चेदनुयुज्यते, उच्यते—अनुरूपं दाम्पत्यम् अभिलषद्भ्यां बधू-वराभ्यां विद्वद्भ्यां प्रतिज्ञा काचिन्निर्वोढ़व्या—तद्यथा—

'यौतकमपरिमितमर्थयमानस्य वरस्य न मया पाणिगृहीत्या भवितव्यम् ; यावज्जीवं कन्ययैव वा मया भाव्यम्' इति कुमार्य्या,

वरेण च—'यस्याः कृते असंख्येयं यौतकं वितितीर्षन्ति, तस्याः पाणिग्राहकेण न मया भवितव्यम्, वरं नैष्ठिकब्रह्मचर्य्यम्' इति,

ग्रामपञ्चायत्तपरिषदा च व्यवस्थेयदमादरणीया यत् यौ खलु माता-पितरौ कुमाराणां कुमारीणां वा यौतकमपरिमेयमादातुं दातुं वा सज्जौ निर्बध्नीतः, तौ तदा, समुचितेन दमेन दण्डनीयौ, ग्रामाद्वा बहिष्कार्यौ, बन्धुतया वा परिहेयौ—इति ।

उपायोऽयं सर्वेषां हृदयङ्गमश्चेत्—सकलैरास्तिकाग्रगण्यैरनुष्ठान-गोचरः क्रियतांतमामिति सम्प्रार्थ्यते सानुनयम् ।

प्रकृतमनुसरामः—श्रीमन्मन्वादयो हि स्मर्त्तारः—कुलीनाय सुन्दराय अनुरूपाय वराय कन्यकादानम् आमनन्ति ; कदा-चित् परिणयोचितगर्भाष्टमजन्माष्टमादिवयोऽवस्थानमप्राप्तवतीना-मपि सुमतीनां सुन्दरीणां दिष्ट्या अनुरूपवरोपगमे तादृशवराय तत्क्षणमेव विश्राणनमुद्गृणन्ति ; अनुरूपवरालाभेन कन्यका यदि कदाचित् पुष्प्यन्ति, तदा तदप्यकिञ्चित्करं मन्यमानाः, अनुरूपवरोप-लब्धये वत्सरत्रितयं प्रतीक्षणीयम्, तदनन्तरमप्यलाभे तु कन्यैव वा स्वयं वरं वृणुयादिति प्रणिगदन्ति ; प्रथमं साधारणवराय वाचा दित्सिताया अपि कतिपयदिवसाभ्यन्तरे ततोऽप्यनुरूपतरो वरः स्वयं चेत् समापतेत्, तर्हि, तस्मा एव कन्या प्रतिपादनीयेति ईरयन्ति—यथाहि—

नवमाऽध्याये—(मनुस्मृतौ)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥८८॥
काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥८९॥
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥ ९०॥' इति,
'दत्तामपि हरेत् कन्यां श्रेयांश्चेद्वर आव्रजेत् ॥' इति च ।

त एते 'गौरी'संज्ञिकायाः कन्यकायाः परिणयगुणगणं वा ऋतुमतीविवाहवर्जिनव्रजं वा न खलु न जानन्ति ; अथापि किमर्थम् अमी—ऋतुमत्या अपि सदत्याः कन्याया वत्सरत्रिकप्रतिपालनम् अनुजानन्ति ? कुलशीलश्रौतकलाकुशलाय अनुरूपायैव वराय कुमारीणां प्रतिपादनार्थं खलु !

अतो महानुभावानां मन्वादीनां, मधुमयरचनानां धर्मतत्त्वानाञ्च मार्गोपदेशकस्य आदिकवेश्च आशयानुसारेण महाकविः कालिदासः— कुलेन, शीलेन, लावण्येन, तारुण्येन, विनयार्जवश्रौतादिगुणैश्च अनुरूपाय वरायैव कन्यकाप्रदानं तत्र तत्र स्वीयकाव्येषु सरसं वर्णयति— तथाहि—रघुवंशे तावत्—इन्दुमती-स्वयंवरघट्टे सुनन्दया प्रस्तावितेषु बहुषु राजन्येषु कुमार्या इन्दुमत्या प्रतिषेधभङ्ग्याऽपोहितेषु, रघुकुमारस्य अजमहाराजस्य वंशापदानकथनावसाने कविरिदं पद्यं निबबन्ध—षष्ठे सर्गे—

'कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन' ॥७९॥ इति

अत्र निर्दिष्ट-कुलकान्तितरुणवयःश्रौतशीलार्जवादिसुगुणैरलङ्कृता कन्या तादृग्गुणैः परिष्कृताय वराय देया इति स्वाकूतं कविसार्वभौमोऽयं विशदयति ; अत्रत्यं तुल्य-पदञ्च अनुरूपार्थकं वेदितव्यम् । अनन्तरपद्येन च नरेन्द्रकन्या संवरणमालयेव प्रसादामलया दृष्ट्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुमारं प्रत्यग्रहीदिति प्रस्तौति। करभोरूः कन्यका सा मङ्गलचूर्ण-गौरं माल्यम् अजमहाराजस्य कण्ठे धात्रीकराभ्याम् आसञ्जयामास; ततः समगुणयोर्वधू-वरयोर्योगेन प्रीताः पौराश्च—अजमहाराजेन अनुरूपेण वरेण सङ्गता इयम् इन्दुमती—'मेघमुक्तम् अनुरूपं शरच्चन्द्रम् उपगता ज्योत्स्ना' 'अनुरूपं पयोधिम् अवतीर्णा जाह्नवी' इत्याद्यभिनन्दनवचनम् उदीरयामासुः इति महाकविः प्रकटयति—

'शशिनमुपगतेयं कौमुदी मेघमुक्तम्
जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः' ॥ ८५ ॥ इति।

पद्येऽस्मिन् द्वितीयपादस्थम् अनुरूप-पदं प्रथमपादेऽपि योज्यम्; तत्रैव सप्तमसर्गोपक्रमे—

'अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम्।'

इति सूक्ते अनुरूप-पदपर्यायस्य सदृशपदस्य उपयन्तुर्विशेषणेन, अन्वक्षम् आविर्भूतेन अनुरूपेण स्कन्देन सङ्गताया देवसेनाया निदर्शनेन च कन्या-कुमारयोः सकलांशानुरूपं दाम्पत्यम् कविपुङ्गवोऽयं 'वागर्थाविवसम्पृक्तौ'···इति सुभाषिते पार्वतीपरमेश्वरयोरिव, तत्स्नुषा-कुमारयोरिव च अनुध्यायन् मोदते इत्यभ्यूहितुं शक्यते।

किञ्च, प्रथमसर्गे—

'तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः॥'

इति सूक्त्याम्—स्वस्य सदृशदारेषु सुदक्षिणायां पुत्रोत्पत्तितत्परो दिलीपो मन्थरफलैर्मनोरथः समयं यापयामास इति वर्णयन्—विश्वामित्रमहामुनेरागमनाभिनन्दनवेलायां महाराजदशरथेन—

'यथाऽमृतस्य संप्राप्तिर्यथा वर्षमनूदके।
यथा सदृशदारेषु पुत्रजन्माऽप्रजस्य च॥'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति व्याहृतमिति आदिकविना प्रयुक्तं सुभाषितं स्मारयति।

अपि च,

'तस्य दाक्षिण्यरूढ़ेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥'

इति सूक्तौ, सुदक्षिणा-दिलीपयोरध्वर-दक्षिणयोर्निदर्शनेन, राज्ञ्याः 'सुदक्षिणा' इत्यन्वर्थनामधेयेन च जाया-पत्योः सर्वथाऽनुरूप्यं सुष्ठु उपपादितम् इति निर्णीयते।

अन्यच्च, आत्मजो हि नाम अनुरूपायाः पत्न्या हृदयमुकुरे प्रतिफलितं पितुः प्रतिरूपमिव इति 'रूपं रूपं प्रतिरूपो बभूव' इति श्रुतिशिरसाऽवगमितमाशयं महाकविकुञ्जरोऽसौ—

'रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम्।
न कारणात् स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्॥'

इति सूक्त्या विशदयति। एवमेव कुमारसम्भवे—

'स मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीयाम्
आत्मानुरूपां विधिनोपयेमे॥'

इत्यत्र मर्यादातीतमहिमाऽपि विदितमर्यादो नगाधिराजः—'रूपोच्चयेन विधिना मनसा कृता नु' इत्यन्यत्रोत्प्रेक्षितरीत्या पितॄणां मनसा सृष्टां मुनिमानससम्मोहिनीं मनोरमां मेनां नाम आत्मानुरूपां कन्यां यथाविधि परिणिन्ये कुलस्य स्थितये—इति वर्णनेन, यथा किल आत्मनो वरस्य (हिमवतः) अनुरूपा कन्या, तथैव एतस्या (मेनायाः) वरोऽप्यनुरूप इति अर्थात् सिध्यति, 'विवाहश्च विवादश्च समयोरेव शोभते' इति न्यायश्च अनुगुणो भवति। नीतिवाक्यस्थमिदं समयोरिति पदं पुरातन-परिणयनादिविषये, 'समयोः' कुलशीलादिना अनुरूपयोः, क्रौर्य शौर्यादिना समबलयोः इत्यर्थे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयोजितम्, इदानीन्तनविवाह-विवादयोस्तु, 'समयोः'—मा—लक्ष्मीः, सम्पदिति यावत्, तया सहितयोः, सम्पन्नयोरेव विवाहो विवादश्च चकास्ति इति अयमर्थोऽस्माभिरुन्नीयते ।

अन्यच्च, अनुरूपेण वरेण अनुगुणायाः कुमार्याः परिणयनमिदम्—न केवलं वैषयिकसुखानुभवार्थं, किं तर्हि ?

'यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
तथा गृहस्थमाश्रित्य सर्वे जीवन्ति चाश्रमाः ।'

इत्युपश्लोकित गृहस्थाश्रमधर्माचरणार्थम्, अतएव श्रीमद्रामायणे—

'इयं सीता मम सुता सहधर्मचरी तव ।'

इति कविकोकिलेन गीतम् । पितॄणापाकरणार्थम्,...रति-लाभस्तु आनुषङ्गिकं फलमिति कवेरभिसन्धिरित्युन्नीयते—'प्रजायै गृहमेधिनाम्' 'परिणेतुः प्रसूतये' 'कुलस्य स्थितये मेनामुपयेमे' 'तदा पितॄणां मुमुचे स बन्धनात् ।' 'कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ।' इत्यादि सुवचनपरिशीलनेन ।

अभिज्ञानशकुन्तले च प्रथमेऽङ्के—अधुना अमुया आचर्यमाणं मृगतर्णकपरिपोषण-लतावृक्षालवालपरिपूरण-नीवारधान्यप्रवर्धन-सपर्याकुसुमावचयनादि वैखानसं व्रतं किं दारक्रियावधि निषेवितव्यम् ? अहोस्विद् यावज्जीवम् ? इति दुष्यन्तेन अनुयुक्ता प्रियंवदा—'अज्ज ! धम्माचलणेवि परवसो अअं जणो ; गुरुणो उण से अणुरूववरप्पदाणे संकप्पो ।' इति प्रत्यवादीदिति प्रियंवदाद्वारा काश्यपाशयनिवेदनव्याजेन, गुरोः—मन्वादेरपि अभिसन्धिरीदृश एवेति महाकविः संसूचयति । 'सखि अनसूये ! शकुन्तला किंनिमित्तं वनज्योत्स्नामतिमात्रं पश्यति ? किं त्वं जानासि ?' इति प्रियंवदया अनुयुक्ता अनसूया—'नाहं वेद्मि ; त्वमेव कथय !' इति प्रतिजगाद । तदा प्रियंवदा—'जह वणजोसिणी अणुरूवेण पाअवेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगदा, एव्वं णाम अहं वि अत्तणो अणुरूवं वरं लहेअत्ति' इति प्रत्यगादीत् ।

तत्रैव चतुर्थेऽङ्के—कुसुमावचयव्यापृता अनसूया—"हला पिअंवदे ! गन्धव्वेण विवाहविहिणा निव्वुत्तकल्लाणा सउन्दला अणुरूवभत्तुगामिणी संवुत्तेत्ति णिव्वुदं मे हिअअं ; तह वि एत्तिअं चिन्तणिज्ज"…इति वचनेन, इतः स्वपुरीं प्रतिनिवृत्तः स राजर्षिः शुद्धान्तसम्भोगनितान्ततृप्तः प्रियसखीं स्मरति वा न वा इति चिन्तया पर्याकुलो भवति, अनुरूपेण प्रियेण सङ्गता प्रियसखीति प्रमोदं चानुभवतीति ज्ञायते ।

'दुष्यन्तेन ऊढ़ां शकुन्तलां श्रुत्वा, तातकाश्यपः किं प्रतिपत्स्यते ? न जाने' इति प्रियंवदा व्याहृता अनसूया 'गुणवदे कसआ पडिपादणिज्जेत्ति अयं दाव तादस्स पठमो सङ्कप्पो ; तं जइ देव्वं एव्व सम्पादेदि, णं अप्पआसेण किदत्थो गुरुअणो' इति प्रतिजगाद ; अनेन, कुल-कान्ति-तरुणवयो-विनयसुशीलादिगुणैरनुगुणाय रमणाय कन्या देया, 'गुणहीनाय न कर्हिचिद् देया' इति स्वाशयमुद्घाटयति कविकुलतिलकः ; सर्वोऽपि पिता तावत् कन्यायाः, कुलशीलादिगुणशालिने वरायैव स्वीयां कन्यां दित्सति सामान्यतो निर्दिशतोत्यभ्यूह्यते—'माता वित्तं पिता श्रुतम् ।' इति स्मृतेः

काश्यपः—पतिकुलाय शकुन्तलाप्रस्थापनसमये शकुन्तलां, तत्परिपालितां नवमालिकां नाम लतां चोद्दिश्य एवं व्याजहार—'वत्से !

सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं स्वगुणैर्गता त्वम् ।
चूतेन सङ्गतवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतशङ्कः' ॥ १२ ॥ इति ।

'अनुगुणाय रमणाय कन्या वितरणीया, नवमालिका लता च पार्श्वस्थानोकहे प्रसारणीया' इति महती चिन्ता बहुतिथं मम चेतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ममन्य ; साऽधुनैव दिष्ट्या पर्य्यपूरि इति मदन्तरात्मा विशदो जात इति मोदते महर्षिः,—

'पुत्रीति जाता महतीह चिन्ता
कस्मै प्रदेयेति महान् वितर्कः ।
दत्त्वा सुखं प्राप्स्यति वा न वेति
कन्यापितृत्वं खलु नाम कष्टम् ॥'

इत्यभियुक्तोक्तिं स्मृतिपथमुपनयति च । 'दिट्ठिआ धूमावरुद्धदिट्ठिणो वि यजमाणस्स आहुदी पावए एव्व पडिदा ; वच्छे ! सुसिस्स परिदिस्सा विअ विज्जा असोअणिज्जा सि संवुत्ता' इति तात काश्यपेन अद्यैव अभिनन्दितं, दुष्यन्तेन शकुन्तलायाः गान्धर्वविधिना परिणयनम् इति प्रियंवदा वदति, एतेन, अनुरूपवराय कन्याया दानम्—पावकाय आहुतिप्रतिपादनमिव, सच्छात्राय शास्त्रप्रचारणमिव च पावनं फलपर्य्यवसन्नं च भवतीति प्रबोध्यते ; यजमानस्य धूमावरुद्धदृष्टेरिति विशेषणेन, कन्यकाजनकस्य, अनुरूपवरसंपिपादयिषया बहुनगराग्रहारग्रामटिकादिपर्य्यटनेन धूमाभिभवजन्यनयनाकुली-करणमिव तिमिरादिरोगोपप्लुतनेत्रत्वं भवेदिति प्रतीयते ।

पञ्चमेऽङ्के—शार्ङ्गरवेण दुष्यन्ताय कथितेन काश्यपस्य वाचिकेन च—सुशीलयोः कुलीनयोः लावण्यरमणीययोरनुकूलतमयोर्वधू-वरयोः संयोजनेनैव—प्रजापतेश्चिरप्ररूढम् अननुरूपकन्या-कुमारयो-र्योजनजनितम् अयशःप्रमृष्टं भवतीत्यय बोध्यते—तथाहि—

'त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमतीव सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिराय वाच्यं न गतः प्रजापतिः ॥'

इति पद्येन । इदमेवाकूतं रघुवंशेऽपि महाकविरयं सरसं योज-यामासेति विज्ञायते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥' इति ।

किञ्च, कवितल्लजोऽयम्—अनुरूपयोर्बधूवरयोरिव निरतिशयोऽनुरागः, तन्मूलकं सर्वोपकारक्षमगृहस्थाश्रमधर्मनिर्वहणं, 'प्रजया हि मनुष्यः पूर्णः' इत्युपदिष्टरीत्या स्वस्य पूर्णत्वम्, उभयभुवनसुखं चान्यच्च सिद्ध्यतीति चक्रवाकदृष्टान्तेन, मालविकाग्निमित्रे—अग्निमित्रवचनव्याजेन च प्रतिपादयतीत्यवगम्यते—तद्यथा—

'रथाङ्गनाम्नोरिव भावबन्धनं
बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः
परस्परस्योपरि पर्यचीयत' ॥ २४ ॥ स, ३ । इति

'अनातुरोत्कण्ठितयोः प्रसिद्ध्यता
समागमेनाऽपि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः' ॥ इति,

अत्र च अनुत्कण्ठितायाः, उत्कण्ठितस्य कमनस्य च 'काकतालीय'-न्यायेन यदि दिष्ट्या समागमः फलति, तद् न मे प्रीतिमावहति, किं तर्हि ? उत्कण्ठितयोर्बधूवरयोर्योजने विषये प्रत्यूहव्यूहेन विवाहव्यपोहने सति, तन्मूलकः कायपरित्यागोऽपि प्रीतिमावहेत् किञ्चिद् इति स्वाशयप्रबोधनेन, सर्वथा अनुरूपमेव दाम्पत्यं महाकविं प्रीणयतीति निश्चीयते । एवमादिभिरुदाहरणनिरूपणैः,—

कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न स विरौति, न चापि स शोभते
भवति योजयितुर्वचनीयता ॥'

इत्यभियुक्तोक्त्या, आदिकवेः श्रीमद्वाल्मीकेः, महानुभावानां मन्वादीनां चाशयपरिशीलनेन, कुमार्य्यः कुमारेभ्योऽनुरूपेभ्य एव प्रतिपादनीया इति स्वीयमाशयं—'रत्नं समागच्छतु काञ्चनेन' इति सुवचनेन सुनन्दायाः, महाकविकुञ्जरोऽसौ स्वकाव्यनिकुञ्जेषु तथाऽतितरां मधुरं गर्जति, यथा नाम साहित्यसौधाग्रे पादचारिण सञ्चरतोर्मातापित्रोः श्रवणपथावतरणेन प्रतिध्वनिरुदियात्, इत्येतदादिकं सम्यग् विमृश्य, विदुषीभिः कुमारीभिः, वरेण्यैर्वरैश्च स्वाभिसम्यतिसन्धिपरयोः पित्रोस्त्रपावहं कुलघ्नं कृतघ्नं चाभिप्रायं विमलीकृत्य वा विसृज्य वा ब्राह्मादिविवाहचतुष्टये एव विशिष्य आधेया आस्था, न तु सर्वथा आसुरादिषु अधमेषु अघावहेषु आधमर्ण्यजीवातुषु अधोगतिप्रापकेषु विवाहेषु इति संसूच्यतेऽस्माभिः सानुशयं सादरातिशयं चेति ।

गुरुशिष्यसंवादः

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थः

गुरुः ।—भो वत्साः ! संस्काराणामुपयोगित्वमितःप्राक् सामान्यत उपपादितम् । तत्र—"चित्रं कर्म्म—यथानेकै"रित्याद्युपमार्थोऽपि संक्षेपतः कथितः । अद्य तावत् पूर्व्वोक्तोपमानोपमेयगतसामान्यधर्म्मप्रकाशनद्वारा तेषां (संस्काराणाम्) साम्प्रतमप्युपयोगित्वमस्तीति विशदं प्रतिपादयितुमिच्छामि ।

प्रथमशिष्यः ।—"अष्टचत्वारिंशत् संस्कारा" इति कथितमाचार्य्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादेन। के ते अष्टचत्वारिंशत् संस्कारा इति प्रथमतः श्रोतुमिच्छामः, पश्चात्तेषां लक्षणमुपयोगित्वञ्च श्रोष्यामः।

गुरुः।—तथैव भवतु। (संस्काराणां नामकथनं संख्याकीर्त्तनं) युष्माकमभिप्रायत एव तेषां नामानि प्रथमतः कीर्त्तयामि। १—गर्भाधानम्। २—पुंसवनम्। ३—सीमन्तः। ४—विष्णुवलिः। ५—जातकर्म्म। ६।—नामकरणम्। ७—उपनिष्क्रमणम्। ८—अन्नप्राशनम्। ९—कर्णवेधः। १०—चौलम् (चूड़ा)। ११। अक्षरस्वीकरणम् (विद्यारम्भः)। १२—उपनयनम्। १३। व्रतम् (ब्रह्मचर्य्यम्)। १४—समावर्त्तनम्। १५—विवाहः। १६—उपाकर्म्म। १७—उत्सर्ज्जनम्।

अथ सप्त पाकयज्ञाः।

१८—हुतम्। १९—प्रहुतम्। २०—आहुतम्। २१—शूलगवः। २२—वलिहरणम्। २३—प्रत्यवरोहणम्। २४—अष्टकाहोमः।

अथ सप्त हविर्यज्ञाः।

२५—अग्न्याधानम्। २६—अग्निहोत्रम्। २७—दर्शपौर्णमासौ। २८—चातुर्म्मास्यानि। २९—आग्रयणेष्टिः। ३०—निरूढ़पशुबन्धः। ३१—सौत्रामणी।

अथ सप्त सोमयज्ञसंस्थाः।

३२—अग्निष्टोमः। ३३—अत्यग्निष्टोमः। ३४—उक्थ्यः। ३५—षोड़शी। ३६—वाजपेयः। ३७—अतिरात्रः। ३८—आप्तोर्यामः। ३९—वाणप्रस्थम्। ४०—सन्यासः।

अथ सप्त आत्मगुणाः।

४१—दया। ४२—अनसूया। ४३—शौचम्। ४४—अनायासः। ४५—माङ्गल्यम्। ४६—अकार्पण्यम्। ४७—अस्पृहा।

अथ शेषसंस्कारः।

४८—अन्त्येष्टिः। इत्यष्टचत्वारिंशत् संस्कारा अवगन्तव्याः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र गौतमवचनं प्रमाणमागन्तव्यम्। तथाहि—गौतमः—

(क) गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म्म-नामकरणान्न-प्राशनचौड़ोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्म्मिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्राह्मणानामितेषाञ्चाष्टका-पार्व्वणश्राद्धश्रावण्याग्रहायणी-चैत्राश्वयुजीति सप्त पाकयज्ञसंस्थाः।

(ख) अग्न्याधेयमग्निहोत्र-दर्शपौर्णमासावग्रहणं चातुर्म्मास्य-निरूढ़पशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्थाः।

(ग) अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोड़शीवाजपेयोऽतिरात्र आप्तोर्यामः—इति सप्त सोमसंस्था इत्येते चत्वारिंशत् संस्काराः।

(घ) अथाष्टावात्मगुणाः—दया सर्व्वभुतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति।

(ङ) यस्यैते न चत्वारिंशत् संस्कारा न वाष्टावात्मगुणा न स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति।

(च) यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति॥"

गौतमधर्म्मसंहिता—८म अध्याये।

उक्तेषु संस्कारेषु गर्भाधानं प्रथमः, अन्त्येष्टिस्च शेषः। एतेन जन्मावधिमरणपर्य्यन्तमस्मिन् खलु पवित्रभारतवर्षे वर्णाश्रमिणां जीवनं संस्कृतं सुतरां पूतमासीदित्यवगम्यते। स्त्रीणामाद्य ऋतु-कालो गर्भाधानसमयः, एवमन्येषामपि संस्काराणां समयः शास्त्रेण प्रतिपादितः। स च समयो यथास्थानं पश्चाद्वक्ष्यते, इदानीमिद-मवगम्यतां श्रीमद्भिर्यदस्मिन् कर्म्मक्षेत्रे भारतवर्षे वर्णाश्रमिणां जीवने समय एतादृशो नासीदेव यदा तेषां मनसि पापं पदं कर्त्तु-मशकत्। यतस्तत्तत्संस्काराणां कर्त्तव्यानि पालयतामेव तेषां जीवनमभवदतिवाह्हितमित्युक्तदिशापि संस्काराणां सार्वकालिक-मुपयोगित्व मुपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमशिष्यः ।—उपयोगित्वमेषां (संस्काराणां) पश्चादस्माभिः श्रोतव्यम् । प्रथमत एषां संख्यासम्बन्धो यः संशयस्तस्यैवं समाधानमवगन्तुमिष्यते ।

गुरुः ।—उच्यतां संख्यासम्बन्धी कीदृशः संशयः श्रोष्यताम् ।

अथ संस्काराणां संख्याविचारः

द्वितीयशिष्यः ।—संस्काराणामष्टचत्वारिंशत्त्वमुपपादितं गुरुपादेन । केचित्तु संस्काराणां षोड़शत्वमाहुः । तथाचात्र व्याससंहितावचनम्—

गर्भाधानं (१) पुंसवनं (२) सीमन्तो (३) जातकर्म्म च (४) ।
नामक्रिया(५)निष्क्रमणा(६)न्नाशनं (७) वपनक्रिया (८) ॥
कर्णवेधो (९) व्रतादेशो (१०) वेदारम्भक्रियाविधिः (११) ।
केशान्तः (१२) स्नान (१३) मुद्वाहो (१४) विवाहाग्निपरिग्रहः(१५) ॥
त्रेताग्निसंग्रहश्चेति (१६) संस्काराः षोड़श स्मृताः ।
नवैताः कर्णवेधान्तामन्त्रवर्ज्जं क्रियाः स्त्रियाः ।
विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश ॥

एवञ्च "यस्यैतेऽष्टचत्वारिंशत् संस्काराः"—इति पूर्व्वकथितगौतमवचनेन सार्द्धमुपन्यस्तव्यासवचनानि विरुद्धतामावहन्तीति मे संशयः ।

तृतीयशिष्यः ।—ममाप्यस्ति संशयः । तथाहि केचित् संस्काराणामष्टविधत्वं वर्णयन्ति । अत्र ते मलमासतत्त्वधृतं वचनमेतत् प्रमाणयन्ति—अतएव नारायणपद्धतौ

"अष्टौ संस्कारकर्म्माणि गर्भाधानमिव स्वयम् ।
पिता कुर्य्यात्तदन्यो वा तस्याभावेऽपि तत्क्रमात्" ॥

(मलमासतत्त्वम्)

चतुर्थशिष्यः ।—ममाप्यपरः संशयः । तथाहि "कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधि"रिति पूर्वोक्तव्यासवचनेन कर्णवेधस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारत्वं स्फुटमायाति। स्मार्त्तस्तु कर्णवेधस्य संस्कारत्वं न स्वीकृतम्—तथाहि मलमासतत्त्वे तदीयपङ्क्तिः—

"कर्णवेधस्य संस्कारत्वाभावान्न तथा नियमः"। इति।

यदि नाम कर्णवेधस्य संस्कारत्वं न स्यात्तर्हि व्यासवचनवर्णितं षोड़शत्वं संस्काराणां व्याहन्येत, ततश्च—

"संस्काराः षोड़श स्मृताः"

इति तदुक्तं कथमुपपद्यते च तदपि समाधेयमिति मे संशयो व्याख्यातः।

पञ्चमशिष्यः।—ममाप्यन्यः संशयः। तथाहि—पूर्वोक्तगोतम वचने शेषसंस्कारस्य (अन्त्येष्टेः) तथा व्याससंहिताप्रतिपादित-कर्णवेधस्य नाम नैव दृश्यते, किमत्र कारणम्? एतेन गौतममते कर्णवेधस्य तथा अन्त्येष्टेश्च किं संस्कारत्वमेव नास्ति?

षष्ठशिष्यः।—ममाप्ययं संशयः—तथाहि गौतमेन—"इत्येते चत्वारिंशत् संस्काराः"—इत्युक्त्वा—"अथाष्टावात्मगुणाः"—इति पृथगुक्तम्। परतश्चापि तेन (गौतमेन) "यस्यैते न चत्वारिंशत् संस्काराः, न वाष्टात्मगुणाः न स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति" इत्येतेनापि संस्काराणां चत्वारिंशत्त्वं तैः सह संस्काराणां पार्थक्यञ्च स्पष्टमुपपादितम्। ततश्च तेषामष्टचत्वारिंशत्त्वं कथमुपपद्यत इति मे वक्तव्यम्।

सप्तमशिष्यः।—"यस्यैतेऽष्टचत्वारिंशत्संस्काराः" इति स्मृतेर्मूलं श्रुतिः काचिदुपलभ्यते न वा? यदि नोपलभ्यते तर्हि संस्काराणामश्रौतत्वमापन्नमिति ममापि संशयः।

गुरुः।—श्रुताः श्रीमतां बहवः प्रश्नाः। सम्प्रति मध्याह्नक्रियासमयः समुपस्थितः। मध्याह्नक्रियां समाप्य सर्वेषामेव प्रश्नानां समाधानं वक्तव्यमिति।

(सावशेषः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीराधिकाया मानभञ्जनम्।

लेखकः—योगीन्द्रनाथविद्याचुञ्चुः।

कालिन्दीपुलिनोपकण्ठविलसत्कुञ्जे क्वणत्षट्पदे
हेमाङ्गीं हरिणीदृशं नतमुखीं मानावरूढ़ां प्रियाम्।
वामे न्यस्य कराम्बुजे स्थितवतीं गण्डं हि दक्षेतरे
गोपीशः करुणाश्रुसिक्तनयनः प्रोवाच बद्धाञ्जलिः ॥ १

कान्ते कृपामयि कृपा मयि तन्यतां मे
दोषं पुराकृतमहो खलु ते गृहीत्वा।
भ्रान्ता नराः प्रकृतितो बहुलप्रमादा-
स्तत् क्षम्यतामयि शुभे स्वगुणेन धार्ष्ट्यम् ॥ २

त्वं मे भवाब्धितरणिर्वरणीयवृत्तिः
संश्रित्य यामिह सुखात् प्रभवामि तर्त्तुम्।
प्राणायितासि मम दुश्चरितस्य देहि
तन्मे प्रसीद सुभगे परिहाय रोषम् ॥ ३

दृष्ट्वा विषादमवसीदति तावकं मे
चित्तं निरन्तरमहो ननु दह्यते च।
न ज्ञायते कथमिदं व्यसनं तवैतत्
मद्दृहनता भवसि मानिनि चारुशीले ॥ ४

प्राणप्रिये प्रियतमे प्रणतेऽपि रागात्
पादाम्बुजे तव कृपा किमु जायते नो।
क्रोधोऽपि नैव शमतामुपयाति किन्ते
योऽयं तपत्यतितरां दहनायमानः ॥ ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रान्त्या क्वचिद् यदि मया ननु विप्रियं ते
मुग्धे कृतं तदधुना तव मार्ज्जनीयम्।
नोचेद् यथायथमिहात्मनि दण्डमिच्छे
दातुं ग्रहीतुमनघे प्रभवामि सम्यक्॥ ६

त्वं शान्तिवारिकलसी मरुभूगतस्य
सञ्जीवनी त्वमसि मे मृतकल्पवृत्तेः।
उद्धृत्य पङ्कजमुखं नयने विकाश्य
वाचं सकृद् यदि वदेर्मृतजीवितोऽस्मि॥ ७

त्वं मे शुभे सुललिता हृदि मालिकासि
जीवामि ते वरतनुं मनसा विचिन्त्य।
राकाशशी त्वमसि मे मृगचिह्नहीन-
स्त्वामन्तरेण निखिलं तिमिराभिलीनम्॥ ८

यः पोषितो गुरुतरस्त्वभिमानराशि-
स्तस्यानुरूपमिह किं कृतवान् प्रमादम्।
तत् त्वं प्रसीद ननु मे परिवीक्ष्य दुःखं
दुःखाद् दयार्द्रहृदयं न विदीर्य्यते ते॥ ९

त्वं मे प्रियेऽमृतलता हृदयाधिरूढ़ा
रत्नप्रदीपकलिका भवसिन्धुगर्भे।
सौदामनी त्वमसि मे जलदस्य साक्षात्
भूमौ कथं हृदि दिवि प्रविहाय वासम्॥ १०

ग्रस्तं तवास्यमधुना तमसेव चन्द्रं
सिक्तं तुषारपृषतैर्नलिनं यथाक्षि।
दृष्ट्वा कियन् मनसि मे समुदेति दुःखं
ख्यातुं भवामि कुशलः किमहं तवाग्रे॥ ११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नातःपरं किमपि तेऽप्रियमाचरेयं
त्वत्प्रातिकूल्यमचलप्रणये शपेऽहम् ।
कुर्य्यां भ्रमादपि कदाचन विप्रियं चेत्
दण्डं तवेप्सितमहं मुदितो वहेयम् ॥ १२

शक्तिस्त्वमेव परमा शुभशंसिनी मे
मायापरा सकलजीवगणाश्रया च ।
बुद्धिर्गतिस्त्वमिह देवगणार्च्चनीया
मूलं त्वमेव जगतां प्रकृतिः प्रधानम् ॥ १३

ओङ्कारगम्यपदभाक्श्रुतिसारभूता
विश्वप्रपञ्चनियमैकविधातृरूपा ।
कूटस्थचिन्मयवपुर्भुवनप्रसूति
स्त्वं कार्य्यकारणगुणाश्रयतामुपैषि ॥ १४

संस्कृतसाहित्ये विज्ञानवैचित्र्यम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—कविरत्नमखिलानन्दशर्म्मा ।

महामहिम्नः प्राप्तगरिम्णः सर्वथा निरस्तलघिम्नः कविकुलगुरोः स्वनामधन्यस्य श्रीमतः कालिदासमहोदयस्य मते विचिकित्सावशेन किञ्चिदुच्यते न तन्मतमधिक्षेप्तुम् ।

अपां विकारो धूम इति पतञ्जलेर्मतम् । अतएव महाभाष्ये [या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः स आकाशदेशे निवाते नैव तिर्य्यग्गच्छति नार्वागवरोहति अब्विकारः अप एव गच्छत्यान्तर्यत] इति प्रतिपादितम् । काष्ठप्रतिष्ठमग्निसंयोगेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलं धूमरूपेण परिणमत इति वैज्ञानिकाः। अतो जलविकारभूतो धूमो न जलाद्भिन्न इति स्थितम्। कार्य्यस्य कारण एव समाविष्टत्वात्।

व्याप्तिवशेनाग्नेरनुमापको धूम इति यदुच्यते तदा व्याप्यत्वासिद्धिप्रसङ्गसमापत्त्या (?) नायमग्नेः सहचर इति विस्पष्टमेव। अयोगोलके धूमाभावात्।

मेघमण्डलान्तःस्थितविद्युद्रूपदिव्याग्नौ न धूमावस्थानमिति प्रत्यक्षविदां मतम्। लोके विद्युत्प्रदीपादौ तथा दृष्टत्वात्। वैद्युताग्नेश्च मेघावस्थितत्वात्। सिद्धमेतावता विद्युत्सहचरे मेघे धूमराहित्यात्तत्र धूमस्याश्रयासिद्धत्वम्। अतो नायं धूमो मेघोत्पादककारणकलापाङ्गम्।

आवह-प्रवह-संवहादिभेदैः सिद्धान्तशिरोमणौ वायवः सप्तभूमिका निर्दिष्टाः। तत्र भूलोकगतो वायुरावह इति नाम्ना निर्दिश्यते। भुवर्लोकगतश्च प्रवह (?) इति नामधेयेन। मेघमण्डलसञ्चालको वायुस्तदूर्द्ध्वं (?) संवह इत्याख्यया निजागद्यते। अतो भूमण्डलादुत्थितस्य धूमस्य संवहेन साकं सम्बन्धाभावान्न मेघकारणत्वम्।

[अपां च ज्योतिषश्च मिश्रीभावकर्म्मणो वर्षकर्म्म जायत] इति वृत्रशब्दव्याख्याने निरुक्तकारमतम्। [द्वाव्वूकं वहतः पुरीषम्] इति मन्त्रव्याख्यानावसरे "वाय्वादित्यौ उदकं वहत" इति यास्कः। तदेवंविधवैदिकप्रक्रियागवेषणेनापि न धूमो मेघकारणमित्येव सर्वतः समापतितमैकान्तिकं मतम्।

उदीरयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत्पातयाथ ।४।१५।५

इत्याथर्वणे मन्त्रे—समुद्रत उन्नतानामपां मरुता करणेनोत्क्षेपणं पुनश्चार्कत्विषां निचयेन सह तासामपां नभसि समुत्पतनमुपलभ्यते। मेघाः समुद्रतो जलमाहरन्तीति लोकप्रवादोऽप्ययम्। तस्मादिद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव श्रौतं मतं विद्वज्जनस्तोषावहं स्यादिति सन्दिहाना वयं न विस्पष्टमत्र विषये किञ्चिद्वदामः। न च विवदामहे।

धूमसन्तरा मेघमण्डले कार्ष्ण्यं कथमापद्यत इति चेत् शंक्यते तत्रेदमवधानम्। स्वभावधवले विमले च तन्मण्डले जलस्याभास्वरशुक्लरूपवत्त्वाद्भास्वद्विम्बप्रच्छादकत्वाच्च मेघानां पार्थिवगर्वा तत्र समावेशे रात्राविव तत्रापि तमसः प्रतीतिरुपजायते तस्मादनुमीयते मेघमण्डलेपि कार्ष्ण्यम्। न तत्र तत्स्वभावसिद्धम्।

साम्प्रतं सर्वोत्कृष्टं निर्विवादं भगवद्गीतासूपनिषत्सु भगवता स्वकसुदीरितं भगवन्मतमालोच्यते।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥

इति। स्मृतिरपीयं—भगवद्वाक्यमेवानुगच्छति न तद्भिदाम्। निघण्टुपाठे यज्ञनामसु विष्णुपदमुपलभ्यते। यज्ञो वै विष्णुरिति शतपथी श्रुतिरपि निश्चयेन विष्णुमेव यज्ञपदेनाङ्गीकरोति। तस्माद्यज्ञाद्भवति पर्जन्य इति निर्विवादम्।

यज्ञशब्दोयं यजधातोः सम्पद्यते। देवपूजासङ्गतिकरणं दानं चेति त्रयस्तदर्थाः। तत्र विष्णोः सर्वात्मकत्वात्प्रजापालकत्वाच्च यज्ञे तत्पूजनं विश्वतर्पणम्। तस्मै यज्ञात्मने नम इति भारतवचनात्। पृथिव्यप्तेजोवाय्वाकाशात्मनां यज्ञे सङ्गतिसम्भवात् सन्निपातस्य च तत्त्वानां मेघोद्भावकत्वाद्यज्ञादेव मेघोद्भव इति निरस्तापरप्रमाणं वैदिकानां मतम्।

सूर्यकिरणैराकृष्यमाणानां जलीयपरमाणूनां वायुमण्डले समावेशाद्वायोश्च वह्निसमुद्भावकत्वाद्वह्नेश्च जलद्रावकत्वादाकाशस्थितानां सर्वेषामप्येषां द्रव्याणां वाष्परूपेण परिणमनं मेघ इति विज्ञानविदः।

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति भगवद्वचनाद्यज्ञे देवानां हविर्दानेन तर्पणं देवानाञ्च लोकोपकारकस्वभाववत्त्वाद्वर्षणप्रत्युपकारमनस्कतया च, स्वस्वसम्पद्विनिमयेन भुवनद्वयभरणं यज्ञादेवेति सिद्धम्। एतदेव—

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥

इति यज्ञद्वारा विशदीकृतं—श्रीकालिदासमहोदयैः। अतःपरं लघुषु द्रव्येषु व्यवस्थितं विज्ञानवैचित्र्यं विविच्यते। तत्र—

हरितालमनःशिलाभक्षिणो मयूरस्य पुरीषेणालिप्तहस्तो यद्द्रव्यं स्पृशति तन्न दृश्यत इति वात्स्यायनः।

वैचित्र्यमिदं बहुशो दृष्टमस्माभिः। एकदा विविधविस्मापकचरित्रचणः कश्चिदज्ञातनामधेयो जापानदेशीयः समाजगाम हरिप्रस्थम्। तत्रागतेन तेन निजेन विज्ञानवैचित्र्येण विस्मापिताः प्रायः सर्वेऽपि धनवन्तो हरिप्रस्थीयाः। तत्सविधमुपगतेन मया स्वयमवलोकितो हरितालमनःशिलाभक्षी विचित्रो मयूरः। तत्पुरीषलिप्तहस्तेन तेनानंतान्यंगुलीयकानि मध्येसभं वायुसात्कृतानि। दृश्यतामन्यदपि वैचित्र्यमतःपरम्।

अङ्गारतृणभस्मना तैलेन च विमिश्रमुदकं क्षीरवर्णं भवति।१। हरितक्याम्रातकयोः स्रवणप्रियङ्गुकाभिश्च विष्टाभिर्लिप्तानि लोहभाण्डानि ताम्रीभवन्ति।२। स्रवणप्रियङ्गुकातैलेन दुकूलसर्पनिर्मोकेण वर्त्या दीपं प्रज्वाल्य पार्श्वे दीर्घीकृतानि काष्ठानि सर्पवद्दृश्यन्ते।३। इति वात्स्यायनः।

सर्वमपीदृशमनेकविधं विज्ञानवैचित्र्यं भारतादेवाविरासीत्। साम्प्रतं यत्पारेसमुद्रं मध्येसमुद्रं वा विद्यमानेषु यूरोपीयमहोदयेषु दरीदृश्यते। कालक्रमेणोपगतं समयवार्द्धक्यमेवात्र कारणम्।

दूरमतिक्रान्तः स समयः क्रमेण यस्मिन्नुपागते भारतवसुन्धरा परामुन्नतिमापेदे। भारते दारिद्र्यस्यैव दरिद्रतासीद्यस्मिन्नधुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र दारिद्र्यसाम्राज्यमुपस्थितमवलोक्यते। अन्नदारिद्र्यं वस्त्रदारिद्र्यं धनदारिद्र्यं सर्वतोभावेन दारिद्र्यमेव दारिद्र्यम्। एवं विधे वार्द्धक्यमापन्ने समये कलाकौशलकथापि कर्णशूलायते। दूरमास्तां विज्ञानवैचित्र्यम् यत्र प्रातरुत्थाय कथमद्य भोजनं प्राप्तव्यमिति चिन्तया विशीर्णवृत्तयो भारतीयाः प्रत्यहं सीदन्ति। तत्र का कथा कलाकौशलानाम्। साम्प्रतं न विद्यते भारते रामराज्यम् न च तस्य शासनं महीपतेः।

यस्मिन्महीं शासति कामिनीनां
निद्रां विहायार्द्धपथे गतानाम्।
वातोपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम्॥

इदानीन्तु प्रतिपदं विद्यते भारते दुर्भिक्षकथा। महार्घता वस्तूनामनुपदमुन्नदति। न प्रजारञ्जनपराः समवतिष्ठन्ते भूयांसो भूपतयः। तस्मादलं मनोरथपथातीतेन, वस्तूत्प्रेक्षामात्रगुरुणा, वक्रोक्तिपूर्णेन निरुपमेन निःसारेण प्राचीनावदानपद्यपाठेन।

सदसि समवेताः सदस्याः। द्रव्यसाध्यं कार्यं द्रव्येणैव साधयितुं शक्यते। न द्रव्यशून्येनालापेन। मोदकैः पूरयितुमर्हं जठरं द्रव्यक्रीतैर्मोदकैरेव शक्यते पूरयितुं न केवलं मनोमोदकैः। द्रव्यसाध्यानि विज्ञानवैचित्र्याणि द्रव्येणैव नानाविधकलाकौशलद्वारा समुन्नतानि कर्त्तुं शक्यन्ते। भारते धनाभावो हि साम्प्रतं हृदयमन्दिरोदरस्थितनानाविधविज्ञानवतां दुनोति मुहुर्मुहुर्मानसम्। कपर्दिकामात्रमपि येषां सविधे न वेविद्यते वसुजातं तैर्यदि पारे परार्द्धगणनैर्वसुभिः साध्यानि कार्याणि केवलं कल्पनामात्रेणैव विविच्यन्ते न तेषां किमिदं निरक्षरत्वेपि भट्टायितम्। निर्धनत्वेऽपि कुबेरायितम्। नपुंसकत्वेपि पुरुषायितम्। भवन्त्येवंविधाः कथाः प्रत्यहमापण्यगतगञ्जागृहोदरगतानाम्। तस्मात्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीचैरनीचैरतिनीचनीचैः सर्वैरुपायैर्धनमेव साध्यम्।

यत्प्रभावेण कलियुगे सर्वदा विषयानन्दमग्ना अपि भवन्ति ज्ञानानन्दाः। त्यक्तमहामाया अपि सेवितमहामायाः। अशान्तमनसोपि शान्तिरसप्रियाः। अविद्यानुरक्ता अपि विद्यारसास्वादनपराः।

अघटितघटनापटीयसी सेयं हरिवल्लभा भगवत्कृपामन्तरा पुरुषार्थमन्तरा च न केनापि समासादयितुं शक्या। तस्या भगवदधीनत्वात्पुरुषार्थप्राप्यत्वाच्च। पुरुषार्थस्याद्यत्वेन नष्टप्राय इव प्रतीयते। तत एवेदं भारते दारिद्र्यम्।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः

इति सर्वतन्त्रसिद्धान्तः। कुसीदभोजनपराणामलसमतक्कानां मते सर्वमपि दैवाधीनम्। दैवं कर्मायत्तम्। कर्म च पुरुषार्थसाध्यम्। पुरुषार्थश्च पुरुषैरर्थ्यत इति निर्वचनेन पुरुषमात्रसाध्यः। नपुंसकबहुले देशे यदभावप्रसङ्गात्।

त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इति प्राञ्चः। दुःखं त्रिविधम्। आधिभौतिकमाधिदैविकमाध्यात्मिकञ्च। त्रिविधमप्येतद्भूतभविष्यद्वर्त्तमानभेदैर्नवविधम्। तत्र भूतं भुक्तप्रायम्। वर्त्तमानमवश्यं भोक्तव्यम्। अवश्यमेव भोक्तव्यं कृतं कर्मशुभाशुभमिति भगवद्वचनात्। अतो हेयं दुःखमनागतम्। तस्य शक्यप्रतीकारत्वात्। पुरुषार्थसाध्यत्वाच्च।

सामान्यदुःखपद्धतिमतिक्रम्य मर्त्यलोकवासिनां कृते सर्वतोभावेनावश्यभावि मृत्युभयम्। तदपनोदनाय भगवतो मृत्युञ्जयस्याराधनमेवावश्यकम्। तदुपाश्रयवतां मृत्युभयराहित्यात्। मृकण्डुसूनुरेवात्र निदर्शनम्।

अनन्यभावेन कमलाभुजङ्गपरायणानां वैष्णवानां कृते तु सर्वार्तिनाशनपरो भगवान्विष्णुरेव शरणम्। तदुपाश्रितानामपि मृत्युभय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राहित्यात्। उत्तानपादतनयो ध्रुवोऽत्र मानम्। यत्कथा श्रीमद्भागवते ४र्थं स्कन्धेऽष्टमाध्यायाद्वादशं वेविद्यते।

एतदेवजन्मसाफल्यम्। इदमेव मनुष्यकर्त्तव्यम्। अयमेवात्यन्तपुरुषार्थः। इदमेव निबन्धतत्त्वम्। यत्सर्वात्मभूतस्य भगवतः सर्वतोभावेन स्तवनम्। अतिसुलभञ्च लोके तदर्चनसाधनम्। यतो हि—

तुलसीदलमात्रेण जलस्य चुलुकेन च।
विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः॥ १॥
एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम्॥ २॥
तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः।
नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः॥ ३॥
किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः॥ ४॥
ते सभाग्या मनुष्येषु कृतार्था नृपतिश्रियम्।
स्मरन्ति स्मारयन्तो ये हरेर्नाम कलौ युगे॥ ५॥
प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः।
आहूत इव मे शीघ्रं दर्शनं याति चेतसि॥ ६॥

मन्ये धनाभिजनरूपतपः श्रुतौज-
स्तेजः प्रभावबलपौरुषबुद्धियोगाः।
नाराधनाय हि भवन्ति परस्य पुंसो
भक्त्या तुतोष भगवान् गजयूथपाय॥ ७॥

आहुश्च ते नलिननाभपदारविन्दं
योगेश्वरैर्हृदिविचिन्त्यमगाधबोधैः।
संसारकूपपतितोत्तरणावलम्बं
गेहं जुषामपि मनस्युदियात्सदा नः॥ ८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिर्यङ्मनुष्यविबुधादिषु जीवयोनि-
ष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः ।
रेमे निरस्त-रतिरप्यवरुद्धदेह-
स्तस्मै नमो भगवते पुरुषोत्तमाय ॥ ९ ॥

यमेकमेव प्रयतो न जायते
स्पृहा परस्मै महतेऽपि नाकिने ।
नमः समस्तापदुपेतपालन-
व्रताय तस्मै विभवे पिनाकिने ॥ १० ॥

भानुना तुहिनभानुना बृह-
द्भानुना च विनिवर्तितं न यत् ।
येन तज्झटिति शान्तिमान्तरं
ध्वान्तमिति तदुपास्महे महः ॥ ११ ॥

अघद्रुमध्वंसमहाकरेणवः
सुधासिताः पावककल्परेणवः ।
वसन्ति यस्मिन्नभयं करेणव-
स्तनोतु शं तेन हरः करेण वः ॥ १२ ॥

लोकत्रयाभ्युदयजन्मसही महीयः-
स्थानाधिरोहणविधावधिरोहिणी या ।
सा चन्द्रचूड़मुकुटध्वजवैजयन्ती
जह्नोरनिह्नुत-नया तनयावताद्वः ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्य्यवर्य्य-महामहोपाध्याय ⁄यादवेश्वरतर्करत्न-महोदयानाम् आनन्दकाननप्रयाणम् ।

(लेखकः—श्रीभगवतीचरणविद्याविनोदः)

वङ्गोत्तरे रङ्गपुरे प्रभाकर
आसीदहो पण्डित-यादवेश्वरः ।
अस्तं गतो नो पुनरेष्यतीति स
ध्रुवं भवामो वयमत्र मूर्च्छिताः ॥ १ ॥
स काशिकायामधिजाह्नवीजलं,
विहाय विद्वान् किल नश्वरं वपुः ।
योगी विवेकी ह्यपुनर्भवं महत्,
नित्यास्पदं प्राप्य गतोऽद्य नित्यताम् ॥ २ ॥
कियद्दिनं व्याप्य स काशिकाश्रित,
आसीन्महात्मा कृतियादवेश्वरः ।
विश्वेश्वरस्तं नियतिक्रमादहो,
जहार रत्नं भुवनेऽत्र दुर्लभम् ॥ ३ ॥
चक्रे महाकाव्यमपूर्वनूतनं,
मन्ये सुभद्राहरणं मनोहरम् ।
अन्यानि काव्यानि च सोऽत्र भूतले,
सुकीर्त्तिमान् जीवति जीवसङ्कुले ॥ ४ ॥
उपाधिना श्रेष्ठतरेण भूषितं,
परिच्छदेनापि बृहद्गुणान्वितम् ।
चकार सम्राट् स्वयमत्र यं ध्रुवं,
धन्यो वदान्यः स हि यादवेश्वरः ॥ ५ ॥
शुभ्रोऽकलङ्की द्विजराज एव स,
शुभंयुसौम्यः प्रतिभासमन्वितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्तन्दिवञ्चात्र समानसुप्रभो,
नूनं बभासे प्रभया स्वकीयया ॥ ६ ॥
व्यासो वशिष्ठोऽप्यथवा बृहस्पतिः,
स्वयं समेत्याजनि वात्र सुव्रतो ।
शङ्के स कर्म्मक्षयतो विचक्षणः,
समीयिवान् स्वर्गपुरं दिवौकसाम् ॥ ७ ॥
सदाभिरामं रमणीसमन्वितं,
विहाय वृन्दावनमद्य शान्तिदम् ।
सुदर्शनालम्बितसत्सुदर्शनो,
लीलावतीर्णः खलु यादवेश्वरः ॥ ८ ॥
विषादसिन्धौ विनिपात्य मादृशान्,
निरीक्षणीकृत्य कृतान्तभीषितान् ।
गतोऽसि नूनं वत यादवेश्वर !
समेत्य नस्त्वं सदयं समुद्धर ॥ ९ ॥
सिंहस्थसूर्य्ये सति सप्तमे दिने
आसाद्य कृष्णां नवमीञ्च कार्त्तिकीम् ।
लब्ध्वा स काशीं व्रतियादवेश्वरः
सम्पूरयामास विशुद्धवासनाम् ॥ १० ॥

ध्यात्वा स्वर्गत-यादवेश्वर-पदं धृत्वा गुणान् पैतृकान्,
नत्वा श्रीजगदीश्वरीमनुदिनं शान्तिप्रदां मातरम् ।
श्रीवृन्दावनचन्द्र एष सुमतिर्विद्वान् चिरं जीवतात्,
संसारे विपिने मुदा वितनुतां शार्दूलविक्रीड़ितम् ॥ ११ ॥

नित्याश्रयं सकरुणं विबुधाग्रगण्यं,
विद्यार्थिनां सुखकरं विविधार्थवादैः ।
आचार्य्यवर्य्यमिह तं प्रणमामि नित्यं
स्वर्गस्थितं भगवतीचरणद्विजोऽहम् ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयचन्द्रमहाप्रयाणम् *

(लेखकः—ॅमहामहोपाध्याययादवेश्वरतर्करत्नभट्टाचार्य्यः)

स्फुटकुन्दसितस्मिताधरा
भुवि वृन्दारकवृन्दयोषितः ।
कलसान् कनकेन निर्मितान्
जलपूर्णान् नवपल्लवाङ्कितान् ॥ १ ॥

स्वकरेषु निधाय धाविता
मणिदीपोज्ज्वलहेमभाजनाः ।
कुसुमाञ्जलिबद्धपाणयो
यवलाजैरपि पूर्णडल्लकाः ॥ २ ॥

ग्रनकैरुपतस्थिरे पुर-
स्तव नेतुं हरिणीविलोचनाः ।
गरुड़ध्वजमुन्नतं रथं
हरिदूताः पुरतोऽपि निन्यिरे ॥ ३ ॥

वृषशीर्षरथश्च नन्दिना
सह कलासविलासिनीगणाः ।
भगवन्तमुमापतिप्रियं
स्वयमालिङ्ग्य दृढ़ं निजैर्भुजैः ॥ ४ ॥

कृतयः कति सन्ति ते नृणा-
मुपकृत्यै जगति प्रतिष्ठिताः ।
तव 'भारतसूचयः' कृता
मम विध्यन्ति मनोऽनुवासरम् ॥ ५ ॥

---

* महामहोपाध्याय-स्वर्गत-यादवेश्वरतर्करत्नपादानां कवितानिर्माणे चरमप्रयत्नः किलेदं जयचन्द्र-महाप्रयाणं नाम श्लोकदशकम् । सं-सा-प-सः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वह्वः कृतयोऽपि ते पुन-
र्न समाप्तिं गमिताः पुरः स्थिताः ।
वद किं नु भवादृशोऽधुना
सुसमाप्तिं गमयन्ति तास्तु ते ॥ ६ ॥

तमसो रजसो रजःकणो
न तवाक्रामदिहोन्नतं मनः ।
जरसापि वपुस्तवेप्सितं
न पुनर्ग्रस्तमवेक्षितं ततः ॥ ७ ॥

अरणिप्रभवान्तु पादुकां
धरणौ धावसि यत् पुरा दधत् ।
ऋषिपद्धतिबद्धविभ्रम
स्तव नाभूत्तत ईदृशी गतिः ॥ ८ ॥

सह चन्द्रिकया तु चन्द्रमा
उदयं याति तथास्तमेति च ।
जयचन्द्र तवास्तगामिनः
पुरतः 'संस्कृतचन्द्रिका' गता ॥ ९ ॥

विद्ये यामद्य विद्योतितसकलदिगानन्ददा देववन्द्या
स्वच्छन्दं गच्छ विच्छिद्य च भरतभुवानन्धसम्बन्धबन्धम् ।
श्रौताचारश्च चारु व्रजतु सुविलयं सा च गीर्व्वाणवाणी
निर्व्वाणं यातु को वा भवति नु भुवने रक्षकस्तस्य तस्य ॥१०॥

ग्रन्थपरिचयः

आर्य्यनित्यकृत्यम्

श्रीसारदाचरणविद्याभूषणकृतम् । ग्रन्थकारेणैव कलिकाता-श्यामपुकुर-८।ए शिवशङ्करमल्लिकलेनभवनात् प्राकाश्यं नीतम् । मूल्यं सार्द्धरूप्यकमात्रम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विजातीनां नित्यकृत्यवर्णनात्मकोऽयमुपलब्धोऽस्माभिर्वङ्गभाषामयो नवीनमनोहरो ग्रन्थः। ग्रन्थस्यादौ उपहारपत्र एव सूचितं ग्रन्थकृता एतद्ग्रन्थप्रणयनप्रयोजनम्। तथा चासत्स्वपि एतद्विषयकेषु बहुषु ग्रन्थेषु प्रायेण तेषु सर्व्वेषु मन्त्रादीनां व्याख्यानाकरणम् अविशुद्धिबाहुल्यं सर्व्वेषां वस्तूनामुपयोगिनामप्यसद्भाव इत्येते ग्रन्थकृतो नवीनस्यास्य प्रयासस्य नवीनग्रन्थप्रणयनरूपस्य निमित्ततया प्रतिभान्ति। सत्यामपि नोऽत्र सम्मतौ वचने अविशुद्धिनिदर्शनतया यन्नामोपस्थापितं विद्याभूषणमहोदयेन यथा 'अतैलं सार्षपं तैलं यत्तैलं पुष्पवासितम्' इति वचनम् अशास्त्रीयं रघुनन्दनकल्पितमपि शास्त्रीयतया उपनिबद्धं ग्रन्थान्तरेषु तत्र न वयं सम्मतिम् आरचयितुमर्हामः कथमपि। शास्त्रीयवस्तुसङ्कलनैकमानसो विद्याभूषणमहोदयो ग्रन्थगर्भे शङ्कराचार्य्यकृतं दराफ्‌खाँकृतञ्च गङ्गास्तोत्रं सन्निवेशितवान्, तच्छास्त्रसङ्गतं न वेति निर्णेतुमसमर्था व्याकुलीभूता वर्त्तामहे। यातु, ग्रन्थस्यास्य निर्म्माणे यावान् नामाङ्गीकृतः क्लेशस्तेन तु महानेव समुपकारः संसाधितो भवेत् सर्व्वेषामेव जनानां पण्डितानामपण्डितानाञ्च इति नो द्रढीयसी धारणा। अखिलानामेव मन्त्राणां वङ्गानुवादं तात्पर्य्यं च रचयता तथा बहूनां मन्त्रादीनां संस्कृतटीकादिं विनिवेशयता ग्रन्थकृता यत् सत्यं साधुवादभाजनत्वं गतं निखिलानां वङ्गीयानाम्। प्राणायाम-तिलकदानादीनां कृत्यानां शास्त्रीयप्रयोजनवर्णनपुरःसरं यौक्तिकप्रयोजनप्रदर्शनाय सत्यम् अतितराम् एव नैपुण्यं परिश्रमश्चाङ्गीकृतं परमेतदपि वक्तव्यमेव, यथा धर्म्मकार्य्याणां यौक्तिकप्रयोजनान्वेषणं न सर्वदा सफलतां धत्ते इति ग्रन्थकृतोऽपि तदन्वेषणप्रयासो यदि कुत्रचित् कुत्रचित् सर्व्वेषां प्रीतिं नावहेत्, तत्र न किमपि दुःखकारणं स्यात् इति आशंसमाना वयं 'भस्मनः प्रभावः' इति ५१-५२ संख्यकपत्रस्थं सन्दर्भं प्रति विद्याभूषण महोदयस्य दृष्टिमावर्जयामः। सन्ध्योपासनावर्णनावसरे १११ तमे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठे वङ्गेषु प्रचलितं प्रातःसन्ध्याचमनं सायं सन्ध्याचमनञ्च अधिकृत्य यन्नाम नवीनं वस्तु समुपस्थापितं नो दर्शनगोचरे तत्तु सर्व्वथा समालोचनामपेक्षते। वङ्गेषु प्रातःसन्ध्याचमने 'अहस्तदवलुम्पतु' सायमाचमने च 'रात्रिस्तदवलुम्पतु' इति यो नियमः परिलक्ष्यते सार्व्वत्रिकः स कदा प्रभृति प्रावर्त्तत इति प्राचीनहस्तलिखित पुस्तकावलोकनेन निर्णेयं सुधीभिः। द्वित्रविषयानामुल्लेखनादुत्तरमेव समाप्तिं नेष्याम इदं समालोचनम्। सन्धीनामनुरोधाद् वा कारणान्तराद् वा वैदिकमन्त्रे मुद्रापणवेलायां दृश्यते बहूनां पदानामेकीभावोऽत्र ग्रन्थे। यथा 'आपोहिष्ठा' इति। एषा शैली तु साधारणानां बुद्धिविकृतिं जनयिष्यतीति प्रतीयते। तथा च 'आ पोहि ष्ठा' इति अपि केचन पठितुमर्हन्तीति एतादृशेषु स्थलेषु पदविभागकरणमेव शोभतितराम् इति नो मतम्। अन्यच्चैतदत्र ग्रन्थे आकाङ्क्षणीयं वर्त्तते तद्यथा—मन्त्रादीनां वेदादिषु स्थाननिर्देशः (अग्निमीड़े… ऋ १, १, १ एवं रूपः)। एवं कृते विद्वांसः सन्दिग्धेषु स्थलेषु मूलग्रन्थालोचनेन सन्देहं निरासयितुमलम्भवेयुः।

आशास्महे वयं द्वितीयावृत्तिनिर्म्माणावसरे विद्याभूषणमहोदयाः अस्मदीयं वचनजातं समालोचयन्तः रमणीयस्य ग्रन्थस्य रामणीयकत्वं आधिक्येन सम्पादयितुम् उपकारजनकत्वञ्च साकल्येन सम्पादयितुं यतमानाः सर्व्वेषामेव साधुवादभाजनं भविष्यन्तीति।

——

सन्देशाः

चतुष्पाठीस्थापनम्—हुगलीप्रदेशान्तर्गत-'भोँ पुर'-ग्रामवास्तव्यः श्रीयुक्तपूर्णचन्द्रकुमारमहाभागः स्वीये ग्रामे काञ्चन चतुष्पाठीं प्रतिष्ठाप्य परितो वर्त्तमानानां ग्रामाणामतिमात्रमुपकारं निरवर्त्तयत्। तत्र साम्प्रतं पञ्च विद्यार्थिनो विना निजव्ययं विद्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहणाय प्रभविष्यन्ति। शिष्याणां दशसाहस्रमपि भोजनादिदाने-नाध्यापयतां कुलपतीनां भूतपूर्व्वलीलानिकेतने भारतवर्षे खल्वद्यत्वे कालानुसारेण प्रवृत्तिरियमपि प्रशस्यतमेति वयमस्य विद्यापीठस्य निर्व्विघ्नं दीर्घजीवनं कामयमानाः प्रतिष्ठापकानां कुमारमहाभागानां सर्व्वतः कुशलमभिप्रेमः।

बालिकाविद्यालयः—उत्तरपाड़ा-भद्रकालीग्रामस्थित-रामकृष्णसङ्घसम्बन्धिनि बालिकाविद्यालये महानुभावेन श्रीमता मन्मथनाथपालमहोदयेन विंशतिसहस्ररूप्यकार्घं स्वीयवासभवनं बालिकानां विद्यासमुन्नतये समुत्सृष्टमास्ते। किन्तु महात्मनस्तस्य वदान्यप्रवरस्य दानमिदं तदेव शुभोदर्कं समर्थयितुमर्हामो यदि कलिकातास्थ 'सारदेश्वरी'संज्ञकाश्रमानुरूप्येण तत्र बालिकानां शिक्षापद्धतिरवतारिता स्यात्, येन भारतवर्षीया नार्य्यः पुनरपि भारतवर्षीयतामात्मगतां प्रकटयितुमलं भवेयुः, सहैव च समवतीर्णं भविता प्राचीनयुगानुकारि मनोहारि चारित्रसौष्ठवादिकमिति।

चिकित्साविद्यालयः—काश्मीरराज्ये भूतपूर्व्व-प्रधान-विचारपतयः श्रीमन्तः ऋषिवरमुखोपाध्यायमहाभागाः बाँकुड़ा-प्रदेशे स्वीयं 'ननोर'संज्ञकं वासभवनं तत्सङ्गतां तावतीं भूसम्पदञ्च बाँकुड़ासम्मेलनपरिचालकेषु विसृष्टवन्तः, तत्रैष नियमो यथा—तस्मिन् वासभवने कश्चन चिकित्साविद्यालयः प्रतिष्ठापनीय इति। विसृष्टायाः सम्पदो मूल्यन्तु प्रायेण पञ्चाशत्सहस्राणि द्रव्याणाम्। सर्व्वथा प्रशंसामर्हति श्रीमतामयमसीमो वदान्यतावृत्तान्तः, परमत्र वयमभिलषामो यत् भारतीयायुर्व्वेदविद्याप्रकर्षसाधनमपि मुख्यतया तदीयनियममभिनिर्विशमानो मानोन्नतिं वैद्यविद्यायाः सम्पादयेत्। अथेदानीमस्य दानस्य सफलतासम्पत्तये तदेव बाँकुड़ासम्मेलनं प्रभु-रिति वयं तदाशापथपथिका वर्त्तिष्यामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবু

মহাভৃঙ্গরাজ তৈল ৬৲ সের

স্থাপিত ১৩০৮ ঢাকা

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

শক্তি ঔষধালয়

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রংপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভব করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্পেপসিয়া—

হইতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয়। এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

[illegible], ৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः ।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता ।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये | Reg. No. C 1073. | ७म वर्षस्य
अग्रहायणे | | ८म संख्या
December 1924. | | Vol. VII. No. 8

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्।

सम्पादकौ—
महामहोपाध्याय—श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च
सहकारिसम्पादकः—
काव्य-सांख्य-पुराणतीर्थश्रीदुर्गामोहनभट्टाचार्य्य M. A.

मतिमञ्जरी
प्राचीनवङ्गवैशिष्ट्यम्
नलदमयन्तीयम्
श्रीराधिकाया मानभञ्जनम्
महाकविभासः
भक्तिसिद्धान्तनिम्नगा
आशुतोषमुखोपाध्यायानामकालास्तमने शोकोच्छ्वासः
ग्रन्थपरिचयः
सन्देशाः

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम्।
Foreign price 7s yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम्॥

छात्र पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता
अध्यक्ष—श्रीजानकीनाथकाव्यतीर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এককথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৶০ আনা।

পরিবর্দ্ধিত **সচিত্র কবিরাজি শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্র নাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদেব গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৷৶০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

২৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयागविश्वविद्यालयोपाध्यक्ष:

महामहोपाध्याय: श्रीमान् गङ्गानाथ झा एम्-ए, डि-लिट्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये अग्रहायणे, ७म-वर्षस्य ८म-संख्या

मतिमञ्जरी

संस्कृतशिक्षायाः समुन्नतिः

अयि भो भूतस्मृतिप्रवणाः परिषत्पत्रिकावाचकमहाभागाः, अपि स्मरन्ति भवन्तः 'संस्कृतशिक्षासंस्कारपरिषदं' प्राचीनां, या किल तत्रभवतां सुरनिकेतनातिथिभूतानां भूपेन्द्रनाथवसुमहोदयानाम् आध्यक्ष्येण वर्त्तमानशिक्षाविभागपरिचालकानाम् ओटेन-महोदयानां मन्त्रितया तथा राजकीयसंस्कृतविद्यालयाध्यक्षश्रीमदादित्यनाथ-मुखोपाध्यायप्रमुखानां सुविदुषां पारिषद्येन प्रतिष्ठापिता किल राजकीयप्रधानशिक्षाध्यक्षैः । सा हि प्रथमतः, कियतो दिवसान् अनवग्रहं परिगृहीतनिजकर्म्मा राजकीय-संस्कृतमहाविद्यालयशर्म्माणि परिचिन्तयन्ती निरदिक्षदनभिक्षतां समुन्नतिं संस्कृत-शिक्षायाः । अथेदानीमवसरस्तस्या भारतीय-साधारणसंस्कृतशिक्षापद्धतिमालोचयितुम् । बहोः कालात् प्रभृति संस्कृतशिक्षाया यादृशी पद्धतिः प्रचरति, यस्याः पद्धतेरनुवर्त्तनेन साम्प्रतिकाः संस्कृतशिक्षार्थिनो विनीताः शास्त्रतत्त्वेषु प्राचीनविद्वत्-कल्पतामाक्रमितुमनर्हा इव प्रतिभासन्ते, सा सुतरां संस्करणीयेति को वात्र विप्रतिपत्तिलेशोऽपि ; परमितःपूर्व्वं सुचिरं जोषमासीनाया-

राजकीयशिक्षाविभाग-प्रवर्त्तितायाः संस्कृत-शिक्षासंस्कारपरिषदः कार्य्याणि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तस्याः कारणान्तरेण कार्य्यसम्पर्कपरिशून्यायाः इव प्रतिभान्त्याः शान्तमिव समुद्यमं कल्पितवतामद्यत्वे पुनरस्माकमाविर्भवति भूयान् मनोरथो यथेयमिदानीं पुनः सुगृहीतनिजकृत्या सत्यमेव समुन्नमयिता चिरन्तनभारतीयसंस्कृतशिक्षानुबन्धान्, अपसारयिता च नानानिदानजनितां संस्कृतशिक्षायाः क्षतिधारां, समुद्गमयिता च दिग्व्यापिनीं यशःसन्ततिं सुरसरस्वत्या इति ।

संस्कारसमितौ:कृतो नूतनाध्यक्षादिविनियोगः ।

इयतो दिवसानस्याः सत्वरं कृत्यनिष्पादने तत्रभवतामध्यक्षमहाभागानां वसुमहोदयानामस्वास्थ्यमेव प्राधान्येन निदानतामधिचक्रे, सम्प्रति भारतभाग्यवैगुण्येन निपात्य दुःखसागरे भारतवर्षं सुरमन्दिरमानन्दितवत्स्वपि तेषु महनीयप्रभावाः श्रीमन्तो गुणगरिष्ठा देवप्रसादसर्व्वाधिकारिणः तत्पदं ग्राहिता वर्त्तन्ते, तत्परिषदो मन्त्रिमुख्यानाम् श्रीटेनमहोदयानाञ्च शिक्षाविभागाधिपतिपदमाश्रितवतामशक्यमिव तन्मन्त्रितानुरूपकर्म्मानुष्ठानमिति तत्पदे च साग्रहमुपनीताः साम्प्रतिकसंस्कृतमहाविद्यालयाध्यक्षाः श्रीमन्तो विविधगुणालङ्कृता आदित्यनाथमुखोपाध्यायाः, तदेतेषामतिविचक्षणानां परिचालनया संस्कृतशिक्षापद्धतेः कीदृशी वा समुन्नतिरस्माभिः समाशंसितुमशक्या स्यात् ।

नूनमिदानीं स्वकृत्यसम्पादने निरवग्रहासौ संस्कारसमितिः तावच्छीघ्रमेव क्रमेण क्षीणक्षीणाया विषमूर्च्छितायाः इव प्राचीनसंस्कृतविद्याया अनुरूपभेषजप्रतिसन्धानेन पुनरपि भारतं वर्षं जगदादर्शीभूतहर्षनिकेतनं विदधीत । तत्र यद्यपि विलक्षणगुणगरिष्ठानां विचक्षणपरिचालकानाममीषां निखिला एव तदुन्नतिविधायकाः पन्थानः प्रतिभान्तीति नान्येन स्वल्पमप्युपदेष्टव्यमस्ति, तथापि 'विवक्षितं ह्यनुक्तमनुतापं जनयती'ति कविवचनप्रामाण्यानुरोधमतिक्रमितुमयोग्यं मन्यमानाः किञ्चिदिव प्रतिपिपादयिषामः ।—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतपरिषत्प्रस्तुत-संस्कारनियमादिषु अवधानं देयम् ।

अस्ति तावदितः पूर्व्वमावेदितं 'शिक्षासंस्कारसमिति'-प्रस्तुत-प्रश्नवलयविचारावसरे संस्कृतसाहित्यपरिषत्-परिवृढ़ैः सुतरामिदमीयमङ्गलाङ्गम् ; तत्रैव प्रथमतो दीयमानमवधानमभ्यर्थयामहे श्रीमतां संस्कृतशिक्षासंस्कारपरिषदनुबन्धिविधिप्रबन्धॄणाम् । यतः किल कदाचिदादौ समुन्नतदशामाश्रितस्य कस्यापि वस्तुनः कालेन सत्या-मवनतौ पुनः समुन्नतिकामिनामिदमेव प्रथमतः समुचितं चिन्तयितुं, यदत्र कालेन दशाविपर्य्यासे किमिव निदानतामध्यास्ते, अथ विशेष-विचारेण विदित्वैव विपर्य्यासनिदानं तदन्यथाभावो यदि शक्यः साधयितुं, तदैव सङ्कच्छेदनादिकालीनप्रकर्षपर्य्यायाः पुनरपि श्रेयसे जगताम् । तदेव तत्र निबद्धमुपोद्घातविधया, क्रमेण च सम्यक्-सङ्गतिमनुरुन्धाना परिषत्प्रस्तुतपर्य्यनुयोगप्रचयानुगुणा प्रतिवचन-रचनपरिपाटी । सा हि सुचिन्ताफलमनेकेषां विशेषविदुषामिति सन्तमेव सा पन्थानमुपदिशेत्, नासन्तम् । तदसौ सर्व्वात्मना तत्पारि-षदैरनङ्गीकृतापि अवयवशः सुतरामवलम्बनीया, संस्कृतशिक्षासमुन्नति-स्तत्पथमन्तरा दुःसम्पादत्वात् । परं त एवार्थाः प्रत्येकशः सुचिर-चिन्ताप्रसूताः पुनरपि पृथक्तया चिन्तयित्वा निर्णेयाश्चेत्, व्यर्थ एव परिश्रमः श्रीमतामापतेत् । तदमीषामवलम्बनेनैव तत्तत्समावयविक-मुत्कर्षमपकर्षञ्च परामृशन्तः परिषत्परिवृढाः प्रकृतकृत्येषु नियता एव निराबाधमस्याः समुन्नतिमुपपादयितुं शक्नुयुः पतनमाकालिक-मासादितवत्या दैवतसरस्वत्या इति ।

किञ्च बहोः कालात् प्रभृति भारते वर्षे संस्कृतशिक्षेयं लब्धप्रचारा वर्त्तते, प्राचीने काले यमेव विषयमधिकुर्व्वन्तः प्रतिभावन्तः शास्त्र-पर्य्यालोचनया शास्त्रसमृद्धिमनेकविधग्रन्थप्रणयनादिभिः समेधितवन्तः, त एव विषयाः साम्प्रतिकैरधीयमाना नोपकुर्व्वते तथात्वेन भारतीया-नित्यत्र न केवलं कारणान्तरैरुपाध्यायविद्यार्थिनां शास्त्रचिन्तादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैमुख्यमेव निदानं, न खल्वद्यापि सर्व्वानेव गुरून् वा विद्यार्थिनो वा शास्त्रतत्त्वचिन्ताविमुखानवेद्यामहे, परं ये शास्त्रीयतत्त्वानि गुरुदिष्टानि विनावग्रहं परिचिन्तयन्ति, शास्त्रीयतत्त्वविनिर्णयमेव लब्धव्यमर्थं निश्चिन्वन्तस्तत्रैव सर्व्वात्मना रमन्ते, न तेषामपि दृष्टस्तथाविधो वैदुष्यलाभः, येन तद्दर्शनतः सद्यतया प्राचीनविपश्चितो निबन्धारः स्मृतिपथमासीदेयुः। तदत्र निदानान्तरमवधेयं,— तथाहि अद्यत्वे सर्वेष्वेव शास्त्रेषु विवरणग्रन्थानां बहुलप्रचारेण तेषाञ्च अध्येतव्यतया नियमतो निर्द्देशेन विवरणग्रन्थेषु सुतरामभिनिविशतो विद्यार्थिनो विस्मरन्तीव मूलग्रन्थानां, तेन च यथाक्रमं शास्त्रतत्त्वमनधिगच्छन्तोऽपि विवरणविचारादिमात्रोपयिका मूलेषु माध्यस्थ्यमवलम्बमानाः स्वीयप्रतिभासामर्थ्यमकाण्डे क्लेशयन्तो लोकानामनादेयवचसो भवन्ति। तद् यथा साम्प्रतिका मूलग्रन्थानामधिकमालोचनं कुर्व्वीरन्, मूलग्रन्थविविदिषाप्रयुक्ताश्च मौलिकतत्त्वेषु नितरामनुरागमादधीरन्, नियतेषु ग्रन्थावयवेषु च विद्याङ्कुरमधिकृत्य परीक्षणीयतामतिवर्त्तेरन्, तथैव सम्भावयितव्यो विधिः संस्कृतशिक्षाप्रपञ्चे। एवं कृते यथैव प्राञ्चो मूलग्रन्थवर्त्मन्यवदधानाः सारमर्थममुष्मादाकृष्याकृष्य नवीनां शास्त्रविचारशैलीमुदभावयन्, तथैवाद्यत्वे पराञ्चोऽपि विलक्षणप्रतिभानं सफलयन्तो लोके मनस्विनः प्रशस्तिमुखरानुपजनयिष्यन्तीत्यतः को वा स्वस्थो विस्मयते।

संस्कृतशिक्षावनतेः निदानविशेषः।

तत्र प्रतीकारः।

तत्र च मूलग्रन्थानामध्ययनाध्यापनयोः प्रातिस्विकी त्रयी गतिरनुसर्त्तव्या। अध्ययने यथानुपूर्व्वीकमूलग्रन्थस्मरणानुगुणसंस्कारसिद्ध्यर्थमभ्यासेन आम्रेडितं, अध्यापने च वर्णादिविशुद्धिमुररीकृत्य गुरोः शिष्याय तत्प्रतिपादनमाद्या। अध्ययने मूलग्रन्थानां समासेन यथाश्रुतार्थविज्ञानं

पठनपाठनाशैली।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापने च यथाश्रुतार्थविज्ञापनं द्वितीया। अध्ययने सुगृहीते यथाश्रुतार्थे विशेषजिज्ञासया सूक्ष्मतत्त्वानामवधारणं, अध्यापने च विशेषनिरूपणप्रसङ्गेन तत्त्वावधारणयोग्यविशेषविद्यापरिग्राहणमिति तृतीया गतिः प्रोच्यते। एतेन प्रतिप्रारम्भमेव मूलग्रन्थानां सविशेषमालोचनाया विधेयतया समुत्पद्येत किल मूलग्रन्थेषु विद्यार्थिनामतिशयितः संस्कारमहिमा, मौलिकविज्ञानस्य विवरणासङ्गादनभिभूतिश्च। मूलग्रन्थेषु तथा दृढ़प्रत्यये समुपजाते तृतीयपदगामिनो विवरणकोटिरपि नालं मूलप्रत्ययमन्तःकरणादपवाहयितुम्। मौलिकप्रतिभानविप्रयोग एव सुतरां मूलं विद्यावनतेरिति आवृत्तिः सर्व्वशास्त्राणां वोधादपि गरीयसी'ति शास्त्रवचनादप्युन्नेतुं शक्यते। यथा हि शब्दशास्त्रमधीयानैरादौ व्याकरणसूत्राणामाम्रेड़ितं, तथैव दर्शनाध्येतृपुरुषैस्तत्तद्दर्शनसूत्राणां धर्म्मशास्त्रादिविद्यार्थिभिश्च धर्म्मसूत्रादीनामवश्यमभ्यासेन क्रियमाणमाम्रेड़ितमत्यासङ्गेन नूनं विद्यासम्बन्धिप्रज्ञतारतमाविर्भावयितुमलं सम्पत्स्यते।

अपि च प्राचीनभावपरावृत्तिमुत्तमतमां विभावयन्तोऽपि नहि वयमेकस्यैव विदुषो नानाविषयविज्ञानप्रत्यर्थिभूता भवामः, परं प्रत्यर्थिनो वयमेकस्य सर्व्वत्र सविशेषस्य वा अविशेषस्य वा विज्ञानस्य। न खल्वाद्यं कृतिसाध्यं साधारणपुरुषाणां, द्वितीयन्तु न तथा लोकानुपकरोतीति परिहेयं द्वयमेवेदम्। उपादेयं पुनरेकत्र विशेषतो विज्ञानमन्यत्र च सर्व्वत्र यथासम्भवं सामान्यत एव। भूयांसो हि दृष्टा

एकं विशेषेण सामान्यतश्चान्यानि शास्त्राणि ज्ञेयानि।

विपश्चितः प्राचीने काले धर्म्मशास्त्रादिविशेषज्ञा नैयायिकादिपण्डितोचितसम्मानं सवलात्कारमिव सम्प्राप्तवन्तः, न्यायादिदर्शनतत्त्वमायत्तीकृतवन्तोऽपि सुनिपुणा धर्म्मादिशास्त्रेषु। न तावदस्माभिरभिप्रेयन्ते तथा तार्किका दार्शनिका वा, ये श्रुतिस्मृतिसाहित्यादिषु नितरामनभिज्ञा, नापि तथा श्रौताः स्मार्त्ताः साहित्यिका वा, ये तर्क-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनतत्त्वविज्ञानैरेकान्ततः परिशून्याः। क्षीणक्षीणेऽपि तथाभूत-विद्वत्समाजे प्राचीनस्मृतिसमुज्जीवनायेव कतिचन तादृशा विचक्षणा जीवन्त्यद्यापि, येषामुदाहरणेन पुनरपि तथाविधः पण्डितसमाजः शक्यो विनिर्म्मातुम्। अतः संस्कारपरिषदा तथैव प्रयतितव्यं, यथा पुनरपि प्राचीनपण्डितजनोचितविद्यागरिम्णा भारतमिदमलङ्कृतं स्यादिति वह्वोः कालादनन्तरं भूयोऽप्यस्माभिः प्रस्तूयते।

परीक्षाविधौ प्रश्नेषु नोचितः सुगमतामात्राभिसन्धिः।

परञ्चेदं विस्मयकरं विद्यापरिग्रहे, यत् प्रतिशरदमेव समीक्ष्यते परीक्षाविधिरस्माभिः, तत्र च यावदेव परीक्षायां सुगमाः प्रश्नमालास्तावदेव प्रशस्तिः परीक्षकाणाम्, यावदेव च व्युत्पत्तिविशेषपरीक्षणाय प्रस्तुताः किञ्चिदिव दुर्गमा प्रश्नसङ्घातास्तावदेव विद्यार्थिनामुपाध्यायानाञ्च प्रवर्त्तते अवणविदारी भूयान् कलकलो नालमयं योग्यः परीक्षकः शोभनतया परीक्षाविधिं निर्व्वर्त्तयितुमिति, उपगत्य च तन्मूलकमावेदनपत्रं परीक्षानिर्वर्त्तनपरिषदा सुविचार्य्य प्रश्नपत्राणि सानुग्रहं तत्सम्बन्धिसंख्यायाः अनुग्रहेण प्रचुरदानमनुशिष्यन्ते तत्-परीक्षकाः। अथात्र वयं पृच्छामः,—किमु परीक्षाविधिरयं विद्यार्थिनामुत्तीर्णतामेव साधयितुं विद्यापरीक्षणाय वा, आद्ये प्रश्नप्रक्षविचारमनादृत्य सामान्येन सर्व्वेषामेव समुत्तीर्णताप्रचारे निरायासा किल वाञ्छितसिद्धिः, द्वितीये तु व्युत्पत्तिपरीक्षके प्रश्नसम्पाते विद्यार्थिनामुपाध्यायानाञ्च तथाभूतेन कलकलेन समुद्वेजिताः पतिषत्परिचालकाः किमित्यकाण्डे लक्ष्यविगुणमनुग्रहादिकमाश्रयेयुः? विद्यान्तरपरीक्षायामिव प्राच्यविद्यापरीक्षायामुत्तरणमेव वयं नालं मन्यामहे, परं गुणपरीक्षणमेव; ततो यथा यथा सुगमेन वा दुर्गमेण वा प्रश्नपर्य्यायेण तत् सम्पद्येत, तथा तथैव परिषदनुशासनञ्चेत् संस्कृत-शिक्षायाः सर्व्वथा क्षेममनभिक्षतं भवेदिति।

निरुक्तपूर्व्वशिक्षापद्धतिपरिग्रहे तावदादर्शसंस्कृतमहाविद्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लया: केचन प्रथमतो निर्म्मातव्याः। तत्र सुचिरं समासादितप्रासनैः पुनरपरे विद्यालया जायेरन्, ततोऽपि विनीतैः पुनरपरे इत्येवं प्रस्तुते नवीनपद्धतिमनुसृत्य महनीयसंस्कृतविद्यारत्नाधिगमे नैव भारतं वर्षं प्राच्यभावानुबन्धिशिक्षादारिद्र्यमणुशोऽपि समासादयेत्, परं तदानीमेव 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥' इत्यादिगौरववाचामवितथं गोचरतामधिकुर्व्वीत। तत्र च संस्कारपरिषदा चिन्त्यमिदमपि, यथा राजकोषात् समाहृतेनार्थसङ्घातेन पर्य्याप्तमसम्भवन्त्यामपि तदुपपत्तौ तदर्थमर्थयितव्या अद्यापि सदर्थसाधनाभिमुखा भारतीयभूपतयः, येषां विविधपुण्यसमुदाचारा पुरुषानुपूर्व्वी गर्व्वितेव स्वीयसुकृतसम्पातैः, सन्त्यद्यतनेऽपि समये जनकराजसिंहासनमध्यासीनास्तन्त्रसिद्धान्तपारदृश्वानः सुगृहीतनामानो द्वारवङ्गेश्वराः, सन्ति विजयवल्ली वर्द्धमानसद्‌गुणसम्माना वर्द्धमानमहीपतयो महनीयप्रकृतयो महाराजाधिराजपदभाजः, सन्ति च अन्येऽपि वदान्यप्रवीणा मान्यमान्याः प्रभूतधनधन्या, येषामर्थना सदर्थनिष्पादनाय कदाचिदपि नालं विफलतामासादयितुम्।

कर्त्तव्यमादर्शसंस्कृतविद्यालयनिर्म्माणम्।

यद्यपि तत्र तत्र बहुत्रैव वर्द्धमानद्वारवङ्गमूलाजोड़वहरमपुरविक्रमपुरराजसाहीनवद्वीपादिपदेषु साम्प्रतमपि विद्यन्ते केचन विद्यालयाः प्राच्यविद्यामात्रप्रकर्षसमुपदेशाय परिनिष्ठापितास्तथापि तेषु नाद्यापि तथाविधसमुन्नतिपथमनुवर्त्तमाना शिक्षापद्धतिरनुश्रूयते, अतः सनिर्बन्धमनुरुध्यन्ताममीषामध्यक्षाः, परीक्ष्यतां तत्र तत्र स्वाभिमतसंस्कारानुगुणा पद्धतिः शिक्षायाः, यथाबलञ्च सम्प्रार्थ्यन्तां तदपेक्षितानि साहायकानि, प्रतीत्य चान्यानपि भूरिवसुभारान् भूमिभुजो विद्यासमुन्नतये प्रस्तूयतां तथाभूतनवविद्यामन्दिरसङ्घातः,

वर्त्तमानेष्वपि विद्यालयेषु संस्कारः समपेक्षितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाकाङ्क्ष्यतामसुत्र यथाकथञ्चिदनवद्यविद्यानुरागसंसाधनसाधनोपन्यासेन समीचीनचेतनो विद्यार्थिविस्तारः, समनुशिष्यतामवश्यमालस्यलास्यपरिशून्यः शिष्यव्रजो निष्प्रतीपं शास्त्रीयतत्त्वसारम्, क्रियताञ्च यथाक्रममेव शास्त्रीयोन्नतिसीमेति ॥

प्राचीनवङ्गवैशिष्ट्यम्

(लेखकः—श्रीमत्-पूर्णानन्दवंशकरीर-श्रीगिरिशचन्द्र वेदान्ततीर्थः)

अधुना बङ्गवास्तव्यानामुच्चावचश्रेणीविभक्तानां हिन्दुकानां सर्वथैव पतनं समजनि। किमत्र कारणम्? आत्मविस्मृतिरेव। प्रायेणैतत् परिदृश्यते यत् आत्मविस्मरणेन प्राणिनां पतनं, तन्निबन्धनं कष्टबाहुल्यञ्चावश्यम्भावि। यथा कश्चित् सुरापानादिजनितमदविकार आत्मनः खेचरत्वं समारोपयन् भूचरत्वञ्च विस्मरन् प्रासादादिशिरसो विहङ्गमवदुड्डयनं कुर्व्वन् धरणीपृष्ठे पतितः सद्य एव भग्नहस्तचरणो यावज्जीवं दुःखातिशयमनुभवति। किमधिकदृष्टान्तप्रदर्शनेन। आत्मविस्मृतानामैहिकामुष्मिकं श्रेयो दूरापेतमनर्थजालञ्च नितरां सुलभमिदमविसंवादि।

अनधिगतवेदादिशास्त्रतात्पर्य्याणामज्ञात हिन्दुसदाचाररहस्यानामनवबोध्यदेवादितत्त्वानामैतिहासिकम्मन्यानां स्वमनीषामात्रोपादानरचिताहिन्दुकेतिहासाभासानां प्रचारेण स्वजातीयेतिहासलवमप्यजानताम् आशैशवं केवलं विदेशेतिहासानुशीलनरतानां वङ्गयुवकानामधुना सर्वथा आत्मविस्मृतिः सञ्जाता। अतस्ते केवलं निरन्तरं पाश्चात्त्यसभ्यताया उत्कर्षमपकर्षञ्च स्वसभ्यतायाः पश्यन्ति फेरुविरुति-न्यायानुसरणेन च विदेशप्रत्यागतैहिकसर्व्वस्वासुरभावदृप्तप्रचारितमतं हिततममिति मन्यमानाः स्वधर्मरक्षणतत्परान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमार्थतो देशहितैषिणः प्रत्यवस्थां दर्शयन्ति। विश्वविद्यालयलब्ध-कृतकार्य्यता-निदर्शनपत्राणामुच्चशिक्षितानां मध्ये अनेके एवं प्रचारयन्ति, यत् पालशासनावसरे वङ्गवास्तव्या ब्राह्मणादयः सर्वं एव बौद्ध-धर्म्मानुसारिणो जाताः, तदात्वे वङ्गतो जातिभेदस्तिरोहितः। पश्चात् सेनशासनसमये पुनः स्मार्त्तधर्म्मस्य प्रतिष्ठा, तन्निबन्धनो जातिविभागश्च सम्पन्न इति। अतः प्रयोजनानुसारेण शास्त्रशासनमप्युल्लङ्घ्य समाजहितसाधनमावश्यकं; तत्र न काचिद्धानिश्च सम्भवतीति।

केचन पुनर्वदन्ति, यत् प्रकृतो धर्म्मः स्वार्थपरैर्धूर्त्तब्राह्मणापसदैस्तिरोहितः, अवकरभूतैरवैदिकैः शौचाचारैः स्पृश्यास्पृश्यविवेकैश्च देशवासिनो नितरां पीड़िताः, अत एव वयं स्वाधीनतारहिताः। अन्ये तु नानाविधान् युक्त्याभासान् शास्त्राभासांश्च उपन्यस्य प्रतिपादयन्ति, यत् प्राचीनजुष्टपथानुसरणमेव स्वाधीनताराहित्यकारणमिति। शास्त्रशासनपरिवर्त्तनमन्तरेण देशोद्धरणं नितरामसम्भवि। एतद्विषये तु पाश्चात्यशिक्षाटसानामात्मविस्मृतानां वैमत्यं नास्ति।

वयन्तु रक्षणशीलाः शास्त्रसरणिशरणाः प्रदर्शितमतस्यासारतामनर्थकारिताञ्च वीक्षमाणा अद्य किञ्चिद् वक्तुं समुत्सुकाः। अत आदित एव तत्रभवतो भारतीसेवकान् सबहुमानं विज्ञापयामः, प्रमा-प्रमेय-प्रमाण-विवेचनाकुशला भवन्तः सानुकम्पमस्मदुपन्यस्तं वङ्गेतिहासोपादानभूतं गौड़ीयबौद्धनृपतिशासनकालीनं स्मार्त्त-धर्म्माभ्युदयमक्षुस्सं ब्राह्मणगौरवञ्च तावत् पश्यन्तु। उपरिष्टात् स्मार्त्तशासनव्यतिक्रमस्य विषमयफलं, शास्त्रपथानुसरणस्य श्रेयस्करत्वं, सर्व्वशास्त्राणां वेदमूलकत्वं, देशाचारस्यापरिहार्य्यत्वञ्च प्रतिपादयितुं यतामहे। अपि च गौड़ानां स्मार्त्ताचार-प्रचारसाधन-ग्रन्थप्रणयनकौशलं, स्वकर्म्मोपयोगिवेदव्याख्यानं, तत्रानन्यसाधारणत्वं, तन्त्रपुराणादिनिबन्धरचनाकौशलञ्च विघोषयामः।

वैद्यदेव-ताम्रशासनपाठेनैतदवगम्यते—पुरा सूर्य्यवंशे "विग्रह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाल"-नामा नृपतिः समजनि। बाहुबललब्धगरिमा "योगदेव"—नामा वंशपरम्परया तस्य मन्त्री बभूव। प्रबलपराक्रमशालिनस्तस्य राज्ञः "रामपाल"-नामकः पुत्रः सञ्जातः। "बोधिदेव"—नामा तस्य राज्ञो मन्त्री आसीत्। "प्रतापदेवी" तस्य मन्त्रिणः पत्नी बभूव। तयोः "वैद्यदेव"—नामा निखिलगुणालयः पुत्रः सञ्जातः। रामपालदेवपुत्रस्य "कुमारपाल"—नरपतेश्चित्तानुरूपो मन्त्री बभूव। स तु कालक्रमेण कुमारपालस्य वाल्लभ्यात् पूर्व्वस्यां दिशि राजत्वं प्राप। स नृपतिर्वैद्यदेवः कौशिकगोत्राय श्रीधरनाम्ने वरेन्द्रीभूम्यन्तर्गत-भावग्रामसम्भूताय ब्राह्मणाय शासनीकृत्य भूमिमदात्। स तु श्रीधरः तीर्थभ्रमण-वेदाध्ययन-दानाध्यापन-यज्ञानुष्ठान-व्रताचरणादिभिर्ब्राह्मणोचित-क्रियाकलापैः सर्व्वेषां श्रोत्रियाणां श्रेष्ठो बभूव। किं बहुना—स हि

"कर्म्म-ब्रह्मविदां मुख्यः सर्वाकारतपोनिधिः।
श्रौतस्मार्त्तरहस्येषु वागीश इव विश्रुतः॥"

मदनपालदेव-ताम्रशासनपाठेन ज्ञायते—राजा महाभारतपाठदक्षिणात्वेन ब्राह्मणाय शासनीकृत्य भूमिदानमकरोदिति। यथा—

"......मातापित्रोरात्मनश्च पुण्ययशोऽभिवृद्धये कौत्ससगोत्राय शाण्डिल्यासितदेवलप्रवराय पण्डित-श्रीभूषणसब्रह्मचारिणे सामवेदान्तर्गतकौथुमशाखाध्यायिने चम्पाहिट्टीयाय चम्पाहिट्टीवास्तव्याय शौनकस्वामिपुत्राय पण्डितभट्टपुत्रश्रीवटेश्वरस्वामिशर्म्मणे पट्टमहादेवीचित्रमतिकया वेदव्यासप्रोक्तप्रपाठितमहाभारतदक्षिणात्वेन भगवन्तं बुद्धभट्टारकमुद्दिश्य शासनीकृत्य दत्तोऽस्माभिः——।"

गरुड़स्तम्भलिपिपाठेनैतदवगम्यते यत् गर्गनामा भूसुरः धर्म्मपाल-नरपतेः प्रधानामात्य आसीत्। तस्य दर्भपाणिनामधेयः पुत्रोऽभूत्। स तु पितृप्रममात्यपदमलङ्कृत्य धर्मपाल-नरपते राज्यविस्तृतिं सम्पादयामास। नरपतिस्त्वशेषसामन्तराजशिरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समभ्यर्चितचरणोऽपि उपदेशग्रहणार्थं दर्भपाणेरवसरमपेक्षमाण-स्तदीयद्वारदेशे दण्डायमानोऽतिष्ठत्। किं बहुना, स नृपतिः प्रथमं तस्मै नन्दिवराय समुन्नतं महामूल्यमासनं दत्त्वैव तदनुमत्या सभयं सिंहासनमारुरोह। तस्मात् दर्भपाणेः सोमेश्वरः सञ्जातः। सोमेश्वरस्य केदारमिश्रनामा सुतः समजनि। अस्य बुद्धिबलमुपास्यैव नरपतिर्देवपाल उत्कल-हूण-द्रविड़गुर्जराणामखर्वगर्वनिसूदन-पुरःसरं समुद्रमेखलां वसुन्धरां सुचिरं शशास। बृहस्पतिकल्पस्य तस्य प्रधानामात्यस्य यज्ञस्थानमागत्य महेन्द्रतुल्यप्रभावः शूरपालो नृपतिरनेकवारं श्रद्धापरिप्लुतहृदयो नतशिराः पवित्रं यज्ञीयवारि जग्राह।

प्रबलभुजबलशालिनो महीपालदेवस्य ताम्रशासनपाठेनैतदव-गम्यते—यत् परमसौगतो महाराजाधिराजश्रीविग्रहपालदेव-पादानुध्यातः परमेश्वरः परमभट्टारको महाराजाधिराजः महीपाल-देवः मातापित्रोरात्मनश्च पुण्ययशोऽभिवृद्धये भगवन्तं बुद्धभट्टारक-मुद्दिश्य शासनीकृत्य ब्राह्मणाय भूमिदानमकरोत्। तत्तु दानं विषुवसंक्रान्तौ गङ्गायां विधिवत् स्नात्वा अकृत। शासनैकदेश-प्रतिलिपिस्त्वेवम्—

"पराशरसगोत्राय शक्तिवशिष्ठपराशरप्रवराय——द-सब्रह्म-चारिणे वाज······शाखाध्यायिने मीमांसा-व्याकरण-तर्कविद्याविदे हस्तिपदग्रामनिर्गताय चपटिग्रामवास्तव्याय भट्टपुत्र रि [ह्र]षीकेश पौत्राय भट्टपुत्रमधुसूदनपुत्राय भट्टपुत्र······त्य शर्म्मणे विषु [षु] वसंक्रान्तौ विधिवत् गङ्गायां स्नात्वा शासनीकृत्य प्रदत्तो-ऽस्माभिः······।"

अलमतिपल्लवनया, प्रदर्शितताम्रशासन-गरुड़स्तम्भलिपिसंक्षिप्तां-शतात्पर्य्यावबोधिनामेतत् निःसंशयं प्रतिभाति—यत् पाल-राजत्वसमये श्रौत-स्मार्त्तक्रियानुष्ठानपूतहृदया मीमांसा-व्याकरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्कादिशास्त्राभ्यासलब्धयशसो भूसुरनिकरा गौड़देशं समलङ्कुर्वन्तो बौद्धनरपतिभिः सविशेषं सम्मानिताः सुचिरं निवसन्ति स्म। तत्र केचन पुरुषपरम्परया राज्ञां प्रधानामात्यपदमुररीकृत्य स्वदेशगौरवं मानवशास्त्रशासनञ्च सर्व्वथा ररक्षुः। एवं खलु भगवतो मनोः स्मरणमुपलभ्यते—

"मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्॥ ७।५४
सर्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत् परमं मन्त्रं राजा षाड़गुण्यसंयुतम्॥

अनयोः पिण्डितार्थः—पितृ-पितामहक्रमेण सेवकान्, दृष्टादृष्ट शास्त्रज्ञान्, विक्रमशालिनः, लक्षादस्खलितायुधान् अस्त्रविद इत्यर्थः, विशुद्धकुलोत्पन्नान्, परीक्षितान् सप्त अष्टौ वा मन्त्रिणः कुर्व्वीत राजा। एषां सर्व्वेषां मन्त्रिणां मध्यादन्यतमेन धार्मिकत्वादिना विशिष्टेन विदुषा ब्राह्मणेन सह प्रकृष्टं मन्त्रं राजा निरूपयेत्।

योगीश्वरानुशासनमप्येतत्संवादि। यथा—

"स मन्त्रिणः प्रकुर्व्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्।
तैः सार्द्धं चिन्तयेद् राज्यं विप्रेणाथ ततः स्वयम्॥"

[याज्ञवल्क्यस्मृतिः १।३१२]

अत्र विप्रशब्देन प्रधानामात्यरूपः पुरोहितोऽभिप्रेतः। तथाच विज्ञानेश्वरः—"अनन्तरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थकुशलेन ब्राह्मणेन पुरोहितेन सह कार्य्यं विचिन्त्य ततः स्वयं बुद्ध्या कार्य्यं विचिन्तयेत्।"

कीदृशः पुरोहितः कार्य्यस्तदपि स एवाह—

"पुरोहितं प्रकुर्व्वीत दैवज्ञमुदितोदितम्।
दण्डनीत्याञ्च कुशलमथर्वाङ्गिरसे तथा॥"

[याज्ञवल्क्यस्मृतिः १।३१३]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रत्योदितोदितशब्देन शास्त्रोक्तविद्याभिजनसत्कर्म्मानुष्ठानादि युक्तोऽभिप्रेतः। अतो मनूक्तविशिष्टब्राह्मणरूपप्रधानामात्य—योगीश्वरोक्तपुरोहितयोरभेदः प्रतिभाति। एतदेव स्मार्त्तशासन-मुपजीव्य नीतिशास्त्रकारकामन्दकेनोक्तम्—

"त्रय्याञ्च दण्डनीत्याञ्च कुशलः स्यात् पुरोहितः।
अथर्व्वविहितं नित्यं कुर्य्याच्छान्तिकपौष्टिकम्॥" [४।७।३१]

इति। अस्यार्थष्टीकाकृता विशदीकृतः—"पुरोहितस्यामात्य-विशेषत्वात् वैशेषिकममात्यकार्य्यमित्याह—.........तथाहि पुरो धीयते नियुज्यते दृष्टादृष्टेष्विति पुरोहितः।"

अयमेव प्राधानामात्यपुरोहितो राज्ञां गुरुनाम्नाप्यभिहितः यथा चन्द्रगुप्तगुरुश्चाणक्यः। अस्मादेव गुरोर्नृपतिर्दीक्षितो बभूव। यथा सभ्रातृको रामचन्द्रो वशिष्ठेन दीक्षितः। तदुक्तं महा भागवते [३८।१]—

"अथ तं रामचन्द्रन्तु भरतं लक्ष्मणं तथा।
शत्रुघ्नञ्च वशिष्ठः स सर्व्वशास्त्राण्यशिक्षयत्।
दीक्षाञ्च कारयामास देव्या मन्त्रेण नारद॥"

अलं प्रासङ्गिकविषयबाहुल्येन। प्रकृतमनुसरामः—दर्भपाणि-नामब्राह्मणामात्यप्रवरस्य पुरुषपरम्परयामात्याधिकारपालनेनैतत् विस्पष्टं प्रतीयते—यत् बौद्धनृपतिगणः सर्व्वथा स्मार्त्तशासनमनु-सृत्यैव चिरं वङ्गभूमिं शशास।

अपरञ्च—ये तावत् चम्पाहिट्टीया ब्राह्मणाः पालशासनसमये नृपतिदत्तं भूभागमलभन्त तद्वंशप्रसूत एव अनिरुद्धभट्टः वल्लाल-नरपतेर्गुरुरासीत्। तस्य वल्लालगुरुत्वञ्च वल्लालकृतदानसागरोप-क्रमपाठादवगतम्। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वेदार्थ-स्मृति सङ्ग्यादिपुरुषः स्लाघ्यो वरेन्द्रीतले
निस्तन्द्रोज्ज्वलधी विलासनयनः सारस्वतब्रह्मणि ।
षट्कर्म्माभवदार्य्यशीलनिलयः प्रख्यातसत्यव्रतो
वृत्रारेरिव गोष्पतिर्नरपतेरस्यानिरुद्धो गुरुः ॥" (६)

अस्य चाम्पाहट्टीयत्वञ्च पितृदयितोपसंहारपाठादवगम्यते। यथा—"इति चाम्पाहट्टीय महामहोपाध्यायश्रीमदनिरुद्धविरचिता छन्दोगानां पद्धतिः पितृदयिता समाप्ता ।"

प्राचीनलेखमालानां पौर्वापर्य्यपर्य्यालोचनया सम्यगवबुध्यते यत् पालनृपतिशासनसमये समग्रकुथुमशाखाध्यायिनः यजुर्व्वेदवाजसनेयशाखाध्यायिनश्च गौड़वास्तव्या बहवः षड़ङ्गविदः श्रोत्रिया आसन् । श्रोत्रियलक्षणञ्च—

"एकाञ्च शाखां सकलां षड़्भिरङ्गैरधीत्य च ।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् ॥"

इति । ब्राह्मणानां भट्टोपाधिश्च तेषां पूर्व्वमीमांसानिष्णातत्वं व्यनक्ति । यज्ञानुष्ठानसम्पादने मीमांसाज्ञानमावश्यकम् । यज्ञादिक्रियासम्पादनार्थमेव पूर्व्वे पण्डिताः शास्त्राण्यधीतवन्तः । नत्विदानीन्तना इव केवलं ख्यापनार्थमाचण्डालमध्यापनेनार्थलाभार्थं वा ।

किञ्चान्यत् तत्कालीना भूसुरा न केवलं वेदबलशालिनः, अपि तु बाहुबलनिष्णाताश्च । अत एव तदानीं तेषां पतनं नाभूत् । ते खलु यथाशास्त्रमवस्थानुसारेण शास्त्रं शस्त्रञ्च व्यवहर्त्तुं कुशला आसन् । सर्वास्ववस्थासु शास्त्रानुवर्त्तिनां कदापि विनिपातो न सम्भवेत् । कस्यामवस्थायां ब्राह्मणैः शस्त्रं व्यवहार्य्यं, तदपि भीष्मेण युधिष्ठिरं प्रति उक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ब्राह्मणस्त्रिषु कालेषु शस्त्रं गृह्णन्न दूष्यति ।
आत्मत्राणे वर्णदोषे दुर्दम्यनियमेषु च ॥"

[शान्तिपर्व्व ७८।]

किञ्च ब्रह्म-क्षत्रविरोधे तु ब्राह्मणेनैव शास्त्रबलादिना क्षत्रियो दमनीयः, ब्राह्मणात् क्षत्रियस्य पराजयश्च ध्रुवमेव, इत्यपि भीष्मेणैव अभिहितम्—

"तपसा ब्रह्मचर्य्येण शास्त्रेण च बलेन च ।
अमायया मायया च नियन्तव्यं तदा भवेत् ॥

क्षत्रियस्यातिवृत्तस्य ब्राह्मणेषु विशेषतः ।
ब्रह्मैव सन्नियन्तृ स्यात् क्षत्रं हि ब्रह्मसम्भवम् ॥

अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लौहमुत्थितम् ।
तेषां सर्व्वगतं तेजः स्वासु योनिषु शाम्यति ॥"

[शान्तिपर्व्व ७८।२०—२२

ब्रह्मास्त्रं ब्राह्मणो विद्यात् क्षत्रियो वा गुणान्वितः ।"

इत्यादौ तु विशिष्टास्त्रज्ञानं ब्राह्मणस्योक्तम् ! अतः शस्त्र-शास्त्र-व्यवहारपटूनां ब्राह्मणानां कदापि पतनं न सम्भवति । पालराजत्व-समयपर्य्यन्तं शस्त्रशास्त्रविशारदा ब्राह्मणा आसन् । तेषां यथार्ह-सम्मानपुरःसरमेव बौद्धा राजानो भुवं शासितवन्तः । तादृशब्राह्मण-सत्तयैव अन्येऽपि वर्णाः सङ्करजातयश्च स्वस्वधर्म्मवृत्त्यनुसारिणः सुखिन आसन्निति अर्थाच्चिसमेव । अतः तदानीं जातिभेदस्तिरोहित इति कल्पनं निरालम्बनमेव ।

किञ्च बौद्धानां जातिभेदो नास्ति इत्यपि प्रवादो न प्रमाणसहः । यतः प्रदर्शितपालनृपतिताम्रशासन एव तेषां सूर्य्यवंशप्रभवत्वम् उद्घोषितम् । नहि जातिरहितानां सूर्य्यवंशोत्पन्नत्वं समञ्जसम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च बौद्धग्रन्थपाठेनापि तेषां म्लेच्छवत् जातिराहित्यं न प्रतिभाति। तत्र तथागतानां ब्रह्म-क्षत्रेतरहीनजातिषु उत्पत्तिर्न स्यादिति विस्पष्टं लिखितमस्ति। यथा—"न बोधिसत्त्वा हीनकुलेषूपपद्यन्ते। चण्डालकुले वेणुकारकुले वा रथकारकुले वा पुक्कसकुले वा। अथ तर्हि कुलद्वय एव उपपद्यन्ते। ब्राह्मणकुले क्षत्रियकुले च।" [ललितविस्तरे ३य अः]। बोधिसत्त्वप्रादुर्भावयोग्यकुलस्य "ब्रह्मण्यम्" इति विशेषणञ्च दृश्यते। यथा—"ब्रह्मण्यञ्च तत्कुलं भवति" [ललितविस्तरे ३य अः]। अपरञ्च "महावस्तु अवदाने" "महाकाश्यपमहामौद्गल्यायनमहाशाण्डिल्ये"त्यादि गोत्रप्रधानं सम्बोधनपदम् अनिच्छतोऽपि सकशाघातं तेषां जातिभेदं बोधयति। न हि जातिरहितानां काश्यपत्वादिकं कथमपि सम्भवेत्।

अधुना चीनतिब्बतादिदेशवासिबौद्धानां जातिराहित्यमाकलय्य भारतीयप्राचीनबौद्धानामपि तादृशत्वकल्पनं नितरां साहसिक्यम्।

अधुना गौड़ीयवैष्णवेषु यथा केचित् ब्राह्मणादिजातिमन्तः, केचन व्यभिचारोत्पन्ना "वैष्टम्" संज्ञका निर्जातिका, बौद्धानामपि तत्समत्वमकामेनापि स्वीकार्य्यम्।

किञ्च ताम्रशासनतो न केवलं ब्राह्मणसत्तावगम्यते किन्तु चाण्डालादिहीनजातीनामपि। यथा वैद्यदेवादिताम्रशासनेषु "ब्राह्मणोत्तरान्········चाण्डालपर्य्यान्" इत्यादिनिर्द्देशो दृश्यते।

(अवशिष्यते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(आषाढ़मासादनुवृत्तम्)

नलः—भद्रे, कीदृशमत्र नारीधर्मपरिहाणम् ? अपि न जानाति भवती रुक्मिणा शिशुपालाय कल्पितां रुक्मिणीं भगवता नारायणेन विक्रम्य गृहीताम्।

दम—सखि, कथय, जानामि तथा रुक्मिणीं किन्तु तत्र रुक्मिणी नारायण एव बद्धरागासीत्, तस्याः पिता भीष्मकोऽपि नारायणाय एव कन्यां दातुं स्पृहयाञ्चकार, तत् कीदृशं मया सह तस्याः साम्यम् ?

कल्प—महाभाग, प्रियसखी ब्रवीति अहमन्यत्र आवर्जितहृदया, सा तु शिशुपाले न तथेति।

नलः—भद्रे, कौमारचापलाद् वा क्षणिकप्रकर्षदर्शनविड़म्बनाद्वा हीनेऽपि कदाचित् कुमारीहृदयं यदि प्रवर्त्तेत तत्र कीदृशं प्रतिविधानम् ?

दम—तत्र तु हीनस्यापि परिग्रह एव कर्त्तव्यतापथमुपास्ते।

नलः—अथ तत्र तदा दुरन्त एव परिणामः।

दम—तत्तु दुरदृष्टप्रसूतमनतिक्रमणीयमेव।

नलः—अथ का वा स्वेच्छया दुरदृष्टफलं कामयते ?

दम—स्वेच्छया दुरदृष्टफलमकामयमानापि न कुमारी धर्ममतिवर्त्तते।

नलः—राजनन्दिनि, अथ पृच्छामि यदि देवताविरोधिनी नरमेव कामयमाना स्वयंवरणप्रवृत्ता भवती भवेत् तदा किं देवता अपि निर्विरोधं वर्त्तिष्यन्ते, कोपकषायिताः स्वयंवरणव्यापारमेव ते विघटयिष्यन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम—करुणापरा नाम देवाः स्वभक्तेषु, यद्यहं तेषु चिरं भक्तिमती तत् कथमेवं ते कुर्व्वीताम् ?

नलः—राजनन्दिनि, मुग्धासि, कुतः ?

कामेनाहृतचित्तानां स्वभावविलयो यदि ।
तेषां सर्व्वा विपर्य्यस्ता कृत्याकृत्यविचारणा ॥

तदनङ्गसङ्गविमुग्धानाममीषां भक्तिप्रवणायामपि भवत्यां स्वाभिलषितसिद्धिमन्तरेण कुतो दयापरत्वम् ?

दम—सखि, कथयामि, यदि देवानामैकान्तिकमेव नैष्ठुर्य्यं परिलक्ष्यते, तदा मरणमेव वरं मन्यमाना स्वजीवनं परित्यजेयम्, येन पतिव्रताया मे न व्रतहानिकृतो दोषः ।

कल्प—शान्तं पापं शान्तं पापं प्रतिहतममङ्गलं प्रियसख्याः ।

नलः—अथ राजनन्दिनि, पृच्छामि भवतीं, यदि त्वं मनोरथमलभमाना मरणमेव भवती वृणुयात्, तथापि किं शक्यः परिहातुं देवाधिकारः ।

दम—कथं वा न शक्यताम् ?

नलः—भद्रे, पश्य,—

उद्बन्धनेन मरणं काम्यते यदि भाविनि !
शून्याधिकारो भगवान् वासवो विजयं गतः ॥

दम—कथमुद्बन्धनेन, पतिव्रताभिः सुचिरं समाचरितं चन्दनशीतलायमानमनलमेव प्रविश्य तथा कुर्य्याम् ।

नलः—आपातदर्शिनि राजनन्दिनि,

प्रविश्य वह्निं यदि मृत्युकामना
तथापि हंहो जितमेव वह्निना ।
चिराय चित्ते प्रथमोपकल्पिता
वह्निर्यदालिङ्गितुमाप्यते प्रिया ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम—अलं वा वह्निप्रवेशेन, तरङ्गगतव्याकुलामुपगत्य तरङ्गिणी-मात्मनिर्वृतिं विधास्यामि।

नलः—राजदारिके, किमत्रापि निरुपद्रवासि?

पद्य—तरङ्गिणीं यदा गत्वा परिहातुं स्वजीवनम्।
वारिनाथो हि वरुणो वृतः स्वेच्छावशात्त्वया॥
तदलमद्यापि निर्बन्धेन, सुपथि प्रवर्त्त्यतामात्मा।—

दमयन्ती—एवमपि शक्या विषेणापि जीवनलीला निर्व्वापयितुम्।

नलः—मुग्धे, राजनन्दिनि, महान्तमेव विभ्रमं गतासि, यदिदानी-मपि नात्मनोऽहितं हितञ्चावगच्छसि।

पद्य—यथा कथञ्चिन्मरणे समाश्रिते,
क्व धर्म्मराजस्य कराद् विमुच्यसे।
मृतामपि त्वामु गत्य धर्म्मराट्,
कृतार्थभावं ननु मंस्यतेतराम्॥

दम—सखि, सखि, अशरणास्मि, तदवलम्बस्व माम्, (मूर्च्छति)

कल्प—(दमयन्तीमवलम्ब्य) सखि, समाश्वसिहि समाश्वसिहि, महाभाग, किमिदं अनुष्ठितं पौरोभाग्यम्, यदि नाम एषा राजदारिका अनेन वृत्तान्तेन विपद्येत, तत् किं प्रथिष्यते भगवतां देवानां महिमा? एष ते अञ्जलिः, मा पुनरिमां समुद्वेजय देवसम्बन्धिनीभिः कथाभिः। सखि, समाश्वसिहि। अहो अद्यापि सखी नोच्छ्वसिति! महाभाग, किं नु पश्यति भवान् विस्मयेन परिहाय नैष्ठुर्य्यं राजदारिकां प्रति करुणामास्थाय अदूरवर्त्तिनः कमलसरोवरात् पद्मपलाश-पुटकेन सलिलमानीय समुज्जीवयतु मे प्रियसखीम्।

नलः—भद्रे अलमावेगेन, एष सलिलाहरणाय प्रतिष्ठे, त्वमपि राजदारिकामुज्जीवयितुं वसनान्तेन वीजयस्व, यथेयमचिरा-दुद्बुद्धा भवेत्। (गच्छन्) अहो सत्यमतिनिष्ठुरोऽस्मि,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यथा कथं तथा निर्व्वन्धवतीमपि राजदारिकां तथा सुतरामनुरुन्धे, तद् यथास्या दृढ़तमो निर्बन्धस्तथा मन्ये विफलो मे दौत्यनिष्पादनप्रयत्न इति। भवतु सत्वरं सलिलमाहृत्य समुज्जीवयाम्येनाम्। (निष्क्रान्तः)

कल्प—सखि, सखि, समाश्वसिहि, समाश्वसिहि।

दम—(लब्धसंज्ञा) सखि, कुत्राहं वर्त्ते ?

कल्प—सखि, अपि न स्मरसि, विलासोद्याने वर्त्तसे।

दम—अपि प्रस्थितं देवदूतेन ?

कल्प—तेन हि भवत्याः समुज्जीवनाय कमलसरोवरात् सलिलाहरणाय प्रस्थितम्।

दम—सखि, अलमद्य तथानुबन्धेन, प्रत्यावृत्तमेनं विज्ञापय, यथा पुनरसौ देवविषयिण्या वार्त्तया मां नोद्वेजयेत्, अन्यथा अनिच्छन्तीमपि मां स्मरणीयामिव मन्यस्व। एवञ्च विज्ञापय यथा दमयन्ती निषधनाथसंक्रान्तहृदया नालं कथमपि देवान् वरीतुमिति।

(पुनः प्रविशति पद्मपत्रे सलिलमादाय नलः)

नलः—भद्रे, इदं तत् सलिलं, उपदर्श्यतामनेन ते प्रियसखी, (स्वगतं) अहो दिष्ट्या स्वत एव समुच्छ्वसिता तत्रभवती। तदपगतकलङ्कोऽस्मि।

कल्प—(सलिलमादाय दमयन्त्या मुखनयने सिञ्चति) सखि, अपि प्रकृतिमापन्नासि ?

दम—अथ किम्। सखि, शीतलं सरोवरसलिलं कस्य वा जीवनं न परितर्पयति। (शनैरुत्तिष्ठति)।

नलः—भद्रे, कार्य्याभियोग एव अस्मानेवं दशायामपि पर्य्याकुलयति, तदेष देवानामन्तिकं गत्वा कथं विज्ञापयेयम् ?

कल्प—महाभाग, सखीहृदयमनुवर्त्तमाना वदामि, यथा पवं देवेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञापनीयं यदियं निषधनाथसंक्रान्तहृदया कथमपि नालं तस्मादन्यं वरणस्रजा वा चित्तेन वा वरीतुमिति, तत् प्रसीदन्तु मे प्रियसख्या देवाः, यथेयमचिरादेव स्वमनोरथं समासादयेत्।

नलः—भद्रे, किञ्चिदपरमपि विज्ञापयितुमिच्छामि।

कल्प—आज्ञापयतु महाभागः किमिति?

नलः—एतद् विज्ञापयितुमिच्छामि, यथा निषधेश्वरः पुरन्दरश्च इत्येतयोः प्रथमस्य वरणे कियन्तमेव कालं सुखसम्भोगः, द्वितीयस्य वरणे तु सुचिरं यावत्। संसारे सुखसम्भोगाय स्पृहयन्तो जीवा जीवन्ति, तद् गुरुलाघवविचारेण किमिति भवत्याः प्रियसखी नैव विमलां सिद्धान्तशय्यामधिशेते?

दम—सखि, कल्पलते, विज्ञापयस्व देवदूतं, यथा तथा वा भवतु, सर्व्वथा निषधेश्वर एव मे जीवितेश्वर इति।

नलः—भद्रे, दृढसंकल्पासि, तद् भवतु गत्वा मया त्वद्वचनेनैव देवा विज्ञापनीया, तथा च मया प्रस्तोतव्यो यत्नपर्य्यायः, येन तुभ्यं न ते कुप्येयुः, तदेष प्रतिष्ठे, अचिरादस्तु ते मनोरथलाभः। (स्वगतम्) अहो सम्मिश्रितां भावद्वयीमाश्रितोऽस्मि। तथाहि—

देवानां दूतकृत्ये फलविरहवशादस्मि खिन्नान्तरात्मा,
वैदर्भी पूर्णरागा मयि परमतया तेन यातोऽस्मि हर्षम्।
मत्तः शुभ्रांशुवंश्यात् प्रथममियमभूत् प्रार्थिनां कार्य्यहानि,
र्लोकातीता कुमारी विलसति सुचिरं काम्यसौभाग्यसारः॥

(निष्क्रान्तः)

दम—सखि, क एष देवदूतः स्यात्?

कल्प—न खलु अवधारयामि, नूनं कश्चन महापुरुष एव, अन्यथा किमेवं विकारहीनं मधुरञ्च व्याहर्त्तुं जानीयात्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम--अहन्तु मन्ये स एवायमिति ।

कल्प—कथं मन्यसे ?

दम—तद्गतमेव हृदयं मे व्याहरति ।

कल्प—यद्येवं श्व एव अवगन्तासि । तदेहि यावत् । इदानीसम्बिका-गृहं गच्छावः ।

दम—एवं, गच्छावः । (निष्क्रान्ते)

द्वितीयाङ्कः समाप्तः ।

तृतीयाङ्कः ।

(ततः प्रविशति गृहीताध्वगवेशो विदूषकः)

विदू—(स्वगतम्) अहो देव्या दमयन्त्या समादिष्टः तस्याः बान्धवानां सन्देशमादाय कुण्डिनपुरात् प्रत्यावृत्तोऽस्मि । अथ कीदृशो देव्या दमयन्त्या विवेकः, राजपुरे विद्यमानेष्वपि तुरङ्गमादिषु नानाविधोपकरणेषु किमिति पादचारिणैवाहं सम्प्रेषितः ? तत् किं ब्राह्मणानां परिश्रमो न परिश्रम एव, तद् भवतु अद्य गत्वा विशेषेण अनुयोक्तव्या देवी दमयन्ती, कथं ब्राह्मणस्य मे पथिश्रमापनयनाय न यानमादिष्टवतीति । अथवा स्वयमेव अत्र अहमपराध्यामि, यतो मदर्थं तदानीं सुसज्जितमपि यानं स्वस्य सामर्थ्यातिशयं प्रत्याययितुं यानस्खलनशङ्कया च स्वयमेव अपाकृतवानस्मि । तदलमिदानीमनुशोचनया । अहो रमणीयतमं नाम देव्याः दमयन्त्याः पितृपुरं, रमणीयप्रकृतयश्च सर्व्वे एव तत्रत्या राजपरिजनाः, यैन समुपस्थितमात्रे मयि तत्र सुमधुरस्वागतभाषितेन सम्भाष्य राजसहोदरोचितं स्नानभोजनादिकं मया कारितवन्तः । महाराजो भीमोऽपि स्वयमेव मां करे गृहीत्वा अन्तःपुर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौन्दर्य्यादिकं सर्व्वमेव समदर्शयत्, अपगतश्च तेन तेन साधु समाचरितेन सव एव मे पादचारप्रभृतिसम्भूतः परिश्रम-पर्य्यायः। तदेतत् सकलमेव समादरातिशयं नलस्य प्रियवयस्यतया एव सम्भावयामि। महानेष प्रियवयस्यो मे नलो नाम, यो हि तदानीं देवानां दूततामङ्गी-कृत्य दमयन्त्या देववरणाय भूयांसमायासं कृत्वा यावत् विफलकामो जातस्तावदेव देवसमीपमुपसृत्य सर्व्वमेव यथायथं प्रकाश्य देवानुमत्या स्वयंवरसभामुपगतवान्, उपगते च तस्मिन् दमयन्तीमन्यथापि परीक्षितुकामा देवा नल—सदृशाकारं परिगृह्य यदा भैमीं भ्रामयामासुः, तदैव तया साग्रहं याचिता नले प्रीतिमन्तश्च स्वं स्वं लक्षणं प्रकाशया-मासुः, वृतस्ततो दमयन्त्या मे प्रियवयस्यः, आकाशाच्च पतिता प्रभूतपुष्पवृष्टिः, दत्तवराः प्रस्थिताः पुरन्दरादयो देवाः। ततः प्रभृति सुचिरं दाम्पत्यसुखसम्भोगेन वर्त्तते किल द्वन्द्वम्। किंतु महत्त्वमन्तरेण त्रिभुवनकाम्या दमयन्ती देवानवधूय तमेव वृणुयात्? देवाश्च ततोऽपि परितुष्टाः स्युः? (नेपथ्या-भिमुखं दृष्ट्वा) अयि, किमिदम्? एते वाष्पधारापरिप्लुतवदना राजपरिजनाः प्रजाश्च राजतोरणे विषादमनुभवन्तस्तिष्ठन्ति; अदूरे च तेषां प्रियवयस्यो मे निषधेश्वरः, महादेवी च दमयन्ती तोरणाद् बहिरुपसर्पतः, तत् किन्नु खलु इदम्। परिकम्पते मे हृदयं वयस्यस्य अमङ्गलाशङ्कया तत् किमिदं स्यात्? भवतु एनं विश्वावसुं पृच्छामि, (आकाशे) भद्र विश्वावसो, किमेवं दुःखेन वर्त्तसे, अपि न किञ्चिदत्याहितम्? किं कथयसि? महदत्याहितमिति, कथमिव? किं ब्रवीषि? प्रियवयस्यो मे निषधेश्वरः पुष्करेण द्यूते विनि-र्जितो वनाय प्रतिष्ठते, सह च तत्रभवती विदर्भराजनन्दिनीति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा हतोऽस्मि मन्दभाग्यः, वयस्य निषधेश्वर, प्रतिपालय मां यावदहमपि त्वया सहैव गच्छामि। (निष्क्रान्तः)

(ततः प्रविशतः पुष्करः कलिश्च)

कलिः—वयस्य पुष्कर, किमिदं न पश्यति भवान् ? युवयोरभिन्नावेव पितरौ, कौलीन्यमपि समानम्, तत् कथं तेन नलेन राज्यमुपभुज्यतां, त्वया च सम्मुखप्रवाहिनि महानदीप्रवाहे, पिपासाक्षामकण्ठेन कष्टधारा अनुभूयताम् ? एतदर्थमेव चिरात् मया द्यूतकृत्ये नियोजितोऽसि। अथ इदानीं द्यूतविनिर्जितं साम्राज्यं किमु मया भोक्तव्यम् ?

पुष्करः—वयस्य, किंवा कथयामि, महता सौभाग्येन सम्प्राप्तो मया भवानकृत्रिमो बान्धव,—

कृत्रिमाः सुहृदो लोके दुर्लभा न कदाचन।
एकोऽप्यकृत्रिमो बन्धुर्भुवनेषु सुदुर्लभः॥

कलिः—तदिदानीं कृतकृत्येन भवता मदनुगतेन भवितव्यम्।

पुष्करः—वयस्य, कथमिदानीमेव, यावदेव मया ते साक्षात्कारः कृतः, यावदेव त्वया द्यूते विनियोजितो नलं जितवानस्मि, यावदेव च सर्व्वमिदं वसुधाराज्यं द्यूतेनायत्तीकृतवानस्मि तावदेव तव दासतामङ्गीकृतवानस्मि, वयस्य त्वमेव मे कारणं साम्राज्यश्रीलाभस्य, तत् सुचिरमनुगतो दासजनोऽयं विनियुज्यताम् यथेष्टमेव स्वकृत्येषु, त्वमेवास्य साम्राज्यस्य नायकोऽसि, केवलमहं ते प्रेष्यभूतो नियोगमपेक्षे।

कलिः—यद्येवं तदादिश्यन्तां ते साम्राज्यवर्त्तिनो जनाः —

गावो देवगणाश्च भक्तिविहितां पूजां न गच्छन्त्वमो,
क्षीणो धर्मविधिः प्रयातु विलयं सौहार्दमुच्छिद्यताम्।
वार्त्तापि त्रिदिवस्य नश्यतु चिरं योगैषणा लुप्यताम्
विप्रेषु प्रियतान्यजातिजयिनी माभूत् क्षितौ लक्षिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीराधिकाया

मानभञ्जनम् ।

लेखकः—योगीन्द्रनाथविद्याचुञ्चुः ।

(पूर्वतोऽनुवृत्तम्)

त्वं मोक्षवाचकपदात्मकतां बिभर्षि
कैवल्यदायिनि शुभे सुकृतार्थलभ्ये ।
त्वं निर्गुणासि परमा गुणवन्निदानं
लोकस्रजामुदयपालननाशकर्त्री ॥ १५

त्वं वैष्णवी हरिहराम्बुजयोनिसेव्या
दिक्पालभास्करसुधाकरशक्रपूज्या ।
त्वन्मायया जगदिदं सुचिरं निबद्धं
पाशैर्नियन्त्रितपदाः पशवो यथास्मिन् ॥ १६

तत् त्वं प्रसीद दयिते दयिते दयार्हे
ईदृक् प्रकोपपरता नहि ते विधेया ।
यावन्न शाम्यसि नति सुदृढं कराभ्यां
सन्धारयामि चरणाम्बुजयुग्ममेतत् ॥ १७

एवमुक्त्वा तु हरिणा तत्त्वतो दुःखितात्मना ।
कराभ्यां जगृहे पादः प्रियायाश्चास्रु मुञ्चता ॥ १८

करस्पृष्टपदा राधा दीर्घं निश्वस्य मानिनी ।
आकर्षयन्ती चरणं तमूचे ललिताक्षरम् ॥ १९

मूलं विलूय मतिमान् सलिलं निषिञ्चेत्
कोऽयं तरोः शिरसि यत्प्रसवं दिदृक्षुः
नास्ते यदीयहृदयं करुणारसार्द्रं
जानाति नैव रमणी विरहाधितापम् ॥ २०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्रे प्रदर्श्य सुखदं सुरलोकसृङ्गं
पश्चान्निपातयसि किं निरये गभीरे।
किंवा परीक्षणमिदं ललनाजनानां
दुःखार्णवे भवति किं विकृतं नु चेतः ॥ २१

यासौ त्वदर्थमतुलं लभते हि दुःखं
तां दीर्घकालमनघां व्यथयस्यबाधम्।
संगृह्य सारमशनैरथबाश्मसारम्
धात्रा विनिर्म्मितमहो हृदयं त्वदीयम् ॥ २२

अभ्यस्तमेतदिह ते बहुशो जनुर्भ्यो
नार्य्यश्रुपातनमिति स्मरणं कुरुष्व।
तारा विदेहनृपतेस्तनया च साध्वी
किं ते ऽकरोदविनयं वद कोऽपराधः ॥ २३

उक्ता त्वलं विगतमत्र पुरा चरित्रं
किं तेन मे फलमहो भवति प्रकाश्य।
मृत्योः समं कथयतीह तवाश्रयं यत्
कृष्णं गतोऽयमिति वै प्रथितं जगत्याम् ॥ २४

मा क्रुध्य मे व्रजपते प्रकृतिं त्वदीयां
स्वल्पं भणेयमिह चेत् कुपितेऽपि किं स्यात्।
सूक्ष्मं मनो यदहरो व्रजसुन्दरीणा
मुल्लिख्य किं फलमहो वसनापहारिन् ॥ २५

स्त्रीणां वधेऽपि चतुरं तव बाहुयुग्मं
तस्मिंस्तु कर्म्मणि तथा गणितं न पापम्।
यक्षी च सुन्दरमणी पुतना ह्यनेका
स्त्वद्वीरतां प्रकटयन्त्यधुनापि भूमौ ॥ २६

इत्युक्तवत्यां व्रजनायिकायां
गोपेश्वरस्तद्वचनं निरोद्धुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धृत्वा मनोभवमनोहररूपराशिं
श्लिश्लेष तां प्रणयिनीं भुजवेष्टनेन ॥ २७

क्षणेणाश्लिष्यमाणामपगततमसं हेमकान्तिं नतास्यां
दृष्ट्वा सख्यस्तदानीमुपवनचपलाकान्तिभाजं वयस्यां ।
बिम्बोष्ठप्रान्तलिप्तस्मितमयममृतं धारयन्तीं प्रफुल्लाः
कुर्वत्यश्चारुनृत्यं जगुरतिमधुरं प्रीतिदां प्रेमगीतिम् ॥ २८

सौगन्धाढ्यैर्मलयजरसैः कुङ्कुमैः पुष्पवृन्दैः
सम्भूष्येमौ रसिकयुवकौ चारुपत्रावलीभिः ।
अङ्गेष्वेता उपवनलता कुञ्जगर्भे यथावत्
प्रातिष्ठन्त त्वरितचरणाश्छद्मना न्यस्य राधाम् ॥ २९

धृत्वा गले व्रजवधूं चिबुकं स्पृशन् सन्
दत्ताङ्गुलीभिरभितो वदनं नटेशः ।
तस्या विवर्त्तितमुखो विकिरन् कटाक्षं
सद्यो निनाय विनयं गुरुकोपजालम् ॥ ३०

प्रकाशितश्च श्रीहरिपदभारतीशर्म्मणा ।

महाकवि-भासः

(लेखकः—श्रीकेदारनाथसारस्वतः)

नाट्यजगति सिद्धहस्तः कविशिरोमणिर्भासः सुप्रसिद्धानां कालिदास-वाण-राजशेखरादीनां संस्कृतसाहित्यसार्वभौमानां माननीयः कदा कं देशं जन्मनाऽलञ्चकारेति परमार्थतो न विद्मः । संस्कृतसाहित्यसंसारे चास्य हृदयते महती सम्भावना । अयं कालिदासात् प्राक्तन इति तु निर्विशङ्कं शक्यते वक्तुम् ।

मालविकायामादावेवोक्तवान् कविसार्वभौमः—'भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य'—इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मद्रमण्डलीय-ट्रावनकोरस्थानन्तशयन-संस्कृतग्रन्थावली-सम्पादको महामहोपाध्यायश्रीगणपतिशास्त्रिमहाशयः प्रकाशितवान् भासनाटकावलीम्।

अस्य नाटकानां विषये च वर्त्तते सहृदयधौरेयाणां संस्कृतविदुषां महती मतविभिन्नता। साहित्याचार्य्यश्रीरामावतारशर्म-एम, ए, काव्यतीर्थमहोदयास्तु—"स्वप्नवासवदत्तं विहायान्येषु नाटकेषु नास्त्येव भासकृतित्वम्। सुभाषितग्रन्थेषु भासनाम्ना समुपलब्धानां पद्यानामुपलब्धनाटकेष्वदर्शनादि"ति यद् वदन्ति। तदसङ्गतमेव भाति। नाटकानामन्ते—'राजसिंहः प्रशास्तु नः' इति सममेव दृश्यते। कवित्वप्रणाली (Style) सदृश्येव सर्वेषु नाटकेषु। मद्रासनिवासी पं० नारायणशास्त्री एम, ए, विद्यानिधिस्तु—'भास एव धावकः। भासशब्दो धावकशब्दश्चेति द्वावपि रजकैकार्थवाचकौ अतो भासधावकयोरैक्यम्। 'श्रीहर्षादेर्धावकादीनामिव धनम्' इत्यस्य 'श्रीहर्षादेर्भासादीनामिव धन'मित्यपि पाठान्तरं वर्त्तते, अतो रत्नावल्यादिप्रणेता भास एव स्वप्नवासवदत्तादीनां प्रणेता' इति वदति।

एतत्तु तस्य पण्डितशिरोमणेर्वैदग्ध्यविलसितमेव। कालिदासो भासं स्मरति, स च श्रीहर्षात् पूर्वमेव प्रादुर्बभूवेति कथं सङ्गच्छते नारायणशास्त्रिणां नूतनमताविष्कारवैदग्ध्यम्?

भासः कालिदासाच्छतवर्षादूर्द्ध्वमभवदित्यैतिहासिकानां केषाञ्चन मतम्। वर्त्तते चेयं विप्रतिपत्तिर्यत् प्राचीनाऽलङ्कारग्रन्थेषु भासकृतीनां तन्नामधेयस्य चादर्शनात् नातिसुप्रसिद्ध आसीद्भास इति। नास्त्येतदपि। कविसार्वभौमो महाकविः कालिदासः कविशिरोमणिर्बाणभट्टश्च स्वस्वप्रबन्धेषु भासं स्मरतः। यशस्तिलकचम्पूप्रणेता सोमदेवश्च भासं स्मरति। यथा—

"तथा उर्व-भारवि-भवभूति-भर्तृहरि-भर्तृमेण्ठ-कण्ठ-गुणाढ्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास-भास-वोस-कालिदास-बाण-मयूर-नारायण-कुमार-माघ-राजशेखरादिमहाकविकाव्येषु, तत्र तत्रावसरे भरतप्रणीते काव्याध्याये, सर्वजनप्रसिद्धेषु तेषूपाख्यानेषु च, कथं तद्विषया प्रसिद्धिः।" इति

४र्थः उच्छ्वासः, २यो भागः, ११३ पृष्ठे,

तथाच प्रसन्नराघवचन्द्रालोकयोः कर्ता जयदेवापरनामा पीयूषवर्षोऽपि—

'यस्याश्चोरश्चिकुरनिकुरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।'

इत्यादि वदति।

अन्यच्च सूक्तिमुक्तावल्यां प्राह कविशेखरो राजशेखरः—

'भासो रामिल-सौमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्मेण्ठो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः।
दण्डी बाणदिवाकरौ गणपति कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवतो के तस्य सर्वेऽपि ते॥' इति।

सुभाषितग्रन्थेष्वपि भासस्य बहवः श्लोकाः दरीदृश्यन्ते ते चात्र सहृदयानां मनोविनोदाय प्रदर्श्यन्ते।

कठिनहृदये! मुञ्च क्रोधं सुखप्रतिघातकम्
लिखति दिवसं यातं यातं यमः किल मानिनि!।
वयसि तरुणे नैतद्युक्तं चलच्च समागमे
भवति कलहो यावत्तावद्वरं सुभगे! रतम्॥ १

कृतककृतकैर्मायासख्यैस्त्वयास्मि प्रतिवञ्चिता
निभृतनिभृतैः कार्यालापैर्मयाप्युपलक्षितम्।
भवतु विदितं नेष्टाहं ते वृथा परिखिद्यसे
ह्यहमसहना त्वं निःस्नेहः समेन समं गतम्॥ २

कपोले मार्जारः पय इति कराँल्लेढि शशिनः-
स्तरुच्छिद्रप्रोतान् विसमिति करी सङ्कलयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥ ३

दुःखार्ते मयि दुःखिता भवति या हृष्टे प्रहृष्टास्तथा
दीने दैन्यमुपैति रोषपरुषे पथ्यं वचो भाषते।
कालं वेत्ति कथां करोति निपुणा मत्संस्तवे रज्यति
भार्या मन्त्रिवरः सखा परिजनः सैका बहुत्वं गता ॥ ४

बाला च सा विदितपञ्चशरप्रपञ्चा
तन्वी च सा स्तनभरोपचिताङ्गयष्टिः।
लज्जां समुद्वहति सा सुरतावसाने
हा कापि सा किमिव किं कथयामि तस्याः ॥ ५

सुभाषितावल्याम्।

तीक्ष्णं रविस्तपति नीच इवाचिराढ्यः
शृङ्गं रुरुस्त्यजति मित्रमिवाकृतज्ञः।
तोयं प्रसीदति मुनेरिव चित्तमन्तः
कामी दरिद्र इव शोषमुपैति पङ्कम् ॥ ६

सुभाषितावलि—सदुक्तिकर्णामृतयोः।

दग्धे मनोभवतरौ बाला कुचकुम्भसम्भृतैरमृतैः।
त्रिवलीकृतालवाला जाता रोमावलीवल्ली ॥ ७

सदुक्तिकर्णामृते।

प्रत्यासन्नविवाहमङ्गलविधौ देवार्चनव्यस्तया
दृष्ट्वाग्रे परिणेतुरेव लिखितां गङ्गाधरस्याकृतिम्।
उन्मादस्मितरोषलज्जितरसैर्गौर्याः कथंचिच्चिरा-
दूढस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः पातु वः ॥ ८

शार्ङ्गधरपद्धति—सदुक्तिकर्णामृतयोः।

पेया सुरा प्रियतमामुखमीक्षणीयं
ग्राह्यः स्वभावललितो विकृतश्च वेषः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येनेदमोद्दामदृश्यत मोक्षवर्त्म
दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥ ८

यशस्तिलकचम्प्वाम् ।

विरहिवनितावक्त्रौपम्यं बिभर्ति निशापति-
र्गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवेः ।
अभिनववधू-रोष-स्वादुः करीषतनूनपा-
दसरलजनाश्लेष-क्रूरस्तुषारसमीरणः ॥ १०

सदुक्तिकर्णामृते ।

यदपि विबुधैः सिन्धोरन्तः कथञ्चिदुपार्जितम्
तदपि सकलं चारु स्त्रीणां मुखेषु विलोक्यते ।
सुरसुमनसः श्वासामोदे शशी च कपोलयो-
रमृतमधरे तिर्यग्भूते विषञ्च विलोचने ॥ ११

सूक्तिमुक्तावल्याम् ।

एतान्यनुपमरस-भावालङ्कार-गुणप्रौढ़ानि सरसानि पद्यानि सहृदयहृदयमाकर्षयन्ति भासस्यैवेति प्रतीयते। एतानि नाटकाख्यानि च प्रतिभान्ति अद्यावध्युपलब्धानां भासग्रन्थानां मध्ये तु नागतान्येव। सम्भाव्यतेऽस्यान्येऽपि भवेयुः प्रबाधा इति।

अभिनवश्लोकः 'मत्तविलास' प्रहसने दरीदृश्यते। 'मत्तविलास' प्रहसनन्तु महेन्द्रविक्रमवर्मप्रणीतं अनन्तशयनग्रन्थमालायामेव मुद्रितम्।

भासप्रणीतानि नाटकानि साधारणतया प्रतीयमानान्यप्यन्तः-सरसानि संमोहयन्ति सहृदयानां मानसानि। नारिकेल इवान्तर्गर्भितमधुरस्वादुरसकविता भासस्येति नाविदितं सहृदयधुरीणानाम् अत एव स्वीकरोति चेतः भासकृतित्वमेवोररीकर्त्तुं नाटकानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तिसिद्धान्तनिम्नगा

विघ्नान्यस्तं गणेशो विगमयतु तमो हन्तु गाढं विवस्वान्,
प्रायत्यं पद्मनाभो दिशतु करुणया बाह्यमाभ्यन्तरञ्च ।
लोकेशो व्योमकेशोऽनिशमपि च शिवं संविधत्तां प्रकामं,
शक्तिं लोकेष्वकुण्ठां त्रिभुवनजननी सर्वथोमा तनोतु ॥ १

अथैकदा माकरसंक्रमे रवेः, समागता जह्नुसुताब्धिसङ्गमे ।
गणेशसूर्य्याच्युतकृत्तिवाससां, तथाम्बिकाया गणशो ह्युपासकाः ॥२

ततस्तत्र महापुण्ये स्नानादिना पूतात्मानः सर्वे महात्मानो मिलित्वाकार्षुर्महतीमेकां समितिम् । अभूवंश्च संलापमिषेण स्वस्वोपासितदेवतामहिमख्यापनपराः सुतरां । तत्रादौ कश्चिदत्तुमारेभे गाणपत्यमन्यः ।—

अशेषवृन्दारकवृन्दवन्दितं, गजेन्द्रवक्त्रं मदविन्दुसुन्दरम् ।
अमन्दतुन्दं शिशुचन्द्रशेखरं, स्मरामि सिन्दूरविनिन्दिविग्रहम् ॥ ३

अपि च । अर्चेषु सर्वविबुधेषु यथाविधानं,
यस्यादिमैव गणना गणनायकं तम् ।
नोपासते बुधगणाः पुरुषार्थसिद्धै,
के नाम सर्वविधशास्त्रविशुद्धबोधाः ॥ ४

किञ्च । अन्तरायचय-मन्तरागतं, नेतुमन्तमिह सर्वकर्म्मणाम् ।
सन्ततं त्रिषु जगत्सु को भवेन्नायको ननु विना विनायकम् ॥ ५
अतश्चतुर्वर्गफलप्रदं विभुं, जगत्त्रयीपूजनभाजनं जनाः ।
भजामि जानन् गुरुशास्त्रवाक्यतो, गजाननं तं परमेव नापरम् ॥ ६
नान्यं नमामि देवं, नापि च जातु स्मरामि हेरम्बात् ।
नापि स्तौमि कथञ्चित्, कञ्चन च न पूजये नूनम् ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणगणमघसंघ-ध्वंसहेतुं जनानां,
गणयितुमपि नेष्टे चेष्टमानो नितान्तं ।
विधिरपि गणनाथस्यास्य विष्णुर्हरो वा,
दशशतवदनो वानन्तमुच्चै रनन्तः ॥८

धर्मार्थौ काममोक्षावपि कृतभजनेभ्यो जनेभ्योऽखिलेभ्यः,
स्वच्छन्दं विश्वपूज्ये भगवति कृपया दातुमीशे गणेशे ।
मोहादन्यामधन्या इह जगति वतोपासते देवतां ये,
ते नूनं गाङ्गनीरादपगतरुचयः कौपमम्भः पिबन्ति ॥९

अतो हितं वच्मि सदर्थसंहितं, प्रसह्य हित्वान्यसुरार्चने हितम् ।
भजध्वमेकं महितं सुरैर्बुधास्तमेव कृत्वा हृदयं समाहितम् ॥१०

इत्याकर्ण्य तेषां सामाजिकानां बहवो रोषवशीकृतान्तःकरणा अनधिगतानन्तशास्त्रकृतान्तं तं तिरस्कृत्योच्चैरूचुः ।

पश्यतायमिह संसदि स्थितः साहसात् प्रलपतीत्यमुच्चकैः ।
निष्कुटस्थमिव कण्टकद्रुमं, किं बहिर्न कुरुथेनमञ्जसा ॥११

यतः,—नासौ गणपतेरन्यं, विबुधं गणयत्यपि ।
तत्प्रशस्तिमिषात् सर्व्व-सुपर्व्वगणनिन्दकः ॥१२

एवं तिरस्कृतोऽपि पुनरेवाह सः। अहो किं तिरस्कुरुथ मां शास्त्रमनुसृत्यैव गणपतेः श्रेष्ठत्वख्यापनेनोपास्यत्वं प्रतिपादयन्तम्। मन्ये युष्माभिर्नालोचितानि तानि तानि गणपतेर्ब्रह्मत्वप्रतिपादकानि शास्त्राणि। इत्युक्तवति तस्मिन् कोऽप्यन्यः किमपि विवक्षतीति श्रोतुकामाः सर्व्वे सभ्या उद्ग्रीवास्तस्थुः। अत्रान्तरे वक्तुमारेभे दिव्य-बोधविशुद्धान्तःकरणो गाणपत्यः।

अन्येषु सेव्येष्वपि दैवतेषु, मनोऽग्रजप्रेमपरं मदीयं ।
अतो भजे सन्ततमाम्बिकेयं, कृत्वा प्रमाणं गुरुशास्त्रवाक्यं ॥१३

भ्रातृप्रेमप्रवणमनसां मादृशां सानुकम्पं,
भक्तेः सिद्धेः सपदि सुतरां भुक्तिमुक्तिप्रदायाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पित्रोरेषां सकलजगतां चण्डिकाभूतपत्योः,
भूत्वापत्यं भवति परमात्मैव विघ्नाधिराजः ॥१४

सर्व्वथैव तमुपाश्रितोऽप्यहं, तस्य दैवतनुतस्य तृप्तये ।
भानुमच्युतशिवौ शिवामपि, प्रार्च्चयामि च नमामि नौमि च ॥१५

यतः,—पित्रादिसत्कृतिपराङ्मुखतां वितन्वन्,
भक्तोऽपि कश्चन कदाचन पूर्व्वजस्य ।
प्रीतिं जनो जनयितुं सुमनागपोह,
स्यात् किं कथञ्चन जगच्चितये समर्थः ॥ १६

नहि कस्यापि भ्रातृभक्तस्य पित्राद्यर्च्चनं भ्रातुरमर्षाय भवति। प्रत्युत तस्य सुप्रीतिं जनयत्येव, अत एवाहं सर्वतोभाविन भ्रातृभाविन भजन्नपि भगवन्तं गणपतिं प्रसङ्गात् पितराविव उमापरमेश्वरौ, प्रभुमिव विष्णुम्, उपकर्त्तारं मित्रमिव भानुं वरिवस्याम्येव ।

इत्यनसूयेनोक्तं, गाणपतर्व्येण ते समाकर्ण्य ।
तमनेकसाधुवादैः, सर्व्वे संवर्द्धयामासुः ॥ १७

इति श्रीप्रसन्नकुमारमिश्रविरचितायां भक्तिसिद्धान्तनिम्नगायां प्रथमस्तरङ्गः ।

स्वर्गतानां भारतभास्कराणां पुण्यश्लोकानाम्
आशुतोषमुखोपाध्यायानामकालास्तमने

शोकोच्छ्वासाः

लेखकः—श्रीहरिपदकाव्यस्मृतिमीमांसातीर्थः

वाग्देवीकमकण्ठभूषणमहो हारस्त्वतः साम्प्रतं,
वीणानिक्कणतन्त्रिकाद्य सहसा च्छिन्ना धरित्रीतले ।
वर्णो म्लानिमुपागतः क्व नु गतो हासप्रकाशोऽधुना,
मन्ये सा वरपुत्रनाशगुरुणा शोकेन नष्टा भुवः ॥ १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशे यत्र पुरेतिहासविदितोऽशोको नृपोऽराजत,
तस्मिन् पाटलिपुत्रपुण्यनगरे स्मर्त्तव्यसारे किल।
गत्वा कर्म्मवशात् कृतान्तकलनाद् विन्यस्य कायं कृती,
शोकोदन्वति नो निमज्ज्य सुचिरं स्वाराश्रुतोषो गतः ॥ २
मन्ये देवपुरी विनामरगुरुं शोभां पुरा पुष्यति,
शङ्के दैत्यपुरी समेष्यति मुदं काव्येन होनापि सा।
बुद्ध्या देवगुरुर्बलेऽसुरगुरुः सोऽयं सुधीः काव्यवित्,
हीनानेन कथं वरेण विदुषां विद्वत्पुरी स्थास्यति ॥ ३
कारुण्योदधिपूरपूर्णहृदयः कर्त्तव्यबुद्ध्या च यत्,
कर्म्मानुष्ठितवानभीरभिमुखं साधोः समाजस्य वा।
नो निन्दा गणिता स्तुतिः किमु कथा धीरेण शान्तेन च,
विद्यासागरपूज्यपादपदवीमाक्रम्य नूनं स्थितम् ॥ ४
भो वाणीवरपुत्र ! पौरुषगुणैरत्यूर्ज्जितो वीर्य्यवान्,
भ्रामं भ्राममनेककण्टकयुते प्रोच्चण्डसत्त्वाकुले।
वङ्गीये गहने स्वविक्रममहो सन्दर्शयन् सर्व्वदा,
'वङ्गव्याघ्र' इति प्रसिद्धिमगमस्त्वं राजसंसत्स्वपि ॥ ५

जीमूतवाहन-हलायुधमाधवानां,
छात्रद्विजातिगुणभूषितमानसानाम्।
सारल्यशक्तिसहयोगविचित्रकर्म्मा,
दृष्टस्त्वमेव वसुधातलविप्रजन्मा ॥ ६
श्यामा रमा सकमलाथ सरस्वती च,
यस्मिन् प्रसादमददुः परितोषयुक्ताः।
मन्ये गुणत्रयधरोऽवततार भूमौ,
ब्रह्मेशविष्णुकलयामररूपधारी ॥ ७

भो धर्म्माधिकरणप्रभो शुचि सुधाधौतं तवान्तस्तलं,
बाह्यं नीलघनप्रभं सुविपुलं श्यामं परं ते वपुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेतं केवलवस्त्रयुग्मकमहो सद्यज्ञसूत्रं तथा,
धृत्वा राजगृहञ्च भूषितमिदं सर्वैर्नरैर्दुष्करम् ॥ ८

सम्बुद्धागमचक्रवर्त्तिपदवीमध्यास्य बुद्धागमे,
त्वं वाचस्पतिरिव शास्त्रनिचये विद्या तथाङ्कस्थिता ।
नूनं मोहविजृम्भनातिविकले देशेऽवतीर्णः स्वयं,
वाग्देवो प्रतिरूपशिष्यनिवहे ज्ञानांशुमुद्योतयन् ॥ ९

दौर्भाग्यात् परमादसावसमये कारुण्यरत्नाकरः,
तेजःपुञ्जविमण्डितः सुजनहृत्पङ्केरुहाह्लादकः ।
ग्रस्तः सर्वजगत्प्रतापतपनः स्वर्भानुकालेन हि,
वङ्गाकाशतलं मलीमसतमोव्याप्तं कृतं वेधसा ॥ १०

स्थूलं वपुः सुरधुनीसलिले विहाय,
धृत्वापरं परमसुन्दरदिव्यकायम् ।
वाग्देवताङ्कतलतल्पनिषण्णमूर्द्धा,
सच्चिन्तयत्ययमये वरकर्म्मवीरः ॥ ११

ग्रन्थपरिचयः ।

श्रीराधापरिदेवनम्—टाकीवास्तव्य श्रीमदिन्दीवरकृष्णकाव्यतीर्थविद्याभूषणेन रचितम्प्रकाशितञ्च । मूल्यमानकषट्कम् ।

यमुनातीरमितायाः श्रीकृष्णविप्रयोगविधुरायाः कस्याश्चिद् गोपिकायाः परिदेवनरूपं खण्डकाव्यम् । प्राक्तनलीलाविहारभूमिं गतस्य प्रियसहचरविरहानलसन्तप्तमनसो जनस्य यथा दाहो भवति तथैव सुनिपुणं प्रकटितवानत्र कृतिवरो लेखचातुर्येण । समधुरध्वनि पदन्यासेन रुचिपूतालङ्कारप्रयोगेण स्वभावानुरूपवर्णोत्कर्षेण सकरुणवाक्प्रपञ्चेन च वियोगिन्योऽत्र बहुभिरेव धन्याभिर्जातिभिः साधु आवर्जयन्ति मनांसि रसिकानाम् । प्रयोगविज्ञानमत्र विद्याभूषण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाशयस्य पाटवं प्रकटयतीति न बहु वक्तनीयम्। अपरमपि संस्कृत-शिक्षाया विरलप्रचारकाले इदानीं देवभाषया निबद्धमेतत् काव्यं सुतरामिवानन्दकारणमस्माकम्।

पाइअ-सद्द-महण्णवो—न्यायव्याकरणतीर्थ-श्रीहरगोविन्द-दासश्रेष्ठेरेयस्य प्राकृतशब्दमहार्णवग्रन्थस्य द्वितीयखण्डमासाद्य नितरामेव परितृप्ता वयमभवाम। ग्रन्थेऽस्मिन् प्रथमखण्डवदेव प्राकृतशब्दानां संस्कृतहिन्दीभाषयोः प्रतिशब्दाः सप्रमाणं सोदाहरणञ्च सुविन्यस्ताः। परं तत्र नासीत् कापि संकेतसूची, येन तस्य व्यवहृतावभवत् किमप्यसौकर्य्यमिति तत्समालोचनावसरे एवास्माभिरुक्तम्। इदानीन्तु अस्माकमुक्तेः सारमुपलभ्य निर्दिंशिता काचन संकेतसूची श्रेष्ठिमहोदयेन द्वितीये खण्डे। परिहारितं तेन पूर्वमसौकर्य्यं, दूरीकृतञ्च ग्रन्थस्य अङ्गहीनत्वम्। मन्यते छात्राणां महत एव उपकाराय भवेदयं ग्रन्थ इत्यलं प्रपञ्चेनाधुना। समाप्तावस्य आशास्माकं वर्त्तते सम्यगालोचनायाः।

सन्देशाः

आश्विनीयमधिवेशनम्—परिषदाचार्य्य-श्रीमत्कालीपदतर्काचार्य्यमहोदयानामाध्यक्ष्येण सुनिर्वर्त्तितायां संस्कृतसाहित्य-परिषदो विगताश्विनीयसभायां कुलाडाकुड़िचि-संस्कृतपाठशालाध्यापक-दाक्षिणात्यश्रीयुक्तरामलिङ्गशास्त्रिमहोदयेन विरचितः 'कालिदासस्य अनुरूपवराय कन्यकादानञ्चे'तिशीर्षकः कश्चिन्निबन्धो वाचितः श्रीमता कालीपदभट्टाचार्य्येण निबन्धरचयितुरनुपस्थित्या। अवसिते निबन्धवाचने श्रीमन्तो धीरेन्द्रमोहनकाव्यतीर्थः चिन्ताहरणचक्रवर्त्तिकाव्यतीर्थः (बि-ए) दक्षिणारञ्जनशास्त्री (एम्-ए) दुर्गामोहनसांख्यतीर्थ (एम्-ए) अशोकनाथभट्टाचार्य्यश्च समालोचितवन्तो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्धविषयम् । तत्र च श्रीचिन्ताहरणचक्रवर्त्तिनाऽभिहितं यथा लेखेऽस्मिन् कालिदासस्य वैशिष्ट्याधायकं न किमप्यवतारितं श्रीमता लेखकमहाभागेन। कन्यकानामनुरूपवराय प्रतिपादने अन्येषामिवासीन्महाकवेः कालिदासस्यापि सम्मतिरिति यत् सत्यं न केनचित् विप्रतिपद्यते, परं बधूवरयोः कोदृशमानुरूप्यं महाकविना तेनानुमन्यते तदेवासीद्विशेषतोऽत्र विचारयितव्यमिति। श्रीदुर्गामोहनसांख्यतीर्थेन च—परिषदकृत्रिमबान्धवानामतितरां दूरप्रदेशवास्तव्यानामपि शास्त्रिवराणां पत्रिकार्थं निबन्धनिर्माणादि यावन्नाम साहायकमनारतं पारिषदैः समनुभूयते तत्कृते भूयिष्ठा कृतवेदिता सभायां विनिवेदिता। ततः सभापतिमहोदयाः परिषत्पत्रिकाप्रकाशितेषु निबन्धरत्नेषु दृष्टपूर्वं शास्त्रिमहाशयानां रचनापाटवं बहुशः समुल्लिख्य सभायामसन्निहिततया समालोचकवचःप्रतिवचनावकाशमप्राप्तवतां तेषां निबन्धस्य विरुद्धमालोचनं नैव शोभनमिति प्रतिपादितवन्तः। एवञ्च समाप्तिमगात्तद्दिवसीयं सभाकृत्यम्।

कार्त्तिकीयमधिवेशनम्—कार्त्तिकीयसभायां नैयायिकचूडामणयो महामहोपाध्यायाः श्रीमन्तः कामाख्यानाथतर्कवागीशपादाः सभापतेरासनमलमकुर्वन्। तत्र निर्वृत्तेषु प्रारम्भकृत्येषु परिषदोऽन्यतमसदस्याः एम्-ए श्रीयुक्तभागवतकुमारशास्त्रिमहोदयाः कलिकाताविश्वविद्यालयतः (पिएइच्-डि) इत्युपाधिमानमधिगतवन्तः पारिषदैरभिनन्दिताः। तथाच श्रीमद्भिः कालीपदतर्काचार्यैरनुबाचितेष्वभिनन्दनश्लोकेषु, श्रीमन्तः कोकिलेश्वरशास्त्रि-भोलानाथमिश्र-सुधन्वाविद्यालङ्कार-शेलानन्दस्वामिप्रभृतयो विद्वांसः शास्त्रिमहोदयानां गुणावलीरकीर्तयन्, शास्त्रिमहोदयैश्च विदुषामाशीरिति कृत्वा सप्रतिवचनमङ्गीकृतम्भदभिनन्दनम्। अभिनन्दनानन्तरञ्च कलिकाताराजकीयसंस्कृतपाठशालाध्यापकश्रीयुक्तहरिपदकाव्यस्मृतिमीमांसातीर्थेन विरचितः आस्तिकनास्तिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनेष्वेकमत्वं वैमत्यं चेतिशीर्षको निबन्धः श्रीयुक्तदक्षिणारञ्जन-शास्त्रिमहोदयेन अंशतोऽनुवाचितः। लेखस्य दीर्घतया रचयितुरनुपस्थितेश्च सभापतीनां निर्देशात् साकल्येन न पठितो न वा समालोचितोऽसौ निबन्धः। ततः एम्-ए-बि एल्-पि-एइच्-डि-श्रीयुक्तपशुपतिनाथशास्त्रिणः सभापतीनां धन्यताकीर्त्तनपुरःसरं समाप्तिमनयन् सभाकृत्यमिति।

शोकवार्त्ता—चक्रनेमिक्रमेण दशाविपर्य्ययादापतितोऽयं दारुणो दैवनिर्घातो नवप्रतिष्ठितायाश्छात्रसमितेर्यदस्याः अन्यतरसहकारिसम्पादकः अमरनाथभट्टाचार्य्यः सम्प्रति वृद्धां मातरं ज्येष्ठांश्च भ्रातॄन् शोकसागरे निमज्ज्य विहाय चास्मानपरिणतवयस्येव परलोकं प्रस्थितः। प्रतिष्ठासमयादेवायं सरलहृदयो बालकश्छात्रसमितेरपेक्षितेषु विषयेषु स्वयमेव समुपागत्य सुकौशलमस्याः कार्य्यजातं निर्वर्त्तयन्नास्त। किशोरवयस्कस्याप्यस्य गीर्वाणवाण्याः कृते एतादृशोऽकपटोऽनुरागो नितरां विस्मयमुदपादयच्छात्रसमितिसभ्यानां परिषत्सभ्यानाञ्च। ततोऽस्य कृते शोकप्रकाशार्थं विगते सौराग्रहायणस्य द्वितीयदिवसे सोमवासरे सायं परिषद्गृहे परिषदन्यतरसम्पादक—श्रीपशुपतिनाथशास्त्रिमहोदयानां सभापतित्वेन शोकसभा काचित् संवृत्ता॥ तत्राकपटहितैषिणोऽस्य सततसंस्मरणार्थं ब्रोमाइडाख्यचित्रसंरक्षणाय प्रस्तावः कश्चित् समुपस्थापितः सर्व्वसम्मतिक्रमेण परिगृहीतश्च।

त्रिवाङ्कुरमहाराजः—नूनं शोकवृत्तमिदं श्रीमतां पाठकमहोदयानां यत् कतिपये मासाः समभवन् अमरपुरीमलङ्कृतवतां भूतपूर्व्वत्रिवाङ्कुरमहाराजानां वियोगमतिदुःसहमनुभवन्त्या वसुन्धराया इति। ते खलु माननीया राजानः संस्कृतशास्त्रेषु रतिमन्तः स्वीयव्ययेन कति शतानि दुर्लभग्रन्थानां मुद्राङ्कितानि कारयित्वा सुरसरस्वतीसमृद्धिं समेधितामकुर्व्वन्, तेषां विरहो भारतीप्रणयिना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सतिमात्रशोकहेतुरित्यत्र किं वा बहु वक्तव्यम्। ततश्च अतीतभाद्रमासस्य एकादशे पुण्यदिवसे नवीनवया: श्रीरामवर्म्मा त्रिवाङ्कुरमहाराजतां प्राप्तितस्तथैव प्रचारितश्च प्रकृतिपरिवृढैरिति तु मोदस्थानमपि समुपलभ्यते। स चायं सुनिष्पन्नयथाविधानाभिषेकमहोत्सवस्तस्यैव भाद्रपदस्य षोड़शे दिवसे। नवीनमहाराजस्य खल्वेतस्य सम्प्रति प्राप्तो द्वादशवर्षप्रमाणो वय:समय:, तत् पौगण्डदशायामस्य भूतपूर्वमहाराजानां ज्येष्ठा महादेवी राजप्रातिनिध्येन राज्यकर्म्माणि विचारयिष्यतीति श्रूयते। नवीनमहाराजानां राज्याभिषेकमहोत्सवमुपलक्ष्य तस्या महादेव्या: सविशेषानुग्रहेण 'त्रिवाङ्कुाम सेण्ट्राल जेल' इत्यभिधानात् कारागृहात् तथा तदितरकारागारात् संयता: सत्याग्रहिणो मुक्तिमासेदु:। तत् प्रथमत एव प्रजानामाशास्थानमभूत् किल महादेव्यास्तथाभूतसंयतमोचणप्रवृत्तिरिति वयमप्यनुपदमस्या: प्रजासु कोमलस्वभावताञ्च न्यायानुगतविचारचातुरीञ्च समाशंसमाना: श्रीमतां नवीनमहाराजानां सह परिजनैरनामयसमययापनमभिलषाम:। अभ्यर्थयामहे च प्राचीनमहाराजानुरूपशास्त्रानुरागमबाधितप्रसरं तेषामिति।

चित्रभूर्त्तिः—समुपहृताऽत्र विख्यातविदुषां महामहोपाध्याय-श्रीमद्गङ्गानाथझा-(एम-ए-डि-लिट्) महोदयानां चित्रमूर्त्ति: श्रीमद्भि: संस्कृतप्रणयिभ्य:। एते हि ब्राह्मणपण्डितोचितमाचारादिकमक्षुण्णमनुतिष्ठन्तोऽप्यद्य महनीयप्रभावं प्रयागविश्वविद्यालयस्योपाध्यक्ष-(Vice-Chancellor)पदं राजकीयमहापरिषद: (Council of State) सदस्यपदञ्च समधिगतवन्त: स्वकीयपाण्डित्यमहिम्ना। प्रथम एवायं ब्राह्मणपण्डितानामीदृश: सम्मानलाभ:। संस्कृतदर्शनग्रन्थानामाङ्गलभाषयानुवादेन विशेषत: प्रभाकरमतस्य तद्भाषया प्राथम्येन प्राधान्येन च सरलरीत्या समालोचनया प्राचीनभारतीयविद्यां साधारणसुगमां सम्पादयतां महामहोपाध्यायपादानां कृतज्ञेयं तद्विद्याप्रचारैकव्रता संस्कृतसाहित्यपरिषत् तेषामितोऽप्यधिकतरं मानपदं सुदीर्घमायुश्च परमेशत: कामयते।

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্য রিষ্ট ৩৲ সের
মহাভৃঙ্গরাজ তৈল ৬৲ সের
অধ্যক্ষ মথুর বাবুর
স্থাপিত ১৩০৮
ঢাকা
শক্তি ঔষধালয়
চ্যবনপ্রাশ ৩৲ সের
মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রঙ্গপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট,
৭১।১ রসা রোড্ নর্থ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সে
পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না —ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—
অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয়
এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্মাসি, [illegible] বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২।।০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯।।০ টাকা, এক গ্রোস্ ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১।।০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭।।০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ

সংস্কৃতসাহিত্যপরিষদ্ভবনম্, শ্যামবাজার ব্রীজরোড, কলিকাতা।

মুদ্রণস্থান—সিদ্ধেশ্বরপ্রেস, ২৮ নন্দকুমারচৌধুরী সেকেণ্ডলেন,

কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये पौषे
January 1925

Reg. No. C 1073.

७म वर्षस्य
९म संख्या
Vol. VII. No. 9

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ—
महामहोपाध्याय—श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्यश्च

सहकारिसम्पादकः—
काव्य-सांख्य-पुराणतीर्थ—श्रीदुर्गामोहनभट्टाचार्य्य एम, ए ।

मतिमञ्जरी ।
सुभाषितद्वयी ।
शिशिराभियानम् ।
प्राचीनवङ्गवैशिष्ट्यम् ।
परिस्थितिधर्म्मपरिवर्त्तनञ्च ।
शास्त्रार्थविचारः समस्यापूरणञ्च ।
नलदमयन्तीयम् ।
अभिलाषः ।
सिद्धान्तभूषणजीवनचरितम् ।
शोकविजल्पितम् ।
परिषत्सन्देशाः ।

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता
अध्यक्ष—श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।



স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এককথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্র নাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদেব গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

২৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
आबालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

१८४६ शकीये पौषे, ७म-वर्षस्य ८म-संख्या

मतिमञ्जरी

प्राचीनकालवर्त्तमान-कालयोर्विद्यापरीक्षा-पार्थक्यम्।

संस्कृतविद्योन्नतिकौशलम्—विदितमेवेदं संस्कृतशास्त्र-निष्णातमतीनां, यत् बहोः कालादूर्द्ध्वं संस्कृतशास्त्राध्यायिनां वर्त्तमानरीत्यनुसारेण कापि विद्यापरीक्षा नैव समवर्त्ततेति। प्राचीना विद्वत्तमाः खलु सभास्वेव पक्षप्रतिपक्षभावेन उपस्थाय शास्त्रीय-विद्यायामात्मनिपुणतामुपपाद्य प्रशस्तिभाजः सम-भवन्, ये तु विशेषतो विद्याप्रावीण्यमुपगता अपि सभासु सुतरा-मप्रगल्भास्तेषां तथाविधा प्रशस्तिरनुपपन्नैव समासीत् सभ्यसमाजेषु, अनन्तरञ्च क्रमेण प्रसृते पाश्चात्यविद्यानुरूपरीतिप्रताने स्मरणीयगुण-पर्य्यायाः केचन न्यायरत्नादयो मनीषिणः शास्त्रविद्याया वर्त्तमान-रीत्यनुसारिणं परीक्षाविधिं व्यवस्थापयन्तः प्रशान्तविकारां सरस्वतीं सम्यक्तया प्रसारितवन्तः, तयैव किल विधया प्रचरत्यद्यापि सा परीक्षा संस्कृतशास्त्रप्रपञ्चे। आदौ तावत् केवलमुपाधिपरीक्षा केचन प्रवर्त्तिता विद्यागौरवं प्रावर्त्तयत् परेश्च प्रथमशिक्षार्थिनामपि समुत्-साहादिसम्पादनकाम्यया काम्यगुणैः प्रवर्त्तिते प्रथमपरीक्षा च द्वितीयपरीक्षा चेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामेव रीतिमनुसृत्य अद्यापि परीक्षाविधयः प्रवर्त्त्यमाना उपाधियोग्यतामात्रं लोकानां परीक्षन्ते, ये तु तदपेक्षया सविशेषयोग्यतावन्तस्तेषां योग्यता तु सत्यपि नोपलभ्यते लोकैः, परं यस्याः पाश्चात्त्य-परीक्षाया नियममवलम्ब्य प्राच्यविद्यापरीक्षेयं प्रवर्त्तिता प्राचीनैः तस्यां पाश्चात्त्यविद्यापरीक्षायां नानाविधरीत्या विद्या-गौरवपरीक्षायाः प्रवृत्तिरास्ते ; तथाहि आदौ तावत् बिए-परीक्षायाः समुत्तरणेनैव उपाधिलाभः, अनन्तरमपि एम्-ए-परीक्षा उपाध्यन्तर-लाभाय व्यवस्थापितास्ते, तदनन्तरञ्च ये विषयविशेषमवलम्ब्य निबन्धविशेषं निर्म्माय परीक्षापरिषदि प्रत्यर्पयन्ति, तेषां तन्निबन्ध-प्रकर्षपर्य्यालोचनया 'पि-एइच् डि' इत्याद्युपाधिलाभो दृश्यते। नास्ति संस्कृतविद्यावतां तथाविधः कश्चन समुपयोगो येन उपाधिपरीक्षातः परं गुणविशेषपरीक्षाया अवसरः। तद्यथा क्रमेण उपाधिपरीक्षा-प्रवर्त्तनानन्तरं प्रथमद्वितीयपरीक्षाप्रवर्त्तनेन कृतः संस्कृतविद्यायाः समुत्कर्षः, तथैव साम्प्रतमपि गृहीततीर्थाद्युपाधीनां विशेषगुणपरीक्षा निबन्धादिद्वारेण काचित् प्रवर्त्तयितव्या ; तेन न केवलं संस्कृतज्ञानां गौरवाभिवृद्धिः परं संस्कृतशास्त्रमधिकृत्य प्राचीनानामिव गभीर-तत्त्वानुसन्धानमपि सावकाशं संस्कृतविद्याया महदेव गौरवं सुस-म्भावयेत्। तदाशास्महे नातिचिरमेव संस्कृतशिक्षासंस्कारपरिषदा प्राथमिकोऽयमालोच्येषु विषयः सन्निवेशयितव्य इति।

निबन्धसम्पादनादि-द्वारा संस्कृतज्ञानां विशेषगुणपरीक्षा।

पाश्चात्त्यविद्यावत्सु ये नाम तथाविधान् निबन्धानुपपादयन्ति, ते तु प्रायेण संस्कृतशास्त्रनिबद्धवस्तुसाहाय्यकमव-लम्ब्य प्रथन्ते, अनेकेष्वेव न दृष्टस्तत्र तत्र विषये नवीन-वस्तुसमुद्भावनप्रयत्नः कोऽपि ; किन्तु यदि संस्कृत-भाषया तथाविधनिबन्धनिर्म्माणं कर्त्तव्यं भवेत्, यदि च प्राचीनशास्त्रतत्त्वेषु गभीराभिनिवेशपूर्व्वकं निबन्धविषयव्यव-

संस्कृतभाषायां सादृश परीक्षाप्रवर्त्तने नव-वस्तुलाभसम्भावना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थापनं विधेयं स्यात्, तदा केवलं न ग्रन्थनिबद्धविषयमात्रं शक्यमुपनिबन्धुम्, तथात्वे भाषावैजात्यस्याप्यभावेन अनायासत एव नैपुण्यविरहमुन्नीय शक्येरन् अमी निबन्धाः प्रत्याख्यातुम्। आङ्गलभाषाविदाञ्च आङ्गलभाषया निबद्धे तादृशनिबन्धे यथा कथञ्चन आङ्गलभाषया शास्त्रोक्तविषयानुवादमात्रेणापि भाषान्तरीकरणादिवलक्षणमपि सम्भाव्यते गुणप्रकाशाय। वस्तुगत्या पर्य्यालोचिते तु शास्त्रस्य तेन न किमप्युपक्रियते। संस्कृतशास्त्रीयविषयानवलम्ब्य संस्कृतभाषया निबन्धप्रचारस्तु अनिच्छतामपि निबन्धकाराणां नवीनविषयसमुद्भावकत्वं समुपपादयेत्, शास्त्रवाक्यमात्रपरिग्रहे पौनरुक्त्यापातेन परिहेयत्वात्। अतः सर्व्वथा प्रवर्त्तनीया तथाविधनिबन्धपरीक्षया संस्कृतशास्त्रज्ञपण्डितानां काचिदुपाधिव्यवस्था यया शास्त्रतत्त्वेषु समीचीनतया रतिरनेकेषां जायेतेति।

संस्कृतशास्त्रे विशेषतो व्युत्पत्तिमतां विशेषपरीक्षा नाम काचित् परीक्षा प्रवर्त्तयितव्येति वाराणसीशास्त्ररक्षासमितिकर्त्तृपक्षीयाणां केषाञ्चन सङ्कल्पः सुबहुकालादूर्द्धमुत्पन्नः समनुस्मर्य्यते, तस्य तु नाद्यापि फलं किमपि परिदृश्यते। तस्यापि सङ्कल्पस्य साफल्यमस्माभिराशास्यते इति।

तीर्थसंस्कारे विप्रतिपत्तयः—पाठकमहाभागाः! बहोः कालात् प्रभृति प्रचरति भारते वर्षे वार्त्तेयं तीर्थसंस्कारस्तीर्थसंस्कार इति। तत्र विप्रतिपत्तिरपि भूयसी समुपलभ्यते। तथाहि केचित् प्रत्यवतिष्ठन्ते यथा सर्व्वमेव तीर्थमिदानीं दैवतप्रभावपरिशून्यं दुराचारजनसमागमादुपहतशक्तिकं वर्त्तते, केनापि संस्कारविधिना न तदुज्जीवितशक्तिकं सम्भवितुमर्हति। तत् किमिति वृथा प्रयासमङ्गीकृत्य निजकृत्यक्षतिमभ्भावनेन, विरम्यतामस्मादनर्थकपरिश्रमात्; नहि दाहेन विलुप्तायां बीजशक्तौ प्रयत्नशतेनापि शक्यमङ्कुर-

(तीर्थानि दुराचारजनसमागमादिना दैवतशक्तिशून्यानीति मतम्।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनकत्वं बीजे सुसम्पादयितुमिति। तन्न समीचीनं, योगिनां योगप्रभावादिभिरुपहतशक्तिकानामपि बीजानामङ्कुरजननशक्तेः साक्षादेव समुपलम्भात् केनाप्यलौकिकेन व्यापारसमवायेन तिरोहितशक्तिकानामपि तीर्थादिकानां पुनरपि शक्त्याविर्भावस्य सम्भावयितुं योग्यत्वात्। तीर्थानां माहात्म्यमस्माभिर्येन प्रमाणेन समभ्युपगम्यते, तदेव प्रमाणं यदि लुप्तशक्तिकानां क्रियाविशेषेण प्रादुर्भूतशक्तिकतामनुशास्ति, तदा कथमस्माभिः शक्यं तत् परिहातुं ; ये तु तीर्थमाहात्म्यमेव नाङ्गीकुर्वन्ति, तेषान्तु प्रबोधनाय वाव्प्रपञ्चावतारो नोपयोगं कञ्चन समावहतीति नासदुत्तरं पर्य्यनुयोगानाम्।

अभिभूतायास्तीर्थशक्तेः संस्कारसम्भावना।

परे च प्रतितीर्थं सत्यपि लोकातिशायिशक्तिपरम्परा परिचालकादीनां नानाविधविगुणाचारपर्य्यायेण सुतरामभिभूता नोपयुज्यते संसारिणां शुभसम्पादनायेति सार्थकः खलु तत्तद्वैगुण्यनिरासप्रयासः। अभिभूतिसम्पादकवस्तुविप्रयोगे दृष्टस्तावदभिभूतवस्तूनां पुनः स्वरूपप्रकाशः। अस्ति हि रञ्जकोपरागादभिभूतस्य सितिम्नः पुनरपि प्रकृष्टसलिलक्षालनादिना प्रादुर्भावो वसनादौ, तदेवं क्रियतां यथामति तैर्थिकसार्थानां विकृतानुष्ठितिरन्यथाकारः, प्रवर्त्त्यतां सदाचारसम्पादनेन तीर्थगामिजनसङ्घेषु पुण्याचरणानुकूल्यं, सम्पाद्यतामभिभूतायास्तीर्थशक्तेरभिभूतिनिरासव्यवस्था, यया किल समुज्जीवितो विशेषविदुषामभिमतः सनातनधर्म्ममार्गः संसारिजनतापत्रयसमुन्मूलनाय सम्यक्तया प्रभवेत्। तत्र च समपेक्षते विशेषतो विचारः सुविदुषां, कथमन्यथा दोषराशीनामशेषतया विज्ञानं, कथं वा अविदितेष्वपि दोषपर्य्यायेषु तत्प्रतीकारसाधनाविनिर्णयेन योग्योपायसमाश्रयणम् ? न हि अनिर्णीते रोगे तन्निवर्त्तकवस्तुव्यवस्था शक्यते कर्त्तुं, दैवमात्र-

परिचालकानामाचारदोषादिना तीर्थशक्तिह्रास इति मतम्।

संस्कारे कर्त्तव्ये आदौ दोषमूलमनुसन्धेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपरीक्षत्य प्रयुक्तेषु भेषजेषु काकतालीयन्यायेन सत्यामपि कदाचन रोगशान्तौ समुपपद्यते नैकान्तिकता, अत एव विशेषविदुषामादौ विनिर्णेयं रोगमूलं, येन तदनुकूलभेषजप्रतिसन्धानेन प्रयुक्तिरल्पेनैवा-यासेन काम्यफलं सम्पादयितुं क्षमेत इति।

संस्कारे कर्त्तव्ये प्राचीनपरिचालकाप-सारणादिविकल्पः।

प्राच्यभावपरिरक्षणैकव्रताः केचन पुनरालोचितविविधयुक्तयः सुदृढ़ां मतिमातिष्ठन्तः प्रस्तुवन्ति, यथा तीर्थ-संस्कारस्तु कर्त्तव्य एव किन्तु तत्र विशेषतस्तावदिदं विवेचनीयम् यद्वर्त्तमानतैर्थिकप्रथायाः कीदृशं परिवर्त्तनं शुभाय नः सम्पद्येत, सद्यः सुप्रतिष्ठानां परिचाल-कादीनामपरेषां विनियोगेन प्राचीनानाञ्च समपसारणेन वा, तेषामेव पुरातनानामवस्थापनेन वा ? यदि तावत् अपरे नवीनाः परिचालका-स्तत्र तत्र सन्निवेशनीयाः प्राचीनाश्च परीक्षितभावदोषाः समपसार-णीयास्तदा तादृशा एव तत्र नवीनाः परिचालकाः समुपयुज्यन्ते ये नाम देवतत्त्वादिनिष्णातमतयः प्राचीनधर्म्मपर्य्यायानविच्छिन्नधारं संरक्षितुमभिजानन्ति, ये च सनातनधर्म्ममार्गमनुवर्त्तमानानि शास्त्र-तत्त्वानि सविशेषमवगच्छन्त ऊहापोहपूर्वकमेव यथास्थानं विनियोक्तुं समर्था भवन्ति। तीर्थानि किल भारते वर्षे सर्वसम्प्रदायानां नैकानि, प्रतिसम्प्रदायञ्च नियमविशेषानवलम्ब्य तेषां तीर्थानां व्यवस्था पुरा कालात् प्रभृत्येव सुव्यवस्थिता, तत्तन्नियमानां तदैव सुसंरक्षा शक्यते कर्त्तुं, यदि तत्र तत्र विशेषतो निष्णाता एव तत् परिचालकपद-मध्यासीरन्, अन्यथा परतीर्थनियमेन तीर्थान्तरव्यवस्थायामुन्नावितायां नियमपूर्वकमनुष्ठानराहित्येन सदाचारमूलो धर्म्मविधिः प्रतिहतः सम्पद्येतेति।

अन्ये च विचक्षणाः स्वं पक्षमेवं व्याचक्षाणा दृश्यन्ते, यथा— जानीमो वयं यथा प्रतिसम्प्रदायं विभिन्ना किल धर्म्मसरणिः, तदनुगत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनतीर्थगुरुत्वेऽपि विशेषविदुषां नियन्त्रणया दोषालाघवसम्भावनम् ।

नियमाश्च विभिन्नेनैव मार्गेण विनिर्णीतास्तेषु तेषु धर्मशास्त्रेषु ; स्त्रीशूद्रैर्हि च तत्र तत्र सुनिष्णातमतीनामुचितं तीर्थाद्याधिपत्यमिति। नहि वयं शास्त्रे विशेषविदुषां तीर्थाधिपत्यप्रतिपक्षाः परं स्थितानां तीर्थगुरूणां शक्तिलाघवेन परिषद्विशेषनियन्त्रणया यदि शक्रमव्यवस्थापनं येन पूर्ववत् सदाचारविघातस्य तीर्थकामिनामुपद्रवस्य दोषान्तरं च न शक्नुयुः सम्पादयितुं तदा कीदृशी हानिः स्यात् ? तस्याश्च परिषदि तथाविधा नियन्तारः स्थिता एव सर्वं व्यवस्थापयितुमर्हन्ति। तीर्थलब्धानां धनानां कियन्तमंशं साधारणानामुपकाराय प्रयुज्य कियन्तमंशश्च तीर्थगुरवे निवेद्य लोकोत्तरः खलु संसारोपकारः सम्भावयितव्य इति।

तीर्थेषु तीर्थगुरूणामेव आधिपत्यं साधारणानां वा समीचीनमिति संशयः ।

एवं बहुविधविरुद्धवाक्प्रपञ्चसमुद्भवेन महानयं संशयो यत् कतमः पक्षः समीचीनतां धत्ते । अस्ति यद्यपि दृश्यमानः प्रायेण सर्व्वेष्वेव पक्षेषु दोषलेशः, तथापि गुरुलाघवविचारेण कश्चन पक्षः समाश्रयितव्य एव। बहुत्र खलु विषयमिममुपजीव्य विचारपरिषत् प्रवर्त्तते, प्रत्येकमेव पक्षे स्वपक्षरक्षणप्रवृत्तिरन्यूनापि परिलक्ष्यते, नह्येके परेषां पक्षमभ्युपगम्य प्रविशन्ति, ये तावच्छ्रोतारः ते तु विप्रतिपत्तिवाक्यपरम्पराणामर्थमुपगत्य सुतरां संशेरते, न ह्येकां कोटिं सुदृढ़मवलम्बितुं क्षमन्ते। अस्माकमपि महानेष संशयः प्रादुर्भूतः यत् तीर्थे तीर्थगामिभिर्यद्देयं तत् कस्मै देयं, यदि तीर्थगुरवे, तदा तत्र तीर्थगुरोरेव प्रभुतया कथमन्यस्तदाददीत, यदि च साधारणेभ्यः तदा दातुरेव महान् दोषः साधारणेषु बहूनामेव दानपात्रत्वाभावेन असत्पात्रप्रदानप्रयुक्तपातकस्यावश्यम्भावात् । तदेवं पुण्यार्जनाय कृतं तीर्थसमाश्रयणं यदि वैपरीत्येन पातकमेव सम्पादयेत्, तदा को वा क्षेमकामी तीर्थं समाश्रयेत, एवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम सनातनधर्म्मिणां तीर्थे अनिष्टसाधकताविज्ञानतो द्वेष एव सम्भवेन्न रागस्य लेशोऽपि। तदा क्व वा वर्त्ततां धर्म्मानुकूल्यं, क्व वा तीर्थसंस्कारसाफल्यम्? तदत्र कीदृशं पन्थानं समीचीनमवगच्छेमेति।

सुभाषितद्वयी

अधुनातनी ग्रामोन्नतिः

(महामहोपाध्यायाजितनाथन्यायरत्नानाम्)

केश्चिद् (१) वानर-काय-पातन-करी ग्रामोन्नतिः साधिता
केश्चिद् वा (२) नरकाय-पातन-करी ग्रामोन्नतिः साधिता।
केश्चिद् वा (३) नरकाय पातन-करी ग्रामोन्नतिः साधिता
केश्चिद् वा (४) नरकाय-पातन-करी ग्रामोन्नतिः साधिता॥

(एकवस्त्रस्य कस्यचिद् दरिद्रस्य)

आद्यन्तमध्यरहितं दशाहीनं पुरातनम्।
अद्वितीयमहं वन्दे मद्वस्त्रसदृशं हरिम्॥

---

(१) केश्चिद् मिउनिसिपालाख्यशासनयन्त्रस्य चालकैः। वानरवधेन।

(२) ग्रामस्थरथ्यानामेवंविधः संस्कारः साधितो यद् जनाः पदक्षेपमात्रेणैव पतन्ति।

(३) नरा एव नरकाः, स्वार्थे 'क'प्रत्ययः; नरकाणामयः शुभम्, तस्य नाशनकरी; करस्य एवंविधम् आधिक्यं सम्पादितं यद् दरिद्रा नरा करभारपीड़िता नश्यन्ति।

(४) नरकाय मलस्थानाय; मलापसारणोपायानां व्यवस्था 'सौष्ठवेन' ग्रामवासिनां नरकभोगं सुलभं कुर्व्वन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशिराभियानम्

लेखकः—श्रीयामिनीकान्तसाहित्याचार्य्यः ।

निपतति शीत- स्तपविपरीतः
शीर्य्यति जागतशोभा ।
शारद-कान्तिः शतदल-भान्ती
न भवति मानसलोभा ॥

शिथिलितपर्णं विमलिनवर्णं
खगकुलमतिशयभीतम् ।
जीर्णारण्ये विकसितदैन्ये
कलयति नहि कलगीतम् ॥

गतगतिभङ्गा विगलितरङ्गा
तटिनी गुरुतटबन्धा ।
रहयति कलकल- मुज्झति रसबल-
मपगतयौवनगन्धा ॥

श्यामलदर्शाः क्व नु नववर्षाः
शरदपि क्वतजनहर्षा ।
ननु हिमसन्तति- रहह निकृन्तति
जीवनमति दुःस्पर्शा ॥

करकृतधान्य- स्त्रिभुवनमान्यः
क्व नु निवसति हेमन्तः ।
ललितविलासः क्व च मृदुहास-
स्तिष्ठति मधुरवसन्तः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जड़यति नीरं जीवशरीरं
मृतिरिव सरसि विगाहः ।
असिरिव शातः सुरगिरिवातः
प्रियसुहृदिव हुतवाहः ॥

क्षतदिनलुप्तिः सुलभसुषुप्ती
रजनी भवति सुपीना ।
न सुलभवस्त्रा हिमसन्त्रस्ता
मृतिमभि यान्ति च दीनाः ॥

प्राचीनवङ्गवैशिष्ट्यम् ।

(पूर्व्वतोऽनुवृत्तम्)

लेखकः—श्रीमत् पूर्णानन्दवंशकरीर-गिरीशचन्द्रवेदान्ततीर्थः ।

पालराजत्वसमये स्मार्त्तो धर्म्मो गौड़ेषु सुप्रतिष्ठितः, न तत्र काचिद् विप्रतिपत्तिः सम्भवति । तदानीं वङ्गवास्तव्यानां यथाशास्त्रमाचारवतां ब्राह्मणादिचण्डालान्तानां हिन्दुकानां पतनवार्त्ता न श्रूयते ।

तत्कालरचित-भवदेवभट्ट-प्रभृति-ग्रन्थपाठादेतदेव ज्ञायते यद् वङ्गानां धर्म्मकर्म्मव्यवस्था वङ्गीयैरेव राज्ञां धर्म्माध्यक्षैः निबद्धा । न तदात्वे मैथिलानां दाक्षिणात्यानां वा ग्रन्थादरो वङ्गेषु समजनि । राजामात्यै राजाश्रितविशिष्टपण्डितैर्वा तदानीं निबद्धा बहवो ग्रन्था अद्यापि अप्रकाशिता जीर्णशीर्णकलेवरा दृश्यन्ते । ते तु समतीतयुगस्य अवस्थाविषये सर्व्वथा साक्ष्यदाने समर्थाः । त एव वङ्गेतिहासरचनायामुपादानभूताः । तान् उपेक्ष्य केवलं पाश्चात्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतानुसरणेन समयनिरूपणमात्रसर्व्वस्वेतिहासरचनायाः तत्-पाठस्य वा किं फलं तत् पद-पदार्थविद्भिरेव विचारणीयम्।

कस्मिन् शाके कस्मिन् खृष्टाब्दे कः पण्डितो जातः, एतन्निरूपणा-पेक्षया यस्य राज्ञः यो धर्म्माध्यक्षः प्रधानामात्यो वा आसीत् तेन कति ग्रन्था रचिताः तेषां प्रतिपाद्या वा के विषयाः, एतदवगत्या तु तदा-नीन्तनी समाजव्यवस्था विस्पष्टं ज्ञायेत।

भवदेवभट्टनामा सुप्रसिद्धनिबन्धकर्त्ता हरिवर्म्मनामनरपते राज्या-ध्यक्ष आसीदिति तदीयलेखादवगतम्। बालवलभिभुजङ्गापरनाम-धेयस्य तस्य प्रायश्चित्तप्रकरणं, सम्बन्धविवेकः, दत्तकतिलकश्चेति स्मृतिनिबन्धत्रितयमस्माभिरधिगतं यथामति पठितञ्च। ग्रन्थत्रितय-निबद्ध-मुन्यृषिनामनिर्देशेनैतदवगम्यते यत् तदात्वे वङ्गेषु बहवो मूलस्मृतिग्रन्था आसन्। तत्र अनेकेषां ग्रन्थानां नामापि दाक्षि-णात्यादीनां ग्रन्थेषु अधुना दृष्टेषु न दृश्यते।

तदीयग्रन्थे ब्राह्मणादिशूद्रान्तानामुत्कर्षापकर्षनिबन्धन-प्रायश्चित्त-भेदव्यवस्था च लक्ष्यते। किञ्च कुमारिलभट्टीयश्लोकवार्त्तिक-तदीयटीकाप्रभृतीनां मीमांसाग्रन्थानामुल्लेखश्च भवदेवग्रन्थे बहुशो दृश्यते। नैयायिकता च तदीयरचनायां सुव्यक्तं परिस्फुटिता। दशकर्म्मपद्धतिनामा तदीयकर्म्मानुष्ठानपद्धतिग्रन्थश्च अद्यापि वङ्गीय-सामवेदि-ब्राह्मणानां संस्कारकार्य्येष्ववलम्बनम्। अलमत्र बाहुल्येन; विश्लेषणं कृत्वा तदीयं दुरवगाहं पाण्डित्यं प्रबन्धान्तरे दर्शयि-ष्यामः।

भवदेवपूर्ववर्त्तिनां बालक-श्रीकरप्रभृतीनां बहूनां स्मृतिनिबन्धॄणां नाम प्रायश्चित्तप्रकरणादौ दृश्यते, तेषां वङ्गीयता च प्रतिभाति। भवदेवात् पराचीनस्य अनिरुद्धभट्टस्य हारलता-पितृदयिता-स्मृति-निबन्धौ कोविदां परिचितौ। तत्र पितृदयितोपक्रमे—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गोभिलगृह्यसूत्रं दृष्ट्वा छन्दोगपरिशिष्टम्।
दृष्ट्वा स्मृतीश्च बहुशः परिसंख्यानं पुराणवाक्यानि ॥
गोतम-वशिष्ठशास्त्रे नानासंग्रहवचांसि चालोक्य।
युक्त्या स्वयं निरूप्य ज्ञात्वा सर्वमतञ्च वृद्धानाम्।
रचिता पद्धतिरेषा सम्यक् कर्म्मोपदेशिनी रुचिरा ॥"

एतदर्थावगत्या तत्पूर्ववर्त्तिनां संग्रहाणां वृद्धानां स्मार्त्तोपदेशकानाञ्च बहूनां सत्ता अवगम्यते। हारलता तु रघुनन्दनभट्टाचार्य्यमहोदयस्य शुद्धितत्त्वोपजीव्यतयोल्लेखयोग्या।

अनिरुद्धभट्टशिष्य एव बल्लालनृपतिर्दानसागरादिकं विविधनिबन्धं रचितवान्। अधुना तु दानसागराद्भुतसागरावेव दृश्येते, अन्ये तु नाममात्रावशेषाः। दानसागरोपक्रमे च येषां ग्रन्थानां नाम निबद्धं तेषां मध्ये अनेके इदानीम् उत्सन्नाः प्रच्छन्ना वा।

दानसागरे च बल्लालनरपतेरतीव ब्राह्मणभक्तिः परिस्फुटा। स तु सर्व्वान् देवान् विहाय प्रत्यक्षदेवेभ्यो भूसुरेभ्य एव नमश्चकार। यथा —

"ये साक्षादवनीतलामृतभुजो वर्णाश्रमज्यायसां
येषां पाणिषु निक्षिपन्ति कृतिनः पाथेयमामुष्मिकम्।
यद्वक्त्रोपनताः पुनन्ति जगतीं पुण्यास्त्रिवेदीगिर-
स्तेभ्यो निर्भरभक्तिसम्भ्रमनमन्मौलि द्विजेभ्यो नमः ॥"

बल्लालात् परं लक्ष्मणसेनसमयेऽपि तदीयधर्म्माध्यक्षेण हलायुधेन मीमांसासर्वस्वं, वैष्णवसर्वस्वं, शैवसर्वस्वं, ब्राह्मणसर्वस्वञ्चेति निबन्धचतुष्टयं विरचितम्। ब्राह्मणसर्वस्वे तु यजुषां कर्म्मकाण्डोपयोगिनो वेदमन्त्राः सम्यग् व्याख्याताः। तदानीं सायणादीनां भाष्यं न जातं, केवलं कस्मिंश्चिद् वेदभागे गुणविष्णुाचार्य्येण व्याख्या रचितेति हलायुधोक्तेरेव ज्ञायते। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आस्ते वाक्पतिसन्निभोऽपि न पुमांस्तस्मात् परः साहसी
यो वेदार्थविवेचनाय कुरुते संज्ञां रसज्ञाञ्चलाम् ।
किन्त्वस्मिन्नुगड़ेन वर्त्म रचितं प्रागेव चेद् विद्यते
व्याख्यानं क्रियदेकवेदवचसां तेनेदमारभ्यते ॥"

अर्थावबोधं विना वेदे वैदिके कर्म्मणि च न श्रद्धा जायते। अस्मादेव हलायुधेन कर्म्मोचितवेदभागव्याख्या कृता। तस्याग्रजः पशुपतिः प्रागेव श्राद्धादिकृत्यपद्धतिम्, अपराग्रज ईशानश्च द्विजाह्निककृत्यपद्धतिं कृतवान् इति ब्राह्मणसर्वस्वपाठादवगम्यते। यथा—

"अर्थावबोधेन विना न वेदे श्रद्धा समुन्मीलति वैदिकेऽपि ।
अकारि कर्म्मोचितवेदभागव्याख्या विमृश्येति हलायुधेन ॥
भ्राता पद्धतिमग्रजः पशुपतिः श्राद्धादिकृत्ये व्यधात्
ईशानः कृतवान् द्विजाह्निकविधौ ज्येष्ठोऽपरः पद्धतिम् ।
तेनास्मिन्नमुना फलश्रुतिपराः प्रस्तुत्य नानास्मृतीः
सन्ध्यादिद्विजकर्म्ममन्त्रवचसां व्याख्या परं ख्यापिता ॥"

हलायुधीयवेदमन्त्रव्याख्या च अल्पाक्षरा स्पष्टार्था च; सायणभाष्यवत् सुगमव्याकरणपदसाधनेन न वर्द्धितकलेवरा।

तत्समये च राढ़ीयवारेन्द्रब्राह्मणैर्वेदाध्ययनं विना केवलं कर्म्ममीमांसाद्वारेण यज्ञेतिकर्त्तव्यता निर्णीता आसीदिति हलायुधोक्त्या ज्ञायते। एतावता च वङ्गेषु यज्ञाद्यनुष्ठाने अनादिलोकपरम्पराप्राप्तं स्वतन्त्रसम्प्रदायदार्ढ्यमेव प्रतीयते। स्मृत्युक्ताचारबाहुल्यञ्च हलायुधादीनां ग्रन्थेषु दृश्यते। वस्तुतः हिन्दुधर्म्ममूलीभूतः सदाचारो वङ्गेषु आचण्डालं यादृक् समादृतः, तादृक् अन्यत्र कुत्रापि न। मूत्रत्यागादनन्तरं यथोक्तजलशौचं वङ्गेतरत्र दुर्लभदर्शनमेव।

हलायुधात् परं वङ्गीयब्राह्मणरामकृष्णेन कर्म्मकाण्डोपयोगिनामनेकेषां वेदमन्त्राणां व्याख्या कृता। तद्व्याख्या च अतीव समीचीना। यतः घटस्थापनादौ यस्मिन् कर्म्मणि यो मन्त्रो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनियुक्तास्तत्र समवेतार्थता सुस्पष्टं प्रदर्शिता। विविधतन्त्रपुराणादिप्रमाणप्रदर्शनपुरःसरमेव च गौड़ीयव्याख्याया गौरवमुद्घोषितम्।

न केवलं वङ्गानां वेदमन्त्रव्याख्यायामनन्यसाधारणता, अपि तु पद्धतिरचनायाञ्च। वङ्गानां तन्त्रपुराणकोविदत्वन्तु सर्वातिशायि। ते हि वेद-तन्त्र-पुराणसमन्वयेन यान् यान् पूजादिप्रयोगान् रचितवन्तः, तेषां पाठेनैव निबन्धॄणां पाण्डित्यातिशयः सुतरां ज्ञायते। वङ्गानामसाधारणानुष्ठान-दुर्गोत्सवपद्धतिरचयितुर्वेणीनाथस्य दुर्गापूजाप्रयोगभूमिकायां दृश्यते—तदानीं वङ्गेतरत्र पुराणशास्त्रादरः शिथिलः समजनि। मैथिलास्तु विशेषेण पुराणादर्शिन आसन्। यथा—

"सर्वदेवमयीं नत्वा जगन्मातरमम्बिकाम्।
विविच्य सत्पुराणानि प्रयोगस्तन्यते मया॥
श्रीलम्बोदरपौत्रेण श्रीनारायणसूनुना।
श्रीमतीतनयेनायं श्रीवेणीनाथशर्म्मणा॥
क्रियते शारदार्चायां विदुषां परितुष्टये॥"

रचनीयग्रन्थस्य प्रयोजननिर्देशावसरे च उक्तम्—

"पुराणादर्शिनः प्रायो मैथिलास्तु विशेषतः।
अतस्तेषां लिपौ श्रद्धा न हि कार्य्या विपश्चिता॥"

स्कन्दपुराणीयप्रमाणञ्च दर्शितम्—

"श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्।
एकेन हीनः काणः स्याद् द्वाभ्यामन्धः प्रकीर्त्तितः॥
पुराणशून्यौ हृच्छून्यौ काणान्धावपि तौ स्मृतौ॥"

नारदीयञ्च दर्शितम्—

"पुराणं ये न जानन्ति समासस्य च लक्षणम्।
तेषां वाक्यं न कर्त्तव्यं गर्हितास्ते स्वकर्म्मभिः॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधुना विकृतेतिहासपाठेन पुराणादिकं प्रति अनास्था जाता, हिन्दूनां सजीवावस्थायां सा न लब्धप्रसरा। ये यावत् माधवाचार्य्य-महीधरादयो वेदभाष्यकर्त्तारस्ते तु पुराण-तन्त्रादिकं भक्तिपूर्णयैव दृशा अपश्यन्, वेदभाष्यवत् तत्र पुराणादिनिबन्धांश्च व्यरचयन्।

अधुना वङ्गपतनदशायामपरो व्यामोहः—सुलभग्रन्थप्रचारः। विकृतमुद्रित-हास्यास्पदानुवादसमन्वितसुलभग्रन्थप्रचारः "हन्त पण्डितः संसारः" इति भवभूतिविभूतिं सर्वथा सफलयति।

अपरश्च गण्डस्योपरि विस्फोटाविर्भावः—सायणभाष्यावलम्बनेन कर्म्मकाण्डोपयोगिवेदमन्त्रशुद्धीकरणम्। ये तावत् गौड़ीयनिबन्धान् सम्प्रदायरहस्यञ्च मनागपि न जानन्ति, माधवाचार्य्यादीनामुपदेशञ्च न विदन्ति, ते खलु अखर्व्वगर्व्वसर्व्वस्वाः गायत्र्यादिपाठमपि अन्यथा कृत्वा अर्व्वाचीनान् सुतरां पातयन्ति परमार्थतो वङ्गस्यात्मव्याः। तेषां पाण्डित्यख्यापनप्रयासदर्शनेन प्राचीनकवेः काव्यमेकं स्मृतिपथमागतम्—

"ध्वान्तौघः कवलीकरोति जगतीं निर्व्वान्ति सूर्य्योपलाः
खद्योताश्च परिस्फुरन्ति परितः सीदन्ति पद्मान्यपि।
ये तु ध्वाङ्क्षभयेन कोटरबहिर्निर्यान्ति नो कर्हिचित्
तेऽप्युच्चैर्विहरन्ति हा दिनमणे कुत्र त्वया प्रस्थितम्॥"

माधवाचार्य्यस्तु वेदभाष्यकर्त्तापि साम्प्रदायिकमतस्य सर्व्वथा पालनीयत्वमुपदिदेश। यथा—"एवञ्च सत्येकामेव तैत्तिरीयशाखामधीत्य बौधायनापस्तम्बमतभेदेन परस्परविलक्षणमाचरतामुभयमनुष्याणां स्वस्वपूर्व्वपुरुषपारम्पर्य्यक्रमायात एवाचारो मुख्यः" [कालमाधवे काश्यां मुद्रितपुस्तके ७८]। इदमत्राकूतम्—एकामेव तैत्तिरीयशाखामवलम्ब्य बौधायनेनापस्तम्बेन च सूत्रादिकं प्रणीतम्। परन्तूभयमतमतीव विलक्षणम्। तैत्तिरीयशाखिनां मध्ये तु उभयमतस्यैवादरो दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदे पाठभेदो नास्तीति प्रवादप्रत्ययस्तु वेदतत्त्वमविजानतामेव सम्भवति। यतः वङ्गानां कर्मकाण्डविनियुक्तेषु मन्त्रेषु सम्प्रदायभेदेन महान् पाठभेदो दृश्यते। यथा दिक्पालमन्त्रेषु भवदेवसम्मत इन्द्रमन्त्रपाठः—

"त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्तिनो मघवा धात्विन्द्रः॥"

अयमेव पाठ उवटाचार्य्यमहीधराभ्यां व्याख्यातः [शुक्ल यजुर्व्वेदसंहितायाम् २०।५०]। प्रतिष्ठाप्रयोगतत्त्वलिखितः रघुनन्दनभट्टाचार्य्यसम्मतः पाठः—

"त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
हवे नु शक्रं पुरुहूतमिन्द्रमिदं हविर्म्मघवा वेत्विन्द्रः॥"

अस्माभिस्तु संस्कारादौ भवदेवमतं प्रतिष्ठादौ रघुनन्दनमतञ्च समाद्रियते। प्रतिष्ठाप्रयोगतत्त्वमतीव समीचीनम्। अत्र त्रिवेदिनामेव वास्तुयागादीनां पद्धतिरतिस्पष्टा निबद्धा।

वेदशाखादर्शी रामकृष्णस्तु पुरोहितसम्मतमेव पाठं स्वीचकार। यथा अधिवासमन्त्रव्याख्याने—"ओँ. तेजोऽसि शुक्रमस्यमृतमसि धामनामासि। प्रियं देवानामनाधृष्टं देवयजनमसि।" इति मन्त्रे "अन्ते असीति पुरोधसः पठन्ति, तत् शाखायां नास्ति" [रामकृष्णकृतमन्त्रकौमुदी] एवमन्यत्रापि स्वाभिमतं व्यक्तीचकार। गायत्रीव्याख्याने च "वरेण्यम्" इति पाठस्यैव साधीयस्त्वं युक्त्या प्रतिपादयामास।

वङ्गप्रचलितपाठभेदस्तु पदपदार्थविद्भिः कथमपि नोपेक्षणीयः। यतः हलायुध-गुणविष्णु-रामकृष्ण कंसारिप्रभृतिभिरेषां मन्त्राणां सम्यग् व्याख्या कृता। किञ्च पुरुषपरम्परया अशुद्धगायत्रीपाठकानां ब्राह्मणादीनां व्रात्यत्वमकामेनापि वाच्यम्। अतस्तत्सन्ततीनां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुरात्मनां भूर्जकण्टक-भल्ल-मल्लादीनाम् अधुना "वरेणियम्" पाठेन कियान् उत्कर्षः सम्भवेत् प्रेक्षावद्भिरेव विवेचनीयम् ।

अस्तीयं किंवदन्ती—रघुनन्दनभट्टाचार्य्यः स्वमतेनात्मजमुपनीय मातरमुवाच—मातरद्य एको ब्राह्मणः कृतः इति । माता तु सावज्ञ-मुवाच—नैतस्य ब्राह्मणत्वं सम्पन्नं, न ह्यब्राह्मणादुत्पन्नस्य ब्राह्मणत्वं सम्भवेत् । अतः लोकान्तरात् स्वजनकमानीय निजमतेन तेन सह मम परिणयं सम्पाद्य मत्तो जन्म गृहीत्वा तव मतेन जातकर्म्मादिभिः संस्कृतः कृतोद्वाहश्च पुत्रमुत्पाद्य चेत् तमुपनेतुं शक्तस्तदैवाभिनव-ब्राह्मणनिर्म्माणं सम्भवेत्, नान्यथा इति मातृवचनमुपश्रुत्य तु पुत्रं पुनश्च भवदेवमतेनोपनीतवान् । अत एव अद्यत्वेऽपि तस्य संस्कारतत्त्वं नाद्रियते ।

शास्त्रार्थानवगमेन, आचारव्यतिक्रमेण, परसभ्यतावलम्बनेन च, अधुना क्रमशः ब्राह्मणादि चण्डालपर्य्यन्तानां पतनं सम्पद्यते कष्टातिशयश्च वङ्गेष्वनुमीयते । तथापि कलेः प्राबल्यात् न बोधः सञ्जायते, कलेः परिशिष्टञ्च निष्पद्यते । हिन्दुसमाजेषु पाश्चात्त्य-सभ्यतायाः प्रवेशसमये हिन्दूनामनार्य्याचरणं विलोक्य केनचिदुद्-गीतम्—

"वेदं वेद न कोऽपि भूदरदरीलीना मुनीनां गिरः
स्वच्छं म्लेच्छमतं जनास्तदनुगाः का नाम धर्म्मग्रा क्रिया ।
मद्यं हृद्यमतीव वारवनिताः सेव्या न गुर्व्वादयः
किं कार्य्यं परिशिष्टमस्ति भवतो जानामि नाहं कले ॥"

मद्यपानयोषित्सङ्गमादिके सुखप्रदे कर्म्मणि नराणां प्रवृत्तिः स्वाभाविकी । परन्त्वनधिकारिणा यज्ञोपवीतधारणे अशौचसङ्कोचने च प्रवृत्तिः कलेः परिशिष्टसाधनं विना न सम्भवति । नहि तत्र सुखलेशोऽपि सम्भवेत् ।

ये तावत् गुरवः पुरोहिताश्च प्राक् समाजरक्षका आसन् अद्यत्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त एव पतिततमाः क्रीड़ापुत्तलिकावत् शिष्ययजमानानामाज्ञानुवर्त्तिनः तेषां पातने कारणतामुपगताः ।

वङ्गीयाः पण्डिता भिक्षावृत्तिं समाश्रित्यान्तेवासिनः पाठयामासुः । अधुना क्व ते महानुभावाः शास्त्रानुवर्त्तिनो ब्राह्मणपण्डिताः ? पूर्व्वेषामाचरणं स्मृतिपथमागतं नितरामाकुलयति मानसम् । यदा वयं विक्रमपुरवयरागादीवास्तव्य-स्वर्गत-पूज्यपादोपाध्याय-चन्द्रकिशोरचूड़ामणिमहाशयस्यान्तेवासिनोऽभूम,तदानीन्तनः एको वृत्तान्तोऽद्य भवतां सविधे वर्ण्यते । उपाध्यायमहाशयस्तु नितरां निःस्व आसीत् । स तु दरिद्रतमाया एकस्याः सकाशात् सार्द्धरूप्यकमूल्येनैकां कन्थां क्रीतवान् । मूल्यन्तु आनकद्वयं सार्द्धमानकं वा अन्तरान्तरा क्रमशो दत्त्वा मासद्वयेन ऋणमुक्तोऽभवत् । किन्तु ईदृगवस्थायामपि चतुर्द्दशसंख्यकानन्तेवासिनोऽन्नदानेन पुपोष । वयन्तु तद्वंशधरा अपि पराज्ञानुवर्त्तिनः परदत्तं वित्तं गृह्णन्तोऽध्यापनाभासमाचरन्तो वानरीनर्त्तनवत् यत्र तत्र भारतीं नर्त्तयन्तो जीवनं धारयामः । अतः परं किं वा पतनं सम्भवेत् । अद्य तत्रैव विरताः स्मः, प्रबन्धान्तरे उपक्रान्तमुपसंहरिष्यामः ।

परिस्थितिः धर्म्मपरिवर्त्तनञ्च

लेखकः—वेदान्तविशारद-श्रीमदनन्तकृष्णशास्त्री ।

सन्तीदानीं बहवः समाजा आर्य्यसमाज-ब्राह्मसमाज-सनातनधर्मावलम्बिसमाजप्रभृतयः । सर्वेऽपि सत्यं समाजसङ्गठनं परमपुरुषार्थञ्च प्रार्थयमानास्तत्तद्धर्मोपदेशार्थं प्रवर्त्तन्ते । तत्र चोद्देश्यमेकं सर्वेषां, मार्गास्तु भिन्नास्तेषान्तुषामिति प्रत्यक्षमिदं सर्वेषां सत्यप्युद्देश्यैक्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गभेदः किन्निबन्धन इति वयमिदानीं विचारयामः। तत्र इदमालोचनीयं यत् सर्वेषामपि दार्शनिकानां कारणस्वरूपविवेचनार्थं प्रवृत्तानामुद्देश्यैक्ये ऽपि कथं केषन परमाणुकारणवादः केषन प्रधानकारणवादः केषन शून्यकारणवादः बहुभिश्च ब्रह्मकारणवादः स्वीकृत इति इदमेवात्र निमित्तं, युक्त्यवलम्बेन ते कारणस्वरूपं निरूपयितुं प्रवृत्ताः। युक्तिर्हि पुरुषभेदेन विभिन्ना विभिन्ना भवतीति तस्य तस्य बुद्ध्यनुसारेण तेन तेन तत्तत्स्वरूपं निर्धारितमिति एवमत्रापि समाजानामितेषां मार्गभेदेऽपि इदमेव निमित्तं यत् सर्वेऽपीमे धर्म्मविनिर्णयार्थं कालदेशपरिस्थितिं मूलप्रमाणतयाऽवलम्बन्ते। परिस्थितिर्हि सर्वेषां बुद्ध्यनुसारेण भिन्नभिन्नैव तस्मै तस्मै प्रतीयते। कश्चिन्मनुते स्पर्शास्पर्शविचारो दोषनिदानमपरो मन्यते तच्च स्पर्शास्पर्शविचारः सर्वथा रक्षणीय इति एवं कश्चिन्मन्यते विधवाविवाहः अत्यावश्यक इति कश्चिन्मन्यते स महते दोषाय भवतीति। नहीदं वक्तुं शक्यते यत् कस्मिंश्चनावसरे विधवाविवाहेन दोषो न भविष्यतीति तथा च सर्वथा तु परिस्थित्यनुसारेण धर्म्मतत्त्वविनिर्णये न कोऽपि धर्मः परिनिष्ठितः सिध्येत्। न हि एका परिस्थितिः सर्वसाधारणी सर्वत्र वर्तते भविता वेति केनाऽपि वर्णयितुं शक्यते। सत्यम् पराशरादिभिः परिस्थित्यनुसारेण धर्म्मसङ्कोचनं कुत्र कुत्रचन सम्पादितम्। तत्र तु निमित्तमिदमेव यद् यस्यानुष्ठाने शक्तिस्तस्यैव कर्मस्वधिकारो नत्वशक्तस्य। तथा च पराशरादिभिर्बहूनां शसाध्यप्रायश्चित्तानुष्ठानाशक्तिपर्य्यालोचनेन सङ्कोचनं यथा कृतं तथा बहूनां धर्म्मानामनुष्ठेयानां मध्येऽशक्तिपर्य्यालोचने केषांचिदननुष्ठानमेव परिस्थित्यनुसारेण सम्पादयितुं शक्यते, न तु निषिद्धानामधर्म्माणां प्रवर्तनमपि। "निवर्तितानि कर्म्माणि कलेरादौ महात्मभिः" इति वचनमपि धर्म्मसङ्कोचन एव धर्म्मज्ञानाधिकारम्बोधयति न तु तद्वर्धने। अस्माकं भारतीयानां पूर्वं कदाचिन्नियमव्यवस्था आसीत् यद्धर्म्मकथापि न बहिः प्रकाशनी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्चेति, अस्यामप्यवस्थायां न धर्मपरिवर्तनं केरप्याचार्यैः सम्पादितम्। "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इति भगवद्गीतापि ग्लानस्य धर्मस्य रक्षणार्थं हि भगवदवतारं बोधयति नत्वभ्युत्थितस्याधर्मस्य प्रतिष्ठापनार्थम्।• न अभ्युत्थितं किमपि प्रतिष्ठामपेक्षते स्वयं वर्धमानञ्च भगबुद्धमतानुयायिभिः वेदाप्रामाण्यव्यवस्थापनादिना साधारणधर्मसन्त्वोपदेशेन धर्ममार्गस्य हानिः सम्पादितेति खलु शङ्करभगवत्पादादीनामवतारकाले यादृशी विशेषधर्माणां दुर्व्यवस्था आसीत्, तादृशी दुर्व्यवस्था इदानीं भारतीयानामस्माकं विशेषधर्मविषये वर्तते, तस्यामपि परिस्थितौ श्रीशङ्करभगवत्पादादिभिर्न विशेषधर्मपरित्यागेन स्वीयं मतं स्थापितं, किन्तु विशेषधर्मव्यवस्थापनेनैव स्वीयं मतं स्थापितमिति मोक्षार्थिनामामुष्मिकफलार्थिनाञ्च। कथं धर्मपरिवर्तनेनेष्टं सम्पादयिष्यत इति सर्व एव विभावयन्तु। धर्मपरिवर्त्तनं हि नाम यदि अधर्मपदस्थाने धर्मप्रक्षेपमात्रं तदा अनेन किंवा प्रयोजनं साधितं भवतीति ? नहि क्रोशमात्रमपि यस्य भूमिर्नास्ति स्वायत्ता तस्य राजा इत्युपाधिदानेन किमपि प्रयोजनम्। नहि यागादिक्रियामात्रं धर्मः कलञ्जभक्षणादिक्रियामात्रं स्वरूपतोऽधर्मः। पारलौकिकस्वर्गनरकादिसाधनत्वेन खलु तेषां धर्मत्वमधर्मत्वञ्च। तद्यावत् फलव्यवस्थापनेऽपि नास्माकं शक्तिस्तावत् पदमात्रपरिवर्तनेन किंवा प्रयोजनमधिगतं स्यात्। यः खलु परमामापदमापन्नो न वयं तेनापि सर्वेऽपि धर्मा यथावदेव तस्यामवस्थायामपि परिपालनीया इति वदामः। विश्वामित्रादयो हि श्वजाघनीभक्षणादिकमपि परमापदि सम्पादितवन्त इति स्पष्टमिदं महाभारतादिदर्शिनाम्। इदमेवात्रालोचनीयं यद्भारतीयानामस्माकं स्पर्शास्पर्शविचारेण प्राणहानिरिदानीमापतिता नवेति। सत्यं केचनेदानीं वर्णयन्ति सर्वेषां प्राणहानिरापतितेति। इदमेवात्र वयं वदामः। येषां मतेन प्राणहानिर्न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्जातेति प्रत्ययस्तैरपि अन्धपरम्परया स्वबुद्धिशक्तिं परित्यज्य ईश्वरवाक्यवत् एतेषां वाक्यं कथं प्रमाणतया स्वीकर्तुं शक्यत इति सनातनधर्मानुयायिनः पण्डिता अन्येऽपि वा इदमेव मन्यन्ते यत्तत्या मापदि आपन्नेन पुरुषेण धर्मविशेषो न परिपालनीयः परमनापन्नानां धर्मपरिपालनं यावच्छक्ति युक्तमेवेति। सत्यं समाजस्य काचन विपत् इदानीं बहुभिरनुभूयते, तथापि इदमेवात्र सर्वेषां सविधे निवेदयामः, यत् समाजपरिस्थितिरियं धर्मसङ्कोचाय तत्परिवर्त्तनाय वा पर्य्याप्ता वा नवेति सम्यक् पर्य्यालोच्यताम्। समाजस्य हि यथा जैनबौद्धार्य्यसमाजीयादयः अङ्गानि एवं सनातनधर्मानुसारिणोऽप्यङ्गान्येव खलु, एतच्च सति सर्वोद्धारार्थं प्रवृत्तानां परिवर्तनवादिनां कथं केवलशास्त्रपक्षपातिनां सनातनधर्मानुसारिणां दूरतोनिःसारणं समुचितमिति समाजपरिस्थितिः हि धर्मपरिवर्तने तदैव निमित्तं स्यात्, यदि समाजस्य धर्मस्य च कश्चन सम्बन्धः स्यात्। धर्मो हि न समाजाधिकारिकः किन्तु तत्त्वस्याधिकारिकः। स हि समाजाधिकारिको भवति यः समाजावयवे नैकेनानुष्ठितः सम्पद्यते। यथा समाजावयवेन सम्पादकेन कृतं कार्य्यं सर्वैरपि सदस्यैः कृतं भवति नह्येवमेकेन धर्मानामनुष्ठानेन सर्वेप्यनुष्ठितधर्माचारा एकेन कृते प्रायश्चित्तेऽधर्मे वा कृतप्रायश्चित्ताः कृताधर्माश्च भवन्ति। तथा च येन धर्मोऽधर्मो वा सम्पाद्यते, तत्तत्फलं स एवानुभोक्ष्यते न समाज इति। समाजेन व्यक्तिधर्मव्यवस्थापनं कथं वा योग्यं भवति॥ न हि सनातनधर्मानुयायिनोपि समाजस्य अशक्तिं अनधिकारं वा कुत्रापि प्रतिपिपादयिषन्ति किन्तु अनुष्ठायिनां तेषां पुरुषाणां फलविषये भारग्रहणं समाजेन कर्तुं न शक्यत इति। धर्मस्य हि युक्तिमूलकत्वं तत्तदनुभवमूलकत्वञ्च यदि स्यात्तदा स्यात्समाजस्याधिकारस्तत्परिवर्त्तनादिषु तदत्रावश्यं निरूपणीयमिदं समापतितं युक्तेः सनातनधर्मस्य च कः सम्बन्ध इति इममत्र विषयमधिकृत्य सत्यवसरेऽवसरान्तरे निरूपयिष्यामः। सना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनधर्मानुगामिनो वयं सम्यक् परिस्थितिं जानीमस्तथापि समाजे बहूनामन्यथाऽन्यथा प्रवृत्तिः स्वस्वकामक्रोधादिमूलिकेति न तदनुसरणं सर्वेषां पारलौकिकफलोपयोगि भविष्यति ये तु पुनर्न परलोकमपेक्षन्ते शास्त्रञ्च न प्रमाणतया मन्यन्ते, न तानुद्दिश्य वयं किञ्चिदपि वदामः। ये तु शास्त्रानुसारेणैव धर्मव्यवस्थापनमपि काङ्क्षन्ति तेषां सविध इह निवेदयामो यत् अल्पज्ञानानामल्पशक्तिकानाञ्च भवतामनुभवानुसारेण शास्त्रं न व्यवस्थाप्यतां, किन्तु जैमिन्यादिमहर्षिसम्पादितन्यायानुसारेण तद्व्यवस्थाप्यतामिति किमिदं युक्तं यत् स्वल्पपरिमाणशिरस्त्राणपरिमाणमनुसृत्य पूर्वसिद्धस्य महतः शिरसः खण्डनम्।

शास्त्रार्थविचारः समस्यापूरणञ्च *

अद्य खलु विविधविद्याविवादविहितविरावाविष्टविष्टपे समग्रस्वैरत्वव्यसनलोकफलहिताहितविधातुर्जगद्विधातुरनुकम्पया करालकालगल्लगलितायाः "सनातनधर्मविद्यालयालयभूतायास्तत्सभ्यतावित्तच्छात्रदेशीयोत्साहसंवर्धिन्याः संस्कृतसाहित्यसंवर्धिन्या नाम चिरन्तन्याः परिषदः परुत्तनवत्सरे कथमपि वाङ्मुखमुखरितायाः इदानीन्तनदीपमालिकामुद्दिश्य प्रतिपदि चन्द्रसुतवासरे विस्पष्टार्थसार्थसकलायथा गीराविरभवत्—तथाविद्यते सहृदयमनुजमनोह्लादनाय तथा च व्याकरणविहितप्रयासानां-"स्थानिवदादेशोऽनल्विधौ"-इति सूत्रस्य "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति परिभाषायाश्च शास्त्रार्थः।

साहित्यप्रह्वितचेतसां—निम्ननिर्दिष्टसमस्या च समचीक्लृप्ता,

---

* फरुखाबादतो संस्कृतसाहित्यसंवर्द्धिनीपरिषदो द्वितीयवार्षिकाधिवेशनस्येतिवृत्तमिदं तन्मन्त्रिणा पण्डितवरश्रीचन्द्रशेखरजैतलीयेन प्रेषितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रार्थविषयस्यातिप्रकृष्टतरत्वादत्यायतत्वाच्च नात्र निर्दिश्यते। विषयद्वयप्रौढतमविद्वद्भ्यो यथानिर्दिष्टपुरस्कारोऽपि वितीर्णः।

अथ समस्यापूर्त्तयस्य तत्कवयितुर्नामप्रदर्शनपुरःसरं स्थालीतण्डुल-न्यायेन प्रदर्श्यन्ते।

अथ समस्या—"इयं वसुन्धरा कथं लभेत पूर्ववैभवम्" इति तत्रादौ पूज्यपादानां पं० लक्ष्मीनारायणशर्मशास्त्रिणाम्—

विधन्ति(१)नेव विप्रजा ऋषौ(२) रतिं प्रकर्षदां-
तपश्चरन्ति नेव ते समस्तसिद्धिदायकम्।
न चास्ति तेषु संयमः समग्र(३) ऋद्धिदायक(४)-
इयं वसुन्धरा कथं लभेत पूर्ववैभवम्॥ १

कुदृष्टिदुष्टिदारणे मनोजवेगवारणे,
व्रजेन्द्रजप्रसूतिभूनिजस्वमानरक्षणे।
न चास्ति सङ्घशक्तिजं बलं सुवीरमानिना-
मियं वसुन्धरा कथं लभेत पूर्ववैभवम्॥ २

मुनीन्द्रवृन्दवन्दिते कवीन्द्रवृन्दमण्डिते,
सुदेवदेशभारते न योजयन्ति वै धनम्।
बुधेन्द्रमानमण्डने (१)प्रतीतदक्षवैश्यजा,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम्॥ ३

दरिद्रदोषदारणे रमानिवासकारणे,
स्वराज्यशूलनाशने सुराज्यमूलकारणे।
सुशिल्पशास्त्रधारणे शठा वसन्ति शूद्रजा,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम्॥ ५

व्या। (१) विधविधाने तुदादिः। (२) ऋषिर्वेदस्तस्मिंस्तथा। (३) "ऋत्यकः" इति प्रकृतिभावः। (४) पादान्तत्वाद्विकल्पेन गुरुर्बोध्यः।

व्याख्या। (१) प्रतीतः प्रसिद्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलाङ्गना न भारते गृहार्थशास्त्रदीक्षिताः,
न शिल्पशास्त्रशिक्षिता न पाकशास्त्रपण्डिताः ।
न काव्यशास्त्रकोविदाः पतिव्रतारता न ता,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ ६　इति

तथा पूज्यपादानां नानार्थप्रतिपादनकलाकोविदानां पं बाबूरामशर्मकविवराणाम्—

वयस्तु पञ्चविंशतिप्रमाणहायनं परम,
प्रपाठयन्ति विद्वरास्तदन्तविध्यवारणात् ।
मतेन दीक्षितस्य किं व्रजेदधिक्रदादिषु,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ १

तथा रसायनशास्त्रि पं० भागीरथशर्मवैद्यानाम्—

रमासुराः कुमार्गगामिनोऽत्र बाहुजा नराः,
स्वधर्मकीर्तिहारका विशस्तथाङ्घ्रिजा अहो ।
धराधिपाय हिंसकाः प्रभेदनीतिकारिणः,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ १
असंस्कृतप्रवृद्धयो नवीनताङ्किका जनाः,
सुधासमं विहाय हा पिबन्ति दूरदेशजम् ।
अनेकदोषरोगिणं रसं स्वदेशजं तदा,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ २

तथा पं० श्रीरामद्विवेदिकविरत्नानाम्—

अमन्दधारयास्त्रवद्विलोलदेवदीर्घिका,
तरङ्गतुङ्गवाःकणानुपावितत्रयोभुवाम् ।
सदैव भव्यभावनैश नाधुना दयेत चेत्,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ १

५। अन्वयः। वयस्तु पञ्चविंशतिप्रमाणहायनम्, पञ्चविंशतिमितकालावच्छिन्नम्। परं विद्वराः "तदन्तविध्यवारणात्" 'येनविधिस्तदन्तस्ये'ति तदन्तविधेरनिवार्यतया। दीक्षितस्य' भट्टोजिनाम्नो मते दधिक्रदादिषु ग्रन्थेषु "इ" इकारो "यं" यश्च किं न व्रजेदिति प्रपाठयन्ति। वयःकालसङ्कोचे तद्विरुद्धं पाठनीयग्रन्थविस्तरं कुर्वन्तीति यावत्। पुनः वसुन्धरा पूर्ववैभवं कथं लभेत। इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न तन्महो न ते महोत्सवा न देहिनां बलं,
भुजार्जितं जनार्जितं धनार्जितं जगत्प्रभो ।
मनांसि पापवेष्टितानि नेक्षसे यदीश्वर ?
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ २
न कोऽपि दीनदेहवान् न कोप्यभूदनात्मवान्,
न कोऽपि नास्तिको न वा स्वकर्मधीहतः क्वचित् ।
इतश्रियश्च चेदवेक्षसेऽधुना दयानिधे ?
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ ३ इति

तथा पं॰ चन्द्रशेखरशर्मजैतलीयानाम्—
स्वतान्त्रिकैक्यधा यदाऽऽश्रमोढ़वर्णसाक्षरा,
सकर्ममानवैर्नवा नवाहिता पराम्बले । (पराम्बरे)
चलेवले सपौरुषा रुषाऽऽहवे हुताभवे:
दियं वसुन्धरा तदा लभेत पूर्ववैभवम् ॥ १
न भारतीद्भवान्नतूलकादि कस्य नायनं,
सुबाह्यवस्तुवर्जनं स्वदेशिकोपयोजनम् ।
विशेषकार्यसाधकार्थसाधनं निजे पुरे,
सुपर्व्वभारती प्रचार ऐतिहासधर्मभूः ॥ २
स्वधर्मनिष्ठमानसा कटीनहो रिपुञ्जयाः,
विनीयसप्तसाधनैश्च पारतन्त्र्यदानवीम् ।
स्वतन्त्रदुन्दुभिं निनाद्य संस्तुवन्तु मातरम्,
इयं वसुन्धरा तदा लभेत पूर्ववैभवम् ॥ ३ युग्मम्

तथा च पं॰ भगवत्प्रसादशर्मवाजपेयिनाम्—
न तादृशी सुसत्यता न तादृशी सुभक्तिता,
न तादृशी गभीरता न तादृशी सुशीलता ।
न तादृशी सुधीरता न तादृशी सुवीरता,
इयं वसुन्धरा कथं लभेत पूर्ववैभवम् ॥ १ इति

अन्वयः—ऐक्यधा, ऐक्यसम्पन्ना आश्रम ऊढ़ौ धृतौ यैर्वर्णैर्द्विजादिभिस्तैः साक्षरा, विद्वती, "ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये आश्रमोऽस्त्री" इत्यमरः स्वकर्माणः कर्मयोगिनः । आहिता आच्छादिता—स्वयं वस्त्रवयनसमर्थेत्यर्थः । १

अन्वयः—अर्थसाधनं वस्तु निर्माणम् । विशेषकार्यसाधकाः, वस्त्रशिरस्त्राणादीपशलाकादयः । २ इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(अग्रहायणमासादनुवृत्तम्)

अपि च, वेदेषु प्रणयो विनश्यतु नयः शास्त्राद् बहिर्वर्त्तताम्,
ये शास्त्रं रचयन्ति तेऽपि मनुजा नैतेऽपि किं तादृशाः ?
यस्मै यद्धि विरोचते जनिमते तेनैव तत् साध्यताम्,
कालं कञ्चन देहसङ्गतिरियं कास्येन संयोज्यताम् ॥

पुष्करः—यथाज्ञापयति प्रियवयस्यः ।

कलिः—वयस्य पुष्कर, गच्छाम्यहमिदानीं द्रष्टुं सदारस्य भ्रष्टराज्यस्य नलहतकस्य अरण्यगमने कियान् पन्था इति, तदिदानीं त्वमपि स्वनियोगमनुतिष्ठ ।

पुष्करः—यथादिशति वयस्यः ।

कलिः—(गच्छन् आत्मगतम्) अहो मे प्रभावः ! कियन्त एव मे यथा व्यतीता नलस्य प्रभावं पराभवितुम्, यावदेव मदेकसम्बलस्य मोहस्य प्रभावेण परित्यक्तवानेष शारीरशुद्धिं, तावदेव लब्धावसरेण देहमस्य प्रविश्य धर्म्मग्रां बुद्धिं लघूकृत्य द्यूतमार्गेणेष राज्याद् भ्रंशितः । मूढ़े, दमयन्ति, देवानवधूय मानुषं वृण्वती देवकोपादपि न भीतासि, अहो साहसं, सम्प्रति पश्येयं कीदृशस्ते फलानुबन्ध इति । मूर्ख, धर्म्म, परिरक्ष साम्प्रतं वनाय प्रतिष्ठमानं भ्रष्टराज्यं स्वानुगतं निषधनाथम् । क साम्प्रतं ते गर्वः ? किमु नावलोकयसि स्वानुगतस्य नलस्य वर्त्तमानमवस्थापातम् ? तदाकर्णय यन्मया अपरमपि करिष्यते ।—

भैमीं वियोजयिष्यामि नलेनाक्षतबुद्धिना ।
उभयोर्दास्यमाधास्ये प्रभावस्ते विलुप्यते ॥

(निष्क्रान्तः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्करः—अहो अकारणबान्धवो मे प्रियवयस्यः, एतस्मादन्यः को वा सहायो मे साम्राज्यलाभे ? तद्भवतु सम्प्रति वयस्यादेश-मनुतिष्ठामि। कः कोऽत्र भोः! अये न कोऽपि? तत् कीदृशोऽयं प्रबन्धः? भवतु उच्चैराह्वयामि, (उच्चैः) कः कोऽत्र भोः!

(प्रविश्य यष्टिहस्तः खञ्जः पुरुषः)

खञ्जः—आज्ञापयतु देवः।

पुष्करः—अरे! क्व ते परिजनाः? किं मे त्वया खञ्जपुरुषेण?

खञ्जः—देव! सम्प्रति भवतः खञ्जपुरुषैरेवार्थः।

पुष्करः—कथमिव?

खञ्जः—यतस्ते दूरं गन्तुमसमर्थाः।

पुष्करः—किन्तेन?

खञ्जः—देव! अद्यापि नावधारयसि?

पुष्करः—किमेवमसम्बद्धमभिधत्से? स्पष्टं कथय।

खञ्जः—देव! इतोऽपि स्पष्टतरं कथनीयम्? यद्येवं श्रूयताम्।—येषामतिकष्टेनापि दूरे चरणसञ्चारसामर्थ्यं, ते किमद्यापि सन्ति निषधेषु?

पुष्करः—तत् कुत्र?

खञ्जः—ते हि देव्या दमयन्त्या देवेन च नलेन साकं वनायैव प्रतिगताः।

पुष्करः—किमत्र न कोऽपि?

खञ्जः—अथ किम्?

पुष्करः—गृहीतराज्यभाराः सचिवाः?

खञ्जः—त एव प्रथमं सहचारिणः।

पुष्करः—साम्राज्यस्तम्भभूताः सेनापतयः?

खञ्जः—कुतोऽद्य तेषां वार्त्तापि?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्कर:—अन्ये विभवत: परीवारा: ? शान्तमतय: प्रजाश्च ?

खञ्ज:—तेषामपि सम्प्रति नलानुवृत्तिरेव प्रतिष्ठा।

पुष्कर:—(स्वगतम्) अहो मूर्खता! अहो मतिविपर्य्ययो जानपदानाम्! अस्तु समग्रमेव राज्यं पर्य्याकुलं, तथापि मदेकबान्धवेन कलिना सुपरोचितार्थोऽस्मि। तदलमाशङ्कया; अरे पद्मपाद, गच्छ मद्वचनाद् विज्ञापय शेषान् जानपदान् तदनुगतान् परीवारांश्च।—

खञ्ज:—किमिति ?

पुष्कर:—गावो देवगणाश्च भक्तिविहितां पूजां न गच्छन्त्वमी,
क्षीणो धर्म्मविधि: प्रयातु विलयं सौहार्दमुच्छिद्यताम्।
वार्त्तापि त्रिदिवस्य नश्यतु चिरं योगे मतिर्लुप्यतां,
विप्रेषु प्रियतान्यजातिजयिनी माभूत् चितौ लक्षिता॥

अपि च—

वेदेषु प्रणयो विनश्यतु नय: शास्त्राद् वहिर्वर्त्ततां,
ये शास्त्रं रचयन्ति तेऽपि मनुजा नैतेऽपि किं तादृशा: ?
यस्मै यद्धि विरोचते जनिमते तेनैव तत् साध्यतां,
कालं कञ्चन देहसङ्गतिरियं काम्येन संयोज्यताम्॥

खञ्ज:—(स्वगतम्) हन्त विलीनो निषधाधिकार:।

पुष्कर:—किमिति जोषमास्यते ?

खञ्ज:—देव! खञ्जोऽस्मीति जानपदेषु देवादेशं विज्ञापयितुं गतिं चिन्तयामि।

पुष्कर:—धिङ्मूर्ख! राजपुराद् वहिर्गत्वा समुच्चैरिमम् आदेशं निवेदय, तेनैव वक्त्रपरम्परया खल्वयमर्थ: प्रचरिष्यति। तद्गच्छ।

खञ्ज:—अहो विवेकवैचित्र्य देवस्य! कथमन्यथा कनीयानपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्यायांसमतिक्रम्य साम्राज्यं लभेत ? तदेष देवादेशपरिपालनाय गच्छामि। (निष्क्रान्तः)

पुष्करः—गतः खलु पक्षपादो जानपदेषु ममादेशं प्रचारयितुम्, तत् किंवा जानपदाः प्रतिपद्येरन् ? अपि ममाज्ञां निर्विचारमेव स्वीकुर्युः ? यदि ते वैमत्यमाश्रयेरन् तदा नूनमेषोऽहं—

क्रोधवाड़वहुताशतेजसा
सर्व्वतः क्षितिमिमां विदाहये।
पुष्करः कुपितभावमीयिवान्
केन वा सपदि नीयतां शमम् ?

(ततः प्रविशति गायन् विवेकः)

विवेकः— नवनिषधेश्वर सितकरकुलधर
खलतां परिहर वह बहुमानम्।
नलकृतिमनुसर पुण्यसमादर-
तत्परमन्तरमधिकुरु यानम्॥
मायाविलसितमिदमविलम्बित-
मपनय सञ्चितमविशदभानम्।
धनजनसदनं संसृतिगहनं
न खलु चिरं कुरु विमलविधानम्॥

पुष्करः—क एष भोः!

वस्ते गैरिकमेकमेव वसनं ग्रीवाग्रबन्धस्थिरं
शीर्षालम्बिसुदीर्घकेशविलसत्पृष्ठप्रभोद्भासिता।
मूर्त्तिः कामपि कान्तिमेति परमां पूतां विनीतामिव,
हंहो किन्नु ममापि चेतसि नवं भावं मुहुर्यच्छति॥

विवेकः— कलिरतिखलतां जनयति हृदि तव
कुरुते हतमिह सुकृतवितानम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतय हृदयं पालय विनयं
पुण्यसरणिमनु कुरु पददानम् ।
सितकरकुलधर खलतां परिहर
नलकृतिमनुसर वह बहुमानम् ।
धनजनसदनं संसृतिगहनं
न खलु चिरं कुरु चिरमवधानम् ॥

पुष्करः—अये सुधायते सङ्गीतकमिदं मे श्रवणयोः, अथ किमसारं सर्व्वमिवेदं संसारे ? तत् किं स्वार्थमभिसन्धाय परे प्रतार्य्यन्ते ? क्षणभङ्गुरस्य विग्रहस्यार्थे किमिति वा अन्ये विगृह्यन्ते ? तत् किं राज्यमधिकृत्य धर्म्मव्रतं पुण्यश्लोकं नलं पराभूय सुतरामन्याय्यं कृतम् ? हा धिक् कष्टं ! लोभपराधीनेन मया विस्मृता हन्त कृत्याकृत्यविचारणापि ! हा हतं ! मूषितोऽस्मि मन्दभाग्यः ! नितरां विमूढोऽस्मि ! अन्यथा को वा अहमिव ज्यायांसं राज्यादपवाह्य सिंहासनमभिलषेत् ? तदलं मे राज्येन, वनं गत्वा सम्प्रति देवं नलं प्रसाद्य निषधेषु प्रत्यावर्त्तयेयम् । (गन्तुमिच्छति)

(ततः प्रविश्य कलिः)

कलिः—वयस्य, पुष्कर, क्व गन्तासि ?

पुष्करः—(निरुद्धप्रयत्न इव) अये प्रियवयस्यो मे कलिः प्राप्तः ? वयस्य, स्वागतम् ? आस्यताम् ।

कलिः—अलमत्यर्थेनोपचारेण, कथय क्व गन्तासि ?

पुष्करः—यत्र आर्य्यो मे नलः प्रस्थितः ।

कलिः—कथमिव ?

पुष्करः—पुनस्तं निषधेषु प्रत्यानेतुम् ।

कलिः—धिङ्मूर्ख ! किमेवं प्रलपसि ?

पुष्करः—वयस्य, कथमिदं प्रलपितं नाम ? ज्यायांसमतिक्रम्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्राज्यसम्भोगं पापमेव शास्त्रकाराः समामनन्ति, तत् कथमिदं पुष्करेण समाश्रीयताम् ?

कलिः—धिङ्मूर्ख ! अद्यापि नापसृतस्ते भ्रमान्धकारः, श्रूयतामिदं तत्त्वम्—

धूर्त्तानां मतिदुर्विलासरचना पापञ्च पुण्यञ्च यत्,
किं साक्षादनयोरिहास्ति निपुणः कश्चित् परीक्षाकरः ।
यावद्देहमुपासते सुखचयं प्राणैः परैर्देहिनः
देहादुत्तरमस्ति नैव किमपि प्राप्तव्यमव्याजतः ॥

तदलं पापपुण्यवार्त्तापरिचिन्तया, यावद् यावदैहिकः सुखसम्भोगस्तावदेव प्रवर्त्त्यतामात्मा ।

पुष्करः—वयस्य, भीतोऽस्मि ।

कलिः—कस्मात् ?

पुष्करः—प्रतिकूलवर्त्तिनो दैवात् । पुष्करस्य प्रतिपदमेव प्रतिबध्नाति श्रेयः प्रतिकूलदैवपर्य्यायः, अन्यथा कथं प्राप्तेऽपि राज्ये परिजनशून्यतया श्मशानसाम्यं समुपनतं स्यात् ?

कलिः—हा धिक् ! दैवमिति वार्त्तामात्रविश्रान्तं गगनप्रसूनायितं ! पुरुषकार एव फलं प्रसूते सर्व्वत्र, तत्र तु भवानेव प्रमाणं, तथाहि—

मदर्पितां बुद्धिमुपेत्य शोभनां यदैव पाशैरुपदेवितं त्वया ।
तदैव राज्यं गतमात्मनः करे पुरा न दत्तं किमु दैवबन्धुना ?

भवतु साम्प्रतमिहि, शुद्धान्तं प्रविश्य सदुपदेशपर्य्यायान्तरेण सन्देहं ते लघूकरिष्यामि । (आकाशे लक्ष्यं बद्ध्वा) धर्म्म, विवेकेन मां पराभवितुमीहसे ? धिङ्मूर्ख ! अपध्वस्तोऽसि, पश्य कियतीमिव ते दुर्गतिं सन्धारयामि ! (प्रकाशं) वयस्य, एहि किंवा विलम्बेन ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्करः—यथा रोचते वयस्याय।

कलिः—(स्वगतम्) संशयव्याकुलहृदयं पुष्करं बहुधा क्षिप्रमेव समुपदिश्य यावच्छीघ्रं नलमनुसरेयम्। मूढ़वुद्धे नल, गर्वित-हृदये दमयन्ति, दुर्ज्ञात धर्म्म, न जानन्ति भवन्तः सर्व्वविप-र्य्यासिनं कलिमेनम्, तदचिरादेव ज्ञास्यन्ति प्रचण्डप्रभावस्य कलेर्विलसितम्। कियानयमारम्भः? परिणतिरस्याः सुदुः-सहा एव स्यात्। (निष्क्रान्तौ)

—०ο—

विष्कम्भकः

(ततः प्रविशतो गृहीतवनवासिवेशौ नलो दमयन्ती च)

नलः—प्रिये दमयन्ति, सुदूरमतिक्रम्य गभीरां वनलेखां परिप्राप्तौ स्वः। तथाहि पश्य—

दूराद्दूरतरं पलाशरचना लुप्तावकाशान्तरा,
स्तूपीभूतमिवान्धकारगहनं रम्यं तथा भीषणम्।
अस्मिन्नेव वनान्तरे कति कति प्राणैः पर्णैर्योगिनो,
ब्रह्मध्यास्थितमानसा बहुविधं योगं समातन्वते॥

अपि च—शैलाग्रस्खलदम्बुशीकरचयाभ्यासेन शीतायिता,
शैलोपान्तमही निदाघविषमाप्यास्थानयोग्यायते।
दूरे वाशकपक्षिणां बहुविधो नादः परं श्रूयते,
सत्त्वानां विकटोपनम्रसितं कर्णज्वराय स्थितम्॥

दम—आर्य्यपुत्र सत्यमेव ब्रवीषि, वनभूमिरियं भीतिमेवोपदिशति मानसस्य, तथापि यदृच्छासुन्दरं गहनमवलोकयतः कस्य वा न सन्तुष्यति नूतनभावविमुग्धः अन्तरात्मा?

नलः—प्रिये, अत्रैव प्रवेष्टव्यम्। विस्मृत्य सुचिरन्तनं विलासराज्यं अत्रैव प्रतिभयाकरे जीवनं यापयितव्यमिति सुदुष्करमिदं भवत्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम—आर्य्यपुत्र, किमेवं कथयसि ? त्वया सह अनुभूयमानं दुःखमपि मे सुतरां सुखायते, त्वया विना त्रिदिववासोऽपि मे नरक-परिभोग इव प्रतिभाति। तदलमन्यथा सम्भाव्य।

नलः—प्रिये दमयन्ति, स्मरामि हन्त स्मरामि,—तदानीं मामधिकृत्य प्रजानामसाधारणीं प्रीतिं, तासु तस्मिन्नवसरे—

हित्वा पुत्रकलत्रबान्धवगणान् पित्रंय तथा मन्दिरं,
कान्तारं विगणय्य दुःखशरणं तुच्छं महाभीतिदम्।
हा हा देव किमिष नो न दयसे वाचं ब्रुवाणास्तथा,
दुःखार्त्ता बहुसान्त्ववाग्भिरनघा हंहो निषिद्धा मया॥

ततोऽपि दुःखतरं यत् मन्दारको मे जीवनसहचारी सुतरा-मनिच्छन्नपि तदीयपरिजनदुर्गतिमपनेतुं प्रतिबोध्य कथञ्चि-देव ममानुसरणात् प्रतिनिवर्त्तितः। अहो कष्टम्!

आशैशवं मदनुवृत्तिपरं वयस्यं
हित्वा प्रयामि बत दूरतरं प्रदेशम्।
हा कातरेण मनसा प्रियबान्धवस्य
मन्दारकस्य करुणं रुदितं स्मरामि॥

दम—आर्य्यपुत्र, किमेवं विषसेन भवता त्वदेकजीवितेयं क्लेशभागिनी क्रियते? भवानेव मां विकारकाले बहुशः समुपदिष्टवान् यथा "विपदि धैर्य्यं महापुरुषधर्म्म" इति।

नलः—प्रिये दमयन्ति, न जानासि मे हृदयावस्थां, येनैवं ब्रवीषि। देवि, पश्य—

साम्राज्यं निरुपद्रवं परिजना वश्या यशो निर्म्मलं
निर्व्याजोपनतं मनोरथफलं पूजा प्रजाभिश्चिरम्।
नैष्ठुर्य्येण विधेरिहाद्य सकलं सद्यो विपर्य्यासितम्
हा कष्टं निजदुर्विवेकलसितं किं दुःखमस्मात् परम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिलाषः

लेखकः—सन्निधानम् सूर्य्यनारायणशास्त्री

शृङ्गाग्रेषु महीभृतां विचरितुं कर्तुं निवासं स्थिरं
नानापर्वतमेखलास्वनुदिनं स्नातुं सरःश्रेणिषु।
सन्द्रष्टुञ्च समुत्सुकम् मम मनस्तांस्तान् विशेषान् मुहुः
भो धाराधर ! तत्र तत्र नय मामारोप्य शीर्षे तव॥

डोलायामधिरुह्य सागरचलद्वीच्यां विहर्त्तुं चिरं
श्रोतुं दिक्करुणीमणीगलरवं सङ्गीतसारस्वतम्।
शान्तं वाञ्छति पुष्पितासु शयितुं वल्लीषु चात्मा ततो
भो मन्दानिल ! तत्र तत्र नय मामारोप्य पृष्ठे तव॥

आकाशान्तरमेत्य रम्य-वलयाकारेण संक्रीड़ितुम्
मन्दं मन्दमितस्ततो विचलितुं सञ्चालयन् पत्त्रतौ।
आरूढ़स्तरुशाखिकासु मधुरं श्राव्यं समाकूजितुं
वाञ्छत्यस्मि शकुन्तका ! भ्रमत भो आरोप्य युष्मासु माम्॥

तारामण्डलपुष्पकाननतले साकन्त्वया क्रीड़ितुम्
भावत्केन मृगेण चाभिलषति स्वान्तं मदीयं मुहुः।
स्नातुं दिव्यसरित्तरङ्गनिचये कौतूहलं वर्तते
भो आयाहि मृगाङ्क ! मां गमय ते प्रान्तं समभ्यर्थये॥

आत्मानं चिन्तयन्त्या नवकुसुमलतामण्डपे स्वप्रियायाः
पश्चान्निःशब्दमेत्यादरमपि दधतं नेत्रकष्चे युवानम्।
पर्य्यङ्के पुष्पकीर्णे वत वत शयितस्वप्रियास्येन्दुबिम्बं
चुम्बन्तीं सन्दिदृक्षे युवतिमपि च भो मां नयाश्वङ्ग ! तत्र॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तभूषणजीवनचरितम्

(लेखः—श्रीगोपीचन्द्रकाव्यरत्नस्य)

अथैकदा निःसम्बलो जयचन्द्रः किमद्य पथ्यं भोक्तव्यमिति विभावयन् समर्प्य भगवति परमेश्वरे चात्मानमुपविश्यासने सन्ध्यापूजादिविधौ मनोऽभिनिवेशयामास। एतद्वंशीयः कोऽपि न कदापि कमपि किमपि प्रार्थितवान्। अपि च चिरं परकरपूरण एव कृतयत्नः—सुतरां लज्जाभीतो जयचन्द्रः 'क उपाय' इत्येव केवलं चिन्तयति, अस्मिन्नेवावसरे कुमारटुलीस्थवैद्यवंशावतंसः कविराजा निशिकान्तसेनमहाशयः अध्ययनाय स्वाभिप्रायं प्रकाश्य प्रणम्य च पञ्चमुद्राः श्रीपादसरसीरुहे समर्पयामास। सिद्धान्तभूषणस्तु भगवतो महापरीक्षामेव मन्यमानो विस्मितः स्तम्भितोऽभवत्। तदानीमपि निर्लोभोक्तिं भगवद्भक्तिं धैर्य्यादिकञ्च पर्य्यालोचयतामाधुनिकानां स्तब्धता तत्क्षणमेवातिमात्रं जायत एव। अस्मिन्नेव समये कविराजकुलभूषणं विजयरत्नसेनोऽपि साकं निशिकान्तसेनेन यथानियमं व्याकरणसाहित्यालङ्कारदर्शनम् आयुर्वेदशास्त्रञ्च प्रायः समग्रं सिद्धान्तभूषणमहाशयसकाशादेवाधीत्य लब्धप्रतिष्ठो यशस्वी च सर्व्वत्र अनन्यसाधारणायुर्व्वेदीयव्यवसाये नियुक्तो मेने कृतार्थमात्मानम्। अस्मिन्नेव काले स्वयमपि सिद्धान्तभूषणः—म॰ म॰—चन्द्रकान्ततर्कालङ्कारमहाशयसमीपे नानाशास्त्रमधीतवान्।

अथाध्ययनेष्वतृप्तो जयचन्द्रो वादार्थादिकं विशेषरूपेणाध्येतुं पुनरपि ढाकाविक्रमपुरान्तर्गत-'वासाइल'ग्रामनिवासिनां पण्डिताग्रगण्यानाम् अभयाचरणविद्यारत्नमहाशयानां तथा "जीवसारा" ग्रामवास्तव्यप्रधानशाब्दिकपण्डितकुलचूड़ामणिहरिश्चन्द्रतर्कवागीशमहाशयपादानाञ्च सकाशे एकदैव व्याकरणं, नव्यन्यायं वादार्थञ्च भ्रात्रा श्रीयुक्तभुवनचन्द्रसिद्धान्तचूड़ामणिमहाशयेन साकं पठितुमारभते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदानीमेव विक्रमपुरे कस्याञ्चित् नानादेशीयपण्डितमण्डली-परिमण्डितायां परिषदि सभ्रातृकस्य सिद्धान्तभूषणमहाशयस्य विचारचतुरतामनन्यसाधारणपाण्डित्यादिकञ्चानुभूय तत्रत्यः सर्व्व-जनसमादृतो विश्वविख्यातनैयायिककुलचूड़ामणिः प्रसन्नचन्द्रतर्करत्न-महाशयो नितान्तानन्दितो भ्रातरौ तत्सकाशेऽध्यापयितुं निरतिशय-माग्रहं ज्ञापयामास। तादृशविख्यातप्रधानविदुषो नितान्तानु-रोधेनात्मानं सगौरवं मन्यमानः सहसोदरो जयचन्द्रस्तत्सविधेऽपि कियद्दिवसमधीतवान्।

सारस्वतसमाजप्रतिष्ठानप्रथमवर्षे (१८०१ शके) तत्र वादार्थ-व्याकरणसाहित्यादिशास्त्राणामेकस्मिन्नेव दिवसे उपाधिपरीक्षां दत्त्वा विशेषयोग्यतया सर्व्वप्रथमस्थानमधिचक्रे जयचन्द्रः।

मिथिलान्तर्गत-'पिलकवाड़' नामक ग्रामे तदानीं वरेण्यो-पाध्यायबबुजनझामहोदयसकाशे वाचस्पतिमिश्रकृत-(प्राचीन) स्मृति-शास्त्राणि अन्यान्यदर्शनादिकमपि यथारीति कियदवसरमधीत्य काशीस्थशिवोपमपण्डितकुलतिलक—म०म०-कैलासचन्द्रशिरोमणि-महाशयसमीपेऽपि नानाशास्त्रं विशेषतो मीमांसादर्शनमध्यैष्ट। अस्मिन्नेव समये पितृश्राद्धे नानाप्रदेशसमागतविविधशास्त्रपारदर्शि-विबुधवृन्द-विभूषितायां परिषदि संस्कृतभाषया वक्तृतां प्रदाय समस्तानेव जनान् निरतिशयं व्यस्माययत्। प्रहरं यावदनर्गलां सरला-मभिनवां नानाभावविमिश्रितां रसबहुलामलङ्कारसमलङ्कृतां वक्तृतां संस्कृतभाषया वङ्गभाषया वा प्रदातुं सिद्धान्तभूषणपादानामसाधारण-क्षमता समासीत्।

सिद्धान्तभूषणपादानामपरामप्यलौकिकीं शक्तिमालोचयता-मस्माकं प्रतिपदं विस्मय एव समुत्पद्यते। अथैकस्मिन्नेव काले नानाकथां कथयति, गभीरसमस्यामपि पूरयति नानाविधं बन्धा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारेण श्लोकमपि रचयति मुष्टिप्रहारमपि पृष्ठे गणयति इत्यादि बहुविषयावधारणात् शतावधानीत्यभिधामावाल्यं लेभे ।

सारस्वतसमाजात् लब्धोपाधिको निजनिलय एव चतुष्पाठीं विधाय प्रायश्चत्वारिंच्छात्रेभ्यः प्रदायान्नं यथानियममध्यापनायां नियुक्तः। क्रमशो विद्यार्थिनामेतादृशः समागमोऽभूत् यत् शत-परिमितच्छात्रान् रात्रेर्द्विप्रहरपर्य्यन्तमप्यविराममध्यापयन्नपि न खलु सर्व्वान् समयविशेषे पाठयितुं लब्धावसरो जयचन्द्रः। तदा सहकारित्वेन भ्राता श्रीयुक्तभुवनचन्द्रसिद्धान्तचूड़ामणिमहाशयो-ऽप्यध्यापनायां नियुक्तः। एतादृशाधिकपरिमितविद्यार्थिनामेकत्रैकस्मिन्नेव काले समावेशोऽविलम्बितं न केनापि प्रत्यक्षीकृतः अनुमितो वा। एक एवाध्यापकः प्रतिदिवसं शतमितच्छात्रानध्यापयामास इति चिन्तयतामाधुनिकानां 'स्वप्न' इत्येव भवति धारणा।

अथ स्वदेशीय'दत्तपाड़ा'ग्रामवास्तव्यानां देशीयाज्ञीति नाम्ना विख्यातानां कुलीनवर्द्धमानप्रधानधनिनामानुकूल्यात् 'संस्कृत-चन्द्रिका'नामिकां सभां प्रतिष्ठाप्य तत्रार्थ्यशास्त्राणां परीक्षा, संस्कृतप्रबन्धपाठः वक्तृताप्रदानं शास्त्रीयविचारः इत्यादिकानां यथा-सम्भवव्यवस्थां विधाय "संस्कृतचन्द्रिके"त्यभिधां संस्कृतमासिक-पत्रिकां परिचालयन् कियद्वत्सरानन्तरमेव अर्थलोभेनासौ एवं करोतीति देशवासिनां कतिपयकुटिलानां परदोषाविष्कारकानां मृषा-भिप्रायप्रचारेण नितान्तदुःखितो जयचन्द्रो देशस्य तस्य नोन्नतिर्भवितेति भावयन् क्षुब्धोऽनिच्छन्नपि तां सभां तत्याज। सभापि परिचालकाभावात् क्रमशो विलुप्ता। तथापि न जहौ सिद्धान्त-भूषणस्तादृशं सङ्कल्पम्। पुनरप्यसौ हितैषिणां महतामानुकूल्येन कियद्दिनं चट्टग्रामनगरात् कियच्च दिनं कुमिल्लानगरतो यथारीति प्रकाश्यातीव नैपुण्येनातुलनीयां संस्कृतचन्द्रिकानामकमासिकपत्रिकां नानादेशेषु प्रचारयामास।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्त वर्षान् निजनिलये पाठयित्वागणितविद्यार्थिनः कनिष्ठस्य श्रीयुक्तभुवनचन्द्रसिद्धान्तचूड़ामणिमहाशयस्योपरि संस्थाध्यापनाभारं 'कलिकाता' महानगरे समागतस्तत्रापि संस्थाप्य चतुष्पाठीं प्रायश्चत्वारिंशच्छात्रेभ्यः प्रदायान्नं नानाशास्त्रीयाध्यापनायां नियुक्तः। तदापि सर्व्वतः सप्ततिमितान् छात्रान् प्रतिदिवसमध्यापयामास।

अथाध्यापनापरायणो जयचन्द्रः किल व्याकरण-साहित्यालङ्कार-वादार्थ-दर्शनादि विविधविषयकविचारनिरतो नानादेशीयविद्वद्वरेण्य-परिभूषितपरिषदि सर्व्वतो विजयी, यशस्वी च तात्कालिकानां विदुषामग्रगण्योऽनन्यसाधारणं प्रतिष्ठानमगात्।

क्रमशस्तु सुयशोविस्तारात् नानादेशीयवदान्यमान्यधनि-निर्धना-दिभिः सुपरिचितो निरभिमानः सिद्धान्तभूषणो निजधर्म्मपरायणः सुप्रतिष्ठां लभमानो विपथगामिनो स्वेच्छाचाररुचिकान् विकृत-मस्तिष्कान् कालस्रोतसि मग्नमनसश्च मानवान् सदुपदेशप्रदानैः स्वधर्म्मवर्त्मनि संस्थापयन् रचयामास। पूर्वप्रतिष्ठितमासिकसंस्कृत-पत्रिकां "संस्कृतचन्द्रिकां" कलिकातास्थप्रधानविचारालय-प्रधान-(हाइकोर्ट चिफ्‌जष्टिस्) विचारपतिरमेशचन्द्रमित्र-गुरुदासवन्द्यो-पाध्याय-चन्द्रमाधवघोषप्रमुखाणां स्वधर्म्मपरायणानां विद्योत्-साहिनां विद्वन्मर्म्मपरिग्राहिणां पण्डितप्रियाणां विशेषाग्रहेण साहाय्येन च परिचालयन् भारतवर्षे प्रायः सर्वत्रैव तां समधिकं प्रचारयन् सर्वैः सुपरिचितो मानवमात्राणामेव भक्तिश्रद्धादिभाजनं देवभाषाया उन्नत्यर्थमहोरात्रं परिश्रममगणयन् नितरां यतते स्म सफलमनोरथश्च सञ्जातः।

तेन च न्यायशास्त्राध्येतॄणामुपकाराय स्वकीयाभिनवटीका-सहिता "शब्दशक्तिप्रकाशिका," कायस्थानां चत्रियत्वभ्रमनिरासाय 'व्रात्यकायस्थचन्द्रिका', भक्तानां विनोदनाय 'स्तुतिगीतिमाला', 'स्तुतिमाला' चात्मविनोदनाय, रसभावबहुलं बहुश्लोकात्मकं 'ताम्बूलं'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवीनामानन्दानुभवाय तथैव 'काव्यकण्ठाभरणं' 'उद्भटश्लोकाः' "लक्ष्मीस्वयम्बरं" महाकाव्यञ्च संस्कृतभाषया, एवं नीरोगशरीरेण दीर्घजीवनलाभोपायीभूता "जीवनशिक्षा", शय्योत्थानात् पुनः शय्यारोहणपर्य्यन्तं शास्त्रीयप्रमाणसहिता निखिल-नित्यकर्म्मानुष्ठान विज्ञापिका "नित्यकृत्यशिक्षा", अभूतपूर्व्वा "बृहन्महाभारतसूची" (अकारादिक्रमेण)। अस्याश्च साहाय्येन क्षणादेवाभीष्टविषयो महाभारतग्रन्थात् द्रष्टुं जनैः शक्यते। एवं "आर्य्यस्त्रीशिक्षा" "कुलबालिका" "विज्ञानकुसुमं" 'लक्ष्मणाहरणं' नाटकं, 'लुप्तरत्नोद्धारः,' वङ्गभाषया एवं महाभारतसूचीवत् हरिवंशवाल्मीकिरामायणतन्त्रसूची,—एतानि पुस्तकानि प्रणीतानि।

मिथिलायां पाठसमये शतश्लोकात्मकमभिनवं विविधरसालङ्कारगुणादिविमिश्रितं "मिथिलामङ्गलं" विरचय्य द्वारवङ्गाधिपतेः समर्प्य च श्रीकरारविन्दे, तदासाद्य सद्य एवात्यन्तहर्षमुपागतेन मिथिलाधिपवर्य्येण पुरस्कृतः शतमुद्रां नवकवित्वादरादतिशयं प्रशंसितो वितनुते स्म वङ्गभूमेर्महागौरवम्।

✓सिद्धान्तभूषणमहाशयस्तु विहाय कलिकातानगरं निर्व्विघ्नं तपस्तप्तुं चिरादभीष्टं त्रिपुरहरपुरं १८१६ शके समाश्रितवान् सन्त्यज्य सर्व्वं सांसारिकं कर्म्म।

समर्प्य चातःपरं भारं "संस्कृतचन्द्रिकायाः" बन्धुप्रवराणां कोल्हापुरनगरसंस्थितानां महात्मनाम् ✓अप्पाशास्त्रिविद्यावाचस्पतिमहोदयानां श्रीकरसरसीरुहे विषयभावनाविरहितो नियतं जपादिनिरतो विद्यार्थिभ्यो-विद्यादानरतो लोभमोहादिविरतो रिक्तहस्तोऽपि चिरमेव प्रतिग्रहादिभ्यो विनिवृत्तः शकनरपतेः शरवेदवसुचन्द्रमिते (१८४५) अब्दे अग्रहायणशेषदिवसे संक्रान्तिपुण्यक्षणे निःक्षिप्य जगदिदं गाढ़तमिस्रे चिरायास्तमितो वाराणसीपुरपतेः प्रसादात्तत्र संलीनो निजाभीष्टमतिशयमासादितवान् जयचन्द्रः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकविजल्पितम्

लेखक:—श्रीगिरिजाप्रसन्नलाहिड़ी वि, ए:

किमिदं परिदृश्यतेऽभित: कृपणा चाममुखी वसुन्धरा ।
गतसर्व्वविलोलचेष्टिता जड़भावादिव मौननिश्चला ॥ १
मधुमञ्जुलकुञ्जकाननं कलकेकारवभङ्गितैर्मुहु: ।
कथमद्य हठात् नु शोकदं करुणं रोदिति नापि गायति ॥ २
शिवपूजन-चम्पकावली सुलसत्कोमलकाञ्चनच्छवि: ।
नवकोरकनीपमालिका किमु विच्छिन्नतया विलुण्ठिता ॥ ३
किमकारणमेति भारते शतदु:खेन निपीड़िताववनौ ।
इदमीदृगमङ्गलं बहु न ह्यथेयं प्रकृतिर्मलीमसा ॥ ४
यादवेश्वर इत्यार्थगौरवं नास्ति हन्त ! मरभूमिमण्डले ।
घोषितं सपदि तादृशं पदं सत्यमेव तदिदं मृषा नु किम् ॥ ५
भारतावनिललाटपट्टकं दग्धदग्धमिति नित्यश: स्फुटम् ।
अन्यथा कथमिवाशुतोषकं यादवेश्वर वुधोऽयमन्वगात् ॥ ६
हन्त ! हन्त !! खलु रङ्गपूरभूरेकमात्रमणिरत्नसम्बला ।
उच्छलद्विमलभावगर्व्विता म्लानकान्तिरिहसम्पदाच्युता ॥ ७
शास्त्रसाररससागरं गतो ज्ञानकौस्तुभललामलालस: ।
स्नातनिर्म्मलतमो वभूव स देवदेवसितशुभ्रहासवत् ॥ ८
न्यायदर्शनमणिस्रजां खनिर्दुर्गमेति बहुशो मतं सताम् ।
रत्नदोलपरिकर्षणैस्तत "स्तर्करत्न"मणिहारमाप स: ॥ ९
कालिदास-भवभूति-भारविमाघ-हर्ष-जयदेवसम्पदम् ।
लुम्पति स्वकविभाव इत्यहो ! "अश्रुबिन्दु"मकरोद् भयादिव ॥ १०
मानसोद्भवलतान्तपल्लवैर्भक्तिचन्दनविचर्च्चितैर्मुहु: ।
प्रत्यहं नु खलु वङ्गभारती वन्दिताभवदथो क्व पूजक: ॥ ११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य गौरवमहामहोज्ज्वलं कीर्त्तिजातमखिलं विजल्पितुम् ।
नास्ति नास्ति लवमात्रयोग्यता शोकराशिपरिविह्वलस्य मे ॥ १२
हे आचार्य्य ! त्वं क्व वा प्रस्थितोऽसि काशीनाथे नाथते ते मनो वा ।
किं वास्माभिर्दुष्कृतं ते कृतं नु नित्यस्नेह ! ज्ञापय ज्ञापयेमान् ॥१३
वृन्दावनप्रेमकरोऽपि गीतामृतात्मयोगी नृपनीतिविज्ञः ।
अन्वर्थनामा स हि यादवेश्वरः कथं गतः स्यादिव पाण्डवेश्वरः ॥ १४
हे धीर ! हे विबुधमानसपद्मसूर्य्य ! विद्याविनोदरसिक ! प्रियतर्कवीर
हे यादवेश्वर ! गुरोऽसि महेश्वरस्त्वं भद्राशिषं विकिर येह चिरं
शुभाय ॥ १५

परिषत्सन्देशः

मासिकाधिवेशनम्—विगतसौरमार्गशीर्षस्योनत्रिंश-दिवसे रविवासरे सायं प्रावर्त्तत परिषदो मार्गशीर्षीयमधिवेशनम् । तत्र कलिकातामहानगर्य्या उत्तमन्यायालयस्याधिकरणिकवराः 'सार्'-श्रीमन्तो नलिनीरञ्जनचट्टोपाध्याय एम, ए-बि-एल्-महोदयाः स्वोपस्थित्या सभागौरवं समजनयन्नतिरेकेण। आदौ श्रीमतां भागवतकुमारशास्त्रि-(एम-ए-पि-एइच,डि) महोदयानां प्रस्तावेन श्रीमद्भिरनन्तकृष्णशास्त्रिवेदान्तविशारदमहाभागैः समलङ्कृतं सभापतेरासनम् । ततः पूर्वसभाविवरणप्रकाशनाद्यनन्तरं श्रीमता दीनबन्धुसाहित्यशास्त्रिमहोदयेन वाचिताः केचन मनोहराः श्लोका अभिनन्दयितुमाधिकरणिकवरम् । अथ श्रीमता जानकीनाथ-साहित्यशास्त्रिमहाशयेन वाचितो भरतमल्लिकविषयकः कश्चि-न्निबन्धः । निबन्धकृताऽत्र भरतमल्लिकस्याविर्भावकालं तत्कृतान् ग्रन्थांश्चाधिकृत्य बहवो नामालोचिता विषयाः । सभान्ते च परिषत्-सदस्यै रङ्गे प्रयुक्तमासीद् भासकृतं किञ्चिदतिरुचिरं रूपकमिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

স্থাপিত ১৩০৮ ঢাকা

শক্তি ঔষধালয়

মহাভৃঙ্গরাজ তৈল ৬৲ সের

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রঙ্গপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ নর্থ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সের

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, [illegible] বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৸০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৸০ টাকা, এক গ্রোস্ ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লীকষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৸০ দেড় টাকা, ৩ শিশি ৩৷৴০ আনা। ৬ শিশি ৭৸০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थान—सिद्धेश्वरप्रेस, २८ नन्दकुमारचौधुरी सेकेण्डलेन, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये माघे
February, 1925.

Reg. No. C 1073.

७म वर्षस्य
१०म संख्या
Vol. VII. No. 10

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम्।

सम्पादकौ—
महामहोपाध्याय—श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च
सहकारिसम्पादकः—
काव्य-सांख्य-पुराणतीर्थ—श्रीदुर्गामोहनभट्टाचार्य्य एम, ए।

मतिमञ्जरी	३६१	भारतीयसभ्यताप्राचीनत्वम्	३८२
गुरुदक्षिणा (कविता)	३६५	नलदमयन्तीयम् (नाटकम्)	३८५
आस्तिकनास्तिकदर्शनविवेकः	३७८	जीवनालेख्यकम्	३९३
गुरुशिष्यसंवादः	३७३	परिषत्सन्देशाः	३९८
नयनानुनयः (कविता)	३८०		

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम्।
Foreign price 7s yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च।
लभ्यन्ते न्याय्यमूलेन परीक्षा प्रार्थ्यते सताम्॥
छात्र पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता
अध्यक्ष—श्रीजानकीनाथकाव्यतीर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে সুবিন্যস্ত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে ; কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুট ভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এককথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৴০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্র নাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদেব গৌরবস্বরূপ—সুশ্রুত সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

২৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये माघे, ७म-वर्षस्य १०म-संख्या

मतिमञ्जरी

सारस्वतपरीक्षा—बहोः कालात् प्रभृति वङ्गेषु सारस्वत-परीक्षा नाम काचित् संस्कृतशास्त्रपरीक्षा प्रचलति, या किल पूर्व्व-वङ्ग-सारस्वतसमाजाख्यविद्वत्परिषदा सुनियन्त्रिताऽस्ति। कलिकाताम्हानगर्य्याञ्च तस्याः परीक्षायाः परिचालकपदे व्यवस्थिता संस्कृतसाहित्यपरिषत् सम्पादयति संस्कृतशास्त्रमहोन्नतेः परमानुकूल्यम्। अद्य खलु तामेव परीक्षामधिकृत्य किञ्चिदस्माभिः प्रतिपिपादयिषितमास्ते, यदि श्रीमन्तः पाठकमहाभागास्तत्र लवमात्रमप्यवधानपरिश्रममङ्गीकुर्वन्ति। अत्र केचन प्रत्यवतिष्ठन्ते यथा—ननु बहुतिथः कालः किल राजकीयसंस्कृतशास्त्रपरीक्षायाः सुनियमेन परिचालितायाः; यदि तयैव पर्य्याप्ता विद्यार्थिनां विद्यापरीक्षा, तदा किमिति सप्रयोजनोऽयं समाजपरीक्षाप्रारम्भः? सम्भवत्येकेनैवोपायेन कृत्यनिष्पादने किमिति बहुकोपायसमाश्रयणायासेन? नह्यधिकारिभेदादुपायभेदः शक्यः समुपपादयितुं राजकीयपरीक्षार्थिनामिव प्रायेण समाजपरीक्षास्ववतीर्णत्वात्; नापि परीक्षा-

सारस्वतपरीक्षाया निष्प्रयोजनत्वम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकारभेदात् महदन्तरं शक्योपपादनं, तत्र तत्र राजकीयपरीक्षा-प्रश्ननिर्म्मातॄणामनन्यथैव प्रश्नसम्पादनसमवलोकनात्। अत एव कथमित्थमपृथक्तया सम्पादितः समाजपरीक्षाव्यापारो व्यापाराधिकृतानामानर्थक्यं परिश्रमस्य नोद्भावयेदिति। तदिदं नातिसमीचीनं वक्ष्यमाणहेतूपन्यासेन तेषां तेषां प्रतिप्रतिपक्षपक्षाणां शक्यनिरासत्वात्। तथाहि यदि प्रथमत एव सारस्वतपरीक्षाप्रश्ननिर्म्माणनियमावली पर्य्यालोच्यते, यत्र नियमेन मौलिकप्रश्नानामेव आधिक्यमपेक्षितं नत्ववान्तरप्रश्नानां, तदेव तस्याः परीक्षायाः राजकीयपरीक्षाव्यापाराद् भेदः शक्यः समुपपादयितुम् यद्यपि राजकीयपरीक्षाप्रश्नप्रतिपादका एव तत्रापि परीक्षाव्यापारे प्रश्ननिर्म्मातारः समधिक्रियन्ते, तथापि तथाभूतनियमावलीमनुसृत्यैव तेषां प्रश्ननिर्म्माणप्रवृत्तेरवश्यम्भावात् प्रकारभेदः कथं वा नोपपद्यताम्। परन्तु यादृशी खलु प्रश्नप्रवृत्तिरद्यत्वे समुपलभ्यते तत्र प्रश्नकर्त्तॄणां नियमावलीनिबद्धविषयेषु दृढ़ावधानशून्यतेव प्रतीयते, तत एव प्रायेण राजकीयसंस्कृतपरीक्षापेक्षया न तादृशो विशेषः शक्यः समुपलब्धुम्। अपि च तथाविधव्युत्पत्तिसूचकप्रश्ननिर्म्माणे सुयोग्यानामेव विद्यार्थिनां तत्र सुफललाभसम्भवादतादृशानाञ्च सुफलसम्भावनायाः स्वप्नायितत्वेन कृत्यसाध्यताज्ञानस्यैव तत्र प्रवृत्तिप्रतिरोधकतया सुयोग्यानामेव तत्र प्रवृत्तेः शक्यः सर्व्वथा अधिकारिभेदोऽपि सम्भावयितुम्। माऽस्तु परीक्षाप्रवृत्तौ कोऽपि नियमतः प्रतिबन्धः, परं फललाभो यदि नायोग्यानां भोग्यः स्यात्, तदा कियतो वारान् निष्फलैषां प्रवृत्तिर्भवेत्। स्वसदृशानामपरेषां फलाभावदर्शनेन केषाञ्चन प्रवृत्तिप्रतिबन्धः स्वत एव जायेत। एवं कर्त्तव्ये यथैव सारस्वतसमाजाधीनपरीक्षाप्रवर्त्तनसमये ततः कियद्दूरञ्च वस्तुतो गभीरविद्यापरीक्षणाय प्रश्नादयः समभूवन्, यथा च यथार्थोत्कर्षापकर्षविचारेण प्रश्नोत्तरसङ्गति-

सारस्वतपरीक्षा-प्रयोजनोपन्यासः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्य्यालोचनादयः समासन्, तथा तथा कृत्यसम्पत्तौ परिचालकाना-मवधानमपेक्षितमास्ते। किञ्च अस्ति सारस्वतपरीक्षायां पाठ्यग्रन्थ-निरुक्तिरपि विवेकपूर्व्विकेव, यथा नास्ति राजकीयसंस्कृतपरीक्षायाम्। तथाहि कलापव्याकरणादिपरीक्षासु शब्दविज्ञानाद्यनुकूलकोषादि-ग्रन्थानां तथा स्त्रीत्व-षत्व-णत्वादिविचारग्रन्थानां न्यायादिपरीक्षासु विशेषज्ञानजनक 'सामान्यलक्षणादि'-ग्रन्थानां विषयान्तरेषु च विशेष-व्युत्पत्त्याधायकानामपरेषां सन्निवेशनेन निराकाङ्क्षैरपि तत्तद्विद्या-र्थिभिस्तदध्ययनस्य अपेक्षणीयतया दत्तहस्तः किल शास्त्रार्थविचार-काणां तेषामुत्कर्षवान् बोधपर्य्यायः। तदिदानीं यथा यथा पाठ्य-ग्रन्थादिसमन्वयेन परीक्षाविधिरयं प्रवर्त्तितो वर्त्तते, तत्र परिचालका दत्तावधानाश्चेत् सुतरां वैलक्षण्यमस्याः परीक्षायाः सुसम्पादयितु-मर्हं स्यात्; परं संस्कृतशास्त्रशिक्षापरिषदा संस्कृतशास्त्रशिक्षा-संस्कारमधिकृत्य यदि वर्त्तमानदोषापसारणेन सम्यक्तया राजकीय-परीक्षायाः प्रबन्धः क्रियेत, यदि तत्रैव सविशेषमालोच्य आलोच्य पाठ्यवस्तूनां विनिवेशः सम्पाद्येत, यदि च इतःपूर्वमस्माभिः सूचितेन प्रकारेण वस्तुतो विद्यार्थिनां विद्यासंस्कारानुगुणवस्तुविचारेण परीक्षाविधिः प्रवर्त्त्येत, तदैव पदं लप्स्यते तथा पर्य्यालोचनं यत् कथमयमपरः प्रकारान्तराविलक्षणः प्रारम्भः सप्रयोजनः परीक्षाया इति। भवतु यथा तथा वा, यद्येवमेव समयः समायाति, तदा अस्माभि-रपि तत्समाधानाय यतिष्यते, परं तत्परीक्षामुख्यपरिचालकानामत्र कीदृशं समाधानमिति वयं पृच्छामः। नूनमेते तत्र कथञ्चनोत्कर्ष-मन्यादृशं जानन्त्येव, कथमन्यथा राजकीयपरीक्षापरिचालनसमितौ तदानीमवस्थितानामपि सारस्वतपरीक्षाप्रवर्त्तकानां महामहोपाध्याय-प्रसन्नचन्द्रविद्यारत्नानां सत्यपि राजकीयपरीक्षासंस्कारसामर्थ्ये सारस्वतपरीक्षायामेव महान् प्रयत्नः समुपालभ्यतेति।

भवतु 'तदानीं तच्चिन्त्य'मिति न्यायेन तत्कालप्राप्तावेव तत्समा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धानमन्वेषणीयमस्माभिः, नाद्य, अपकृष्यते हि पादपस्थं पनसफलं पश्यतो निजाधरे स्नेहप्रलेपप्रयत्नः। परमद्य तत्रैव परीक्षायां प्रचलितं परीक्षामुत्तीर्णानां पुरस्कारव्यवस्थामधिकृत्य किञ्चिद् विवक्षितमस्ति तद्यथा—ये खलु विद्यार्थिनः सारस्वतपरीक्षां सोत्कर्षमुत्तरन्ति, तेभ्यः सारस्वतसमाजाधिकृतैः किञ्चित् किञ्चित् सम्मानपदं पदकादिकं दीयते, येन लुब्धा विद्यार्थिनः तथाविधविद्याभ्यासे समुन्मुखीक्रियन्ते। तत्र च न्यायस्मृतिशास्त्रपरिहारेण दृष्टः शास्त्रान्तरेषु सुतरामविशेषः,—ये नाम वैयाकरणास्तेषामिव वैदान्तिकानामपरेषाञ्च दार्शनिकादिविद्यार्थिनां यदि कश्चिद् विशेषो न स्यात्, तदा कथं गुरुपरिश्रमानुरूपं गौरवं तेषां कृतं भवेत्। यद्यपि अस्मद्देशेषु पुरा प्रभृत्येव वर्त्तते नैयायिकानां स्मार्त्तानाञ्च सम्मानः समधिकः, तथापि शास्त्रान्तरप्रकर्षभेदविचारे वेदान्तादीनामेव विशेषतः समुत्कर्ष इति को वा कृतधीः सन्दिग्धे। तदिदं वयं प्रस्तुमः यत् यथा शास्त्रान्तरापेक्षया न्यायस्य स्मृतेश्च वैलक्षण्यरक्षणाय नियन्त्रिता विशेषवृत्तिः समाजेन, तथैव वेदान्तादिशास्त्रेष्वपि समुपयुज्यते विशेषवृत्तिव्यवस्था यथा शास्त्रान्तराण्यपेक्ष्य तदीयं वैशिष्ट्यं सुरक्षितं स्यात्। अस्ति हि यद्यपि पूर्व्वकाले वङ्गेषु न्यायस्मृतिशास्त्रादेरिव न प्रचुरालोचनं सांख्यवेदान्तादिदर्शनानां, तथापि साम्प्रतमेतत् नोपयुक्तं वक्तुम्। अद्यत्वे न्यायादिदर्शनेष्विव विशेषतो विज्ञाः समुपलभ्यन्ते वेदान्तादिदर्शनेष्वपि, तत् शास्त्रान्तरवैलक्षण्यविशेषसूचनाय तेषां तेषां विषयाणां साहित्याद्यपेक्षया गभीरतरवस्तूनां समुन्नतिसम्पादनाय सम्यक्तया विशेषवृत्तिव्यवस्था कर्त्तव्या ; परं वङ्गेषु चिरात् प्रभृति समुत्कर्षमादधतः सुदुर्गमवस्तुप्रधानस्य न्यायशास्त्रस्य सर्व्वापेक्षया वैशिष्ट्यं सम्पादयिष्यमाणं न केनापि प्रतिरोद्धव्यम् ; तथात्वे वङ्गानां देशान्तरविलक्षणतैव दूरमुपेयात्।

सारस्वतपरीक्षा-पुरस्कारविचारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च समाजपरीक्षामुत्तीर्णानां विद्यार्थिनां सम्मानाय कश्चित् परिच्छदः प्रदीयते तेभ्यः समाजाधिकृतैः. स हि परिच्छदः कौशेयमुत्तरीयवस्त्रं तच्च सुतरां दृष्टिशोभनमिव दृष्टमस्माभिः । यदि तत्स्थाने किञ्चित् सूत्रजमपि वस्त्रं वस्त्वन्तरं प्रकारान्तरं वा पट्टवस्त्रस्य प्रतिपाद्येत, तदेव समीचीनं भवेत् । यदि सम्माननान्नैव पर्य्याप्तं तदा किमेतेन परिच्छदेन, केवलं सभायां प्रकर्षघोषणमेव समर्थमस्य तथाभूतं प्रकर्षमनुभावयितुम् । तदत्र परिचालकमुख्यानां दृष्टिमाकृष्टुमिच्छामः ।

गुरुदक्षिणा

लेखकः—श्रीयामिनीकान्तसाहित्याचार्य्यः

हैमासने स भगवान् भुवनैकधन्वी
यावद्गुरुः समरभेद-शरप्रयोगान् ।
शिष्यानशिक्षयत तावदपूर्व्वरूपो
बालो विवेश शरणं चरणं तदीयम् ॥ १

श्याकुन्तकुन्तलदलेन विचित्रवेशो
गुञ्जाप्रपञ्च-गुण-गुम्फित-केशपाशः ।
द्रोणस्य विस्मय-विकस्वर-लोचनस्य
पार्श्वं विवेश मनसा सममेव बालः ॥ २

अन्तेसदां भरतवंश विभूषणानां
नेत्राणि नील-नलिनी-दल-सोदराणि ।
बालस्य वक्षसि समापतितानि तूर्णं
नीलाश्म-हार-सुषमां सुषुवुस्तदीयाम् ॥ ३

बालः प्रवालकुलकुण्डल-शोणभासा
बालारुणं विरचयन् मलिनं मुखेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साष्टाङ्गपातमभिवन्द्य पदारविन्दं
बद्धाञ्जली रणगुरोः पुरतो वतस्थे ॥ ४
रूपेण भूपति-सुतानतिवर्त्तमानं
वेशेन विस्मयरसं विदधानमेनम् ।
नाम्ना पितुः सह गुरुर्गुरुकौतुकेन
नामाक्षरं मधुरहासमसावपृच्छत् ॥ ५
कार्य्यं किमार्य्यवपुषस्तव मत्समीपे
शुश्रूषया सपदि वत्स ! समुत्सुकोऽस्मि ।
आचार्य्य इत्यभिदधत्यतिनम्रमूर्त्तिः
पूर्त्तिं निनाय गुरुकर्णमसौ स्वरेण ॥ ६
शक्त्या समाहृत-पुलिन्दपुरन्दरत्वं
नाम्ना हिरण्यधनुषं मम विद्धि तातम् ।
जीवच्छिदां मृगकुलस्य कुलप्रसूतं
मामेकलव्यमवधेहि धनुर्धरेश ! ॥ ७
आचार्य्य ! मानवगणो नहि गण्य एव
देवासुरेषु तव को नु समानधन्वो ।
तेनार्थये तव पदं परिचर्य्य लब्धुं
लोकेषु दुर्लभतमामिह युद्धविद्याम् ॥ ८
बालस्य वाचिकमधु प्रचुरं निपीय-
माद्यन् गुरुः किमिति वाचमुवाच तीव्राम् ?
'नो शिक्षयेय कुलहीनमहं कुलीनो
व्याधात्मजं विरम वत्स ! विरुद्धलोभात्' ॥ ९
स्नेह-स्वधर्म्मनिरति-प्रबल-प्रहारैः
प्रायेण मूढमतिना गुरुणावगीर्णम् ।
यावद्वचः सरति खे मुखमस्य तावन्-
मेघावृतस्य शशिनः समतां ससाद ॥ १०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्युत्तरीकृतनतिं स्वमानमथ्य
दृष्ट्वा गुरोरनुसृतोऽपससार बालः ।
द्रोणः क्षणं कटुकथाकुलिशेन दीर्णं-
माश्वासयन्निव मुखं विरराम वादात् ॥ ११
काले गते कुरुसुताः सह सैन्यसङ्घै-
र्वन्यान् मृगान् मृगयितुं गहनं समीयुः ।
पार्थस्तु सत्त्वसरणीमधिगन्तुकामः
कान्तारमापदपरं गुरु भीमकान्तम् ॥ १२
किञ्चित् पुरः प्रसरतः सहसाऽर्जुनस्य
पादद्वयो गतिविधौ जड़तां जगाहे ।
नेत्रं निरीक्षण-चलं न-चलं विधाय
तर्कश्च कर्कशतमः क्रमशो बभूव ॥ १३
कोऽयं तपश्चरति चारुशरीरबन्धः
सन्धाय मृन्मयगुरौ चिरचिन्मयत्वम् ?
को वा नवीन-नियमो नवतापसस्य
स्कन्धे धनुर्धरति मूर्द्धनि जाटजूटम् ? ॥ १४
दृष्ट्वा मुखं मधुरमस्य तपोधनस्य
चेतो मम स्मरति तस्य पुलिन्दसूनोः ।
यस्मिन् गुरुर्वचनतः कुलिशायमानो
वाञ्छातरुं त्वरितमेव निनाय नाशम् ॥ १५
द्रोणस्य मूर्त्तिमभितो निरतः समाधौ
सोऽसाविति स्मरति तत्र तृतीयपार्थे ।
तस्मिन् मुनौ मृगधिया मृगराजरूपो
घोरं रराश मृगयासखसारमेयः ॥ १६
भीमेन शौवनरवेण विदीर्णकर्णः
सत्त्वं समीक्ष्य पुरतः स पुलिन्दसूनुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकेन मन्मथहृता कुसुमायकेन
जीवं विहाय रवमस्य मुमोष सद्यः ॥ १७

अत्यद्भुतं तदवलोक्य पृथातनूजो
निःसीमविस्मयरसे सुतरां ममज्ज ।
क्षीणं निजं समरसारमसौ समर्थ्य
द्रोणान्तिकं करुणकान्तिरुपाससाद ॥ १८

अश्रु स्रवन्निव विषण्णदृशा पृथाभूः ।
विघ्नं विभाव्य विषमं ननु भावि-भाग्ये
सम्पद्य सत्वरपदं गुरुपार्श्वदेशं
तस्मै समस्तमवदद् वनजातवृत्तम् ॥ १९

तात ! त्वया प्रियतया यदवादि वाक्यं
"वत्स ! त्वमेव भवितासि वरिष्ठवीरः" ।
सा ते कथा विफलतामुपयापिताद्य
तेनैव हीन-जनुषा शवरात्मजेन ॥ २०

कृत्वा महीमयतनुं भवतस्तपस्वी
मग्नः समाधिजलधौ यदवाप रत्नम् ।
का वा कथा मनुभुवां ननु वासवोऽपि
तेनावनीसुर ! कृतो विधुरो मतो मे ॥ २१

आलोक्य पार्थवदनं वचनं निशम्य
द्रोणो जगाद हृदयं दृषदं विधाय ।
"मा खिद्यतां दयित हे, यदवादि वाक्यं
नेष्यामि तत् सफलतां खलताश्रयोऽपि" ॥ २२

प्राणप्रिय ! व्रज वनं ननु दर्शयेमं
क्वासौ किराततनयो व्रतमभ्युपैति ।
निर्माय यः प्रतिकृतिं पृथिवीमयीं मे
पार्थश्रियं स्वमहसा मलिनीकरोति ॥ २३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्येण विश्वविजयी कुलवत्प्रवीणो
द्रोणः समेत्य सविधे ननु हीनजातेः ।
संवर्द्धितां गुरुरयं तव दक्षिणार्थी-
त्यम्भोधरस्तनघनं वचनं वितेने ॥ २४

साक्षात् समीक्ष्य शबरः स्वमभीष्टदेवं
हर्षप्रकर्षजनितं शिशिराश्रु वर्षन् ।
बद्धाञ्जलिः समवदद् वद तातपाद !
देयं किमस्ति मम ते नहि यत्त्वदीयम् ॥ २५

निर्घातनिःस्वनसखेन गुरुः स्वरेण
संमोहयन्निखिलवन्यपशूनवादीत् ।
"अङ्गुष्ठमिष्टफलभाक् ! तव दक्षिणस्य
बाहोः प्रयच्छ शबरात्मज ! दक्षिणां मे" ॥ २६

आलूय चम्पककलीमिव बालकोऽसौ
वृद्धाङ्गुलीं गुरुपदेऽञ्जलिमर्पयित्वा ।
मन्दस्मयं कृतनतिस्तमुवाच वाचं
धन्यस्त्वयाऽद्य कृत एष निकृष्टजन्मा ॥ २७

आस्तिकनास्तिकदर्शनविवेकः

लेखकः—श्रीहरिपदकाव्यमीमांसास्मृतितीर्थः

इह संसृतिरङ्गमञ्चे उच्चावचं सृष्टिप्रपञ्चमहर्निशमाकलय्य मनुजमनीषा निःशेषविश्वरूपमियत्तया नावधारयितुमलम्। अहरहरेव क्लेशकर्म्मविपाकाशयपरामृष्टः सृष्टोऽयं जीवो जीवातवे आकीटमाकीटभन्वितापज्वालाजालकरालितः परिभ्रमन् भूयो विपरिवर्त्तते। अनुदिनं नयनपथपथिकीभवन्तमपि नरं पापहीनम् अशेषक्लेश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्माषितं प्राक्तनकर्म्मनिदर्शनत्वेन नैव स्वीकुर्व्वन्ति केचित्। अथान्वहमेवाखिलखलविलासविभ्रमधरमपि नकुलद्वेषिणमिव पिशुनं न मन्यन्ते पूर्व्वजन्मनाम्। एते खलु "उद्योगिनः पुरुषशार्दूलाः ऐहिकशर्म्मोर्म्मिकिर्म्मीरितमानसाः मनसापि न कल्पयन्ति कमपि कर्त्तारम् अनन्तसुखदुःखदातारं परात्परम् अशरीरिणम्। नवाअप्रत्यक्षीभूतं परलोकम् स्वर्गनरकानुकूलप्रतिकूलवेदनीयगस्वरूपम्। एते हि चार्व्वाका 'लोकायतिका' इत्याख्यायन्ते। ते तु एवं सम्भावयन्ति—प्रायेण सर्वे संसारिणस्तावत्

"यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥"

इत्यादि लोकगाथामनुरुन्धाना नीतिकामशास्त्रानुसारेणार्थकामावेव परमपुरुषार्थौ मन्यमानाः, परलोकविषयीभूतमर्थजातमस्वीकुर्वन्तश्चार्व्वाकमतमनुवर्त्तमाना एवानुभूयन्ते। क्षितिसलिलपवनदहनेभ्य एव चतुर्भ्यो भूतेभ्यो देहाकारपरिणतेभ्यश्चैतन्यमुपजायते। ते तु इदमेव वदन्ति—

ईशे धर्म्मे च मानं यदि भवति तदा दर्शनीयन्तदेतत्,
प्रत्यक्षन्नैव तत्र प्रभवति न हि तावन्तरेणेष्टभङ्गः।
चैतन्यं देह एव प्रभवति मदवद्द्रव्यसंसर्गभेदात्,
उत्पत्तौ कारणं स्यादुपरितनपदे पूर्वपूर्वस्वभावः॥

परमेश्वरश्चेत् कश्चिदस्ति, धर्म्मश्च, तदा तौ तदस्तितावादिभिर्दर्शनीयौ, न च तौ दृश्येते। न वा ईश्वरधर्म्मव्यतिरेकेण कस्यापि किमपि हीयते। क्रमुकशकलपत्रचूर्णानां दशनरसनानिष्पेषितानां परस्परसंयोगात् द्रव्यान्तरेऽदृष्टोऽपि रागो यथोद्भवति, तथा शरीरे जीवदवस्थायां भूतभौतिकसंयोगाच्चैतन्यमुत्पद्यते, न द्रव्यान्तरे इत्यभ्युपगमस्तेषाम्। न वा तेषां मते, अदृष्टस्वीकारः। स्वभावादेव जगतो वैचित्र्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः ।
केनेदं चित्रितन्तस्मात् स्वभावात्तद्‌व्यवस्थितिः" ॥

वदन्ति च ते—

"न स्वर्गो नैव जन्मान्यदपि न नरको नाप्यधर्म्मो न धर्म्मः,
कर्त्ता नैवास्य कश्चित् प्रभवति जगतो नैव भर्त्ता न हर्त्ता ।
प्रत्यक्षान्यन्न मानं न सकलफलभुग् देहभिन्नोऽस्ति कश्चित्,
मिथ्याभूते समस्ते ऽप्यनुभवति जनः सर्व्वमेतद्धि मोहात्" ॥

किञ्च—

"अहिंसा परमो धर्म्मः पापमात्मप्रपीड़नम् ।
अपराधीनता मुक्तिः स्वर्गोऽभिलषिताशनम्" ॥

यद्यपि सुखास्पदमपि वस्तु सर्वथा दुःखसम्भिन्नं यथा कमलिनीनालमपि कण्टकाकीर्णं, सुशीतलसलिलमपि रुजाकरं, भ्रमरनिन्दिकेशकलापोऽपि पलितविरूपः, मत्स्योऽपि सशङ्ककण्टकस्तथापि, अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव सर्वथोपादेयत्वम् । "नहि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते । यः खलु दृष्टं सुखं भिया परित्यजेत्, स पशुवन्मूर्खो भवेत् । तदुक्तम्—

"त्याज्यं सुखं विषयसङ्गमजन्म पुंसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान् हितार्थी" ॥

अनृतव्याघातपुनरुक्तादिदोषैर्दूषितत्वात् वेदानामप्रामाण्यं ते प्रमाणयन्ति । तथा चोक्तम्—

"अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः" ॥

ते तु प्रत्यक्षमेव प्रमाणं गणयन्ति । अनुमानाद्यधीनोत्पत्तिकं तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानं पुनः पुनर्विभाव्यमानं प्रत्यक्षस्वरूपतां प्राप्नुवदेव प्रमाणकोटिमधिरोहति, न तु स्वातन्त्र्येण, न हि लोकान्तरं जीवातिरिक्तमीश्वरं वाङ्गीकुर्वन्ति ते, येनेश्वरप्रणीतत्वादिना वेदप्रामाण्यमाशङ्क्येत। इमे च चार्व्वाका वस्तुभूतमपि ईश्वरं परलोकं वा असद्भूतमेवापादयन्तो नास्तिकपदव्यपदेश्या इति निर्विवादमेव। न केवलं लोकायतिका एव नास्तिकाः, परन्तु आपाततः सात्त्विकभावपटप्रावृतकाया अपि केचन ईश्वरसत्तां नैवाङ्गीकुर्व्वते। तेषु महामुनेर्जैमिनेर्नाम ग्रहीतव्यमेव। स हि—"अथातो धर्म्मजिज्ञासे"त्यारभ्य 'अन्वारभ्ये च दर्शनात्' इत्यन्तं द्वादशाध्यायैर्धर्म्मशास्त्रं प्रणिनाय, तत्र च तेन प्रतिपादितं यत् कर्म्मणि कृतेऽवश्यमेव तदनुरूपफलं लभ्यते। तथाचोक्तं—"फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यात्" इति १।२।१७ सूत्रेण। न खलु कश्चित् अतिशयितसुरासुरप्रभावो भुवनसर्ज्जनपालननाशनव्यापारवान् देवः स्वीक्रियते। न कश्चित् कमपि बिभर्त्ति, न वा नाशयति, स्वकर्म्मानुरूपाणि फलान्याप्नुवन्ति शुभाशुभानि शरीरिणः। वेदवाक्यानि "स्वर्गकामोऽश्वमेधेन यजेत" "अग्निहोत्रं जुहुयात्" "चित्रया यजेत" "कारीर्य्या वृष्टिकामो यजेत" "राजा स्वाराज्यकामो राजसूयेन यजेत" इत्यादीनि विधिवाक्यानि नियोज्यं नियोजयन्ति, द्रव्यदेवताद्वारेण कलिकापूर्व्व-पूर्व्वक-परमापूर्व्वमुत्पाद्य स्वर्गादिफलविलासैरुल्लासयन्ति कर्म्मिणः। यतोऽनादिसिद्धेऽस्मिन् वेदेऽप्रामाण्यशङ्कापि दुराशङ्का। न खलु कश्चित् वेदं व्यरचयत्। यत—"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे, तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" इति सूत्रेण 'नित्यन्तु स्याद्दर्शनस्य परार्थत्वा'दित्यनेन च शब्दनित्यत्वादप्रतिष्ठानपूर्व्वकमेव वेदनित्यत्वापौरुषेयत्ववादं प्रत्यतिष्ठिपदाचार्य्यः। अतो नित्यसिद्धशब्देभ्यः स्वत एव वेदोऽनाद्यन्तरहिते जगत्प्रवाहे प्लवमानो नो कदापि निमज्जति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽस्य प्रामाण्यमवश्यमेवाभ्युपेयम्। कर्मत एव क्रियापि भवति, क्रियातोऽपि कर्म, इति बीजाङ्कुरन्यायवच्चक्रनेमिवङ्क्रमणक्रमेण परस्परकार्य्यकारणभावाङ्गीकारान्न कश्चित् विरोधः। देवाश्च ये केचन इन्द्रचन्द्रादयस्तेऽपि मन्त्रात्मकविग्रहवन्तो याज्ञिकोच्चारिता मन्त्रा एव इन्द्रादीनां प्रतिकृतय इव यागादिकार्य्याहुतिभागभाजो भवन्तीति। अन्यथा एकस्य इन्द्रस्य युगपदनेकत्रोपस्थितिर्न्याय-पथमतिक्रामन्ती, उन्मत्तजनकल्पिता स्यात्। अपरञ्च ऐरावत-निषण्णस्य देवदेवस्य सूक्ष्ममयमूर्त्त्यधिष्ठानेन घटकुड्यादिभङ्गप्रसङ्गश्च समीचीन एवाभातितराम्। "धर्म्मं जैमिनिरत एव" ३।२।१० इति ब्रह्मसूत्रेऽपि तन्मतपरिष्कारोऽस्ति। "स्वर्गकामो यजेत" इत्यादिषु वाक्येषु विधिश्रुतेर्विषयभावोपगमात् यागः स्वर्गस्य उत्पादक इति गम्यते। अन्यथा ह्यननुष्ठात्को याग आपद्येत, तत्रास्योपदेश वैयर्थ्यं भवेदेव। (सावशेषः)

गुरुशिष्यसंवादः

लेखक—श्रीशरत्कमलन्यायस्मृतितीर्थः।

(संस्काराणां संख्याविचारः)

गुरुः। संस्काराणामष्टचत्वारिंशत्त्वं मया गौतमवचनेन प्राक् प्रतिपादितम्। तद्वचनेन सह "संस्काराः षोड़श स्मृताः" इत्यन्त-व्यासवचनानि विरुद्धतामावहन्तीति श्रीमतां प्रथमः पूर्वपक्षः।

द्वितीयशिष्यः। वाढ़म्। प्रथमपूर्वपूर्वपक्षस्यैवोत्तरमादौ श्रोतव्य-मस्माभिः।

गुरुः। तदेवोच्यते श्रूयताम्। ब्राह्मदैवभेदेन संस्काराणां द्विविधत्वं व्युत्पादितं हारीतेन। तथाचात्र हारीतवचनम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(क) "द्विविधो हि संस्कारो भवति ब्राह्मो दैवश्च।

(ख) गर्भाधानादिः स्मार्त्तः (संस्कारः) ब्राह्मः। पाकयज्ञाः हविर्यज्ञाः सौम्याश्च दैव" इति।

"सौम्याः" सोमयागा अग्निष्टोमादयः पूर्वमेव गौतमवचनेन प्रतिपादिताः। ते च ब्राह्मराः षोड़श, तथाचात्र जातुकर्ण्यः—

"आधानपुंससीमन्तजातनामान्नचौलकाः।
मौञ्जीव्रतानि गोदानसमावर्त्तविवाहिकाः॥
अन्त्यश्चैतानि कर्म्माणि प्रोच्यन्ते षोड़शैव तु।
शूद्राणाञ्चैव भवति विवाहश्चान्त्यकर्म्म च॥"

ततश्च उद्धृतजातुकर्ण्यवचनद्वयेन ये संस्काराः कथिताः, त एव (संस्काराः) हारीतेन ब्राह्मत्वेन व्युत्पादिताः, एवञ्च जातुकर्ण्य-हारीतकथितकेवलब्राह्मसंस्कारा एव (न तु "पाकयज्ञाः, हवि-र्यज्ञाः, सौम्याश्च दैव"—इति हारीतकथितदैवसंस्काराः) पूर्व्वोक्त-व्यासवचनेन ("संस्काराः षोड़श"—इत्यनेन) प्रतिपादिताः।

गौतमवचनन्तु ("यस्यैतेऽष्टचत्वारिंशत् संस्काराः"—इति) ब्राह्म-दैवद्विविधसंस्कार प्रतिपादकमिति न भवद्भिरुपच्छिन्नैः षोड़शत्व-प्रतिपादकव्यासवचनैर्विरोधमावहतीति स्फुटम्।

प्रथमशिष्यः। न स्फुटमवगम्यते।

गुरुः। कथं नावगम्यते? व्यासवचनं केवलब्राह्मसंस्कारप्रति-पादकं, अतः "षोड़श स्मृता" इत्युक्तम् गौतमवचनन्तावत् ब्राह्म-संस्कारप्रतिपादकं दैवसंस्कारप्रतिपादकमपि, अतः षोड़शत्वमादाय कथं विरोधः? भिन्नविषयत्वात्—(व्यासवचनस्य केवलब्राह्म-संस्कारा विषयाः, गौतमवचनस्य तु ब्राह्मसंस्काराः, दैवसंस्काराश्च विषयाः) इति पुनः पुनरेव कथ्यते।

तृतीयशिष्यः। षोड़शत्वमादाय वचनद्वयविरोधः (व्यासगौतम-वचनद्वयविरोधः) परिहृत एव, तथाप्यन्यविधो विरोधः समायाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुः। कीदृशः ?

तृतीयशिष्यः। ब्राह्मसंस्काराणां षोड़शत्वं. दैवसंस्काराणामेकविंशतित्वं तथाहि सप्तपाकयज्ञाः (हुतम् १। प्रहुतम् २। आहुतम् ३। शूलगवः ४। वलिहरणम् ५। प्रत्यवरोहणम् ६। अष्टकाहोमः ७।) सप्तहविर्यज्ञाः (अग्न्याधानम् १। अग्निहोत्रम् २। दर्शपौर्णमासौ ३। चातुर्मास्यानि ४। आग्रयणेष्टिः ५। निरूढ़पशुबन्धः ६। सौत्रामणी ७)। सप्त सोमयज्ञसंस्थाः (अग्निष्टोमः १। अत्याग्निष्टोमः २। उक्थ्यः ३। षोड़शी ४। वाजपेयः ५। अतिरात्रः ६। आप्तोर्यामः ७)।

एवञ्च ब्राह्मसंस्काराः षोड़श, दैवसंस्कारा एकविंशतिरिति मिलित्वा संस्काराणां सप्तत्रिंशत्त्वमेवायाति नत्वष्टचत्वारिंशत्त्वमिति पूर्व्वोक्तगौतमवचनेन (यस्यैतेऽष्टचत्वारिंशत् संस्काराः)

"द्विविधो हि संस्कारो ब्राह्मो दैवश्च"

इति पूर्व्व कथितहारीतवचनस्य विरोधः स्पष्टमेव समायातः। ततश्च व्यासवचनकथितषोड़शत्वमादाय विरोधेऽपहृतेऽपि हारीतवचनकथितसप्तत्रिंशत्त्वमुपादाय विरोधः कथमपक्रियते ?

गुरुः! विषयभेदावलम्बने एतादृशो विरोध एव न सम्भवतीति कथं स परिक्रियते इति प्रागेवोक्तम्।

तृतीयशिष्यः। विषयभेदावलम्बने पूर्वोक्तविरोधो न सम्भवतीति न सम्यगवगतम्।

गुरुः। बोधयामि तावत् श्रूयताम्। हारीतवचनस्य विषयाः पूर्वोक्तैकविंशतिसंस्काराः गौतमवचनस्य च कथिताष्टचत्वारिंशत्संस्काराः। ततश्च गौतमो हारीतोक्तसंस्कारान् कथयति, अपि च—तदतिरिक्तानधिकानपि कथयति, विरुद्धभाषणे एव विरोधः समायाति नत्वधिकभाषणे, अन्यथा (अधिकभाषणस्थाने विरोधाङ्गीकारे) "अत्र घटोऽस्ति" इति वाक्येन सह "अत्र घटोऽस्ति पटश्च" इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यस्यापि विरोधोऽङ्गीकर्त्तव्यः। न च तत्र विरोधः केनाप्यङ्गीक्रियते, तद्वदत्राप्यवगम्यताम्।

एवं रीत्या संस्काराणां संख्यागतमधिकत्वं न्यूनत्वञ्च वेदितव्यमिति तेषामष्टचत्वारिंशत्त्वं षोड़शत्वं अष्टविधत्वं द्विविधत्वं (एकविंशतित्वं) सर्वमेव उपपद्यते।

अत एव संस्काराणामेतदतिरिक्ता अपि संख्याः स्मर्य्यन्ते। तथाच पञ्चविंशतिसंस्कारानाह—अङ्गिराः—

"स्वे स्वे गृह्ये यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।
कर्त्तव्या भूतिकामेन नान्यथा सिद्धिमृच्छति॥
पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः॥
गर्भाधानं १ पुंसवनं २ सीमन्तो ३ बलि४ रेव च।
जातकृत्यं ५ नामकर्म्म ६ निष्क्रमो ७ ऽन्नाशनं ८ परम्॥
चौलकर्मोपनयनं (१०) तद्व्रतानां चतुष्टयम् (१४)।
स्नानोद्वाहौ (१६) चाग्रयणमष्टका च (१८) यथा तथा॥
श्रावण्या१ माश्वयुज्याञ्च२ मार्गशीर्ष्याञ्च३ पार्व्वणम् ४ (२२)।
उत्सर्गश्चाप्युपाकर्म्म (२४) महायज्ञाश्च नित्यशः (२५)॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः॥"

"बलिः"—विष्णुबलिः, "तद्व्रतानाम्"—वेदव्रतानाम्, "चतुष्टयम्"—महानाम्नी-महाव्रतोपनिषद्गोदानानीति। "श्रावण्यां"—श्रावणपौर्णमास्यां क्रियमाणं श्रवणाकर्म्म। एव "माश्वयुज्याम्"—आश्विनपौर्णमास्यामाश्वयुजीकर्म्म। मार्गशीर्ष्यां प्रत्यवरोहणम्। "पार्व्वणम्"—पर्व्वणि अमावस्यायां क्रियमाणं पार्व्वणं श्राद्धम्। उत्सर्गः "उत्सर्ज्जनं वेदानाम्। "नित्यशः"—प्रत्यहं क्रियमाणाः, "महायज्ञाः"—पञ्चमहायज्ञाः (अध्ययनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥" इति मनूक्ताः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आश्वलायनश्च—पूर्व्वोक्तानां पञ्चविंशतिसंस्काराणां नित्यनैमित्तिकवार्षिकादिभेदेन चतुर्विधत्वमाह यथा—

महायज्ञास्तु नित्याः स्युः सन्ध्यावच्चाग्निहोत्रवत् ।
नैमित्तिकाः षोड़शोक्ताः समुद्वाहावसानकाः ॥
मासिकं पार्वणं प्रोक्तमशक्तानान्तु वार्षिकम् ।
सप्तैवाग्रयणाद्याश्च संस्कारा वार्षिका मताः ॥"

"समुद्वाहावसानकाः"—विवाहपर्य्यन्ताः । "मासि मासि वोऽशन"मिति श्रुत्युक्तपार्वणश्राद्धस्य मासिकत्वमुक्तम् । मासि मासि अशक्तानां तदेव "वार्षिक"मित्युक्तम् । ततश्च प्रत्यमावास्यं पार्वणश्राद्धकरणाशक्तेन वर्षमध्ये एकवारमेव श्राद्धमवश्यं कर्त्तव्यमित्यर्थः सिध्यति ।

अत्राप्येतत्संख्यासमाधानं पूर्वोक्तदिशा वेदितव्यम् ।

चतुर्थशिष्यः । व्यासेन कर्णवेधस्य संस्कारत्वमङ्गीकृतमिति कथितम् । ततश्च स्मार्त्तेन "कर्णवेधस्य संस्कारत्वाभावा"दिति कथमुक्तमिति पूर्वोक्तसंशये समाधानमिदानीं श्रोतव्यम् ।

गुरुः । कर्णवेधसंस्कारस्य गौणत्वात् स्मार्त्तस्य तथाविधोक्तिः । ततश्च "कर्णवेधस्य संस्कारत्वाभावा"दिति स्मार्त्तपङ्क्तौ—नञ् न अत्यन्ताभावरूपमुख्यार्थकः, किन्तु अन्यार्थकरूपगौणार्थकः, नञश्च अन्यार्थत्वं प्रसिद्धमेव "तदन्यत्वं तदल्पता" इत्युक्तेः ।

चतुर्थशिष्यः । कर्णवेधस्य गौणतायां किं कारणमिति श्रोतव्यम् ।

गुरुः । श्रूयतां—गोभिलादिगृह्यसूत्रेषु याज्ञवल्क्यादिधर्म्मसंहितासु च संस्कारपरिगणनायां कर्णवेधस्य नामाश्रवणात्तस्य गौणत्वमवधार्य्यम् ।

पञ्चमशिष्यः । पूर्वोक्तगौतमवचने अन्त्येष्टिकर्णवेधयोर्नामाश्रवणात् कथं तयोः (अन्त्येष्टिकर्णवेधयोः) संस्कारत्वम् ?

गुरुः । कर्णवेधस्य संस्कारत्वे पूर्वोक्तव्यासवचनमेव प्रमाणमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रागेव दर्शितम्। अन्त्येष्टेः संस्कारत्वे याज्ञवल्क्यवचनं प्रमाणम्। तथाच—याज्ञवल्क्यः—

"ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः॥"

निषेकशब्देन गर्भाधानमादिः संस्कारः, श्मशानशब्देन अन्त्येष्टिः शेषः संस्कारः स्पष्टमुक्तः। ततश्च गौतमवचने अन्त्येष्टिकर्णवेधयो-रपरिगणनेऽपि न तयोः संस्कारत्वहानिः *।

षष्ठशिष्यः। गौतमेन—"इत्येते चत्वारिंशत् संस्काराः" इत्यनेन तथा "यस्यैते न चत्वारिंशत् संस्काराः"—इत्यनेन च संस्काराणां चत्वारिंशत्त्वमेवोपपादितम् (न त्वष्टचत्वारिंशत्त्वम्)। "अथाष्टा-वात्मगुणा" इति सन्दर्भेण आत्मगुणा एव कथिताः न तु तेषां (आत्म गुणानां) संस्कारत्वमुक्तमिति संस्काराणामष्टचत्वारिंशत्त्वमनुपपन्न-मिति मे पूर्वपक्षे समाधानं श्रोतव्यम्।

गुरुः। श्रूयताम्—"अथाष्टावात्मगुणा" इत्यनेन तेषां (दया दीनाम्) संस्कारत्वमेव व्युत्पादितम् संस्कारपरिगणनायामात्मगुण-कथनस्यानुपयोगित्वात्। अन्यथा "यस्यैतेऽष्टचत्वारिंशत् संस्कारा" इति स्वोक्तिविरोधः स्यात्। अपि च—आत्मगुणानां संस्कारत्व-मन्यैरपि स्मर्य्यते। तथा च शङ्खलिखितस्मृतिः—

पाकयज्ञा हविर्यज्ञाः सोमयज्ञास्तथैव च।
संस्कारा ह्यग्निहोत्रान्ता अग्निहोत्रन्तु जुह्वतः॥
संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्राह्मलौकिकः॥

---

* "अन्त्यश्चैतानि कर्म्माणि प्रोच्यन्ते षोडशैव तु" इति पूर्व्वोद्धृतजातुकर्णवचनमपि अन्त्येष्टेः संस्कारत्वे प्रमाणं वेदितव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः ।
नाकपृष्ठं यशो धर्म्मं चिरोजानस्त्रिविष्टपम् ॥"

अत्र—"अष्टगुणैः संस्कारैः संस्कृत" इति बोधनात् स्पष्टमेवात्मगुणानां संस्कारत्वमुपपन्नमिति संस्काराणामष्टचत्वारिंशत्त्वमव्याहतमेव * ।

आत्मगुणानां लक्षणान्याह बृहस्पतिः—

"आत्मवत् सर्वभूतेषु यद्धिताय शिवाय च ।
वर्त्तते सततं हृष्टः कृत्स्ना ह्येषा दया स्मृता ॥
(इति प्रथम आत्मगुणः)

बाह्ये चाभ्यन्तरे चैव दुःख उत्पादिते परैः ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता ॥
(इति द्वितीय आत्मगुणः)

न दुर्गुणान् गुणैर्हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता ॥
(इति तृतीय आत्मगुणः)

अभक्ष्य-परिहारश्च संसर्गश्चाप्यनिन्दितैः ।
स्वधर्मेषु व्यवस्थानं शौचमेतत् प्रकीर्त्तितम् ॥
(इति चतुर्थ आत्मगुणः)

शरीरं पीड्यते येन शुभेनापि च कर्म्मणा ।
अत्यन्तं वर्जयेत् तत्तु सोऽनायासः प्रकीर्त्तितः ॥
(इति पञ्चम आत्मगुणः)

प्रशस्ताचरणं नित्यम् अप्रशस्तविवर्जनम् ।
एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥
(इति षष्ठ आत्मगुणः)

---

* सन्न्यासवाणप्रस्थयोः संस्कारत्वप्रतिपादकं प्रमाणमनुसन्धेयम् । यदि तयोः संस्कारत्वं तदा संस्कारसंख्या पञ्चाशद् भवतीत्यपि विभावनीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तोकादपि हि दातव्यमदीनेनात्मरात्मना ।
अहन्यहनि यत्किञ्चित्तदकार्पण्यमुच्यते ॥

(इति सप्तम आत्मगुणः)

विवर्ज्जयेदसन्तोषं विषयेषु सदा नरः ।
परद्रव्याभिलाषश्च साऽस्पृहा कथ्यते बुधैः ॥

(इति अष्टम आत्मगुणः)

(अथ संस्काराणां श्रुतिमूलकत्वविचारः)

सप्तमशिष्यः । संस्काराणां श्रुतिमूलकत्वं स्मृतिमूलकत्वं वा ? श्रुतिमूलकत्वे केषां श्रुतिमूलकत्वं ? स्मृतिमूलकत्वे केषां वा स्मृतिमूलकत्वम्—इत्यादि प्रश्नस्योत्तरमिदानीं श्रोतव्यमस्माभिः ।

गुरुः । तव प्रश्नस्योत्तरं व्यापकं भविष्यति, अत आगामिनि दिवसे तत् कथयितव्यमिति । (क्रमशः)

नयनानुनयः

प्रथममाश्रममेत्य शरीरिणः सपदि यत्र गुरुप्रणयोचिताः ।
श्रुतिकथाशतसङ्गनिरन्तरं नयन मां नय तद्गुरुमन्दिरम् ॥ १

प्रतिदिनोचितवेदनिवेदिनः शुकशिशोरपि यत्र कृतात्मता ।
हुतहुताशनधूमशितिद्रुमं नयन मां नय तं प्रथमाश्रमम् ॥ २

शिशुमुखस्मितसङ्गतिमङ्गलात् भवति यत्र सुधांशुरुचिद्रवः ।
सकलसारमपारभवान्तरे नयन मां नय तज्जनमन्दिरम् ॥ ३

तनयवत्सलतामृतसेचनात् त्रिदिव एव हि यत्र समुद्गतः ।
सुकृतसारफलं श्रितजन्मनां नयन मां नय तज्जनमन्दिरम् ॥ ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपनसुक्तकरोत्करसुन्दरे लसति यत्र मनोहरचारुता ।
मधुकरध्वनिमुग्धदिगन्तरं नयन मां नय तं कमलाकरम् ॥ ५

सितसुधाकरपादविशोधिता वहति या निशि कामपि माधुरीम् ।
मृदुलवायुतरङ्गतरङ्गितां नयन मां नय तां कुमुदावलीम् ॥ ६

कुलबधूरिव बन्धुसमागमाद् भजति या सुषमां तरुसङ्गता ।
कुसुमराशिविशेषितपल्लवां नयन मां नय तां मृदुवल्लरीम् ॥ ७

विषयभोगविरागमुपेयुषां क्षितिभृतामपि यत्र परिस्थितिः ।
प्रकृतिशोभनशैलनदीतटं नयन मां नय तद्वनमन्दिरम् ॥ ८

मधुरमागधवृत्तिमुपाश्रिताः पवनपूरितकीचकसञ्चयाः ।
दधति यत्र नृपप्रियगीतिकां नयन मां नय तद् वनमन्दिरम् ॥ ९

अतिथिसत्कृतये फलपादपा ददति यत्र फलान्यभितः स्थिताः ।
मृदुलशष्पसुनीलपटावृतं नयन मां नय तद् वनमन्दिरम् ॥ १०

विजहतो निखिलाः किल कामनाः शमगुणाः परमेश्वरतत्पराः ।
परिचरन्ति यतस्तपसः क्रमान् नयन मां नय तद्गिरिमन्दिरम् ॥ ११

प्रकृतिवैरपरिस्मृतिवर्जिताः पशुविहङ्गगणाः शमनन्दिताः ।
परित एव हि यत्र परिस्थिता नयन मां नय तं चरमाश्रमम् ॥ १२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयसभ्यतापरिस्थितेः प्राचीनत्वम्

(लेखकः—श्रीचिन्ताहरणकाव्यतीर्थः वि, ए)

प्राचीनां रीतिमुररीकुर्वन्तोऽस्मद्देशीयाः पण्डिताः प्रायेण सर्व्वं एव समामनन्ति, यथा भारतेषु शिष्टतायाः प्रचलनमनादित एवासीत् कालात् इति। परं दुःखकारणमेतदेवाभूदितः पर्य्यन्तं यत्तथात्वेऽपि प्राचीनविदुषां सम्मतस्य, तथाविधसम्मतस्य परिपोषकवचनजातानां वर्त्तमानत्वेऽपि च संस्कृतशास्त्रग्रन्थेषु नवीनां रीतिमनुसृत्य लब्धविद्या अस्मद्देशीया वैदेशिकाश्च तत्सम्मतौ रतिमनादधानाः भारतीय-सभ्यतापरिस्थितिर्नातितरां प्राचीनेति मतं प्रकटयन्तो वर्षसहस्र-त्रयात् ततोऽपि वा किञ्चित् प्राचीनात् कालात् प्राक् नासीद् भारतेषु शिष्टता तादृशीति व्याख्यातवन्तः। तेन च पृथिव्याः सर्व्वेष्वेव प्रदेशेषु एतेषामेव विदुषां मतं पदं कृतवत् जनानां मानस-भूमौ। अस्मद्देशीयाः प्राचीनाः पण्डिताः स्वदेशीयशिष्टतायाः प्राचीनत्वमतिं मनसि दधाना अपि न तादृशीं तृप्तिमलभन्त सर्व्वेषां तन्मतौ रतिदर्शनाभावात्। नहि पुत्रगुणान् स्वयमेव वर्णयन्तो जनकाः कदाचिदपि सुखं दधते इति प्रथितमेव।

साम्प्रतन्तु प्रत्नतत्त्वविदां प्रयत्नेन नवीनानि कानिचित् द्रव्याण्युप-लब्धानि, येषां नामोपलम्भाद् वैदेशिका अपि विद्वांसः स्वमतं परिहाय भारतीयशिष्टतायाः प्राचीनतामङ्गीकर्त्तुमारब्धा इति परं प्रमोदस्थानमस्मद्देशीयमनीषिणामिति उपलब्धनवीनवस्तुविषयेऽत्र किमपि वक्तुमुद्युक्ता वयम्। अनादिकालतः प्रवृत्ता भारतेषु शिष्टता, इति तु न साम्प्रतमपि प्रत्नतत्त्वविदां सिद्धान्तः। तैस्तु केवलमुच्यते, यथा यानि नाम वस्तून्युपलब्धानि तेषाम् आलो-चनातः प्रतीयते, यथा वर्षसहस्रपञ्चकात् प्रागपि भारतेषु शिष्टताया बाहुल्येनैवासीत् प्रसार इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचतुरेभ्यः प्राक् वर्षेभ्यः रायबाहादुर-श्रीयुक्तदयारामसाहानी महोदयः पञ्चनदप्रदेशान्तर्गतहरपा (Harappa) नामकदलेषु अंश-विशेषाणां खननात् नितरां प्राचीनासु भुवो भूमिकासु प्रचुराणि कौतूहलजनकानि द्रव्याणि समधिगतवान्। द्रव्याणि तानि अतितरामिव प्राचीनानीति तु तेन महात्मना तदानीमेव अनुमितं, प्रकाशं गुम्फितं च स्वं मतं विवरणग्रन्थेषु।*

परं तदानीमपि विषयोऽयं न जनानां चेतांसि समाक्रष्टुम् अलमभवत् तादृशम्, न वोपलब्धद्रव्याण्यधिकृत्य समयनिरूपण-विषये निश्चयेन किमपि केनापि वक्तुमपार्य्यत दृढ़तर प्रमाणाभावात्।

तदनन्तरञ्च श्रीमता राखालदासवन्द्योपाध्यायमहोदयेन विगतहायने सिन्धुप्रदेशान्तर्गत मोहेन्जो दारो (Mohenjo Daro) नामकस्थाने खननेन पञ्चनदप्रदेशलब्धद्रव्यसदृशान्येव बहूनि द्रव्याण्यधिगतानि। उभयत्र एव इष्टकनिर्म्मितगृहाणाम् अंशाः, मृन्मयानि भूयांसि वस्तूनि चित्रितान्याचित्रितानि च, क्रीड़नकानि, काचनिर्म्मितवलयानि, चित्राणि प्रस्तराङ्गुरीयकाणि, नवीना मुद्राः (Coins), नवीनाक्षराङ्किता मुद्राः (Seals)—इत्यादीनि बहून्येवासादितानि वस्तूनि।

तत्र अनन्तरोक्तासु मुद्रासु यादृशानि नामाक्षराणि चित्रात्मकानि निबद्धानि दृश्यन्ते तादृशान्यक्षराणीतःपूर्व्वं भारतेषु कुत्रापि कदापि न दृष्टपूर्व्वाणि। ब्राह्मी खरोष्ठीति द्विविधैव लिपिः प्राचीने कालेऽत्र पदमलभत इत्येवासीदितःपूर्वं धारणा। मुद्रागतलिपि-दर्शनेन सा धारणा परिवर्त्तनमिव व्रजति, यथात्र भारतेषु चित्रलिपे-

---

* Annual report of the Archaeological Survey of India for the year 1920—21. नामको द्रष्टव्यो विवरण ग्रन्थो जिज्ञासुभिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रपि आसीत् कदाचन प्रवर्त्तनम्। परम् एतासां लिपीनां पाठोद्धारे नेदानीमपि कोऽपि प्रभवति मनीषी।

एतासां लिपीनां द्रव्यान्तराणाञ्चाधिगतानां सादृश्यमुपलभ्यते मेसोपटेमियान्तर्गतसुमेरियशिष्टताप्राचीननिदर्शनभूतेषु पदार्थनिचयेषु। सा च नाम सुमेरियशिष्टता इतः वर्षसहस्रपञ्चकात् पूर्वं कदाचित् प्रवृत्तिमत्यभूदिति तत्रत्यानां विदुषामनुमानम्। सति याथार्थ्ये तेषामनुमानस्य अस्मद्देशेषूपलब्धान्युल्लिखितानि द्रव्याण्यपि तत्समकालीनान्येवेति प्रतीयते। तथा च तदानीम् अपि आसीत् भारतेषु शिष्टतायाः प्रवर्त्तनम् इति सिद्धान्तः।

परमयं सिद्धान्तो भ्रमपरिहीनो यथार्थश्चेति वक्तुं न पार्य्यते दृढ़तरम्। सुमेरियशिष्टताकालनिर्णये न तावत् स्थिरसिद्धान्तमधिगता विद्वांसः। तेन च भारतीयशिष्टताया यानि निदर्शनान्यधिगतानि तानि वर्षसहस्रपञ्चकादपि प्राचीनानि न वेति निर्धारयितुं न केऽपीशते अधुना।

यथा तथा वा भवतु, आशास्यतेऽस्माभिर्यथा भविष्यति एतेषां वस्तूनां प्राचीनतरत्वनिरूपणे प्रभविष्यन्ति सुधियः, इतःपरमपि खननावसरे च प्राचीनतरवस्तूनामुपलम्भोऽपि भविष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(पूर्व्वतोऽनुवृत्तम्)

दम—आर्य्यपुत्र, अलमनया अनुशोचनया। मुक्तसलिलबन्धस्य सरोवरस्य सलिलप्रवाह इव सुखं संसारिणां कदाचिदागच्छति प्रतिनिवर्त्तते च, तदद्य सुखं नष्टं, पुनरेव समागमिष्यति, तदत्र को वा शोकस्यावसरः ?

नलः—प्रिये, जानामि यत् अनुशोचना निष्फलेति, तथापि येव भवती सुखमात्रभोग्या कुसुमस्पर्शमपि कष्टाय मन्यमाना पुरा राजान्तःपुरे स्थितासीत्, सैवाद्य विधातुः कठोरेण विलसितेन मम च मन्दभाग्यस्य दुरन्तव्यसनेन कान्तारे कष्टमनुभवन्ती वर्त्तते इत्येतदेव मे हृदयं पर्य्याकुलयति।

दम—आर्य्यपुत्र, पुनरपि मामेव मन्दभाग्यामनुशोचसि। प्रियंवद, नाहं त्वया सह विहरन्ती कष्टलेशमपि अनुभवामि। अपि न जानीते भवान्, यत् कमलदयिता तपनसम्पर्केण आतपतापमपि परमं सुखं मन्यते इति।

नलः—प्रिये, नाहं न जानामि यथा सुचिरमेवम्भूता विदर्भराजनन्दिनीति, तथापि कथयामि किमेवं स्वेच्छया प्रतिकूलं पन्थानमालिङ्गसि ? ईदृशे सुविषमे दशान्तरे यदि भवतीमपि दुःखमुक्तामुपलक्षयेयं, तदापि सुतरां शान्तिमनुभवेयम्। तत् देवि, प्रतिष्ठतां भवती विदर्भेषु ; अयमदूरे दृश्यते विदर्भगामी पन्थाः,। अहमेकाकी कान्तारपथेन प्रस्थितः कथञ्चिदात्मानं धारयिष्ये ; यदा च सुमहति कष्टान्तरे पतितो विषण्णो भवेयं, तदा भवतीं दुःखमुक्तामवधार्य्य त्रिदिवानन्दमनुभविष्यामि। तदलमद्यापि विकल्पेन, यावदेहि, भवतीं विदर्भानुपनयामि।

दम—आर्य्यपुत्र, मा तावत्। पतिमात्रजीविताः पतिव्रता भवन्ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतिमन्तरेण किं वा सुखाय सम्पद्यते तासाम् ? तदेषाहं पादौ ते शिरसा परिगृह्णामि । क्षम्यताम् ; अलमन्यथा जल्पनेन ।

नलः—प्रिये, किमेवं निर्बन्धवती भवसि ? गच्छ त्वं विदर्भेषु ; अन्यथा यावदेव मया सार्कं वनमन्तरा प्रवेच्यसि, तावदेव सुमहत् कष्टं लप्स्यसे । अनुचितदुःखलवायास्ते किमनेन जीवनावसादिना आयासेन ? नूनं तत्र परिप्राप्तां भवतीं पितरौ समासाद्य सुतरामानन्दमनुभवेताम् ; तत् कथमेवं पित्रोरानन्दमुपेक्षसे ?

दम—आर्यपुत्र, यद्येवं तत् किं भवानपि तत्र नोपगच्छति ? यदि मे पितरौ तथा विपत्सन्निपाते भवन्तं तत्र मया सह पश्येतां, तदा दुहितृमात्रसङ्गसुखादधिकतरम् आनन्दं विन्देताम् ; यतः स्वजनबुद्ध्या भवान् विदर्भेषु परिप्राप्त इति ;

नलः—देवि, संसारगतिं न जानीषे तत एवं ब्रवीषि, तथाहि पश्य—

विपर्यस्ते भाग्ये सुहृदपि विरागं प्रलभते,
विलुप्तः सम्मानो भवति वचसां गौरवलयः ।
मनः शङ्कापङ्के पतति सुहृदां सन्निधिविधौ,
वनादन्यत् किंवा शरणमभिलाषस्य विषयः ?

दम—आर्यपुत्र, एवं तर्हि ममापि तत्र प्रस्थाने स एव अन्तरायः ।

नलः—प्रिये मैवं वक्तुमर्हसि कुतः ?

सुकोमलाङ्गी वनवासदुःखं
सोढुं न शक्तासि सुखोचिता त्वम् ।
पित्रोरपत्यप्रणयोपचारै-
स्तत्र ध्रुवं सौख्यशतं लभेथाः ॥

शैशवे पितुरावासे पोषिता स्नेहसम्पदा ।
विस्मर्तुं नार्हसि स्निग्धा यौवने पितृबान्धवान् ॥

दम—आर्यपुत्र, मा खलु मा खलु । किमेवं पुनः पुनरेव मां मन्दभागिनीं त्वदाज्ञालङ्घनपातके निपातयसि ? अलमद्यापि विदर्भ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्थानादेशेन। यथा तथा वा भवतु, नाहं त्वया विना क्षणमपि जीवितुमुत्सहे, तदादिश सुचिराय मां महैव स्थातुम्।

नलः—प्रिये, न त्वं कथमपि नलहतकं परित्यक्तुमिच्छसि ?

दम—देव, नाहं कदापि पतिं परित्यक्तुमिच्छामि। यतः—

पतिवियोगादनलोऽपि पतिव्रताया अल्पायते, कथमन्यथा पतिवियोगमसहमाना पतिव्रता अनायासमेव अनलं चन्दन शीतलं मन्यमाना तत्र स्वजीवनमाहुतीकुरुते ?

नलः—प्रिये, जानासि ; तथापि किमेवं कथयामि श्रूयताम्, अद्य खलु दुर्दैवनिग्रहीतस्य काननमात्रसमाश्रयस्य पुरुषदोषमात्मनः स्मृत्वा स्मृत्वा त्वत्सन्निधानादपि सुतरां लज्जते मे हृदयं, तत् पुनरपि कथयामि

अलं निर्व्वन्धमाश्रित्य विदर्भान् गच्छ सत्वरा।
अनुकूलं तदेव स्यान्मम पित्रोश्च ते शुभे॥

दम—आर्य्यपुत्र, एष ते अञ्जलिः, मा पुनरेवं भण ; वचनन्ते समाकर्ण्य सुतरामहं बिभेमि। मत्तोऽपि ते हृदयं लज्जत इति किन्तु खल्विदम् ? पद्मपलाशगतानि सलिलानीव क्षणस्थिराणि वित्तानि, तत्कृते को वा सन्तापः ? पुरुषदोषं स्मरसि ? सोऽपि वा कथं स्यात्, सर्व्वमेव जगति दैवमपेक्षते। दैवेन साम्राज्याधिनायको जातोऽसि, दैवेनैव च पुनस्तस्मादवरोपितोऽसि ; तदलं सन्तापेन। आवाभ्यां कानने स्थातव्यं, स्वत एव कानने जातानि फलमूलादीनि समाहृत्य तैरेव जीवनं धारयितव्यम्, अतिदूरे संसारकोलाहलात् केवलं त्वदीयेन सुखेन मया मम च परमानन्देन त्वया परमं सुखमनुभवितव्यम्। यदृच्छया लतापादपपतितानि कुसुमानि स्वयं सञ्चित्य निपुणतरं प्रसाधितशरीरा अहं वनदेवी भविष्यामि, त्वामपि तथैव समलङ्कृत्य कुसुमालङ्कारैः प्रत्यहं वनदेवं विधास्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभाते दिवसावसाने च मधुराणि विहङ्गसङ्गीतानि नूनमावयोः श्रोत्रसुखमुपजनयिष्यन्ति। आर्य्यपुत्र, चिरवाञ्छितमिदं यदि समुपनतं तदलं तत् सावज्ञमुपेक्ष्य। क्रियतामभागिन्यां मयि सदयदृष्टिपातः ; मा पुनरनुसन्धीयतां वियोगवार्त्ता।

नलः—प्रिये, विदर्भराजनन्दिनि, न भूयोऽपि ते कथयिष्यामि विदर्भगमनवार्त्तां, किन्तु सुदुष्करं खलु कान्तारप्रस्थानम् भवत्या इति मुहुर्मामुद्वेजयति।

दम—आर्य्यपुत्र, कान्तारप्रस्थानं यदि सुदुष्करं भवति, भवतु ; तथापि यदा प्राणेश्वरो मे पाषाणवन्धुरेण कान्तारपथेन गच्छन् परिश्रान्तो निदाघप्रकृतिसृष्टस्वेदपरिप्लुताङ्गो वृक्षतले समासीनो भविष्यति, तदाहं यावत् सत्वरं पर्णपुटेन समाहृतैः सलिलैः तं परिश्रमं लघूकृत्यैव शान्तिमनुभविष्यामि। यदा पुनः आकाशस्य मध्यमारूढे दिवाकरे पथिप्रस्थानपरिश्रमेण क्षुधार्त्तो मे जीवितेश्वरः प्रतिपदं गमनबाधां गमिष्यति, तदाहं द्विगुणितोत्साहा करप्रचेयलतापादपेभ्यः संगृह्य संगृह्य फलानि तैरेव ते क्षुधां निवर्त्तयन्ती त्रिदिवानन्दमनुभविष्यामि। तदलं कान्तारप्रस्थाने दुःखनिवेदनेन, निःशङ्कमेव मामनुमन्यस्व सह प्रस्थाने॥

नलः—प्रिये, दमयन्ति, न कथमपि निवृत्ता भवसि, तत् का गतिः ?

दम—अहो समुज्जीवितासि। आर्य्यपुत्र अनुगृहीतास्मि।

नलः—प्रिये, यद्येवम् अलमिह विश्रामेण। अद्यापि बहुदूरं गन्तव्यं नाद्यापि समासादिता निषधसीमा, दूरम् अतिदूरं गन्तव्यं, यावदेव नेत्रयोः सञ्चारस्तावदेव गन्तव्यं, तदलं विलम्बेन, क्रूरः पुष्करो यदि आवयोर्गतिं विदित्वा किञ्चिद् इतोऽपि अत्याहितं कुर्य्यात्! तदलमत्र क्षणमपि विलम्बेन।

दम—आर्य्यपुत्र, वत्सेन पुष्करेण किमतःपरमपि अत्याहितं कर्त्तव्यमस्ति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—प्रिये, विस्मिता मा भूः। अद्य वत्सः पुष्करः पापेन कलिना समाक्रान्तः। राजपुरात् काननप्रस्थानवेलायां काचिद्-शरीरिणी वागुदचरत्, त्वन्तु तां नाकर्णितवती, केवलं मयैव सा समाकर्णिता।

दम—कीदृशी सा ?

नलः—श्रूयतां, बहुविधसान्त्ववादैः पौरान् विनिवर्त्त्य यावदेव काननं प्रति आवां प्रस्थितौ, तावदेव वाणी समुदचरत् यथा—

"देवानवज्ञाय विमूढभैमी
त्वामाश्रिता तत्र न ते विरागः।
द्रक्ष्यामि ते भीमसुतानुरागं
कलिः क्रुधा किं न विधातुमीष्टे॥

मन्मायया पुष्कर एष मुग्धः
मन्मायया द्यूतकृतौ जितस्त्वम्।
पदे पदे त्वां परिदर्शयिष्ये
शक्तिं निजामेष कलिः कठोरः" ॥ इति।

तद्देवि, भीमदुर्म्मदोऽयं कलिरुत्पातवात इव समुत्तिष्ठमानः केन वा शक्यो निवारयितुम्। यावद् यावद् यदेवायं घटयितुमभिप्रेति, तावत् तावत् तदेवायमनायासमसुकरमपि सम्पादयति।

दम—आं दुरन्तस्य कलेरिदं प्रभावविलसितम् ?

नलः—देवि, अथ किम्, एतावता कालेन कदापि मया नेदं समुद्घाटितम्, अद्य तु कथाप्रसङ्गेन तव प्रस्तूयते। देवि, कथमन्यथा वत्सः पुष्करस्तथा स्यात् ? स हि मे कनीयान् पुरा—

नात्यशेत मदादेशं पुरो नोद्धतिमाश्रितः।
अक्षक्रीड़ाविधौ प्राप्ते किं वा नाक्षत मां प्रति॥

दम—आं इदानीमवधार्य्यते कथमकस्मादिव पुष्करस्येयं भावपरि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तिरिति। अथाधुना वत्सं पुष्करं प्रति शान्तो मे मन्युवेगः, यतः परप्रेरणा एवास्य नृशंसवृत्तिपरिग्रहे निदानमिति। अथ कथमतः परमपि अस्मदनिष्टमुत्पादयितुं तस्य प्रवृत्तिर्भविष्यति।

नलः—कथमिति ? सरलहृदया त्वं नाववुध्यसे। समाकर्णय, यदि पुनरावां राज्यलोभेन वा कारणान्तरेण वा निषधेषु गत्वा राज्यमधिकुर्य्याव, तदा महानयं सुखप्रत्यूहः स्यात्, किन्तु यदि आवयोर्जीवनहानिस्तदेव निष्प्रत्यूहस्तस्य सुखसम्पात इति। कलिरपि निष्पादितवैरकृत्यः तत एव कृतकृत्यो भविष्यति।

दम—शान्तं पापं, शान्तं पापं, प्रतिहतममङ्गलमार्य्यपुत्रस्य।

नलः—प्रिये यथा तथा वा भवतु, अलमत्र चणमात्रमपि प्रतीक्षणेन; यावच्छीघ्रमनुगच्छ माम्। (परिक्रामति)।

दम—आर्य्यपुत्र, प्रायेण गगनमध्यमधिरूढो भास्वान्, तदिहैव क्वचित् सरोवरे निष्पादितस्नानादिकृत्यः कानिचित् फलानि समुपयुज्य गन्तुमर्हति भवान्; अन्यथा कीदृशस्तावदतः परो वनाभोगः समुपनतो भवेत् तत्र को वा प्रमाणम्।

नलः—देवि, युक्तमभिहितं त्वया। (निरूप्य) किन्तु अत्र पादपा गगनभेदिनः परिलक्ष्यन्ते, अनभिज्ञश्चाहं पादपारोहणे तत् कथमिव फलसंग्रहः सुकरो भवेत् ?

(ततः प्रविशति गृहीतकिरातवेशः कलिः)

कलिः—एष भोः !

महामहिम्ना विविधप्रकाशः किरातजातेरनुरूपवेशः।
नलस्य चित्ते प्रनिधाय मोहं विडम्बयिष्ये कलिरेनमद्य ॥

भवतु यावदस्य समीपमुदासीन इव व्रजामि। (परिक्रामति)

नलः—(किरातं दृष्ट्वा) प्रिये लब्धं प्रतिविधानम्। एष कश्चन किरातो विहङ्गपिच्छालङ्कृतमस्तको लतापत्रप्रावृताधस्तनदेहभागो व्रजति, तदेनमाहूय वार्त्तां पृच्छामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम—आर्य्यपुत्र, अलमस्य वार्त्ताप्रश्नेन; एनमालोकयन्त्या वेपत इव मे हृदयम्!

नलः—भीरु, अलमाशङ्कया, क्षणमपेक्षस्व यावदहमागच्छामि।

कलिः—(स्वगतं) अये, एष नल इत एवाभिवर्त्तते (हर्षं नाटयति)।

नलः—(उपसृत्य) भद्र, यदि ते न कार्य्यव्यतोपातस्तदा किमपि प्रष्टुमिच्छामि।

कलिः—(निपुणं दृष्ट्वा) अले, को तुमं, इध तुमं पूव्वदो ण कदावि दिट्ठो, ता णिच्चअं तुए विदेसवासिणा होदव्वं।

नलः—भद्र, सुष्ठु जानासि, अद्यैव अस्मिन् कानने समुपगतं मां निषधवासिनमवगच्छ।

कलिः—कधं इध परिभअसदपज्जाउले वणप्पदेसे मिलिदे सि?

नलः—वने कियन्तं कालमवस्थाय प्रकृतिशोभा निरूपणोयेति।

कलिः—अदूले ट्ठिदा इत्थिआ तुह ज्जेव सहवट्टिणी?

नलः—अथ किम्?

कलिः—दुक्कलं क्ख, अज्झवसिदं अज्जेण, जं इरिसे पड़िभअसद-पज्जाउले इत्थिआसहिदो उवट्ठिदो।

नलः—भद्र, अलमत्र वृथा शङ्कया, क्षत्रियकुलोत्पन्नः पुरुषो नैतावता भीतिमाश्रयति—तस्य हि

क्रीड़ा नित्यममानुषी समुचिता शस्त्रेण युद्धाङ्गने,
लीलास्फारितसिंहवक्त्रविवरात्तदन्तकृष्टिः क्रिया।
वात्याव्याहतिरम्बुवर्षणमथो तिग्मांशुतापादयः
सर्वेषां सहनोचितं वपुरिदं क्षात्रं विधात्रा कृतम्॥

कलि—हुम्, तुह पलिपुट्टा आकिदो ज्जेव क्खत्तिअगुणं सूचेदि। अध किं पुच्छिदुं इच्छेसि?

नलः—एतत् पृच्छामि, अस्मिन् अरण्यप्रदेशे यावन्तो वृक्षाः संदृश्यन्ते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते सर्वे एव समुन्नतशिरसः । अथ किम् अस्मिन् नास्ति तथा कश्चन पादपो यस्य फलानि तमनारुह्य संग्रहीतुं शक्येरन् ।

कलिः—अत्थि एत्थ तधा एक्को पादवो, किन्तु क्खु—

नलः—किमिव अपरम् ?

कलिः—किन्तु क्खु इच्छामेत्तकेण ज्जेव ण तदो फलाइं आहरिज्जन्ति ।

नलः—तत् केनापरेण ?

कलिः—सुणादु भवं, अत्थि एत्थ अह्माणं एक्को वुड्ढओ लाआ, सो ज्जेव तस्स पादवस्स अहिआली ।

नलः—तत् किमेष प्रार्थयितव्यः ?

कलिः—अधइं । किन्तु क्खु पत्थणामेत्तकेण ण कज्जं हुविस्सदि ।

नलः—कथमिव ?

कलिः—अत्थि एत्थ कोवि णियमो, जइ सो पालिदो होदि, तदो ज्जेव तदो फललाहो, ण अण्णधा ।

नलः—कीदृशो नियम इति श्रोतुमिच्छामि ।

कलिः—सुणादु अज्जो, अत्थि एत्थ वणब्भंतले कावि भूमी सुवण्णभूमी णाम ।

नलः—अथ कथमियं सुवर्णभूमिरिति व्यपदिश्यते ?

कलिः—जदो तहिं प्पदेसे प्पचुरं सुवण्णविहङ्गाओ आअच्छिअ अण्णोण्णं कोदुअं करेन्ति ।

नलः—तत्र किमस्माभिः कर्त्तव्यम् ?

कलिः—तहिं गदुअ दुवे सुवण्णविहङ्गए कधंपि गेह्लिअ जइ से उवाअणं कादुं पालेसि, तदो पाविहसि । ता गच्छ, जाव अहं वि पण्णघलअं ज्जेव गच्छेमि ।

नलः—भद्र, सुदुष्करमिदं कृत्यं ग्रामीणेन, तत् कथय अपि वनान्तरेऽपि न सन्ति तथा पादपा येषां फलानि करप्रचेयानीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामहोपाध्याय—

यादवेश्वरतर्करत्नपादानां जीवनालेख्यकम्

(लेखकः—श्रीगिरिजाप्रसन्नलाहिड़ीव्याकरणतीर्थः बि, ए)

अथ खलु विचित्रेऽस्मिन् जगति चित्रचित्रणलालसा मानवानां सम्यक् श्लाघनीया नवेति जातं पटुतर-विचार-चातुरी-विषयी-भूतं केषाञ्चन नवीनानामालेख्यरसकोविदानाम्। चित्रं हि बहुशो लिख्यते समलेखि च। रसिकमानसमपि मोहयति, रसभावविलास-लालित्यमपि कलयति वाहुल्येन, कलानैपुण्यप्रकाशपरा सुरतरुवर-दले सुधाकर-सार-तरलीकृतकाश्मीरकेनापि लिखिता चित्रावलीति जाने। तथात्वेऽपि रेखामयी वर्णविशेषोज्ज्वला चित्रलेखा प्रतीष्टावयवा परिच्छिन्नतया स्वभावसम्पदामपरिच्छिन्नानां मानवीयानां तदितराणां वा प्रकृष्ट-प्रकाश प्रदानासमर्था, स्वत एव भवितुमर्ह-त्येवेति तदुत्कर्षपरिहीणत्वं सत्यमेवाभाति। बहुलोपचारसमन्विता-प्यर्चा वाह्यिकी मानस-पूजातो हीनत्वेन समुपदिष्टा प्रमादभिर्भूयसा, शुद्धबुद्धचैतन्यात्मकपरमात्मबोधात् सोपाधिब्रह्मबुद्धिरिवेति। तत् महतां देवचरितानां रत्नगर्भाणां महीवलयानां अतलानामिव दक्ष-तमेनापि विधातुं नालमित्यप्रसङ्ग एव जीवनालेख्यस्य। अखण्ड-रसभावपरिच्छेदकरमपि चित्रं नाम प्रतिक्षणनश्वरस्य जगत-स्तथा प्रतिमुहूर्त्तं भ्रंशमानस्य मानवबुद्धिलवस्य नियतकालजलधि-मग्नस्य निमिषालम्बनम्। एतत्तु सत्यं शोभनतमस्य कस्यचि-दालेख्यस्य। यदि नाम पुनस्तत्र नास्ति काचिदपि कलाकौशल-कणा, तर्हि सर्व्वथा विफलप्रयत्ना हि सा लेखेति तत्त्वं जानन्तोऽपि— "तद्गुणैः कर्णमागत्य चापलाय प्रचोदिता" अपटवोऽपि वयमत्र महागम्भीरचरित्रचित्रणरूपे, "प्रांशुलभ्ये फले लोभादुद्वाहुरिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वामनः" संक्षिप्तेन सम्प्रवर्त्तामहे इति धीरधियां चन्तव्यविषयो भवितुमर्हति ।

वंशकथनम्—आसीद् "राजसाही" भूभागवास्तव्यः कोऽपि ब्राह्मणः सद्वंशसम्पन्नो रामकृष्णभट्टाचार्य्याभिधानः। अथैकदावतरति सप्तर्षिमण्डले प्रातःस्नानसवन-कृत-मानसे मानसे सरसि ऋषिजनोचिताचारसम्पन्नो रामकृष्णस्तरुण-तापसकल्पो गृहाददूरवर्त्तिनीं तरङ्गिणीं प्रति स्नातुमनाश्चलन्नध्वनि सहसा कञ्चिदेकं विस्मयकरं व्यापारमालोकयामास । काचन सुरललना वियति प्रोद्भासितविग्रहामोदिताशा ललित-धवल-च्छविः स्वप्रभाभिर्ज्योत्स्नापतिं तिरस्कृत्य सहसा तदक्षिसाक्षिणी जाता। भीतिविह्वल-स्तिमितनयनेन वीक्षमाणेन वागधिष्ठात्रीत्यनुमिता सा देवी सर्व्वथा कवित्वलेशशून्येनापि रामकृष्णेन सहसा विमलगीर्व्वाणगिरां पञ्चभिः श्लोकैः स्तुतेति यथा—

"भुवनापदि किल यस्या न किञ्चिदवसितमपि कल्पस्यान्ते ।
अधुना संस्कृतरूपा व्यतिरिक्ततां प्रपद्येऽहम् ॥" —इत्यादिभिः।

"विगते खलु जन्मनि यावन्ति मे पुरश्चरणकर्म्माणि पुरा त्वया विहितानि तावन्त एव त्वदन्वयजा अमर-भारती परायणतमाः काव्यकलानिपुणाः सत्यं भविष्यन्तीति" कथयमाना स्तुतिसन्ततिपरितुष्टा सा लोकलोचनागम्या प्रजगाम । ततः पुनर्मुग्धचित्ततया स्वकर्त्तव्याकर्त्तव्यनिर्व्वाचनासक्तेन गृहाश्रमेण सह विषय-वासनां सहसैव विसर्ज्जयता काषाय-वसन-मात्र-सहायेन तेन नीलाचलवासिनीदर्शनलोलुपेन कामरूपाय प्रस्थितम्। पथि रङ्गपुरे कस्मिंश्चिद् ग्रामे समुपयाचितः केनचन भूस्वामिना (फतेपुराधिपतिना शिवरामचतुर्धुरिणा) तं मन्त्रदीक्षितं विधाय स्वप्रभावेण तमेव सञ्चितयोगिभ्यः प्रमोचयामास। ततः काले गते, पुनः पुनर्याच्यमानो विधिलिखनमात्रवशाद् विकृतबुद्धिः संसार-गतचित्तः कृतोद्वाहस्तेनैव भूस्वामिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सानन्देन प्रदत्ते "इटाकुमारी"ग्रामे विदधौ स्वकीयां वसतिम्। सरस्वतीप्रदत्तवरस्य समधिगतबहुलविद्यारत्नस्य तस्य यशश्छटा योगिजनसुलभा तेजःकान्तिश्च वर्णनीयविषयतां प्राप कालेनाचिरेण।

"आकरे पद्मरागाणां जन्म काचमणेः कुतः" इति सुविदितं सुभाषितं महदेव सत्यम्। एतादृशे खलु वंशे युक्ततमैवाचार्य्यवर्य्यस्य यादवेश्वरतर्करत्नस्य सुधाद्रवमयेऽमरसरिति काञ्चन-कमलरत्नजातस्येव सुमहती जनिः। रामकृष्णात् षष्ठः पुरुषवरः १७७१ शकाब्दे मधुमासे वुधवासरे मधु-मधुरहृदयो वुधद्वितीयो यादवेश्वर आविरभूत्। विशालस्यास्य भारतवर्षस्य साहित्ययशः-कल्पपादपस्य प्ररोहो विधिना ग्रामके "इटाकुमारी"नामके निचिक्षे इत्यस्माकमद्भुतगौरवविषयः।

वाल्यजीवनकालः—आरूढ़े च तस्मिन् केवले पञ्चमाब्दे जनकः स्वपुत्रस्य कृतित्वमहनीयतां विजानन्निव त्यक्तसङ्गेन सुरपुरातिथिनाचिरेणाभावि। पितृहीनस्य यादवेश्वरस्य मातामही तदेकं शरणमासीत्। अवहुतिथे काले गते सापि चिरादपससारेत्यहो! विधिविधानविड़म्बनम्। केनचन सूत्रेण रचितोऽभूदयं वालस्तदाप्यज्ञातमहत्त्वः वटपादपाङ्कुर इव रङ्गपुरस्थ भूस्वामिनां श्रीमदन्नदाप्रसादसेनमहोदयानां ज्येष्ठतातपत्नीकृपाशीतलस्नेहरसानुसिक्तः। असहायानामविदितमहिम्नां हि रक्षणमोदृशं भवतीति तत्तच्छरणानामपि प्रभूतं यशः। अथवा ललाटलेखैवात्र सर्व्वथा शरणम्।

विद्यारम्भः—ततः समुपयोगिनि समये रङ्गपुरस्थ वैयाकरणमुख्येभ्यो हरगोविन्दसिद्धान्तपादेभ्यः कलापव्याकरणम् तथा भारतकविकोकिलेभ्यः समानान्वयजश्रीईश्वरविद्यालङ्कारेभ्यः "काव्यप्रकाशः" कतिचित् काव्यग्रन्थांश्च विपुलधिया यादवेश्वरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यशसा सुखेन चाधीतानि। भूयसा व्युत्पन्नोऽपि काव्यव्याकरणात्मके शास्त्रद्वये ज्ञानसुधाचकोरोऽसौ परां निर्वृतिं नाससाद।

परममुक्तिकारणभूतेन ज्ञानैकमयेन विमलधवलकान्तिना राजितेऽविमुक्ते सुरधुनीप्रवाहसमायामिनो निखिलविद्या सुतरामधिगन्तव्येति सुविचार्य्य तरुणवया यादवेश्वरः शास्त्रामृतपिपासुरानन्दनिकेतनाय प्रतस्थे। तदभिजनमेत्य कालेनाल्पेन महामहोपाध्यायकैलासचन्द्रशिरोमणितः स्वज्ञानमणिच्छटासञ्जातभूतं न्यायशास्त्रनिकषरत्नं; लब्धचिदानन्दाभासात् विशुद्धानन्दस्वामिभास्वरभास्करतो वेदान्तज्ञानालोकं; काव्यकुसुम रसं पेपीयमानः पुनरपि ईशानचन्द्रविद्यावागीशचरणारविन्दमधुरमधुकणावलिञ्च स्वप्रभावेणातिमहता चिरेण लब्धमासीत्। "अमृते रुचेरभावो नास्तीति" प्राकृतानां प्रवचनं न्याय्यम् यदसौ यादवेश्वरः काशीस्थं "कुइन्स्कलेजाख्यं" महाविद्यालयं तदा पुनः पाठकामः प्रविवेश। न चिरेण च स्वोपाधिव्याजेन "तर्करत्न" मणिहारं विजित्य यशसा धवलीकृताशः स्वदेशपुरं रङ्गपुरं प्राप। तस्याबाल्यात् जन्मभूमौ रङ्गपुरावनौ जनन्यधिकस्नेहभक्तिपात्रमासीत्। धरापरित्यागात् प्राक्कालपर्य्यन्तं सासौ स्नेहधारा कदापि न विभक्तासीदिति तस्य महती प्रीतिरसाधारणी। गृहमागत्य पितृव्यकमलेश्वरभट्टाचार्य्यचरणसन्निधौ स्मृतिशास्त्रपारीणत्वमासादितम् अर्ज्जितविमलज्ञानकुसुमसुरभीकृतदिशा यशःसम्पदास्तृतासनसमलङ्करणाय नानादिग्देशजानि आमन्त्रणानि परवशत्वभिया ब्राह्मणसुलभस्वल्पजतुष्टिमता तेन पुरुषसिंहेन स गौरवं बहुशः प्रत्याख्यातानि। पण्डितवर्य्येण सुहृदा महेशचन्द्रन्यायरत्नेन सादरमाहूतोऽपि स "संस्कृतकलेजा"ख्यविद्यामन्दिरस्य किमप्यध्यापकपदं न स्वीचकार। ततः कृष्णधनघोषाख्यराजकीयभिषग्वरमुख्यैः सौरजानपदैर्नितराम् अभ्यर्थितो रङ्गपुर एव प्रतिष्ठितस्तर्करत्नवरः चतुष्पाठीमेकां विरचय्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्येभ्यो विविधशास्त्राण्यध्यापयितुमारेभे। तदध्यापनायश:-सौरभेण समाकृष्टा दिगन्तरागता अन्तेवासिमधुकरास्तस्य विद्या-निकुञ्जे सुचिरं जुगुञ्जु:। पुनरेकदा नागरिकैराराधितेन तदानीन्तनस्य "रङ्गपुरकलेजाख्य" महाविद्यालयस्य संस्कृत-साहित्यशास्त्राध्यापकता कथमपि तेन स्वीकृतासीत्। कठोरमधुरं दुर्लभं सारस्वतं व्रतमेव तस्यासीदेकान्तं जीवनावलम्बनमाजीवन-मिति महागरीयानेव तस्य संसारधर्म्मो नात्मत्र कश्चित् सन्देह-लेश इति।

सारस्वतकानने—पण्डितकेशरिणो राजसुलभस्वभावविशेषो द्वादश एव वर्षे वाल्ये "खेदावली"रचनेन, तथोनषोड़शाब्दे "शोक-तरङ्गिणीकाव्य"-प्रकाशेन परं प्रकाशं नीत इति प्राचां सुधियां स्मरणमात्रशेषम्। कलापव्याकरणमाश्रित्य श्लोकात्मकव्याकरण-रचना तेनैका कृता पाठिता च स्वग्रामे वालकेषु। ग्रन्थत्रयस्यास्य विशेषेण लोपात् शेषोक्तस्य रिक्त: संस्कृतसाहित्यकोष इति नेदं वृथाजल्पितम्।

वृहद्ग्रन्थरचनाभावस्तर्करत्नमहोदयस्य स्वापकर्षं उत्कर्षो-वेति वक्तुं न पार्य्यते। स्वल्पेनापि लिखितेन सौन्दर्य्यसारेण चिर-प्रथितयशसो जाता वहुलकविमुख्या इत्यस्य दृष्टान्तविषया भूरिशो द्रष्टव्या: प्राच्ये, प्रतीच्ये, किं पुन: सर्व्वत्र। कानिचित् स्वल्पावयवानि ग्रन्थरत्नानि* तेन प्राकाश्यं नीतानि। तत्र या कवित्वमाधुरी रससारमयी, सा चन्द्रामृतवत् द्रुतचरणशीला भाववहुललीला चेति

*(१) चन्द्रदूतं (खण्डकाव्यम्)। (२) प्रवालकुसुमम् (कोषकाव्यम्) १८८१ई। (३) अश्रुविसर्ज्जनम् काव्यम् (१९५७ शकाब्दे)। (४) अश्रुविन्दुकाव्यम् (१९९१ शकाब्दे)। (५) राज्याभिषेककाव्यम् (१९६१ शकाब्दे)। (६) रत्नकोष-काव्यम [अधुनाप्यमुद्रितं]। (७) सुभद्राहरणमहाकाव्यम् [तथैव]।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञातमेव काव्यरत्नरत्नज्ञैः। अतो न युक्तमस्मादृशानां मूढ़ानां तदालोचनया मुग्धवुद्धिप्रकटनमिति विरम्यते।

तथा च पुनर्विचारात्मकवर्णजालमया ये खलु तदीया दृश्यन्ते ग्रन्थास्ते च स्मार्त्तप्रवराणां नियत-लक्ष्यविषया इति श्रूयते तच्छास्त्र-पारीणेभ्यः। नवद्वीपस्य नैयायिक-गोष्ठी-गरिष्ठ व्रजनाथविद्यारत्न-महोदयैः काञ्चित् स्मार्त्तव्यवस्थामाश्रित्य यो विचारः सुमहान् बुधपरिज्ञातः समजायत, तदात्मको ग्रन्थनिचयः * रत्नान्यमूल्यानि। स्वल्पानि खलु दिनान्यतीतानि यत् एकादश्यां विधवानां जलग्रहण-सम्भवासम्भवत्वविचारस्तेन स्मृतिशास्त्रज्ञवर्य्यैः श्रीमद्भिः पञ्चानन-तर्करत्नैः समं वीरत्वेन विहित इत्यस्ति तत्र प्रमाणभूतं तदात्मकं पुस्तकम्। "भारतवर्षा"ख्यपत्रप्रवरस्य श्रीमतो जलधरसेनमहोदयस्य "जलं जलं" ("जल, एकटु जल") इत्यभिधानं प्रवन्धविशेषं पठन्नाकुलमतिर्विधवाबन्धुरसौ तस्मिन्नेव विचार्य्यविषये रत आसीदिति कीदृक् महनीयत्वं सूचयतीति नास्त्यत्र मन्तव्यप्रयोजनम्। साम-यिकी विषयविचारलीला बहुशः पत्रिकासु दृष्टेत्यलं वाहुल्येन।

(क्रमशः)

परिषत्सन्देशः

राजकीयशिक्षाविभागानुकूलता—इयं किञ्चिद् विनिवेद्यत इदानीं परिषदुन्नतिकामिषु श्रीमत्सु पाठकमहाभागेषु। यथापूर्व्वमेतस्मिन्नपि प्रवर्त्तमाने खृष्टीयसंवत्सरे परिषद्गुणग्रहण-

---

* (१) संशयनिरसन (प्रथम भाग) १९३० सं; (२) तथा २य भाग १९३० सं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्तुष्टा वङ्गीयशिक्षाविभागाधिकृताः संस्कृतभाषाभ्युन्नतये रूप्यकाणां सहस्रत्रयं वितीर्णवन्तः। तदेतदुपकृतिस्मरणाय निरुपयोगमेव नो भूरिवचसामाविष्करणम्; केवलमुचितार्थविनियुक्तमौदार्य्यमिह राजपुरुषाणां हृदयेन वयमनारतमवगच्छामः।

सामन्तराजसाहायकम्—अपरमिदमुत्साहस्थानं सुरभारतीसेवकानां यत् सामन्तनरपतयोऽपि क्रमेण परिषद्व्यापारेषु समधिकमादरमाविष्कुर्व्वंत इति। सम्प्रति च परमधर्म्मानुष्ठानतत्पराः सनातनधर्म्मसंरक्षा-सहायभूताः कश्मीरमण्डलमहाधीश्वराः श्रीमन्तः स्यर् प्रतापसिंहवर्म्माणः कलिकातायामवस्थानसमये संस्कृतसाहित्यपरिषदः सत्कृत्यनिष्पादनप्रवृत्तिमुपलभ्य तदनुकूलतायै मुद्राणामेकसहस्रमुत्सृष्टवन्तः। परमकृतज्ञा वयमेतेषां सुदीर्घं जीवनमेवंविधेषु कर्म्मसु भूयो भूयः प्रवृत्तिप्रसरञ्च परमेशसविधे कामयामहे।

परिदर्शकसमागमः—नूनमिदं सौभाग्यनिदर्शनमेव संस्कृतविद्याया यत् प्रतिदिनमुपचीयमानेव परिलक्ष्यते परिषत्कृत्यजातेषु प्रतिष्ठितपुरुषाणां पण्डितजनवरिष्ठानाञ्च महतामनुरागप्रसक्तिरिति। स्वल्पान्येव दिनान्यतीतानि वङ्गीयराजतन्त्राधिकृतशिक्षाविभाग-कर्म्मसम्पादकानां माननीय-जे-ए-एल्-स्वोयान-महोदयानां तथा आयवाणिज्यादिविभाग-कर्म्माध्यक्षाणां जे-ए-वुड्हेड्महोदयानां परिषदं सन्द्रष्टुमभ्यागतानाम्। महाजनास्ते एतस्याः परिस्थितिपरिदर्शन-लब्धसन्तोषा नाट्यप्रयोगसंप्रेक्षा-रञ्जितमानसाश्च निरतिशयमानन्दिता अभूवन्।

ततोऽपरेद्युः काश्मीरेश्वरसेवितचरणा निखिलयोगशास्त्रपरमपारङ्गता मुक्तसंसारसङ्गा राजगुरवस्तपोनिधयः श्रीमन्तो नित्यानन्दस्वामिपादाः परिषन्मन्दिरेऽत्र सानुग्रहं चरणपातेन सविशेषं नः समुत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहितवन्तः। दिनान्तरे च काश्मीरराजसभामुख्यपण्डिता वैदिकतान्त्रिकादिविविधविद्यासमुपलब्धवैदुष्या महाराजोपाध्यायवर्य्या महामहोपाध्यायाः श्रीमज्जगदीश्वरविद्यासागरमहाभागाः परिषत्-परिदर्शनायाऽत्र सकृपमागतवन्तः। द्वितयेऽपि ते परिषदन्तेवासिनां नाटकाभिनयकौशलं संस्कृतोच्चारणसौष्ठवञ्च भूयो भूयः समभिनन्द्य परिषत्कर्म्मसम्पादनसौकर्य्याय कतिचिद्रूप्यकाण्यर्पितवन्तः। इत्थमेव निरन्तरमुपलब्धे महतां करावलम्बे न बहुदूरवर्त्तिनी तिष्ठेत् संस्कृतस्याभ्युदयाशेति नो दृढ़ः प्रत्ययः।

सदस्यानां सम्मानः—अन्यदप्येकमभिनन्दनीयवृत्तान्तविनिवेदनमिदानीमवशिष्यते। संस्कृतसाहित्यपरिषदस्त्रयः सदस्याः साम्प्रतं बहुमानसूचकैरुपाधिविशेषैः समलङ्कृताः परिषद्गौरवमवर्द्धयन्। तत्र च विविधशास्त्रनिष्णातबुद्धयः कलिकाताविश्वविद्यालयस्याध्यापकाः एम् ए पि-आर्-एस् इत्युपाधिकाः श्रीमन्तः प्रभातचन्द्रचक्रवर्त्तिकाव्यतीर्थाः शब्दशास्त्रसमालोचनप्रदर्शितविज्ञानप्रकर्षाः विश्वविद्यालयाधिकारिभिः 'पि-एइच्-डि' इत्युपाधिसम्मानेन सत्कृताः। खृष्टीयवर्षप्रारम्भे च पुरातत्त्वानुसन्धानलब्धकीर्त्तयः बि-ए-श्रीयुक्तरमाप्रसादचन्दमहोदयाः परमस्वधर्म्मनिष्ठा लोकोपकारबद्धमतयः श्रीयुक्त-बद्रिदासगोयेनकामहोदयाश्च राजोपहृते 'रायबाहादुर' इत्युपाधिभूषणैरभिभूषिताः। तानेतान् सर्व्वात्मना पुनः पुनः सम्भावयन्तो वयं प्रार्थयामहे—तत्तत्सम्मानमास्वादयन्त इमे 'शतपरिमितमायुः शान्तिसौख्यं समृद्धिं' निर्व्वाधमुपभुञ्जतामिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩, সের

অধ্যক্ষ মথুরবাবুর

স্থাপিত ১৩০৮

ঢাকা

শক্তি ঔষধালয়

মহাভৃঙ্গরাজ তৈল ৬, সের

চ্যবনপ্রাশ ৩, সের

মকরধ্বজ ৪, তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, গৌহাটি, চট্টগ্রাম, রঙ্গপুর, পাটনা, জলপাইগুড়ি, শিলেট, সিরাজগঞ্জ, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট,
৭১।১ রসা রোড্ নর্থ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সের

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না —ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১, টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস্ ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লীকষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৷৷০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ

সংস্কৃতসাহিত্যপরিষদ্ভবনম্, শ্যামবাজার ব্রীজরোড, কলিকাতা।

মুদ্রণস্থান—সিদ্ধেশ্বরপ্রেস, ২৮ নন্দকুমারচৌধুরী সেকেণ্ডলেন, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकीये फाल्गुने
March, 1925.

Reg. No. C 1073.

७म वर्षस्य ११श संख्या
Vol. VII. No. 11

"भारत भातु भारती"

संस्कृतसाहित्यपरिषत्
श्यामबाजार, कलिकाता।

सबहुमानमावेदनम्—

आगामिनि सौरचैत्रस्य १०म दिवसे मङ्गलवासरे सायं षष्ठहोरायां परिषदो मासिकाधिवेशनं भविता। भवतामुपस्थितिः प्रार्थ्यते। इति

श्रीपशुपतिनाथशास्त्रिणः
श्रीगोष्पतिकाव्यतीर्थस्य
सम्पादकयोः।

कार्य्यावली—

१। परिषत्सदस्यानां श्रीमत्प्रभातचन्द्रकाव्यतीर्थ एम, ए, महोदयानां 'पिएच्, डि' इत्युपाधिप्राप्तौ तथा श्रीमद् रमाप्रसादचन्द वि, ए—श्रीमद् बदरीदासगोयेन्का वि, ए महोदयानां 'रायबाहादुर' इत्युपाधिप्राप्तौ अभिनन्दनम्।

२। न्यायशास्त्रीयो विचारः

वादिनौ { श्रीमत् कृष्णप्रसन्नतर्कवागीशः
श्रीमद् अनन्तकुमारतर्कतीर्थः }

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६
फाल
Marc

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ—
महामहोपाध्याय—श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च
सहकारिसम्पादकः—
काव्य-सांख्य-पुराणतीर्थ—श्रीदुर्गामोहनभट्टाचार्य्य एम, ए ।

नतिमञ्जरी	४०१	गुरुशिष्यसंवादः	४२१
आस्तिकनास्तिकदर्शनविवेकः	४०९	न्यायतत्त्वसमालोचनम्	४२८
गोपीनां वस्त्रहरणम्	४१२	जीवनालेख्यकम्	४३४
परिषदि शैलकरवः	४१७	सन्देशाः	४३९

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थितैः सताम् ॥

छात्र पुस्तकालय, निवेदिता लेन, बागबाजार, कलिकाता
अध्यक्ष—श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।



স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এককথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ✓০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্র নাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদেব গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

২৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामहोपाध्याय कविराज श्रीयुक्त गणनाथ सेन सरस्वती
एम्‌ए, एल्‌ एम्‌ एस्‌, महाशयस्य ग्रन्थाः

प्रत्यक्षशारीरम्‌

वेदादिशास्त्राणि प्रमाणीकृत्य, आयुर्वेदोदधिमन्थनदण्डायमानानां चरकसुश्रुतवाग्भटप्रभृतीनां संहिताग्रन्थेभ्यः, भोजसंहितादिशल्यतन्त्रोयं ग्रन्थेभ्यश्च संकलय्य, मीमांसागमनयसिद्धैः व्याख्यानैः सार्द्धं ग्रथितानि प्रमाणानीह अभिनवे ग्रन्थे। स्वहस्तकृतशवच्छेदैः ग्रन्थकारेणेह पाण्डित्यप्रकर्षलब्धशास्त्रतथ्यानि ऋषिसम्मताभिः परिभाषाभिः सरलया संस्कृतया गिरा संक्षेपेण उपन्यस्तानि। बहूनाञ्चित्राणां समावेशात्‌ ग्रन्थोयमभिनवतरसुपयोगित्वबाहुल्यमादधानो वर्त्तते। मुम्बयी-मद्रासानन्तशयन (Travancore) पिलभितेन्द्रप्रस्थ लवपुर-कलिकाता प्रभृतिषु नगरेषु प्रतिष्ठितानां सर्वेषामेव आयुर्वेदविद्यालयानां पाठ्यरूपेण निर्दिष्टोऽयं ग्रन्थः।

भागत्रयेण संविभक्तोऽयं ग्रन्थः। प्रथमे भागे शारीरोपक्रमणिका शारीरपरिभाषा, अस्थिसन्धिस्नायूनां परिज्ञानञ्च; द्वितीये—पेशी-शिरा,-धमनी,-रसायनी हृदयफुप्फुसामाशयप्लीहायकृद्वृक्कादीनां वर्णनानि; तृतीये च मस्तिष्कसुषुम्नाकाण्डसंज्ञावह-चेष्टावह-नाड़ी-गण पञ्चेन्द्रियप्रभृतीनां वर्णनविज्ञानानि सन्यस्तानि।

प्रकाशिता खलु तृतीयावृत्तिर्बहुतथ्यसमन्वागतेनोपद्घातेन अपरेण च ग्रन्थभूतेन समन्विता। प्रथमभागस्य मूल्यं पञ्चरूप्यकाणि, छात्राणां कृते चत्वारिरूप्यकाणि प्रेरणव्ययः आनकसप्तकम्‌। द्वितीयभागोऽपि सम्प्रति प्रकाशितः मूल्यं षड्रूप्यकाणि, छात्राणां पञ्चरूप्यकाणि।

सिद्धान्तनिदानम्‌

स्वप्रणीतया प्राञ्जलया टीकया समलङ्कृतम्‌

रोगविज्ञानविषयकः सचित्रो ग्रन्थः। छात्रान्‌ अध्यापयन्‌ माधवनिदानस्य त्रुटीः संलक्ष्य, चरकसौश्रुतादिभ्यो ग्रन्थेभ्यः त्रिदोषतत्त्वानि, रोगज्ञानतत्त्वानि अन्यानि च बहूनि आयुर्वेदतथ्यानि सन्देहरहितानि कृत्वा निवद्धवानिमं ग्रन्थं ग्रन्थकारमहोदयः। सन्ति चात्र ऋषिविज्ञानसम्मतानि। ग्रन्थोयं भागत्रयेण विभक्तः। अपरौ यन्त्रस्थौ मूल्यं प्रत्येकं रूप्यकद्वयम्‌, छात्राणां सार्द्धैकरूप्यकम्‌।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

বঙ্গ, বিহার, উড়িষ্যা, মান্দ্রাজ, পাঞ্জাব, মাড়বার, নেপাল, ইন্দোর, কাশ্মীর, শিলং, লঙ্কাদ্বীপ, বোগদাদ্, সিঙ্গাপুর, বোম্বে, বেনারস্, এলাহাবাদ, রাজপুতনা, রেঙ্গুন, মালাবার প্রভৃতি স্থানের বিশিষ্ট খ্যাতনামা ব্যক্তিগণের একমাত্র বিশ্বাসভাজন সুপরিচিত ও সমাদৃত এবং হাইকোর্টের জজ, একাউন্টেন্ট জেনারেল, গভর্ণমেণ্ট প্লীডার ও নবাব, রাজা, জমিদার মহোদয়গণের ও দেশমান্য নেতৃবৃন্দের অসংখ্য অযাচিত উচ্চ প্রশংসাপত্রপ্রাপ্ত ও পৃষ্ঠপোষিত

ভারতের সর্ব্ববৃহৎ

"জ্যোতিষ-গণনা কার্য্যালয়।"

এই স্থানে জ্যোতিষ-সম্বন্ধীয় যাবতীয় বিষয়ের (কোষ্ঠি, ঠিকুজী প্রস্তুত ও বর্ষফল, মাসফল, গ্রহস্ফুট, বলগণনা, আয়ুর্দ্দায়, যোটকবিচার এবং পুরাতন কোষ্ঠী বিচার ও সর্ব্বপ্রকার প্রশ্নগণনাদির) জন্য টিকেটসহ পত্র লিখুন। জ্যোতিষ-গ্রন্থাবলী—হাতদেখা বা সামুদ্রিকরহস্য মূল্য ১৲। জ্যোতিষ-শিক্ষা (১ম খণ্ড) ২৲। স্বপ্নদর্শনের শুভাশুভ ও জ্যেষ্ঠী [টিকটিকী] পতন স্পন্দন ফল সমন্বিত স্বপ্নফল বিজ্ঞান [দৃষ্টান্তসহ] ৪র্থ সঃ মূল্য ৷৵০, ঐ হিন্দি স্বপ্নফল মূল্য ৷০, নারীজাতক বা স্ত্রীলোকের অদৃষ্ট বিচার মূল্য ৳০, বৃহজ্জ্যোতিষ-সংগ্রহ বা জ্যোতিষ গ্রন্থাবলী, (বৃহজ্জাতক, কোষ্ঠী প্রদীপ, জাতক চন্দ্রিকা, শুদ্ধি দীপিকা, নারদ সংহিতা, ভরদ্বাজসংহিতা, যাজ্ঞবল্ক্যসংহিতা, গৌতমসংহিতা, ব্যাসসংহিতা, কশ্যপসংহিতা, পরাশরসংহিতা, জৈমিনীসূত্র, জ্যোতিস্তত্ত্ব, নির্ণয়সিন্ধু, সংকৃতা মুক্তাবলী, সর্ব্বার্থ চিন্তামণি, রত্নাবলী, ব্যবহার নির্ণয় রাজমার্ত্তণ্ড প্রভৃতি বিবিধ জ্যোতিষ গ্রন্থ অবলম্বনে সঙ্কলিত,) ৫৲, অদৃষ্ট বিচার ৷০, জ্ঞানযোগ ১৷০, বরাহ-মিহির ও খনার বচন ৷০, সংসার ।৵০, সানুবাদ লঘুপ্রশ্নসার সংগ্রহ ৷০, সানুবাদ তাজিক প্রশ্নগণনা ১৲ হংসচক্র ৷০। ইত্যাদি তন্ত্র, মন্ত্র, ধর্ম্ম এবং জ্যোতিষ সম্বন্ধীয় বহু পুস্তক এইস্থানে পাওয়া যায়।

সম্পাদক ও প্রেসিডেন্ট জ্যোতির্ব্বিদ্ পণ্ডিত—

শ্রীবসন্তকুমার ভট্টাচার্য্য জ্যোতির্ভূষণ

জ্যোতির্ব্বিদ্যারত্ন, তত্ত্বভারতী, বিদ্যাভূষণ, এফ্, টি, এস্।

অল্ইণ্ডিয়া এষ্ট্রোলজিকেল্ এণ্ড এষ্ট্রোনমিকেল্ সোসাইটী,

৩৭০ নং অপার চিৎপুর রোড, জোড়াসাঁকো,

কলিকাতা।

ব্যাঙ্কার্স :— বেঙ্গল ন্যাশনাল ব্যাঙ্ক লিমিটেড।

টেলিগ্রাফিক ঠিকানা :— "এষ্ট্রোলজার" কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्यपरिषत्-पत्रिका



स्वर्गत-महामहोपाध्याय-रामनाथ सिद्धान्त पञ्चानन:

कोटालीपाड़ा, फरिदपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४६ शकीये फाल्गुने, ७म-वर्षस्य ११श-संख्या

मतिमञ्जरी

संस्कृतमहासम्मेलनम्—अयि भोः पाठकमहाभागाः, जानन्त्येव सविशेषं भवन्तो यत् अस्य भारतवर्षस्य संस्कृतशास्त्रादि-समुत्कर्ष एव मूलं सर्व्वोन्नतीनामिति ; तदिदं यावदतिरोहितमभूत् तत्त्वमनुवीक्षमाणानां केषाञ्चित् पण्डितमुख्यानाम्, तावदेव ते भव्योपदेशिन्याः संस्कृतभाषायाः समुन्नतये 'निखिलभारतवर्षीय-संस्कृतमहासम्मेलनं' नाम काञ्चन संस्कृतमहापरिषदं समयोजयन्, यत्र किल नानादेशीयविदुषां सम्मेलनादिना बहूनि गभीरतत्त्वादीनि समुन्मेषितानि सुतरां समुत्कर्षमापादयितुमर्हन्ति सुरसरस्वत्याः। तस्या महापरिषदः प्रथमः प्रादुर्भावः किल पुण्यक्षेत्रे श्रीहरिद्वारे यत्र प्रथमतः प्रवर्त्तमाना सुरतरङ्गिनी पूतप्रवाहा पावयामास सकलमेव महीतलं पूततरङ्गैः। द्वितीयमधिवेशनमपि तस्यास्तत्रैव, तृतीयं श्रीमथुरापुर्य्यां, चतुर्थं लवपुरे, पञ्चमं श्रीप्रयागे, षष्ठञ्च मद्रासप्रान्ते समभूवन्। श्रावं श्रावं तस्या महापरिषदो वृत्तान्तान् भारतीय-विपश्चितः प्राचीनशास्त्रव्यवसायिनश्च सनातनधर्म्मानुरागपरायणाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्व्वे एव भाविभव्यानि परिकल्पयन्तः शान्तिमनन्तामन्तरे सम्प्राप्तवन्तः। कतिचन सुतरामुत्साहशालिनः प्रियविज्ञानाः सुदूरादपि समेत्य तत्र तत्र विज्ञानफलदानादानैः संस्कृतशास्त्रादीनां महोन्नतिमार्गमुददीपयन्। नास्ति सम्प्रति तथा कश्चन पन्था विपश्चितां यं द्वारीकृत्य दूरमधिवसन्तः परस्परं मिलिताः सन्तः शास्त्रेषु स्वां निपुणतां प्रकाशयितुमलं भवन्ति, यत्र चैकत्र सङ्गत्य किञ्चित् नवीनं श्रावयितुञ्च श्रोतुञ्च समर्था विद्यायाः साफल्यमुन्नतिञ्च कर्त्तुं समर्थायन्ते। तस्यैव विषयस्य द्वारमिदं यदिदं संस्कृतसाहित्यमहासम्मेलनं नाम इत्येव वाणी प्राचरत् पण्डितसमाजेषु। अथ

कलिकातामहानगर्य्यां सप्तमाधिवेशनीयम्: कलिकातामहानगरप्रान्तीयः पण्डितसमाजो गौरवेण तस्याः परिषदः सप्तममधिवेशनं कलिकातामहानगर्य्यां सुसम्पादयितुकामः समवर्त्तत। तदा खलु केषाञ्चन महानुभावानां लब्धवर्णानां विदुषां समवातरत् सुमहान् वाचिकः समुद्यमः, यदवतारेण नितरामाशान्विताः समभूवन् सम्भावितसुरभारतीसमुत्कर्षाः प्राच्यविद्यालब्धकीर्त्तयो महाविद्वांसः। प्रतिष्ठिता नातिचिरमेव काचित् प्रबन्धकारिणी परिषत्, संवृत्तश्च भूयान् महासम्मेलनकर्त्तव्यार्थविवेकः, मुद्रापिताश्च कर्म्मपद्धतयः। प्रतिदिशं प्रतिष्ठमाना दूराद्दूरतराच्च प्रदेशसमवायात् आहर्त्तुकामाः पण्डितमहत्तमान् परिषदो महदेव भाविभव्यं समुपादिशन्। प्रबन्धकारिण्यां परिषदि प्रवेशमतिसुकृतफलं सम्भावयन्तः केचन विनिवृत्तकर्म्मान्तरा ददृशिरे। तत्र कथञ्चिदात्मप्रवेशमलब्धवन्तः सुतरां विषसान्तःकरणा बहिः परिषदो दोषप्रकाशकृत्ये विनियुक्ता अभूवन्। केषाञ्चिदेव निपुणमतीनामात्मकीर्त्तिविस्तारोपाय एष इत्यत्र प्रभूतनामसमलङ्कृतं पण्डितानामामन्त्रणपत्रमेव परं निदर्शनपदं प्रपेदे। सन्देहश्च प्रथमतः प्रभृत्येव समवतीर्णो यथायमुद्यमः शुभोदर्को नवेति। सम्मेलन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादनाय अपेक्षितानां प्रभूतद्रव्याणां संग्रहाय प्रबन्धकारिणामेव परिषदि समाकारिताः केचन प्रभूतद्रव्यभाजो महीभुजः प्रथितनामानश्च लक्ष्मीवन्तः, येषामेकमात्रेणापि सम्पादयितुं शक्यं तादृशं महासम्मेलनं नाम। परं परस्परमपेक्षमाणेषु तेषु स्वल्प एव प्रयत्नस्तेषामुदवोच्यत तत्सम्पादनेष्विति मन्त्रिप्रभृतीनामर्थसंग्रहार्थं समन्ततः प्रचारः समदृश्यत। कालनियममनपेक्षमाणा एव प्रबन्धकारिण्याः सभाया मन्त्रिप्रभृतयो मारुतरथमङ्गीकुर्व्वाणाः सम्भाव्य सम्भाव्य बहूनां द्रव्यवतां भवनमासीदन्तः कथञ्चिदेव कियन्ति द्रव्याणि समासेदुः, आवश्यकतया च मारुतरथसारथिवेतनं तत एव सुबहु वितीर्णवन्तः। कति वा पत्त्रमुद्रापणाय व्ययं गतानि, कति वा कर्म्मलेखकविनियोगेन निःशेषीकृतानि, कतिचिच्च वृत्तस्यास्य समन्ततः प्रचारणार्थं चयितानि द्रव्याण्यभूवन्। एवं स्थितेऽपि सञ्चितद्रव्यचये बहुलेनैव प्रयत्नेन पुनः पुनरेव संगृहीता ह्यर्थाः सम्मेलनस्य भवितव्यतामनुरुन्धते स्म। अथापि महासम्मेलने पठितव्यानां निबन्धानां समुत्कर्षविचारेण पत्त्रैर्विघोषिताणां पारितोषिकाणामधिगमकामनया प्रेषिताः खल्वसंख्याता निबन्धा नानाप्रदेशीयैः, महासम्मेलनव्यवस्थागारमंशतो निरवकाशतामाससाद निरुक्तनिबन्धपत्त्रैः। नानाप्रदेशीया एव विपश्चितः परमोत्साहसम्पन्नाः कलिकातानगरीमदृष्टपूर्व्वां द्रष्टुं वा तथाविधसम्भाव्यगुणातिशयपण्डितसमाजसम्मेलनानुभवसुखैषणया वा कारणान्तरेण वा नातिचिरमेव कलिकातामहानगरीमभिगन्तुकामाः समश्रूयन्त; दरिद्राणामपि पण्डितानामामन्त्रणपत्त्रे पाथेयव्ययप्रापणविज्ञापनं विशेषतस्तदनुकूलतामाशिश्रायेति को वात्र वचनावसरः? कर्म्मान्तरमनतिपात्यमपि न तेषां तदानीमन्तरायतामधिचकार तदभिप्राये।

अथैवं सम्प्रतिपन्ने कतिपयैरेव प्रबन्धकारिसमितिसम्बन्धिभि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महासम्मेलनानुकूलकृत्यसम्मर्द्दे, सुदूरादपि समुत्साहेन महासम्मेलनसुखमनुभवितुं समागच्छत्सु विद्वद्वृन्देषु इदमित्थमिति महासम्मेलनसमाचारं प्रचारयत्सु नानादेशीयपत्रिकाप्रचयेषु सहसैव समुदचरद् वृत्तान्तो यथा कारणान्तरमनतिपात्यमोदृशमास्ते येन तथा कृतप्रबन्धमपि महासम्मेलनाधिवेशनं न तदानीं कथञ्चित् सम्भवितुमर्हतीति। हा हन्त ! शान्ता खल्वकस्मादेव केषाञ्चन सुखमयो कल्पना, विपर्य्यस्तः सहसैव समुत्साहिनामसाधारणः कर्म्मोद्यमः, नितरां लज्जिता व्यजायन्त स्वनामसमर्पणेन प्रतिदिशमामन्त्रणपत्रिकाविनियोक्तारः, समुपरराम राजमार्गे महासम्मेलनसम्बन्धिमारुतरथनिर्घोषः। सम्प्राप्तश्च भूताविष्टानामिव कतिपयकर्म्मिणामनतिपात्यकर्म्मान्तरावसरः। इतस्तु महासम्मेलनसमुत्साहिनो ये केचिदपरप्रान्तीयाः कलिकातामहानगरोमभिलक्ष्य पूर्व्वमेव प्रस्थिताः, ये च तदानीं तां सम्मेलनपरिस्थितिमजानन्तः पथि समवतीर्णास्ते कलिकातामहानगरोमागत्य यदैव वृत्तान्तमेनमधिगतवन्तः, परं किमत्र कारणमिति बहुलमन्विष्यापि नोपलेभिरे, तदा कृतिरियमव्यवस्थितचेतसामित्यवधार्य्य यथागतमेव प्रतिगन्तुकामाः समभवन्। तेषु च ये निःस्वाः पाथेयं महासम्मेलनात् प्राप्तव्यमिति कृत्वैव समायातास्तैः सम्मेलनप्रबन्धकारिसमितिमन्त्रिणः साक्षात्कृत्य स्वं स्वं पाथेयं सम्प्रार्थिताः, परं नानाविधेन वैगुण्येन नावर्त्तत तेषां यथाभिलाषः फललाभः।

तत्र महाविघ्नसम्वलनम्।

तेषां सम्मेलनव्याघातदुःखं तथा नातिविषममासीत्, यथा निःस्वतामूलं प्रचुरपाथेयव्ययदुःखम्। ये तु समुपेक्षया पाथेयप्रार्थनादैन्यं नाङ्गीकृतवन्तः, तेषामपि निरर्थकप्रभूतद्रव्यक्षयजनितं दुःखमासोदेवेति निःसंशयं वयं जानीमः। आदौ य एव सम्मेलनसम्बन्धिनां सर्व्वकर्म्मणां विज्ञातारः साग्रहमेव व्यापारमनवयवशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादयितुमग्रेसराः, त एव तदानीं तथा माध्यस्थ्यवन्तो दृष्टाः, येन जना मन्येरन्, यथा संमेलनव्यापारनामापि नैतेषां विदितमिति। एवमासन्ने महति संमेलनविकारे प्रतिक्षणमेव नः समभून्मनसि यथा कीदृशं तत् कारणान्तरं येन नितरां प्रवृत्तेऽपि तथा प्रभूतप्रबन्धे प्रतिरुद्धमभूत् संमेलनं नाम? अन्विष्यान्विष्य परिज्ञातञ्चेदं यथा प्रबन्धकारिण्यां परिषदि प्रविष्टानां केषाञ्चन पदगौरवादिकमधिकृत्य समुत्पन्नः कलिरेव प्रतिरोद्धा तस्य हितोपयुक्तव्यापारस्येति। एवं क्रमेण विलुप्यते स्म कलिकातामहानगर्य्याः संमेलनसम्पादनसौभाग्यमिति विदितमेव मनस्विनाम्।

यदा तावदनन्तरम् अग्रवणे (आग्रानगरे) प्रयुक्तमभूदस्यैव महासम्मेलनस्य अधिवेशनं, तदैव किञ्चित् साफल्यमनुभूतं प्रारम्भस्य।

सुसम्पादित-
मग्रवणीयाधिवेशनम्

तत्र ये ये वैदेशिकाः पण्डिताः समुपगतास्तेषां यथासम्भवं सम्मानादिप्रदर्शनेन तत्रत्यानामातिथेयताप्रकर्षेण च दिनत्रयमेव संमेलनकृत्यजातप्राशस्त्येन महानानन्दः किल समजनिष्ट तत्रोपनतानां विपश्चितामन्तःकरणेषु। प्रबन्धकारिण्याः सभायाः सुतरां नैपुण्येन स्वल्पविद्वज्जनेऽपि तस्मिन्नुदियाय महानेव विद्यामहोत्सवः। तत्र प्रत्यक्षमेव वयं दृष्टवन्तो हालिकजनानामपि तत्रत्यानां बहुलं शुभाध्यवसायम्। प्रतिमार्गं प्रतिगेहञ्च सर्व्वेषामुपालक्ष्यत कृतार्थताविज्ञानं यदिदं संस्कृतसाहित्यमहासंमेलनं तस्मिन् नगरे सम्पद्यत इति। स्वेच्छासेवकाः प्रतिपदमटन्तः सर्व्वतः सौकर्य्यमुदपादयन्नभ्यागतानां, द्रष्टव्यार्थेषु कौतूहलनिवर्त्तनाय सहैव ते निरन्तरमवातिष्ठन्त वैदेशिकानाम्। तत्र हि भूरिभावगहनानां निबन्धानां श्रावणेन सदर्थगम्भीरमधुराणां संस्कृतगिरामुपहारेण सुललितकवितावाणीवितरणेन शास्त्राद्युपकारककर्त्तव्यार्थविनिर्णयेन तथा माननीयानां महामहोपाध्यायश्रीहरनारायणशास्त्रिपादानां संमेलनाध्यक्षभूतानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ललितभावभाषासुभगपद्यमयसदुपदेशनिबन्धसम्बन्धेन कियदेव गौरवं समुत्पन्नमिति प्रत्यक्षदर्शन एव प्रमाणम्। वस्तुगतिः पर्य्यालोच्यते चेत्, तत्रैव परस्परसंवादादिभिः शास्त्रीयतत्त्वादिसमुन्मेषणस्य नानादेशीयविद्वत्समाजेषु गभीरसौहार्द्दादेश्च महता सौकर्य्येण सार्थकं महासंमेलनमिति तत्रैव दृष्टो मन्त्रिमुख्यानामनितरसाधारणो गुणपर्य्यायः।

अथ सत्यपि झालोवारनरपतीनां सभापण्डितैरग्रसरणसंमेलनमुपागतैः कृते तदनन्तराधिवेशनामन्त्रणे वाराणसीतो मालव्यमहाभागानामामन्त्रणमधिगत्य तत्रैव संस्कृतविद्याया महद् गौरवादिकं सम्भाव्य तदेवामन्त्रणमङ्गीकृतमनन्तराधिवेशनार्थं संमेलनेन। गते च मालव्यमहाभागानां नानाविधकृत्यजातैः सुचिरे काले यावद् वाराणस्यां हिन्दुमहासभायाः समयः प्राप्तः, तावत्तस्या एव स्वल्पाङ्गतया प्रवर्त्तितं संस्कृतसंमेलनाधिवेशनं तदधिकृतैः पण्डितमहाभागैः। न जानीमहे पुनः कीदृशस्तेषामभिप्रायः ? प्रथमतः सुनिष्पन्ने हिन्दुमहासभावृत्तान्ते सुचिरं वचनप्रपञ्चादिभिः क्षीणशक्तौ सति कतिपये पण्डितसम्प्रदाये, परिक्लान्तेषु मालवीयानुवर्त्तनमपेक्षमाणेषु हिन्दुमहासभाव्यापारपरम्परया संमेलनमन्त्रिमुख्यादिषु, कथमपि नियमरक्षणार्थमिव प्रवर्त्तितो महासंमेलनव्यापारः। तत्र च नियमतो दिनत्रयेण निर्व्वाह्योऽपि तस्मिन् महोत्सवे मालव्यमहाभागानामभिप्राय आसीत् यथा एकेनैव दिवसेन सर्व्वं कर्म्म सम्पाद्यतामिति, परं नेदमपरेषामनुमतं सर्व्वेषामिति तत्र नालं स्वमतं ते प्रतिष्ठापयितुम्। परं संस्कृतमहासंमेलनव्यापारस्तत्र प्रधानरूपकाभिनयानन्तरं प्रहसनमिव सर्व्वेषां बोधविषयतामयासीत्। वस्तुतो वाराणस्यां संस्कृतमहासंमेलनस्य तथा वैरूप्यं न वयं

षष्टेऽधिवेशने वाराणस्यां संस्कृतमहासम्मेलनस्य सुदुर्गतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमपि सम्भावयितुमर्हामः। परं तथा प्रत्यक्षतो दृष्टमित्येव तत्र विश्वसिमः।

अन्यतस्तु—ये तत्र वाराणस्यां महासंमेलनामन्त्रिताः समम्मिलन्, ते के वा, कुतस्त्या वा, किमर्थमागता वा इत्येव खल्वविदितं संमेलनमन्त्रिप्रभृतीनां, ते तु तदानीं हिन्दुमहासभासम्बन्धसौभाग्यमनुभवन्तो निजं भाविभव्यमनुकूलयन्ति, नैव च स्मरन्त्यपि नातिचिरं प्रवर्त्तमानस्य संस्कृतमहासंमेलनस्य। दूरदेशात् समागतास्तु कथञ्चिदेव यत्र तत्र यथा तथा समवतिष्ठमानाः संस्कृतमहासंमेलनार्थमेव स्वमागमनं फलवद् विधातुमुदोचाञ्चक्रिरे। यदा च प्रथमदिने संमेलनाधिवेशनवार्त्ता समवर्त्तत, तदापि तत्रैव सभामण्डपे हिन्दुमहासभाधिवेशनमसमाप्तमुपलभ्य संस्कृतमहासंमेलनमुद्दिश्य प्राप्ताः विद्वांसः किं वा कुर्व्वन्तु ? अनायत्या केचन मण्डपाद् वहिः शय्यासने वा धूलितले वा समुपविशन्तः पादचारेण वा भ्रमन्त एव कालमत्यपातयन्, अहो सम्मानः पण्डितमहत्तमानाम्, अहो सौभाग्यधारा कालेन महोन्नतं पटमारूढवत्याः सुरसरस्वत्याः, अहो सुफलं भारतवर्षसुकृतानाम्! यथैव धनिकभवनेषु श्राद्धादिमहोत्सवे किञ्चिदर्थकामनया भैक्ष्यवृत्तयो दीना धनिकभवनाद् वहिरेव कथञ्चिदवतिष्ठमाना विलोक्यन्ते, तथैव दृष्टस्तदानीं हिन्दुमहासभाव्यापारे प्रवृत्ते यथाकालमागतानां पण्डितमहत्तमानामवस्थापात इति किमतः परमपि शोच्यं स्यात्। यदि तावदीदृशमेव हृदयमासीत्तत्रत्यानां प्रभूणां तदा कथं वा समामन्त्रितास्ते ते महान्तो बहुशास्त्रपारदृश्वानो, येषामसाधारणगौरववशादद्यापि भारतवर्षं प्राचीनकालमनुस्मारयति, सम्प्रथते च सुतरामेव देशान्तरेभ्यः ?

अपिच वाराणसेयानां प्रथितमहिम्नां भूयसामेव सुविदुषां नोपलब्धश्चरणरजःपातः संमेलनाधिवेशनमण्डपे। वाराणस्यां प्रवृत्ते संस्कृतसाहित्यमहासंमेलने यदि न तेषामेव समुपलम्भस्तदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीदृशं तस्य साफल्यमिति नो वयं विद्मः। तदेतद् वयमवधारयामो यत् वाराणसीसदृशे महानगरे संमिलनप्रबन्धादिसम्भावनायामादौ तत्रत्यैः सुविद्वद्भिश्च प्रथिताभिधानैश्च मन्त्रिमुख्यानां संवादादिरपेच्यते, येन तत्र तत्साफल्यं दत्तहस्तावलम्बं भवेत्, अन्यथा केवलमेकमुपजीव्य प्रवर्त्तमानस्य स्वल्पमात्रे फले सम्भवत्यपि महतः फलस्य नाप्नोति। श्रूयते इतः परं कर्णपुरे महासंमिलनसम्बन्धो भविष्यतीति, इदमपि श्रूयते यथा तत्रैव राष्ट्रमहासमितिरप्यागामिवत्सरे सम्पत्स्यते।

कर्णपुरे सम्भाव्यं नवमाधिवेशनम्

तदिदं संमिलनाधिवेशनं यदि पुनस्तया सह योजितं भवेत्, तदैव वाराणसीवत् संमेलनसौष्ठवं सुतरामुद्दीप्तं स्यात्, भवतु पश्यामस्तावत्।

बहुतिथः कालः खलु दृष्टायाः संमेलनमुखपत्रिकायाः पाठ्यग्रन्थनियमावलीपर्य्यायानाञ्च, तत् सर्व्वमिदानीमतिशयेन तिरोहितमस्तीति सविषादमावेदयामः। अपि कृतार्था इव मन्त्रिमहाभागा नातिचिरं परिश्रमेणैव। यदि साम्प्रतम् अन्तरान्तरा कथञ्चिदधिवेशनकृत्यसम्पादनमन्तरेण नास्त्यस्य महासंमेलनस्य कर्त्तव्यं तदा तदेव यथा समीचीनतरं सम्पद्यते, तथा प्रयत्नः कार्य्यते किलास्माभिः प्रधानमन्त्रिपदमारूढ़ाणाम्। तत्र संमेलनकृत्याङ्गेषु यद् यदेव विगुणं भवेत्, तत्र सर्व्वत्रैव दोषः समापतेत् अमीषामेव। यदि कापिलस्य पुरुषस्येव साक्षित्वं नाममात्रतः पर्य्याप्तं भवेत्, तदा किमिति लौकिकनामपरिग्रहेण, परिगृह्यतां तर्हि मन्त्रिपदे परमेश्वरस्यैव संज्ञा, यस्य समुत्कर्षे विप्रतिपत्तिलेशोऽपि नावतीर्णः स्यादिति वदन्तः कथमस्माभिः प्रतिरोद्धव्याः ?

संस्कृतमहासंमिलनमस्माकमतिप्रियं वस्तु, प्रायेणास्माभिस्तदीयमनुध्यानं कुर्व्वद्भिरल्पेनापि तदपकर्षेण परितप्यत इत्येव तदधिकृत्य तावतां वचनानामवतारः कृतः। यदपि तत्र मन्त्रिमुख्याः सुतरामस्माभिः साक्रोशमनुयुक्ताः, तदप्यनायत्यैव, त एव विभावयन्तु यथा कस्य वा अन्यस्य वयं संमेलनहितार्थं निवेदयेम इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्तिकनास्तिकदर्शनविवेकः

(पूर्व्वतोऽनुवृत्तः)

लेखकः—श्रीहरिपदकाव्यमीमांसास्मृतितीर्थः

अनुक्षणविनाशिनः कर्म्मणः कथं फलोत्पत्तिरितिचेत्, तत्रैवमुत्तरं—श्रुतिबलेन यथायं कर्म्मफलसम्बन्धः श्रुत उपपद्यते, तथा कल्पयितव्यः। न ह्यनुत्पाद्य किमप्यपूर्व्वं कर्म्म विनश्यत् कालान्तरितं फलं दातुं शक्नोति, अतः कर्म्मणो वा सूक्ष्मा काचिदुत्तरावस्था, फलस्य वा पूर्व्वावस्था अपूर्व्वाभिधेयास्तीत्यनुमीयते। विधिस्तावदुपदेश एव,—यथोक्तं "तस्य ज्ञानमुपदेश" इति। उपदेशश्च नियोज्यप्रयोजने कर्म्मणि लोकशास्त्रयोः प्रसिद्धः। यथा "निरामयकामो जीर्णे भुञ्जीत" "एष सुपन्था, गच्छतु भवाननेन" इत्यादि। अस्य च उपदेशस्य नियोज्यप्रयोजनव्यापारविषयत्वमनुष्ठात्रपेक्षितानुकूलव्यापारगोचरत्वमेव। एवञ्च "स्वर्गकामो यजेत" इत्यादिषु स्वर्गकामादेः समीहितोपाया गम्यन्ते यागादयः। तस्माद् विधिविषयभावोपगमाद् यागः स्वर्गस्योत्पादक इति सिद्धम्। "विधाने चानुवादे च यागः करणमिष्यते" इति न्यायात् स्वर्गादिफलं प्रति यागस्यैव साधनत्वं स्पष्टमवगम्यते, तदेव निर्व्वाहयितुं तस्यैवावान्तरव्यापारो भवति। न च व्यापारवति सत्येव व्यापारो, नासतीति समीचीनम्। असत्स्वप्याग्नेयादिषु तदुत्पत्त्यपूर्व्वाणां परमापूर्व्वे जनयितव्ये तदवान्तरव्यापारत्वात्; असत्यपि च तैलपानकर्म्मणि, तेन पुष्टौ कर्त्तव्यायामन्तरा तैलपरिणामभेदानां तदवान्तरव्यापारत्वात्। तस्मात् कर्म्मकार्य्यमपूर्वं कर्म्मणा फले कर्त्तव्ये तदवान्तरव्यापार इति युक्तम्। कर्त्तरि हर्त्तरि फलप्रदातरि च सदसत्फलानां विद्यमाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईश्वरे कथं वा धर्म्मकर्म्मादरः ? नहि भवने भोज्यजाते प्राप्ते, कोऽपि द्रव्यजातं पणितुमापणे धावति। अतो धर्म्माधर्म्मकर्म्म-परिपाकादेव शुभाशुभफलनिष्पत्तिर्नाकस्मिकीति सर्व्वमवदातम्। "कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः" इति गीतावचनवलेन च कर्म्म एव शुभाशुभनिदानम्। किञ्च "अपाम सोममसृता अभूम" "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिश्रुतिवाक्य-बलेन च तदाचरणपराः क्रतुफलमनुसन्दधाना भवन्तीति सर्वथा कर्म्म-वाद एवात्राभिप्रेतः। भट्टमते नित्यसुखाभिव्यक्तिर्मुक्तिरिति तु सिद्धान्तः। एतेषां मीमांसकानां अश्वमेधेन यजेतेति विधिवाक्यानुसारेणानुष्ठीय-मानं क्रतौ पशुघातनमवेक्ष्य बौद्धा निवृत्तिमार्गावलम्बिनः शून्यवाद-माश्रिषत। ते च "मा हिंस्यात् सर्व्वा भूतानि" इत्यादि हिंसा-निषेधपरैः श्रुतिवादैर्वैदिककर्म्मकलापमाकुलीकुर्व्वन्तः श्रोत्रियाणां श्रौतस्मार्त्ताचाररचितामरलोकनिलयानां मनसः क्षोभमाचरित-वन्तः। ते पुनश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। तेषां माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकसंज्ञाभिश्चतुर्द्धा विभागः कल्पितः। एतन्नामधेयाश्च यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यप्येषां भगवान् बुद्ध एक एवोपदेष्टा, तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यम्। यथा 'गतोऽस्तमर्क' इत्युक्ते जारचौरानूचानादयो यथेष्टं अभिसरण-स्तेन-सन्ध्यावन्दनादिसमयं बुध्यन्ते तथात्रापि। तत्र सौत्रान्तिक-वैभाषिकयोः पृथिव्यादिभूतचतुष्टयपरमाणुपुञ्ज एव बाह्यो घटपटाक-वह्निबाह्यादिः न तु ततोऽन्योऽवयवी, कृत्स्नञ्च जगत् क्षण एव स्यात् दीपज्वालासत्तावत्त्वाद्धेतोरित्येतत् सौत्रान्तिकवैभाषिकयोस्तुल्यम्। सौत्रान्तिकस्तु—'उत्पद्यमानं घटादि स्वाकारं विज्ञानेऽर्पयित्वा नश्यति। ततो विज्ञानगताकारेण विज्ञानात्मकेनातीतं घटाद्यनु-मीयते' इति वदति। वैभाषिकस्तु—विज्ञानस्यैव स्वविषयघटादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षत्वात् सर्वं प्रत्यक्षगम्यमिति मन्यते। अनयोः पक्षयोः स्कन्धा एवान्तरसंघातरूपेणावतिष्ठन्ते। रूपविज्ञानवेदनासंज्ञासंस्काराख्याः पञ्च स्कन्धाः। सन्मात्रं क्षणिकं कार्य्यदुःखमितिभावनायाः विशुद्ध-विज्ञानासन्तानापत्तिर्मोक्षः। क्षणिकदुःखात्मके कार्य्ये नित्यसुख-बुद्धिरविद्या, तया रागादिरुत्पद्यते। ततश्च संसारसु-भोगविलास-वासना प्रभवति। ततश्च कर्म्मवशेन शुभाशुभादृष्टमाविर्भवति। ततो विज्ञानात्मनो जीवस्य विज्ञानरूपो भोगरागो द्रव्ये वृत्तिभावः। ततः शरीरपरिग्रहः, ततो विषयविज्ञानसुखदुःखादिविषयेच्छा, तदुपादाने प्रवृत्तिस्ततो मनुष्यत्वाद्यभिमानजरामरणादीति पुनः पुनर्घटीवस्त्रवदितरेतरहेतुहेतुमद्भावत्वादनिशमेव संघातभावोपपत्ति-रिति प्रक्रिया। योगाचारस्तु—"सर्व्वमेव क्षणिकमिति ज्ञाते बाह्ये भ्रमज्ञानविषयोभूते नैरात्म्यभावनया बाह्यस्वरूपप्रवृत्तिविज्ञानात्म-कोपप्लवरहितस्यालयविज्ञानात्मकाहमर्थस्य—ईश्वराख्यसर्व्वज्ञविज्ञान-सन्तानान्तर्भावं मोक्षाख्यमिति निरनैषीत्। माध्यमिकः पुनश्चतुर्थो-ऽन्तेवासी भगवतो बुद्धस्य शून्यवादं निरधिष्ठानभ्रमासिद्धं चेतनाचेतनं जगत् क्षणिकं सर्वं व्यावहारिकं मिथ्यात्मकमिति भावनया शून्य-भावापत्तिरूपमोक्षसिद्धिरितिमतमाविश्चकार। ते तु भगवन्तं बुद्धदेवमेव सर्वज्ञपदेनाभिदधुः। यथा—"सर्वज्ञो जितरागादिदोष-स्त्रैलोक्यपूजितः। यथा स्थितार्थवादीच देवोऽर्हन् परमेश्वरः"॥ इति आप्तनिश्चयालङ्कारे चन्द्रसूरिणा उट्टङ्कितम्। परमकारुणिको भगवान् यद्यपि सर्वशून्यतामेव प्रतिपेदे, तथापि हीनमध्यमोत्तम-विनेयभेदात् एवं बहुधा प्रतिपत्तिः। तथाचोक्तम्—

"देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोके उपायैर्बहुभिः पुनः॥"

इतिभामतीधृतबोधिचित्तविवरणीयवचनमेव प्रमाणम्। तत्र-भवान् जीवं यातनाजीर्णमवेक्ष्य करुणापूरितान्तःकरणो जगतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखज्वालाहुतभुगुपशमनकृतमतिरेवं पर्य्यालोचयत्—यत् यावदेव संसाराभिमुखोभवामि, तावदेव दुःखमुत्तरोत्तरं वर्व्वर्द्धि, नास्ति किं किमप्यस्य प्रशमनोपकरणम्? संसारभावनया चेत् व्याप्तमेतद्दुःखं तदा तदभावभावना एवास्य निराकरणकारणमिति बहुकालमालोच्य सर्व्वमेव शून्यत्वेन भावयामास, ततश्च व्यापकाभावे व्याप्याभावः स्वाभाविक इति युक्तिं सारवतीमचीकरत्। नेति नेति, शून्यं शून्यं, क्षणिकं क्षणिकं, दुःखं दुःखं, स्वलक्षणं स्वलक्षणमित्यनुक्षणमभ्यासबलेन प्रवृत्तिनिवृत्त्योपायकं मनःसंकल्पमाकलयाञ्चकार। अतस्तेऽपि नास्तिककोटिष्वन्तर्भावमापिदिरे इति निर्विवादमेव।

(अवशिष्यते)

योगीन्द्रनाथविद्याचञ्चुविरचितं

गोपीनां वस्त्रहरणम्

अथ हृतवसनान्ते नीपशाखाधिरूढे
भगवति यदुनाथे पल्लवाच्छन्नकाये।
युवतिषु सलिलान्तर्मग्नदेहासु काचि-
द्धरिमकथयदुच्चैर्जानतो तस्य कार्य्यम्॥ १

चौराग्रणीर्वद कथं व्रजकामिनीनां
हृत्वा दुकूलपटलान् तटतस्तटिन्याः।
आश्रित्य नीपविटपं ह्यवतिष्ठसे त्वं
पत्रोच्चयावृततनुर्निभृतं किमेतत्॥ २

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रार्थाकुला वयमहो विरहात् पटानां
शीतार्त्तवेपथुमतो तनुरस्मदीया ।
स्थातुं न वा चणमिह प्रभवेम कृष्ण
स्थातुञ्च निर्धवतया पुलिने वतास्मिन् ॥ ३

किं नो निपीड्य बलवद् भवितासि धन्यो
लाभश्च कोऽत्र कुतुकिन् सुखमिष्टसिद्धिः ।
तत् साम्प्रतं विसृज नो वसनानि तूर्णं
नो साम्प्रतं व्यथयितुं प्रमदाः कदाचित् ॥ ४

लज्जावगुण्ठनमलं ह्यपसार्य्य नार्य्यः
प्राणांस्त्यजेयुरबलास्तृणवन्न लज्जाम् ।
चापल्यधार्ष्ण्यशठतापरता हि पुंसां
यादृक् तथा कुलभुवां नहि दृश्यतेऽस्मिन् ॥ ५

वस्त्रेषु दैन्यमिति चेत् तव जातमस्मिन्
पट्टांशुकानि शतशः प्रददाम तुभ्यम् ।
चौमञ्च पीतरुचिरं ननु रोचते यत्
तत्ते करस्थमचिराद् भविता हि नूनम् ॥ ६

चौर्य्यात्मकं यदिह ते सुजनैर्विनिन्द्यं
वृत्तन्तु तत् क इह वा बहुमन्यते हि ।
उद्घोषयेयुरचिराद् व्रजवासिनोऽमी
त्वद्यशःपटहमुच्चतरं विताड्य ॥ ७

प्रागेव योऽत्र कृतवान् व्रजनायिकाभी-
रासोत्सवं बहुविधं स्मरतृप्तिभाजम् ।
स त्वं निपीड़यसि नो वसनापहृत्या
कोऽयं तवाद्य रसिकेश्वर चित्तभावः ॥ ८

लज्जा दया भयमहो हृदि ते न जातं
कस्मादशिच्यत यदूद्वह धार्ष्ट्यमेतत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कंसाद्भयं न कुरुषे ? शृणु मे शुभोक्तिं
शीघ्रं समर्पय पटान् ननु कामिनीनाम् ॥ ९

भो भोः कुरङ्गनयनाः शृणुत प्रिया मे
उक्तं वचो बहुतरं विविधन्तु सत्यम्।
अस्योत्तरार्थमहमद्य वदामि किञ्चित्
तत् कारणञ्च भविता प्रकटीकृतं हि ॥ १०

अन्धाः समस्तजगतां निजदोषदृष्टौ
लोका अमी सुनिपुणाः पररन्ध्रलोके।
भव्येतरां दवयितुं बहुशो निषिद्धं
स्नानप्रथां विवसनाङ्गदृशां श्रुतं नो ॥ ११

सख्यो भणेयुरितिचेन्न भवांस्तु शास्ता
राज्ञां हि शासनमलं बहुमन्यतेऽस्मिन्।
राजाहमस्मि यदलं हृदि वो निविष्टुं
सिंहासने बहुतपःप्रकरार्हलभ्ये ॥ १२

राजत्वभाक् नरपतिर्नहि चौर्य्यवृत्ति
रेतद्वचो वदथ चेच्छृणुत प्रियास्तत्।
लोके नृपेतरजनाः सकला हि चौरा
दस्यूत्तमा नृपतयस्तदधीश्वराश्च ॥ १३

सत्त्वन्तु यत्र नहि यस्य स चेद्विनाज्ञां
तद्द्रव्यमेव हरते भुवि चौर्य्यमेतत्।
यूयन्तु पूर्वमसकृत् प्रणयानुरागात्।
स्वं जीवितं तरुणतां स्वतनूमदत्त ॥ १४

तद्वस्त्वनुस्थितविभूषणवास इत्थं
संगृह्णतो मम भवेन्नहि चौर्य्यदोषः !
नेष्टुर्य्यधार्ष्ट्यमिति चेद्धृदयस्य भावं
सम्यक् परीक्षितुमहं कृतवांस्तथैवम् ॥ १५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मां लब्धुमिच्छथ सदा मनसा हि यूयं
गोप्य: परं न सुलभं सविकारचित्तै: ।
कामादिदुर्ज्जयरिपुप्रवरर्जिताल्मा
मत्तो हि तिष्ठति जनो बहुदूरवर्त्ती ॥ १६

लज्जाधना युवतय: प्रवदन्ति सन्त
श्चेतोगतिप्रवणता मयि चेद्यथार्थम् ।
तत् केन वो मृगदृशां सविकारदुष्टा
लज्जा घृणा कृपणता मदमानयोगात् ॥ १७

यद्यन्तरं विनिहितं मयि गोपिकाभि
र्युष्माभिरेव सुखदु:खमयञ्च देहम् ।
न्यस्तं स्वजीवितमये प्रणयात् कथं वा
मत्सन्निधौ विकृतताश्रितलज्जितत्वम् ॥ १८

लज्जाभिमानमदमत्सरतादिभावा
स्तिष्ठन्ति यत्र हृदये पुरुषाबलानाम् ।
तस्मिन् भवेत् कथमहो स्थितयेऽवकाश:
पर्य्याप्त एव ललना मम तद् विचार्य्यम् । १९

क्लेशं विना क इह वा लभतेऽप्रकर्ष-
मुत्कृष्टवस्तु भुवने बहुयत्नलभ्यम् ।
हस्ताग्रमूर्द्धमसकृत् कलयन् शिशु: किं
नानाप्रयत्नसुलभं फलमाप्नुमर्ह: ॥ २०

योगाश्रया हि यतयो मयि सक्तचित्ता
भुक्त्वा च पर्णमरुतस्तपसे नयन्ति ।
कालं क्वचिद्धिमशिलाशिशिराप्सु मग्ना:
सर्व्वासु दिक्षु दहनं परिकीर्य्य ग्रीष्मे ॥ २१

आकर्ण्यतां शुभवचो मम साधुशीला
गौरी हरार्थमकरोद् यतिवत् सुदीर्घम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीव्रं तपो हिमवतः शिखरे यतात्मा
साध्यं न सिध्यति कदाचन कल्पनाभिः ॥ २२
का मे दया प्रतिपलं भुवनत्रयस्थान्
क्ष्मावारिजाम्बरचरान् निजभीमतुण्डे
सम्पात्य खादत इमान् बहुभिः किमुक्ते
र्जानन्ति मे सदयतां मधुकैटभाद्याः ॥ २३
कंसाद् भयन्त्विति गिरा भवतीषु काचित्
यन्मामभीषयत तद्वितथं न मन्ये ।
कंसादनात् पदमिदं ननु धारयामि
कंसाद् भयं त्रिजगतामिति सत्यमुक्तम् ॥ २४
आत्मीय एव भुवने ननु शिष्यतेऽस्मिन्
कः कुत्र गोपमहिला अपरान् प्रशास्ति ।
यूयं मम प्रियतमा इति कः प्रशास्तु
मोदक् क्रियाक्रियत सुष्ठु निबोधताङ्ग ॥ २५
लोकस्रजो यदि मयि प्रतिकूलभावाः
संकीर्त्तयेयुरनिशं मम दुर्यशांसि ।
किंवा सुकीर्त्तिपटलान् दिनरात्रसन्ध्या
मन्मानसन्त्वविकृतं चिरमेव तिष्ठेत् ॥ २६
मानापमानसुखदुःखयशोऽयशांसि
पश्यामि तुल्यमनिशं सुहृदश्च शत्रून् ।
ये पीड़यन्ति सततं दनुजायमानाः
साधून् मदोद्धतधियः किल तान् निहन्मि ॥ २७
शीतार्त्ततां युवतयः कति वात्र कालं
भुङ्ध्वे वृथैव शिशिराम्भसि मग्नदेहाः ।
उत्थीयतां तटभुवि क्रमशो मदीयं
कादम्बमूलमुपगम्य पटोऽभियाच्यः ॥ २८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एताश्च एव हरिणा स्वविभूतिगर्भ-
मौचित्यसूचकपदं कथितं यदेव ।
तत्सम्भवो मृगदृशां हृदयात् प्रबोध
स्तन्माययाक्रियत तत्र तिरोहितोऽयम् ॥ २९

तूष्णीम्भूते यदुकुलपतौ नायिका इत्यमुक्ता
सोच्चैः सर्व्वा निजगदुरमुं श्रूयतां भो नटेश
अस्मिन्नेवं तपनदुहितुः कृष्णपानीयमध्ये
उत्सृष्टास्मो निजतनुमिमां नैव तीरं व्रजेम ॥ ३०

श्रीहरिपदभारतीधर्म्मणाप्रकाश्यते

(सावशेषम्)

परिषदि शैलकरव:

लेखकः—श्रीचिन्ताहरणकाव्यतीर्थः वि, ए

'सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।' यत् सत्यमस्माकमपि अनुपमसौभाग्यसमुदयात् विगतश्रीपञ्चम्याः परवासरे समञ्चितवाग्देवतानुग्रहतः सारस्वतरसिकस्य कस्यापि महापुरुषप्रकाण्डस्य शुभसमागमेन सत्पुरुषनिचयसंसर्गपरिपूतेयं परिषत् गौरविता समजायतातितमाम् ।

विदितचरमेवैतत् सुधियामनेकेषां यथा संस्कृतेराणीयादिविविधप्राच्यभाषासु समधिगतप्रतिष्ठातिरेकाः प्राचीनभारतेतिवृत्तसमालोचनदत्तमानसाः पाश्चात्त्यप्रदेशीयनरवेऽन्तर्गतक्रिष्टियानियाविश्वविद्यालयाध्यापकवराः श्रीमन्तः शैलकरवभट्टमहोदयाः (Dr. Sten Konow—Professor, Kristiania University, Norway.) कियद्भ्यो मासेभ्यः पूर्वं भारतं समायाताः कवीन्द्ररवीन्द्रप्रतिष्ठिते शान्तिनिकेतनेऽवस्थाय स्वमतुलं ज्ञानराशिं भारतीयेषु वितरन्त आसन् । महात्मानश्च ते मासद्वयं तत्रावस्थाय कलिकाताविश्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयेषु भारतेतिहासविषयकान् कानपि मनोरमान् वाचितवन्तो निबन्धान्। ते एव महात्मानः पण्डितधौरेयाः कलिकातानगरावस्थानावसरे परिषद्भवनं परिषत्कृत्यनिचयञ्च प्रत्यक्षीकर्त्तुमनसः सस्त्रीकाः समागतवन्तः परिषदालयं तस्मिन् वासरे।

यद्यपि सुपरिचिताः सम्यगेवेते सुधियां विशेषतश्च भारतेतिवृत्तालोचनगृहीतमतीनां विदुषां समाजे तथापि परिषत्पत्रिकावाचकानां सामाजिकानां सर्व्वेषां नैते वैशिष्ट्येन ज्ञातपूर्वा भवेयुरिति समासेनाव तेषां गौरवाहिकम् उपवर्णयामः। विविधासु भाषासु लब्धप्रावीण्या एते महात्मान इति तु सूचितपूर्वमेव। तथा च न केवलं स्वमातृभाषाङ्गलजार्म्मण्य-फरासीप्रभृतिषु पाश्चात्यप्रदेशीयभाषासु नैपुण्यमस्य प्रतिष्ठामुपगतम्, परं संस्कृतप्राकृतेरानीयभाषासु विशेषतश्चोत्तरकुरूत्तरमद्रप्रभृतिप्रदेशानां (Central Asia) विलोपमिव समुपगतासु भाषास्वपि तथा पाटवमनेन सम्पादितम्—तथा नैपुण्येन महता तत्तद्भाषाप्राचीनग्रन्थानां प्रकटनं कृतम् यथा भाषातत्त्वशास्त्रे प्राधान्यमस्य प्रथितं सर्व्वत्रैव प्रदेशेषु। Linguistic Survey of India इत्याख्ये भारतीयाखिलभाषासमालोचनात्मिकायां ग्रन्थमालायामस्यापि महात्मन एतद्विषयकपाण्डित्यातिरेकपरिचायकानि कान्यपि ग्रन्थरत्नानि सुधियां मानसप्रमोदातिरेकं समुत्पादयन्ति। संस्कृतभाषोपनिबद्धानि काव्यादीनि च सम्यगेव समधिगत्यानेन महात्मना संस्कृतनाटकमधिकृत्य विरचितः कोऽपि ग्रन्थो यो नामास्य पाण्डित्यप्रकर्षम् तद्ग्रन्थस्य वाचकानामन्तिके प्रमापयति बाहुल्येनैव। समलङ्कृतं चानेन महोदयेन भारतीयप्राचीनलिपिपत्रिकाया * गौरवमयं सम्पादकपदं कियन्तं कालं; प्रदर्शितञ्च तत्र महदेव नैपुण्यं कृत्येषु।

* Epigraphia Indica.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्च सर्वथा भारतीतिवृत्तप्रकटनायैवानेन स्वजीवितमुत्सृष्टमिति प्रतिभात्यस्य विविधविषयावगाहिना भारतीतिहासालोचनात्मकेन कार्य्यजातेन। तथा च, एतेषां शुभागमनेन परिषद् गौरवितेति यदुक्तं नैतत् अतिशयोक्तिदूषितं वचनमिति प्रतीयते। विदुषां सम्पर्कैनेवेयं विद्वत्परिषत् आत्मानं सौभाग्यवतीं मन्यमाना वर्त्तते इति च न चित्रम्।

यातु, प्रकृतमनुसरद्भिरस्माभिः वाचकानां तदागमनवृत्तान्तो विनिवेदनीयः। उल्लिखिते वासरे सायं सस्त्रीकः श्रीमान् शैलकण्ठः समागतवान् परिषदालयम्। अपरे च महात्मानो बहव एव दिवसे तस्मिन् तत्र समायाताः समभिनन्दितुं तं महात्मानम्। तथा च पण्डितश्रीयुक्तशितिकण्ठवाचस्पतिः कलिकाताविश्वविद्यालयाध्यापकाः श्रीमन्तः देवदत्तरामकृष्णभाण्डारकार—अनन्तकृष्णशास्त्रि-हेमचन्द्ररायचौधुरीसुनीतिकुमारचट्टोपाध्यायाः तथा अपरे च केचन महापुरुषाः स्वोपस्थित्या परिषद्गृहं मण्डयन्तो व्यराजन्त। यत् सत्यं पण्डितवर्य्यभूयिष्ठेयं परिषत् तदानीम् अतितरां रामणीयकं दधौ।

गृहीतासनेषु सर्वेषु परिषदन्यतमसम्पादकेन श्रीमता पशुपतिनाथशास्त्रिणा श्रीमद्भिः अक्षयकुमारशास्त्रिभोलानाथमिश्र-शितिकण्ठवाचस्पतिमहोदयैश्च भट्टमहोदयस्य गुणावलीसमुपवर्णन-मुखेन कृतं तस्याभिनन्दनम्। तदनन्तरं परिषदाचार्य्येण श्रीमता कालीपदतर्काचार्य्येण सरलमधुरया रसिकजनचित्तचमत्कारविधायिन्या वाचा तदीयगुणवर्णनगर्भया पारिषदान् सर्व्वान् सन्तोष्य प्रतिश्लोकं 'शैलकण्ठपदभाग् जयत्यसौ' इत्यन्तेन श्लोकसप्तकेन भूर्ज्जपत्रोपरि-विलिखितेन सोऽभिनन्दितो महात्मा माल्यभूषितः प्रथममेव श्रीमद्भिः पशुपतिनाथशर्म्मभिः। एतदनन्तरं श्रीमद्भिः शैलकण्ठमहोदयैः सरलसरलया गोर्व्वाणवाण्या तस्याभिनन्दनस्य यथाम प्रतिविहित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत्तरं तेन सर्व एव पारिषदा विमुग्धविमुग्धाश्चित्रार्पिता इव व्यराजन्त। समागतैश्च मनीषिभिः सार्द्धं गीर्वाणवाण्यैव अप्रतिहतप्रसरया अनेनालपितमिति तस्य वाक्पाटवं सर्व्वानेव समं विस्मयाकुलान् विदधाति स्मेति युक्तमेव। उक्तञ्च सर्वैर्यथा नालोकितपूर्वमीदृशं पाटवमन्यस्य कस्यापि पाश्चात्त्यविदुष इति।

अवसिते चाभिनन्दनकृत्ये परिषत्सदस्यैः प्रयुक्तं भासकृति मनोहरमनोहरं मध्यमव्यायोगं नामातुलं रूपकं यन्नाम प्रयोगम् आलोकयन्तः सामाजिकाः परां मुदमधिगतवन्तः। प्रयोगावसाने श्रीमद्भिरनन्तकृष्णशास्त्रिभिः भट्टपादस्य साधुवादकीर्त्तनरूपं सम्पादितं सभान्तिमकृत्यम्।

समागतानां सामाजिकानां तदानीं समुत्पद्यमानो भावस्तावत् भट्टमहोदयेनाभिलिखितात् स्वाभिमतपत्रादेव प्रतीयेतेति तदवाधः समुद्धतः। तद् यथा—

'अस्यां संस्कृतसाहित्यपरिषदि विशेषतो मम ज्ञानमुत्पन्नमद्या-प्यस्मिन् भारतवर्षे दिव्या वाक् स्फुरतीति। भासकृतमध्यमव्यायोगस्य श्रवणेन दर्शनेन च महान् हर्ष उत्पादितः। सुशिक्षिता आसन् नटाः। मनोहरः प्रयोगः। महती च ममासीत्तुष्टिः शृखतो यदद्याप्येतावन्तः पण्डिताः स्वभाषावत् संस्कृतभाषां जानन्ति। एवं चानुमीयते सफलीभूतः परिषदः प्रयत्न इति। एवं च ममास्ति मनसि दिना-दिनम् अधिको भविष्यत्येतस्य परिश्रमस्य विपाक इति शम्।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुशिष्यसंवादः

लेखकः—श्रीभरत्कमलन्यायस्मृतितीर्थः ।

(संस्काराणां श्रौतत्वस्मार्त्तत्वनिरूपणम्)

गुरुः । वत्स ! कीदृशस्ते प्रश्न उच्यताम्, तस्योत्तरमिदानीं कथयामि ।

शिष्यः । संस्काराणां केषां श्रुतिमूलकत्वं केषां वा स्मृतिमूलकत्वमिति मे प्रश्नः प्रागेव कथितः ।

गुरुः । "श्रुतिमूलकत्वं स्मृतिमूलकत्वञ्च"—इत्यस्य कोऽर्थः ? श्रुतिमूलकत्वं सर्वेषामेव संस्काराणामस्ति, तथाच केषाञ्चित् श्रुतिमूलकत्वं साक्षात्, केषाञ्चित् स्मृतिद्वारा ; ततश्च संस्काराणामश्रौतत्वशङ्का व्युदस्तैवेति मन्तव्यम् । एवञ्च कीदृशस्ते जिज्ञासाभिप्रायः ?

शिष्यः । संस्काराणां के श्रौताः, के वा स्मार्त्ता इति मे जिज्ञासासंक्षेपः ।

गुरुः । भवतो जिज्ञासानुसारि निरूपणमिदानीमुच्यते । स्मर्य्यतान्तावत् पूर्व्वोक्तं हारीतवचनम्—"द्विविधो हि संस्कारो भवति ब्राह्मो दैवश्च । गर्भाधानादिः स्मार्त्तो ब्राह्मः, पाकयज्ञा हविर्यज्ञाः सौम्याश्च दैव" इति ।

उद्धृतहारीतवचनेन फलितमेतत् यद्—(१) गर्भाधानम् (२) पुंसवनम् (३) सीमन्तोन्नयनम् (४) जातकर्म्म (५) नामकरणम् (६) अन्नप्राशनम् (७) चूड़ाकरणम् (८) उपनयनम् (९—१२) व्रतानि (चत्वारि) (१३) गोदानम् (१४) समावर्त्तनम् (१५) विवाहः (१६) अन्त्यकर्म्म इति ब्राह्माणां षोड़शसंस्काराणां स्मार्त्तत्वमिति । तथा चात्र जातुकर्ण्यस्मृतिरपि (पूर्व्वोक्ता) स्मर्य्यतां यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आधानपुंससीमन्तजातनामान्नचौलकाः ।
मौञ्जी व्रतानि गोदानसमावर्त्तविवाहकाः ।
अन्त्यञ्चैतानि कर्म्माणि प्रोच्यन्ते षोड़शैव तु ॥" इति ।

शिष्यः । पूर्व्वोक्तप्रमाणैर्गर्भाधानादीनां स्मार्त्तत्वमुपपादितमाचार्य्यपादेन । मया तूपलभ्यते गर्भाधानस्य श्रौतत्वम्, तथा चात्र कृष्णयजुर्व्वेदीया गर्भोपनिषत्—"शुक्रशोणितसंयोगादावर्त्तते गर्भो हृदि व्यवस्थां नयति हृदयेऽन्तराग्निः, अग्निस्थाने पित्तं, पित्तस्थाने वायुः, वायुतो हृदयं प्राजापत्यात् क्रमात्" ।

(१) उद्धृतश्रुतौ 'शुक्रशोणितसंयोग'पदेन गर्भाधानमेवोच्यते । 'गर्भः आधीयते येन कर्म्मणा तद् गर्भाधान'मित्यनुगतार्थकर्म्मनामधेयत्वात्तस्य ।

(२) अपि च

'विष्णुर्य्योनिं कल्पयतु त्वष्टा रूपाणि पिंषतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भन्ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥'

इति वेदमन्त्रद्वयं श्रूयते । ततश्च गर्भाधानसंस्कारस्य श्रुतिप्रतिपादितत्वादायातं श्रौतत्वमेव (न तु स्मार्त्तत्वम्) ।

(३) अपि च आश्वलायनस्मृतिरपि सीमन्तोन्नयनस्य श्रौतत्वमाह । तथा चात्र—आश्वलायनगृह्यपरिशिष्टम्—

"सीमन्तोन्नयनं प्रथमे गर्भे । सीमन्तोन्नयनसंस्कारो
गार्भपात्रसंस्कार इति श्रुतिः ॥"

'श्रुतिः (वेदः) सीमन्तोन्नयनसंस्कारः गार्भपात्रसंस्कार इति आह'—इत्यन्वितार्थकरणात् सीमन्तोन्नयनस्य श्रौतत्वमेवायातम् (न तु स्मार्त्तत्वम्) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) अपि च नामकरणस्यापि श्रौतत्वमेव। तथा चात्र तत्त्वकारधृता श्रुतिः—

"एकादशे द्वादशे वाऽहनि पिता नाम कुर्य्या"दिति।

(संस्कारतत्त्वम्)

उद्धृतश्रुतौ 'नाम कुर्य्यात्'—इति विधेः सुस्पष्टश्रवणादस्याहतमस्य श्रौतत्वमेव।

(५) एवमुपनयनविधायकः श्रौतो विधिर्यथा—

"वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्"।

(शास्त्रदीपिकायामध्ययनविधिविचारप्रकरणम्)

ततश्च पूर्वोक्तश्रौतविधिवाक्येन उपनयनसंस्कारस्यापि श्रौतत्वमेव सुस्पष्टमायातम्। एवमन्यत्राप्यूहनीयम्।

एतावता कथितानां ब्राह्माणां संस्काराणां श्रौतत्वं स्मार्त्तत्वमुभयमेव प्रमाणसिद्धमिति सति संशये कोऽत्र सिद्धान्त इति जिज्ञासा फलिता।

गुरुः। जिज्ञासा ते श्रुता, उत्तरमिदानीं कथयामि। श्रौतत्वमित्यस्य कोऽर्थः श्रीमता गृह्यते ?

शिष्यः। श्रुतिप्रतिपादितत्वमेव श्रौतत्वमित्यस्यार्थोऽवगम्यते।

गुरुः। वाढम्। श्रुतिप्रतिपादितत्वमित्यस्य वा कोऽर्थो गृह्यते ?

शिष्यः। येषां स्वरूपं श्रुत्या व्युत्पादितं तेषां श्रुतिप्रतिपादितत्वम्। ततश्च श्रुत्या व्युत्पादितस्वरूपत्वमेव श्रुतिप्रतिपादितत्वमित्यस्यार्थः।

गुरुः। वाढ़म्।

(१) गर्भाधानस्य स्वरूपं भवत्प्रदर्शितश्रुत्या ("शुक्रशोणितसंयोगादावर्त्तते गर्भ" इत्यादि पूर्वप्रदर्शितया) न व्युत्पादितं भवति, परन्तु तादृशश्रुत्या तादृशसंस्कारस्य नाममात्रमायाति, न हि नाममात्रकथनेनैव पदार्थो व्युत्पादितः स्यादिति कथं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतिव्युत्पादितस्वरूपत्वरूपश्रुतिप्रतिपादितत्वलक्षणं श्रौतत्वं गर्भाधानस्य ?

(२) यत्तु "विष्णुर्योनिं कल्पयतु"—इत्यादि श्रौतं मन्त्रद्वयं तस्य (गर्भाधानस्य) श्रौतत्वे प्रमाणं मन्यसे, तदपि नोपपद्यते। नहि मन्त्रेण वस्तुस्वरूपं व्युत्पादितं तत्र। तथा च मन्त्रो हि कर्म्मणामङ्गतया उपयुज्यते, तदपि अङ्गं न स्वरूपनिर्वाहकम्। अत एव प्रयोगसमवेतार्थस्मारकत्वेन मन्त्राणामुपयोगित्वमामनन्ति। तथा चात्र धर्म्ममीमांसाधुरन्धरशास्त्रदीपिकाकृद्वचनम्—

"अनुष्ठेयस्मृतेरेह मन्त्रोच्चारणमर्थवत्।
स्मरणञ्च प्रयोगार्थं प्रयोगाच्च फलोदयः॥"

महाप्रामाणिकधर्म्ममीमांसावार्त्तिककारभट्टपादैरप्येतदुक्तं यथा—

"मन्त्रैरेव स्मृत्वा कृतं कर्म्म अभ्युदयकारि भवतीत्यवधार्य्यते।" इति एतावता मन्त्रेण वस्तु व्युत्पादितं भवतीति नायाति। ततश्च श्रौतमन्त्रदर्शनेनैव श्रौतत्वावधारणं न कर्त्तव्यम्। अन्यथा प्रायः कर्म्मस्वेव (स्मार्त्तेषु पौराणिकेषु च) अल्पाधिकश्रौतमन्त्रदर्शनात् तेषामपि श्रौतत्वापत्तिः स्यात्।

(३) "सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कार इति श्रुति"रिति वचनादपि सीमन्तोन्नयनस्य श्रौतत्वं नायाति। तथा च—'श्रुतिः (वेदः) सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कार इति आह'—इत्यर्थकरणेन श्रुत्या च तस्य (सीमन्तोन्नयनस्य) नामकीर्त्तनमात्रं भवति न तु स्वरूपव्युत्पादनम्। ततश्च निरुक्तश्रौतत्वं (श्रुतिव्युत्पादितस्वरूपत्वं) सीमन्तोन्नयनस्य नास्त्येवेति स्पष्टमुपलभ्यते।

(४) एवम्—"एकादशे द्वादशे वाऽहनि पिता नाम कुर्य्यात्" इति श्रुतौ, तथा—

(५) "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेश्यम्” इति श्रुतौ च नामकरणोपनयनयोर्नामश्रवणाच्च निरुक्त-श्रौतत्वमिति पूर्वोक्तदिशा सर्वत्रावसेयम् ।

ततश्च येषां संस्काराणां स्वरूपमितिकर्त्तव्यतादि सर्वमेव श्रुत्या उपदिष्टं तेषां श्रौतत्वमवधार्य्यम्। यथा वाजपेय-सौत्रामणी-प्रभृतीनाम् । तथाच कात्यायनश्रौतसूत्रम्—

“वाजपेयः शरद्यवैश्यस्य” । १४ अध्यायः । १म-सूत्रम् ।

“ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य” । १८ अ० । १म-सूत्रम् ।

कथितसंस्कारयोः (वाजपेय-सौत्रामणीरूपयोः) स्वरूपेतिकर्त्तव्यतादिः श्रुत्या व्युत्पादितत्वात् श्रौतत्वमचतमेव । एवमन्यत्राप्यूहनीयम् ।

ततश्च गर्भाधान-सीमन्तोन्नयन-नामकरणोपनयनादीनामिति-कर्त्तव्यतादिः स्मृत्यैव व्युत्पादितत्वात्तेषां स्मार्त्तत्वमेव न श्रौतत्वमित्य-वधार्य्यम् । एवञ्च भवदुक्तगर्भाधानादेर्नाम्नः श्रुत्या उक्तत्वेऽपीति-कर्त्तव्यतादेः स्मृत्या उक्तत्वात्तेषां स्मार्त्तत्वम्। वाजपेयादेस्तु इति-कर्त्तव्यतादेः सर्वस्यैव श्रुत्या उक्तत्वात्तेषां श्रौतत्वमिति न काप्यनुप-पत्तिः ।

एवं रीत्या संस्काराणामष्टचत्वारिंशत्संख्यकानां श्रौतत्वं तथा स्मार्त्तत्वमवधातव्यमिति सर्व्वमनवद्यम् ।

(संस्काराणां सामान्यलक्षणमुपयोगित्ववर्णनञ्च)

प्रथमशिष्यः । संस्काराणां श्रौतत्वस्मार्त्तत्वसिद्धान्तोऽवगतो-ऽस्माभिः । इदानीं तेषां सामान्यलक्षणं श्रोतुमिष्यते ; साम्प्रतमपि यत्तेषामुपयोगित्वमस्ति तदपि श्रोतव्यम् ।

गुरुः । श्रूयताम् । सामान्यलक्षणमेवादौ कथयामि । तथाच— “आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः” इति संस्कारसामान्यलक्षणम् । एकस्तावत्कर्म्मान्तराधिकारोऽनुकूलः, यथा उपनयनजन्यो वेदाध्ययनाधिकारापादकः । अपरस्तावत् तदुपपन्नदुरितमार्जनात्मकः यथा बीजगर्भसमुद्भवैनोनिबर्हणो जात-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म्मादिजन्यः। * एवं रीत्या अन्यस्मिन्नपि संस्कारे लक्षणं सङ्गमनीयम्।

द्वितीयशिष्यः। सामान्यलक्षणमेतेषामवगतम्। विशेषलक्षणमपि श्रोतुमिच्छामः।

गुरुः। विशेषलक्षणमिदानीं नालोचयितव्यम्। यदा हि "गर्भाधानादि" विशेषसंस्कारमालोचयिष्यामि तदैव तत्तद्विशेषलक्षणमपि कथयिष्यामि। इदानीमेषामुपयोगित्वं वर्णयामि। अत्र तावत् स्मर्य्यतां पूर्व्वोक्तमङ्गिरोवचनम्—

चित्रं कर्म्म यथाऽनेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्व्वकैः॥

एतेन सर्वेषामेव संस्काराणामुपयोगित्वं सामान्यतः प्रतिपादितम्। तथाच 'चित्रं कर्म्म' प्रतिमालेख्यादि 'यथा अनेकैरङ्गै'र्हस्तपदमुखनासिकादिभिः, 'शनैः' क्रमशः 'उन्मील्यते' सम्पूर्णतामावहति, 'तथा' ब्राह्मण्यमपि। ब्राह्मणत्वं जातिः, तथा च—

सन्ध्या स्नानं पूजा होमं देवतानित्यपूजनम्।
अतिथिर्वैश्वदेवञ्च देवब्राह्मण उच्यते॥
शाके पत्रे फले मूले वनवासे सदा रतः।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते॥
वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत्।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते॥

इति महर्षिचिर्वर्णितं (ब्राह्मणत्वं) 'विधिपूर्वकैः संस्कारैः' पूर्वकथितैः उन्मील्यत इति समुदितार्थः।

"जन्मनैव महाभागो ब्राह्मणो नाम जायते।"

इति यद् जातिब्राह्मण्यमुपवर्णितं संस्कारद्वारा तस्योन्मीलनं भवति, न तु संस्कारद्वारा ब्राह्मण्यमुत्पद्यते इत्यवधातव्यम्।

* वीरमित्रोदये संस्कारप्रकाशे—मित्रमिश्राः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारद्वारा ब्राह्मण्योन्मीलनकथनात् संस्काराभावे ब्राह्मण्योन्मीलनाभाव इत्यर्थोऽपि प्रतिपादितो भवति। 'विधिपूर्वकैः' इत्यनेन संस्कारे स्वेच्छाचारो वारितः। तथा च यस्य संस्कारस्य यादृशो विधिः शास्त्रेणोक्तस्तादृशविधिमवलम्ब्यैव सः संस्कारः कर्त्तव्यः। यथा द्विजातीनामुपनयनसंस्कारो न त्वन्येषामित्यधिकारवार्त्ता। तस्याप्युपनयस्य—

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥"

इत्यादि कालकथनमिति दिङ्मात्रमुक्तम्। एवं रीत्या संस्काराणां विधिपूर्वकत्वमूहनीयम्। अविधिपूर्वकत्वे त्वनिष्टफलमेवोपजायते, तदेतत् स्मर्य्यते श्रीमद्भगवद्गीतायाम्—

"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥"

साम्प्रतमष्टचत्वारिंशत्संस्काराणां प्रायश एव विलुप्ताः, ये तु अवशिष्टा दृश्यन्ते नाम तेऽप्यविधिपूर्वकत्वात् कङ्कालावशिष्टाः, तत एव साम्प्रतमेतादृशो दुःसमयः समुपस्थितो यस्मिन् समये—

... ... नराः पुण्यविवर्ज्जिताः।
दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः।
परापवादनिरताः परद्रव्याभिलाषिणः॥
परस्त्रीसक्तमनसः परहिंसापरायणाः।
देहात्मदृष्टयो मूढ़ा नास्तिकाः पशुबुद्धयः॥
मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिङ्कराः॥
विप्रा लोभभयग्रस्ता वेदविक्रयजीविनः।
धनार्जनार्थमभ्यस्ता विद्यामदविमोहिताः॥
त्यक्तस्वजातिकर्म्माणः प्रायशः परवञ्चकाः।
क्षत्रियाश्च तथा वैश्याः स्वधर्म्मत्यागशीलिनः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वच्छूद्राश्च ये केचिद् ब्राह्मणाचारतत्पराः ।
स्त्रियश्च प्रायशो भ्रष्टा भर्तृवज्ञानिनिर्भयाः ॥
श्वशुरद्रोहकारिण्यः ... ... ।

(अध्यात्मरामायणेऽनुक्रमिकाध्याये कलियुगवर्णने
नारदवाक्यम्, ८—१५ श्लोकाः)

न्यायतत्त्वसमालोचनम् *

(लेखकः—महामहोपाध्यायः श्रीआशुतोषतर्कभूषणः)

१। विष्णादिपदस्य तत्तच्छरीरपरत्वे सर्वं जानाति विष्णुः इति प्रयोगानुपपत्तिः स्वसमानाधिकरणप्रयत्नासाधारणकारणक चेष्टाश्रयत्वस्याख्यातार्थत्वे गौरवादिति भ. टी० । अत्र प्रयत्नासाधारण-कारणत्वानिवेशे भगवत्प्रयत्नस्य वस्तुमात्रं प्रति साधारणकारणतया सर्वं वेत्ति चैत्र इत्यादि प्रयोगस्य प्रामाण्यापत्तिः, प्रयत्नासाधारण-कारणत्वञ्च चेष्टात्वावच्छिन्नकार्य्यतानिरूपितप्रयत्ननिष्ठकारणत्व-मिति तर्कवागीशटीका। अत्रेदं वक्तव्य चेष्टात्वावच्छिन्नकार्य्यता निखिलशरीरवृत्तिचेष्टायामिकैव तादृशकार्य्यतानिरूपितकारणत्वं भगवत्प्रयत्नेऽस्त्येव कथं तदापत्तिवारणं, यदि तादृशकारणत्वं भगवत्प्रयत्ने न स्वीक्रियते तदा आख्यातस्य तादृशार्थस्वीकारेऽपि सर्वं वेत्ति विष्णुः इत्यादिप्रयोगस्य अनुपपत्तिसम्भवे आख्यातस्य तादृशार्थकत्वे गौरवदोषदानमनुचितं गदाधरस्येति ।

---

* महामहोपाध्यायश्रीयुक्तकामाख्यानाथतर्कवागीशमहाभागैः कलिकाता एसियाटिकसोसाइटीमहासभातः स्वकृतपादटिप्पणालङ्कृता अनुमितिगादाधरी प्रकाशं नीता तदवलम्बनेन रचितोऽयं निबन्धस्तत्त्वबुभुत्सयास्माभिः प्रकाश्यते सं-सा-प-सम्पादकैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२। पूर्णाय तृप्ताय, तृप्तिश्च स्वीयसुखेच्छावदन्यत्वमिति भ० टी०। अत्र तर्कवागीशटीका स्वीयत्वं सुखविशेषणं तथा च स्वसमानाधिकरणत्वस्वविषयकत्वे तदुभयसम्बन्धेन सुखविशिष्टेच्छावदन्यत्वमिति फलितार्थः। अत्रेदं चिन्त्यं, तादृशोभयसम्बन्धेन सुखविशिष्टेच्छावान् जीवात्मा, तदन्यत्वं यथा ईश्वरे वर्त्तते तथा घटेऽपि वर्त्तते इति घटोऽपि तृप्त इति व्यवहारः स्यादिति।

३। अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्चेति दीधितिः। अत्रेति एतत्पदं प्रत्यक्षानुमानग्रन्थपरमित्येव गदाधरपाठो बहुपुस्तके दृश्यते। तर्कवागीशमहोदयेन "अत्रेति इदं पद"मिति गदाधरपाठं संशोध्य लिखितम्। तत्र वक्तव्यमिदम् "अत्र" इतिरूपम् एतच्छब्दस्यैव सप्तम्यां न त्विदंशब्दस्य सप्तम्यन्तरूपम्; इदंशब्दस्य सप्तम्याम् 'इह' इति प्रयोगो भवति इति वैयाकरणाः सर्व्वएव जानन्ति। एवञ्च महामहोपाध्यायेन यदुक्तम् "अत्रेति इदं पद" तत् व्याकरणभ्रमात् इति भ्रमसंस्कारादिति वा वक्तव्यम्; किमन्यद्वक्तव्यमस्ति?

४। प्रयोजकान्तानुपादाने सङ्गतित्वस्य निरूपकविशेषनियन्त्रितत्वानुपपत्तिः कथञ्चित्तदुपपादनेऽपि यथास्य किम् उपजीवकमित्यादिजिज्ञासां प्रति उपजीवकत्वज्ञानं हेतुस्तथा को घट इति जिज्ञासायां घटत्वादिधीस्तथेति तद्विषय घटत्वादेः प्रत्यक्षसङ्गतित्ववारणाय प्रयोजकान्तमिति भ० टी०। अत्र तर्कवागीशटीका— कथञ्चित्तदुपपादनं जिज्ञासाजनकधर्म्मे यन्निरूपितत्वं विशेषणीकृत्य तदुपपादनमिति। टीकाकारस्यायमभिप्रायः—जिज्ञासाजनकज्ञानविषयो धर्म्मो यन्निरूपितो भवति स धर्म्मस्तन्निरूपितासङ्गतिरिति। एवञ्च जिज्ञासाजनकज्ञानविषय उपजीवकत्वं प्रत्यक्षनिरूपितं भवति अतः प्रत्यक्षनिरूपितसङ्गतित्वम् उपजीवकत्वे सम्भवति। अत्रेदं वक्तव्यं कथञ्चित्तदुपपादनमित्यस्य धर्म्मे निरूपितत्वविशेषणदानरूपो यद्यर्थस्तथा सति घटत्वस्य प्रत्यक्षनिरूपितसङ्गतित्वापत्तिरिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थकारेण यदापत्तिर्दत्ता सा न सङ्गच्छते, घटत्वजातेः कथञ्चिदपि प्रत्यक्षनिरूपितत्वस्यासम्भवात् तादृशोपपादनपक्षं प्रति ग्रन्थकारेणापत्तिदानादिति ।

५ । यद् यदुपजीवकं भवति तत्तन्निरूपणोत्तरनिरूपणविषयमित्यनुमाने व्यभिचारं प्रदर्श्य तदव्यवहितनिरूपणविषयत्वे सतीति हेतौ विशेषणं दत्तं । अत्र टीकाकारेणोक्तं निरूपणाव्यवहितनिरूपणत्वञ्च निरूपणविशिष्टनिरूपणत्वं निरूपणवैशिष्ट्यञ्च स्वोत्पत्त्यनधिकरणत्व स्वध्वंसानधिकरणत्व-स्वप्रागभाववत्समयप्रागभावानधिकरणत्वेतत्त्रितयसम्बन्धेन । अत्र टीकाकारस्याभिप्रायः—स्वक्षणोत्पन्ननिरूपणवारणाय प्रथमसम्बन्धनिवेशः स्वतृतीयक्षणोत्पन्ननिरूपणवारणाय द्वितीयसम्बन्धनिवेशः स्वपूर्व्वपूर्व्वक्षणादौ यन्निरूपणं तद्वारणाय तृतीयसम्बन्धनिवेशः । एवञ्च निरूपणस्याव्यवहितपूर्व्वक्षणे अव्यवहितोत्तरक्षणे यन्निरूपणं भवति तत्रैव तादृशत्रितयसम्बन्धेन निरूपणवैशिष्ट्यं सम्भवतीति । अत्रेदं वाच्यं एकनिरूपणस्याव्यवहितोत्तरक्षणे तत्पुरुषीयनिरूपणान्तरमप्रसिद्धम् । तथा च तादृश सम्बन्धत्रयेण निरूपणविशिष्टनिरूपणस्याप्रसिद्ध्या तादृशविशेषणविशिष्टहेत्वप्रसिद्धिदोषो भवति ; यतो निरूपणं प्रति वक्तुर्बुबोधयिषा कारणं, तां प्रति प्रतिपाद्यपुरुषाणाम् असिद्धत्वज्ञानं कारणं, असिद्धत्वज्ञानं प्रति जिज्ञासाविषयत्वज्ञानं तत्रासिद्धत्वव्याप्तिज्ञानञ्च कारणं, तज्ज्ञानं प्रति को घट इत्यादि प्रश्नवाक्यं कारणं, तादृशप्रश्नं प्रति जिज्ञासाप्रत्यक्षं कारणं, तत्र जिज्ञासाकारणं, तां प्रति सङ्गतिज्ञानं कारणं, तज्ज्ञानं प्रति पूर्व्वनिरूपितवस्तुज्ञानं, तज्ज्ञानं प्रति गुरुवाक्यात्मकनिरूपणं कारणं भवति । एवं क्रमेण पूर्व्वनिरूपणस्य नवमक्षणमध्ये निरूपणान्तरं न सम्भवति ; तथाच तादृश सम्बन्धत्रयेण निरूपणविशिष्टनिरूपणं न कुत्रापि सम्भवतीति सुधीभिर्ध्येयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्वीश्वरपदयुगे निवेशितस्य न्यायस्य मोक्षरूपफलसम्बन्धे माना-भावस्तत्त्वज्ञानविषयात्मबोधकात्मशब्दस्य संसारनिदानमिथ्याज्ञान-विषयस्वात्मसाक्षपरत्वादित्याशङ्कायामाह स्वर्गापवर्गयोरित्यादि। ईश्वरमननञ्चादृष्टद्वारा स्वात्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः, तमेव विदित्वा इत्यादि श्रुतिस्तत्कारणत्वे मानं, स्वात्मसाक्षात्कारस्य मोक्ष-हेतुत्वे मानञ्च यदात्मानं विजानीयादहमस्मीति पूरुष इत्यादि श्रुतिः इति हरिदासग्रन्थः। अत्र तर्कवागीशटीका—ईश्वरमननञ्चेति तथा च तमेवविदित्वेत्यादिश्रुत्या द्वे ब्रह्मणी वेदितव्ये इत्यादि श्रुत्या च आत्मा वा अरे द्रष्टव्य इत्यादि श्रुतिघटकात्मपदं ज्ञानवत्त्वरूपेण जीवात्मपरमात्मोभयपरमित्यादि। अत्र टीकाकारस्य व्याख्या न सङ्गता यतस्तन्मते आत्मा श्रोतव्य इत्यस्य ज्ञानवान् श्रोतव्यः ज्ञानवान् मन्तव्य इत्यर्थो वाच्यस्तथा सति ज्ञानवज्जीवविषयकशब्दबोधमनना-दिनापि मोक्षसम्भवे परमात्ममननं निरर्थकं स्यादित्याशङ्काया अनि-वृत्तेः। आचार्य्येण यदुक्तं श्रुतो हि भगवान् श्रुतिस्मृतिपुराणादौ इदानीं मन्तव्यो भवति इत्यादि तदात्मपदस्य परमात्मपरपक्ष एव युक्तं भवति; आचार्य्यमते तु श्रोतव्यो मन्तव्यो इत्यादि श्रुत्युक्तात्मपदम् ईश्वरात्मपरमेव इति मुक्तिवादग्रन्थे गदाधरेण केचित्त्वित्यादिना आचार्य्यमतमुक्तं तत्रैव अत एव न्यायचर्चेयमीशस्य मननेत्यादि कुसुमाञ्जलिरित्युक्तम्। दीधितिकारादीनां मते तदात्मपदं जीवात्म-परं न ज्ञानवत्त्वेन उभयात्मपरं, तत्रैव न वारे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय इत्यादि श्रुत्युपक्रमे श्रोतव्यो मन्तव्यो निदिध्यासितव्य आत्मा इत्यादि श्रुतिकथनात् तदात्मपदं जीवपरमिति गदाधरेणोक्तम्। एवञ्च उदयनाचार्य्य-रघुनाथ-शिरोमणि-गदाधर-प्रभृतीनां मध्ये कस्य मते परमात्मपरं कस्य मते जीवात्मपरम्, ज्ञानवत्त्वेन उभयपरमिति तु शास्त्रविद्भिः कैर्नोक्तं, परन्तु दिनकरीव्याख्यामध्ये आत्मपदस्य ज्ञानवत्त्वन उभयात्मपरत्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्माधारे इत्यादिश्रुत्युक्तात्मपदस्य लाक्षणिकत्वापत्तेरिति दोषोद्भावनं कृतम्।

ज्ञानवत्त्वेन उभयपरमित्यत्र ज्ञानपदं किं नित्यज्ञानपरं जन्यज्ञानपरं वा ? प्रथमपक्षे जीवस्यासंग्रहः द्वितीयपक्षे परमात्मनोऽसंग्रहः अतो ज्ञानवत्त्वेन उभयपरमित्ययुक्तम्। वस्तुतः बृहदारण्यकोपनिषदि द्वितीयाध्याये मैत्रेयीं प्रति ब्रह्मज्ञानार्थं याज्ञवल्क्योक्तिरूपा सा श्रुतिः। यथा न वाऽरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिःप्रियो भवति इत्यारभ्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेयि आत्मनोवाऽरे दर्शनेन श्रावणेन मत्याविज्ञानेन इदं सर्वं विदितं भवति। स यथा आर्द्रैन्धनाग्नेरभ्यर्हिता पृथक्धूमा विनिश्चरन्ति, एवं वाऽरे अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेत्यादि। अत्र श्रुतिस्थात्मपदस्य परमात्मपरत्वे एव आत्मज्ञानेन सर्वं विदितं भवति तस्य महतो भूतस्येत्युत्तरश्रुतेः सङ्गतिः स्यान्नतु उभयात्मपरत्वे। एवमात्मपदस्य न्यायमीमांसावेदान्तादिसकलदर्शनसम्मतपरमात्मरूपमुख्यार्थपरत्वेऽनुपपत्त्यभावात् याज्ञवल्क्यस्य एतदात्मपदं ज्ञानवत्त्वेन रूपेण उभयबोधकं भवतु इत्यादि तात्पर्य्यकल्पना निर्बीजं ज्ञानवत्त्वस्य उपस्थापक भावाच्च। एवं श्रुत्या उभयमननस्य मोक्षहेतुतालाभे "ईश्वरमननञ्चात्मसाक्षात्कारद्वारा मुक्तौ हेतु"रिति हरिदासभट्टाचार्य्येण द्वारद्वारिभावकल्पनमसङ्गतं स्यादिति सुधीभिर्ध्येयं।

एवम् आत्मा श्रोतव्य इत्यस्य श्रोतव्यः श्रुतिवाक्येभ्य इत्यादि श्रुत्येकवाक्यतया श्रुत्यादिवाक्यजन्यशाब्दबोधविषय आत्मा इत्यर्थो वक्तव्यः, आत्मपदस्य ज्ञानवद्बोधकत्वे तदसङ्गतिः ज्ञानवत्त्वेन आत्मबोधकश्रुत्यादेरभावात्। एवम् आत्मपदस्य तादृशार्थपरत्वे न विधौ परः शब्दार्थः इति जैमिनिसूत्रविरोधस्तत्र विधिपदस्य विधिघटक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यपरत्वादत एव जगदीशेन लिखितं श्रोतव्यः श्रुतिवाक्येभ्य इत्यत्र स्मृत्यादिभिन्नप्रमाणशब्दत्वेन शक्तमपि श्रुतिपदं प्रमाणशब्दत्वेन श्रुतिस्मृती बोधयन्न लाक्षणिकमिति ध्येयम्।

वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजक इति हरिदासः। अत्र टीका—नन्वेकप्रतिष्ठाकालीनास्पृश्यस्पर्शसंसर्गाभावः प्रतिष्ठान्तरध्वंसकालीनोऽपि तत्रापि पूज्यतापत्तिः। न च स्वप्रतियोगिप्रतिष्ठाकालीनत्वस्वकालीनत्वोभयसम्बन्धेन प्रतिष्ठाध्वंसविशिष्टास्पृश्यस्पर्शसंसर्गाभावकूट एव पूज्यताप्रयोजकः। तथा च न दोष इति वाच्यम्। यत्र प्रतिष्ठाद्वितीयक्षणे अस्पृश्यस्पर्शः तृतीयक्षणे प्रतिष्ठाध्वंसस्तत्र द्वितीयक्षणे पूज्यतापत्तिरितिचेन्न प्रतिष्ठाध्वंसविशिष्टकूटत्वावच्छिन्नाधिकरणत्वस्य पूज्यताप्रयोजकत्वात् कूटत्वे ध्वंसवैशिष्ट्यञ्च स्वाधिकरणकालनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वस्वप्रतियोगिप्रतिष्ठाकालीनास्पृश्य स्पर्शसंसर्गाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकत्वोभयसम्बन्धेन। यादृशप्रतिष्ठाद्वितीयक्षणे अस्पृश्यस्पर्शस्तादृशप्रतिष्ठाकालीनास्पृश्यसंसर्गाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकं यत् कूटत्वं तन्न तादृशप्रतिष्ठाध्वंसकालनिष्ठाधिकरणतानिरूपकतावच्छेदकमिति नोक्तस्थले पूज्यतापत्तिरिति विभावनीयम्।

अत्रेदं द्रष्टव्यं टीकाकारेण यदुक्तं "प्रतिष्ठाकालीनास्पृश्यस्पर्शसंसर्गाभावत्वावच्छिन्नानुयोगितावच्छेदकं यत् कूटत्वम्" एतदसङ्गतं व्यासज्यवृत्तिकूटत्वस्यानुयोगितावच्छेदकं नाव्यासज्यवृत्त्यभावत्वं भवतीत्यवयवादिग्रन्थे भट्टाचार्य्येणोक्तम्। एवं प्रमेयस्य यत्र साध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकं किं प्रमेयत्वम् उत वा प्रमेयगतसमुदायत्वम्? अभाववान् मेयत्वादित्यत्र साध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकं किमभावत्वं तद्गतसमुदायत्वं वा? नैयायिकैन तद्गतसमुदायत्वमेवानुयोगितावच्छेदकं वाच्यं नत्वभावत्वादिकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्च प्रतिष्ठाकालीनतादृशाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्त्यप्रसिद्धिः। यदि च प्रतिष्ठाकालीनतादृशयावदभावनिष्ठसमुदायत्वावच्छिन्नानुयोगिताक-कूटत्वमेवाभावत्वावच्छिन्नानुयोगिताकपर्य्याप्तिक-कूटत्वपदेन उच्यते तदा यत्र प्रतिष्ठाद्वितीयक्षणे अस्पृश्यस्पर्शस्तत: प्रतिष्ठाध्वंसस्त्वचापि पूज्यतापत्तिः तदस्पृश्यस्पर्शप्रागभावध्वंसौ विहाय प्रतिष्ठाकालवृत्ति तादृशाभावचतुष्टयवृत्ति यत् समुदायत्वं तदवच्छिन्नानुयोगिताकपर्य्याप्तिककूटत्वं तदभावचतुष्टयवृत्तिकूटत्वमेव, प्रतिष्ठाध्वंसकालेऽपि तत्कूटत्वावच्छिन्ना एकाधिकरणता वर्त्तते। तथा च तत्कूटत्वं प्रतिष्ठाध्वंसकालीनाधिकरणतानिरूपकतावच्छेदकमेव इत्युभयसम्बन्धेन प्रतिष्ठाध्वंसविशिष्टकूटत्वावच्छिन्नाधिकरणतासत्वात् पूज्यतापत्तिः कथमपि वारयितुं न शक्यते टीकाकृता। अपि च तादृशोभयसम्बन्धेन प्रतिष्ठाध्वंसविशिष्टं यत् कूटत्वं तदवच्छिन्नाधिकरणतायाः पूज्यताप्रयोजकत्वे यत्र प्रतिष्ठोत्तरं नास्पृश्यस्पर्शस्तत्र प्रतिष्ठापूर्व्वकालेऽपि पूज्यतापत्तिः, प्रतिष्ठोत्तरं यादृशकूटत्वावच्छिन्नाधिकरणता वर्त्तते प्रतिष्ठापूर्व्वकालेऽपि तादृशाधिकरणतायाः सत्त्वात् प्रतिष्ठाद्वितीयक्षणे पूज्यतारक्षार्थं प्रतिष्ठाध्वंसस्य कूटत्वे विशेषणविधया निवेशासम्भवादिति सुधीभिर्ध्येयम्।

महामहोपाध्यायस्वर्गतयादवेश्वरतर्करत्नपादानां

जीवनालेख्यकम्

(पूर्व्वतोऽनुवृत्तम्)

लेखकः—श्रीगिरिजाप्रसन्नलाहिड़ीव्याकरणतीर्थः बि, ए

संस्कृतसाहित्यपारङ्गमैः प्रायेण वङ्गभाषा बाहुलायासं प्रणतमानसं सभक्तिकं सेवनीया नेति प्रमाणपरम्परा सर्व्वतो द्रष्टव्या विशेषतः प्राचीनेषु। यादवेश्वरपादानां न तथेतिभाषणं पुनरत्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषमापादयति। वङ्गभाषया प्रकाशिता नासीट्काऽपि विशिष्ट-पत्रिका यत्र पण्डितराजस्य कविसुलभलिपिलालित्यं सामाजिकानां मानससमुद्रे साग्रहेण न्यस्तीकृतं नासीत्। तस्य ग्रन्थविशेषो वङ्गभाषा-प्रकाशितो नास्तीति केवलं मृषाकरोति सम्प्रति प्रकाशितं "त्रिसन्ध्यातत्त्वम्"। तदपहाय सर्व्वाणि तस्य लिखितचित्रणानि यथोपयुक्त-विविध-वर्णच्छटाग्रवलोकितानि सामयिकप्रकाशितेषु पत्रेषु शोभां रचयाञ्चक्रुरिति प्राकृतैरपि ज्ञातम्। कविसम्राजो लेख्य विषय वैचित्रचय एव विशेषवैभवत्वेन विश्वमूर्त्तः सहस्रप्रकाश-इव विस्मयस्थानम्। नव्यं प्राचीनञ्च वङ्गसाहित्यम्; ऐतिहासिकं; प्रयत्नतत्त्वं, किन्तुखलु बहुलविषय-परिवाहिणो तस्य ज्ञानधारा शतधारेव गौड़जनपदं नितरां सुमधुरं प्लावयामास। नव्येसा "श्रीमद्रवीन्द्रप्रतिभासमालोचनम्", प्राचीने "रङ्गपुरस्य ग्राम्यगीति-व्याख्या" ("रङ्गपुरेर जागीर गान" इत्यादिकम्) "जन्मना खलु कालिदासो वङ्गदेशं समलङ्कृतवान्" "स एवाभिजनो मुग्धबोध-कारस्य वोपदेवस्य प्रसूतिः"; "अमरसिंहो दुर्गसिंहश्चैक एव पुरुषो नाममात्रेण विभिन्नः" "कातन्त्रं हि अष्टाध्यायीतः प्रागेव विहितम्"—इत्यादि बहुविधपुरालोचनासम्पर्का विषयावली तेन आङ्गलादिभाषानभिज्ञेनापि सुनिपुणं बहुतरम् समालोचिता। सम्प्रति तदीयेन योग्यतम-तनय-रत्नेन प्रकाशिते "वङ्गसाहित्याख्ये" पत्रे एका कथा-साहित्य-रसधाराऽपि ('उपन्यासे'ति लोके ज्ञेया) "अशोका"भिधानकथया सुप्रमाणिता। वाग्मिता हि जलदमन्द्र निःस्वनस्य पण्डितकेशरिणः काव्यकाननकलकण्ठस्य सुमहती प्राणस्पर्शिनी ज्ञेयबहुला तुलनाविहीनेवाभाति। प्रतिध्वनयतीव सम्प्रत्यपि सा मधुरगम्भीरवाणी सुपरिचितेषु श्रवणेषु।

विचारनैपुण्यं केश्चित् दृष्टान्तैः स्मरणपथगामिनं कर्त्तुकामा वयं तदीयविचारोत्कर्षनिर्द्देशसामर्थ्यहीना नोपहासस्थानानि भवेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाश्चात्यावस्थायामपि काशीनरेशस्य सभापण्डितेन महाकविना दार्श-निकप्रवरेण ताराचरणतर्करत्नपादेन सह तस्य वादः केषुनाद्यापि ज्ञातः स्यात्। पुनरपि मयमनसिंहान्तर्गते 'मुक्तागाछा' ग्रामे वङ्गदेशीय नैयायिकप्रधानेन रामधनतर्कपञ्चाननमहोदयेन सह परमाणुवाद विचाराचरणे समुपार्जितविजयकीर्त्तेः तस्यैव ताराचरणचरणस्य 'अनुमाने' अस्माकं तर्करत्नमहोदयेन कश्चिदेक 'उपाधि'रखण्डनीयः प्रतिपादित आसीत्। तथा नाटोरराजस्य विक्रमद्वितीयस्य चन्द्रनाथस्य महति सदसि चन्द्रकलङ्क-वर्णन-प्रस्तावे स्वोत्कर्षप्रति-पादनव्याजेन उभयोः पुनरपि महान् विचारः समजनि। विक्रम-पुरस्थेन नैयायिकाचार्य्यवर्य्येन प्रसन्नकुमारतर्करत्नेन तथा वैयाकरण मुख्येन जगद्बन्धुतर्कवागीशेन तत्तच्छास्त्रविषयमवलम्ब्य तर्क-रत्नस्याभवद्दीर्घतरो विचारः सुधियां सर्व्वेषां विस्मयमोहजनकः। अथ गच्छति काले पुनः संस्कृतकलेजाध्यक्षस्य महेशचन्द्रन्यायरत्न-महाशयस्य कृतौ "प्रवेशिका" पुस्तके केनचिल्लक्षितानां दोषजालानां प्रकृतनिर्द्दोषितास्थापनैः स्वमाहात्म्यं पाण्डित्यबाहुल्यमिषेणानेन प्रकाशं नीतम्। यदा हि "समस्यापूरणा"स्वच्छलेन भारतवर्षीया-णामखिलविपश्चितां जयकामा सा रमावाइ सरस्वती बहुलजयश्री-मण्डिता रङ्गपुरे अभियानं विहितवती, तदा स्वगुरुचरणेन श्रीश्वरेण सह यादवेश्वरोऽपि साहित्यसमराङ्गने समागम्य समरोद्यताया अक्षयतूणीरं क्षयं नीतवान्। एतादृशामगणित-संख्यकानां विचारपद्धतीनां विपुलयशःसुरभीणां सम्यक् निर्द्धारणे परमासमर्था वयमिति क्षन्तव्याः।

संसारक्षेत्रे—शास्त्रज्ञानस्य व्यावहारिकबुद्ध्या सुचिरमेव कलहपरम्परासम्बन्धो ज्ञानदाया धनदायाश्चेति लोके प्रसिद्धिं गतः। तत्रापि च पुनर्नैयायिकप्रवराणां सांसारिकी प्रतिभा शिशुभ्योऽपि क्षीणतरेत्युपजीव्य प्रवर्त्तते खलु सर्व्वत्राख्यानमयी कथामाला

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामाजिकेषु सर्व्वेषु। तर्करत्नाचार्य्ये तु न तादृशोति तस्य ज्ञान-समन्वयशालित्वं परमाश्चर्य्यभूतं विरलद्वितीयमिति चित्रम्। आसोदसौ विद्याव्रतस्नातोऽपि सांसारिकविषयज्ञानसम्पन्नो बहूनां भूमीन्द्राणां बृहस्पतिरिव राजनीतिकलाकुशलो मन्त्रिमुख्यः। व्यावहारिकराजनीतावपि ("practical politics") यथासम्भवं लिप्तः स परिखिन्नेषु सत्यमेवाद्वितीय आसीत् सत्यकर्म्मपरायणः परमोदारश्च। पुरा स खलु "वङ्गभङ्गे" (Partition of Bengal") जाते राजनीतिपरामृष्टां ज्ञानगर्भां वाक्यावलीं परमवाग्मित्वेन सपाटवं सदसि रचयाञ्चक्रे। आसीदाजीवनमसौ महापुरुषो रङ्गपुरस्य, तथा वार्द्धक्ये सम्प्रति विश्वेश्वरमहानगर्य्यां कृतनिवासस्तत्र-त्येषु सर्व्वविधेषु जनगणमङ्गलकरेषु धर्म्मांशेषु कार्य्यजातेषु सदैव सौत्सुक्येन लिप्तः। "अनरारिम्याजिष्ट्रेट" "मिउनिसिपाल कमिशनर्" "डिसष्ट्रिकट् बोर्ड-मेम्बर" इत्यादिकं बहुलं मानपदं तेनैव सदालङ्कृतमासीदित्यधुना रङ्गपुरस्य दुर्भाग्यबाहुल्यम्।

उपाधिलाभः—

"लज्जते न गदितः प्रियं परो
वक्तुरेव भवति त्रपाधिका।
व्रीड़मेति न तव प्रियं वदन्
श्लाघमतात्र भवतेव भूयते।"

सुष्ठु सङ्गच्छत इयं माघकवेः सूक्तिरर्ज्जुने इव विबुधकुले यादवेश्वराय उपाधिदानपरायणाय। "तर्करत्न"मित्युपाधिः काशीस्थ-"कुइन्स् कलेज"नामकात् महाविद्यालयाल्लब्ध इति प्रागेवोक्तम्। १९०५तमाङ्गलाब्दे "महामहोपाध्याये"त्याख्यविरुददानेन समल-ञ्चकार तर्करत्नं भारतेश्वरः, गुणगणगणनाग्राहिरूपेणात्मान-मपि प्रदर्श्य मन्ये छलेन स्वमपि पूजयामासेति सर्व्वत्रैव योग्यपात्रदानफलम्। ततः १८२५तमशकसंवत्सरे भारतज्ञान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्यमहानगरी नवद्वीपाभिधा "पण्डितराजे"त्यपूर्व्वसम्मानननिर्द्देशोपनाम्ना यादवेश्वरमाहूय तदीयवश्यतां गतेति ध्रुवं विजितमासीत् पण्डितराजेन पण्डितराज्यम्। विपुलज्ञानसम्पच्छालिने प्रीतो ज्ञानदाता महेश्वरो यादवेश्वराय स्वनगरबुधजनैः "कविसम्राट्-पण्डितकेशरी"त्यभिधानद्वयमिषेण सरस्वतीदत्तवरानुगृहीतकुलोत्पन्नाय उपहाररूपं सम्राड्योग्यं मकरकुण्डलयुगलं दापयामासेति कर्त्तव्यनिष्ठानां ज्ञानलोलुपानामाशाख्यानम्। ईदृशी बहुविधा अप्युपाधयो नालं तदीयान् सारल्यप्रीतिभक्तिज्ञानगरिमोज्ज्वलान् सहजान् स्वभावोपाधीनतिशाययितुमिति ज्ञात्वा शङ्के विरता बभूव पण्डितगणास्तत्सम्मानविधानकामइति।

नास्ति पुनरन्यत् किमपि वक्तव्यं तदीयमहनीयातुलचारित्रमाहात्म्यप्रकाशाय। मुग्धबुद्धयो वयं तादृशानां विशेषतः स्वपरमगुरूणां चारित्रानुमानेन न्यूनाधिककथनात् पापभाजो भवेयमित्याशङ्कया विरताः। अन्यः कोऽपि समर्थो विदध्यादिति कामयामहे।

भारतवर्षस्य विशेषतो वङ्गदेशस्य पुनरपि विशेषेण रङ्गपुरस्य दुःखशोकान्धकारिततमिस्रपक्षे विगते सौर भाद्रपदे भिक्षुकस्यापि महादेवस्य श्रवणकुण्डलनाशपूतमणिकर्णिकातटे यो ह्ययं पुनर्लब्धरत्नप्रणाशो जातस्तादृशस्य कदापि भाविनि प्राप्तिविषये हताशा वयं यादवेश्वरशोकसदसि महति यद् विजृम्भितवन्तस्तदेवात्र प्रकटय्य विरता भवेम इति याचते प्रणतकन्धरं दीना मर्षणा सुधियां गुणमात्रग्रहकाणामिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देशः

मासिकमधिवेशनम्—विगतसौरमाघस्य षष्ठे दिवसे सायं महामहोपाध्यायानां श्रीमतां गुरुचरणतर्कदर्शनतीर्थमहोदयानामाध्यक्ष्येण प्रावर्त्तत परिषदो नवममासीयमधिवेशनम्। तत्र पूर्व्वसभाविवरणप्रकाशाद्यनन्तरं पण्डितवरयोः श्रीमतोः चण्डीचरणतर्कतीर्थ-मन्मथनाथतर्कतीर्थयोः समजनि न्यायविषये शास्त्रार्थविचारः। तथा चादौ श्रीमता मन्मथनाथेन प्रथमतः पूर्वपक्ष एषः समुपस्थापितो यथा—'तत्साक्षात्कारविधतात्मकनिरूपकत्वस्य लाभायेति सामान्यनिरुक्तिगदाधरग्रन्थे प्रथमसाक्षात्पदव्यावृत्ति'रिति। तत्रोत्तरं प्रदत्तमुत्तरवादितर्कतीर्थमहोदयेन यथा—'कार्य्यताविषयत्वावच्छिन्नजन्यतानिवेशे तादृशकार्य्यविषयकेच्छामादाय असम्भववारणाय तद्विशेषण'मिति। एतदनन्तरं श्रीमच्चण्डीचरणतर्कतीर्थानां 'साध्याप्रसिद्धव्याप्तिवारणप्रयोजनकत्वोपवर्णनन्तु तदुपादानस्य न सदिति गदाधरोक्तसामान्यनिरुक्तिग्रन्थे द्वितीयदले साध्यपदप्रवेशवत् पक्षपदस्यापि प्रवेशावश्यकत्वेनाश्रयासिद्धव्याप्तिदानं कथं सङ्गच्छते' इतिपूर्व्वपक्षस्य 'पक्षपदस्य सकृन्निवेशाभिप्रायेण युगपत्तत्खण्डनतादृशाभिप्रायागमस्तु साध्यव्याप्यवान् पक्षः साध्यवानित्येवं सकृत् पक्षपदप्रवेशदर्शनात्' इति प्रत्युत्तरं प्रदत्तं श्रीमता मन्मथनाथतर्कतीर्थेन। विचारावसाने उभाभ्यामेव तर्कतीर्थाभ्यां पारितोषिकरूपेण प्रत्येकं मुद्राद्वयकमुपहृतं परिषत्पक्षतः।

चित्रपरिचयः—येषान्तावद् भारतवर्षमण्डनभूतपण्डितमहत्तमानां श्रुतशीलतपःप्रभावेण संस्कृतविद्या सर्व्वोच्छित्तेरद्यापि कथमप्यात्मानमभिरक्षति, तेषामेवैको महापुरुषोऽद्य नयनविषय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानीतः श्रीमतां संस्कृतसाहित्यपरिषद्वान्धवानामेतत्पत्रिकामुखपत्रविनिवेशितचित्रमूर्त्तिद्वारेण।

महामहोपाध्यायपदभाजो राम नाथसिद्धान्तपञ्चाननपादा एकपञ्चाशदुत्तरसप्तदशशततमे शकोयसंवत्सरे स्वजन्मना वङ्गेषु कोटालिपाड़मण्डलमलमकुर्व्वन्। श्रूयते—बाल्ये मनोषोन्मेषं तादृशमनुपलभ्य तदोयपितृचरणा वाराणसीमुपस्थाय श्रीविश्वेश्वरतो बुद्धिप्रकर्षलेशमकामयन्त इति। यच्च वयसां विपाकेन देवप्रसाद इवैषां लोकोत्तरः प्रतिभानराशिः प्रतिदिनमुज्ज्वलतरमाविरभूत् तदद्यापि बहवः सुव्यक्तं स्मरन्त्येव। तदानीन्तनविख्यातं नवद्वीपक्षेत्रमध्यूषितवतां नैयायिकमुख्य-हरमोहनतर्कचूड़ामणिमहाशयानामन्तिके शास्त्राध्ययनं सविशेषं निःशेषोकृत्य कृत्यान्तराविनिवृत्तमानसाः सिद्धान्तपञ्चाननपादा आजोवनमध्यापनकर्मण्येव निरताः समतिष्ठन्त। सततं निपोड़यत्स्वपि च दैन्यशतेषु न ते स्वयमुपनतमपि अन्यैरतिवाञ्छितमपि प्रभूतवृत्तिमन्नवद्वीपसंस्कृतपाठशालाया अध्यापकपदं भृतिस्वोकारभिया कथमप्यङ्गोचक्रुः। कालक्रमेण दृष्टोततद्गुणपर्य्याया राजपुरुषा 'महामहोपाध्याय'विरुदेनैतान् सादरमलङ्कृतवन्तः। ततः शिष्यनिवहान् बहुकालमनुशिष्य तपश्चरणादिकञ्च सुचिरमनुष्ठाय सप्तविंशत्युत्तराष्टादशशततमे शकाब्दे महात्मानस्ते यशोनामशेषतामवाप्ताः।

न केवलं नैयायिकनिबन्धेष्वनन्यसुलभप्रवोणतया न वा तत्साम्येन शास्त्रान्तरेष्वप्यतुलनोयविज्ञानप्रकर्षेण वयममोषामसाधारणतामुत्पश्यामः, परं निरुक्तगभोरविद्यायोगपद्येन तथाविधलोभादिपरिशून्यता प्रभूततपःसाधनसम्पच्च तेषामितरातिशायकप्रतिष्ठाबोजमित्यवेचामहे। यत्सत्यमनतिसुलभ एव संवृत्तः शास्त्रप्रावोण्येन सममिदानों तादृशगुणराशेः सन्निपात इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षस्य श्रेष्ठानाम् औषधालयानां चिकित्सालयानां च अन्यतमः

"आर्, सि, सेन एण्ड कों लिमिटेड्"

(यथाशास्त्रं निर्मितानि विशुद्धानि औषधानि सर्व्वदा लभ्यन्ते)

१ । च्यवनप्राशस्य प्रतिविंशतितोलकं मूल्यं रूप्यकद्वयं २) प्रेषणादिव्ययः ।८० आणक षट्कम् ।

२ । वृहच्चन्द्रोदयमकरध्वजस्य सप्ताहार्थं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।८० आनकपञ्चकम् ।

३ । तुषारविन्दुतैलस्य प्रतिदशतोलकम् २) रूप्यकद्वयम् प्रेषणादि व्ययः ।८० आनकषट्कम् ।

(सर्वेषाम् औषधानां मूल्यादिविषयकं विवरणपूर्णं पुस्तकं मूल्यं विनैव प्रेष्यते)

कविराजः श्रीराखालचन्द्र सेनः एल् एम् एस्

" श्रीसुधीरकुमार सेनः

२५८ नं अपार-चित्पुर-रोड्, कलिकाता

सर्व्वत्र भारतवर्षे सुधीजनैः समादृतं,
कविराज-श्रीराखालचन्द्र-सेन एल् एम् एस् कृतं

कुन्तलकौमुदीतैलम्

भवत्कुटुम्बमध्यवर्त्तिनीनां महिलानां केशप्रसाधनार्थं
विशुद्धोपादानजातं केशतैलमेतत् क्रीयताम् ।
भवत्-स्वदेशवासिना सुशिक्षितेन भिषजा निर्मितमेतत्
तैलम् अतो भेषजगुणैः श्रेष्ठम् ।
(सर्वत्र गान्धिकानामापणेषु प्राप्तव्यम्)

आर् सि सेन एण्ड कों लिमिटेड्

२५८ अपार-चित्पुर-रोड्, कलिकाता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

অজীর্ণ অম্লপিত্ত ও শূলরোগের মহৌষধ।

সুধা চূর্ণ।

ভুক্তদ্রব্য যাঁহাদের সহজে জীর্ণ হয় না, পেট ফাঁপা, থৈ ঢেকুর, পেটে গুড় গুড়, পুটপাট শব্দ, বেদনা, পেট খোঁচা, কোষ্ঠ একেবারে পরিষ্কার না হওয়া বা বারম্বার অল্পপরিমাণে হওয়া, অথবা মাঝে মাঝে দমকা ভেদ হওয়া, অরুচি, অক্ষুধা ইত্যাদি উপসর্গে যাঁহারা পীড়িত, তাঁহারা এই ঔষধ সেবনে সদ্য ফললাভ করিয়া আনন্দিত হইবেন।

অম্লোদ্গার, বুকজ্বালা, পেটজ্বালা, ভোজনান্তে বমন, পেটব্যথা ইত্যাদি যেরূপ অবস্থা কেন হউক না, সুধাচূর্ণ সেবন করিলে আশাতীত ফল পাওয়া যাইবে।

যে প্রকার কঠিন শূলরোগই কেন হউক না, সুধাচূর্ণ সেবনে নিশ্চয় সুফল লাভ করা যাইবে।

মূল্য বড় এক শিশি ১॥০ দেড় টাকা, ছোট শিশি ৸৵০ আনা। প্যাকিং ও ডাকমাশুল।৶০ আনা। একত্রে বড ৩ শিশি ৪৲ টাকা মাশুলাদি ॥৶০ আনা।

কবিরাজ—শ্রীকেশব লাল রায়—

৪১ নং বাগবাজার ষ্ট্রীট—

THE SANSKRIT SAHITYA PARISHAT PATRIKA.

The most popular and widely read Sanskrit magazine, circulated all over India.

The best medium for advertisement in Northern and Southern India.

N. B.—Advertisements are published in all languages.

Monthly rate of advertisements.

	Full page.	Half page.
For one year	Rs. 6 ...	... Rs 3
For one Issue	„ 8 ...	... „ 4

For further particulars apply to the Secretary.

Sanskrit Sahitya Parishad,
Shambazar Bridge Road,
Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্য রিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

স্থাপিত ১৩০৮ ঢাকা

শক্তি ঔষধালয়

মহাভৃঙ্গরাজ তৈল ৬৲ সের

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রংপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট,
৭১।১ রসা রোড্ নর্থ ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সের

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না —ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয়

এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনা, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৷৷০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৷৷০ টাকা, এক গ্রোস্ ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৷৷০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭৷৷০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ
সংস্কৃতসাহিত্যপরিষদ্ভবনম্, শ্যামবাজার ব্রীজ রোড, কলিকাতা।
মুদ্রণস্থান—সিদ্ধেশ্বরপ্রেস, ২৮ নন্দকুমারচৌধুরী সেকেণ্ডলেন, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत साप्त
५ (१२)

१८४६ शकीये
चैत्रे
April, 1925.

Reg. No. C 1073.

७म वर्षस्य
१२श संख्या
Vol. VII. No. 12

भारते भातु भारती   संस्कृतसाहित्यपरिषत्
श्यामबाजार, कलिकाता ।

सबहुमानविज्ञापनम् —

आगामिनि सौरवैशाखस्य १२श दिवसे शनिवासरे सायं षष्ठघटिकायां परिषदश्चैत्र-मासीयम् अधिवेशनं भविता । भवतामुपस्थितिः प्रार्थ्यते । इति ।

श्रीपशुपतिनाथशास्त्रिणः
श्रीगोष्पतिकाव्यतीर्थस्य
सम्पादकयोः

कार्य्यावलिः

१ । आगामिवर्षीयकार्य्यपरिचालकनिर्व्वाचनम्
२ । "दोष" शीर्षकप्रबन्धपाठः
लेखकः—श्रीकालीपदभट्टाचार्य्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ—

महामहोपाध्याय—श्रीदुर्गाचरणसांख्यवेदान्ततीर्थः

श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः—

काव्य-सांख्य-पुराणतीर्थ—श्रीदुर्गामोहनभट्टाचार्य्य एम, ए ।

मतिमञ्जरी	४४१	आस्तिकनास्तिकदर्शनविवेकः	४६५
गोपीनां वस्त्रहरणम्	४४६	नलदमयन्तीयम् (नाटकम्)	४७३
गुरुशिष्यसंवादः	४५७	सन्देशाः	४८१

प्रतिखण्डमूल्यं ।० चतुरानकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।

Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥

छात्र पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता ।
अध्यक्ष—श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে; কেশ-রঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বিক দুর্ব্বলতার জন্য যাঁহাদের উদ্যম-উৎসাহ-শক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহা দ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এককথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য, ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৶০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্র নাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ঘৃতাদি-প্রস্তুত-বিধি, বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ডে মহর্ষিদেব গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং লিমিটেড।

২৮।১ ও ১৯নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



महामहोपाध्याय श्रीयुक्त हरप्रसाद शास्त्री, एम्.ए., सि. आइ. इ.।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम्॥

१८४६ शकीये चैत्रे, ७म-वर्षस्य १२श-संख्या

मतिमञ्जरी

मुद्रायन्त्रबाहुल्येन संस्कृतविद्यापकारः—प्रियपाठक-महाभागाः! अपि स्मरन्ति श्रीमन्तः पूर्व्वकालं, यत्र प्राचीनाः संस्कृत-विद्यामध्येतुकामा विद्यार्थिनः पाठ्यग्रन्थसमूहान् स्वकरसाहाय्येन विलिख्य विदधुरायत्तानि शास्त्रतत्त्वानि? तदानीं पाठ्यग्रन्थलेख-परिश्रमः किल गणनीयतामेव नाध्यकार्षीत्। सर्वेषामेव विद्या-र्थिनामिदमेकमङ्गमध्ययनविधेरवर्त्तिष्ट, यदध्येयग्रन्थानां स्वकरेण समङ्कनं नाम। तत्र कियानुपकारः खलु विद्यार्थिनामध्येतव्य-विद्यापरिग्रहेष्विति स्मर्य्यतां श्रीमद्भिः—तत्र आदौ तावदध्यापका-दिभिरधीतपूर्व्वस्य ग्रन्थस्य निदर्शनेन स्वीयपुस्तकानां लिपिविन्यासेन अशुद्धिविरहः, स्वीयलेखशक्तिपरिस्फुरणञ्चेति द्वयमेव फलमुपलभ्येत। प्राचीनकूटाक्षरपाठसामर्थ्यसमुद्भवाच्च परतो हस्तलिखितप्राचीन-ग्रन्थपर्य्यालोचनेन विद्यावर्द्धनसाहाय्यकमपि पारमितया सम्पादयितुं शक्यं कृतविद्यैः। हस्तलिखितग्रन्थानां यथा चिरस्थिरतया बहूनां कृतमतीनां लोचनसम्पर्कात् अनुशीलनसम्पदा च प्रकाशमापन्ना गूढार्थाः स्थलविशेषेषु टिप्पणरूपेण योजिताः समुपकुर्व्वते किल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरविद्यार्थिनामतिमात्रम्। यतस्तावदद्य नानाविधवेदवेदाङ्गादिशास्त्राणि साम्प्रतिकानामक्षिगोचरतामुपसीदन्ति। यदि तदानीं हस्तलिपिकौशलमतिरोहितं तथा नाभविष्यत् तदा तथाभूतानामतिगभीरार्थसंस्कृतशास्त्राणां सम्प्रदायविच्छेदेन कथमस्माभिः प्राप्तिसम्भावनापि समवर्त्तिष्यत। अतो विद्यापरिग्रहे हस्तलिपिविन्यासः सुतरामस्माकमुपकरोतीति किं वा सुबहु वक्तव्यमास्ते।

अद्यत्वे तु विद्यार्थिनः सत्यपि सामर्थ्ये भूरिभ्रमप्रमादपरिपूर्णानपि मुद्रापितग्रन्थानुपसंगृह्य स्वमध्ययनविधिं निर्व्वाहयन्ति, लेखनामापि विस्मृतमिव तेषां प्रतिभासते। स्वल्पेनैव च कालेन मुद्रापितग्रन्थानां विनाशस्य अवश्यम्भावात् पूर्व्वाध्येतृणामध्ययनफलं तत्र तत्र सन्निबद्धमपि आश्रयनाशादेव तद्विज्ञापकमातृकाणामपि नाशात् नोपलब्धुं शक्यमनन्तराध्येतृभिस्तत्फलमिति प्रत्यक्षमेवेदमस्माकम्। किञ्च स्वहस्तलिखितग्रन्थाध्ययनविधौ प्रथमतो लेखवेलायाम् अक्षरमात्रकेणापि अधिगतस्य ग्रन्थस्य अनन्तरमध्ययनेन सुदृढः किल तद्विषये संस्कारः प्रयुक्तो भवति। मुद्रापितग्रन्थानामध्ययने तु प्रथमतः अगत्या अक्षरपाठार्थमभिनिवेशादीनामनावश्यकतया न सम्पद्यते सुतरामनिच्छतामपि तद्विषये सुदृढसंस्कारप्रकाशः।

तदेवं यत्र अनिच्छतामपि विद्यार्थिनां सुदृढसंस्काराः परमनुकूलिता भवन्ति, स चायं विषयः समुत्कृष्ट इति अनुक्तमपि व्यवतिष्ठत एव। अपि च प्राच्यविद्यायाश्च पाश्चात्यविद्यायाश्च परस्परमस्त्येव महत् पार्थक्यमिति को वा न जानाति, तच्च पार्थक्यमुपकरणवैजात्यमपेक्षमाणं सुप्रकाशं भवति। अतएव साम्प्रतमपि यत्र यत्र प्राचीनरीतिमनुरुध्य समुच्चासनादिपरिग्रहरूपमविशेषेण पाश्चात्त्यविद्याया उपकरणमनपेक्षमाणो विद्यापरिग्रहः सम्पद्यते तत्रैव दृश्यते समुत्कर्षः साधारणविलक्षणः किल प्राच्यविद्यायाः। तामेव प्रकृष्टतमां रीतिमवलम्बमानाः क्वचित् केचन पाश्चात्त्यविद्यायां प्रकर्षमुप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादयितुकामाः प्रचेष्टन्ते, यदि तेषां तेषामुपकरणानां नास्ति किमप्युपकारित्वं तदा कथमिव निपुणदृशां तत्र प्रचलितरीतिपरिहारेण प्रवृत्तिरन्यादृशी प्रशस्ता स्यात्। एवं स्थिते यथा प्राचीनाः संस्कृतविद्याया अधिगमे प्राचीनान्युपकरणानि समुपागमन्, यथा यथा क्लेशमङ्गीकृत्य सत्यं पन्थानमाशिश्रियन्, तथा तथा प्रवृत्तिरस्माकमिष्टं विना नानिष्टं जनयिष्यतीत्यत्र नास्ते लेशोऽपि सन्देहस्य।

पुरा किल नियमः प्रावर्त्तत वङ्गेषु पदान्तरेषु च यथा पुराणादीनां पारायणेषु हस्तलिखितग्रन्था एव शरणं पौराणिकानाम्; अद्यत्वे पुनः मुद्रायन्त्रक्रियायाः सुमहता प्रचारेण लोकानामपि हिताहितविवेकराहित्येन नितरां कष्टलेशपराङ्मुखतया च पुराणादिपाठावसरेऽपि मुद्रापितानेव ग्रन्थानहो वत शरणतया प्रतिपदमङ्गीकुर्व्वन्ति। तदत्र कियानेष विपत्पातः! मुद्रापितेषु ग्रन्थेषु परिशोधकानां प्रमादाद् वा सूक्ष्मदृष्टिपरिशून्यतया वा अर्थादिमात्राकाङ्क्षया तथा परिशुद्धिसम्पादनाभिनिवेशराहित्याद् वा अन्यथा वा भ्रमबाहुल्यं सम्भवत्येवेति तत्प्रतीकारः कथमिव सुकरः सम्पद्यते साम्प्रतिकानाम्।

सति कर्त्तव्ये विद्यायाः सुप्रकर्षे पुनरपि मनः समाधेयं प्राचीनलेखरीतौ। कष्टसृष्ट्या परिभूतिमात्मनः सम्भाव्य प्राचीनलेखादिरीतिपरित्यागे निरुक्तानां दोषाणामनपघातेन शतशः काम्यमानापि विद्यापरिशुद्धिरध्यवसायवैफल्यमेव समुद्भावयेत्। लेखरीतिः प्रसृता चेत् मुद्रापितग्रन्थसंग्रहार्थमपेक्षितानां बहुलद्रव्याणामभावेन क्वचित् क्वचिदध्येयग्रन्थविरहतः पाठव्याघातसम्भावनापि सुदूरमपक्रामेत्, फलञ्चास्य विद्यायाः सर्व्वाङ्गीणा समुन्नतिरिति सुदृढ़मेव वयं वक्तुं प्रभवामः।

मुद्रायन्त्रबाहुल्येन खल्वस्माकं देशे बहूनामदृष्टानामश्रुतानाञ्च शास्त्रग्रन्थानां प्रचारो जातस्तेन च बहुषु लुप्तप्रायेषु प्राचीनविषयेषु विज्ञानसौकर्य्यं सुसम्भवतां धत्ते शास्त्रव्यवसायिनाम् इति निर्विवादं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनम्। किन्तु यदा तथाभूतः शास्त्रप्रचारो नावर्त्तिष्ट, तेन सम-येन साम्प्रतिकविद्याकालस्य तारतम्यविचारः प्रस्तूयते, यदि प्राचीन-पण्डितानामिदानीन्तन पण्डितानाञ्च बहिर्विषयेष्वपि विद्यापरि-शुद्धितुलना समनुसन्धीयते, तदा किमिदमेव तत्त्वमुन्मेषितं न स्यात् यथा प्राच्यपण्डिता गभीरार्थशास्त्रसमूहेषु सूक्ष्मवेदिनो बहुदर्शिनः परमयशस्विनश्चासन्निति। तत्र तावदिदमेकं कारणमुपगन्तुं शक्यते नवेति विचार्य्यं श्रीमद्भिः यथा पूर्वं यदा स्वप्रयत्नेन ग्रन्थलेखः कर्त्तव्यता मध्यास्त तदा वर्त्तमानमुद्रापितग्रन्थतुलनया हस्तलिखितग्रन्थाना-मसौलभ्यमासीत्, तेन च तदानीन्तनविद्यार्थिनां ग्रन्थेषु असौलभ्य-विज्ञानेन कथञ्चिदपि तदभ्यासवासनायाः प्रभावेण शास्त्रार्थेषु संस्कारदार्ढ्यमभवत्। इदानीन्तनास्तु प्रतिविषयमेव मुद्रासाहाय-केन ग्रन्थसौलभ्यं परिपश्यन्तः प्रयोजनमात्रेणैव पुस्तके द्रष्टुं शक्यमिति मत्वा न तत्र समधिकमभ्यासमनुतिष्ठन्ति, अतएव जातस्तदानीन्तन-जनापेक्षया साम्प्रतिकेषु विद्याया अपकर्ष इत्यस्माकं हृदयम्। तदानीमध्यापका विद्यार्थिनामपि कृते सर्व्वत्र स्वं ग्रन्थं नोपाहरन्, ततश्च अध्यापकग्रन्थमवलोक्य अन्तरान्तरा अभ्यासेन ते ते विषयाः साग्रहमेव विद्यार्थिभिरायत्तीकृता अभूवन्। अद्य तु सर्व्वेषामेव विषयाणां सौलभ्यपरिज्ञानेन तथा अभ्यासप्रवृत्तेरेव विलोपात् विद्यायाः पुस्तकस्थतैव न तु हृदयस्थतापीति सूक्ष्मवेदिनो मन्यन्ते।

पुरा न्यायादिशास्त्राणां महाप्रभावावसरे कालीशङ्करचन्द्रनारा-यणप्रभृतिभिर्मनीषिभिर्याः खलु विचारपद्धतयः समुद्भाविता अभूवन्, तास्तु क्वचिदेव देशे क्वचिदेव आचार्य्यगृहे निबद्धाः सम-वर्त्तन्त, तदानीं तैराचार्य्यैरध्यापनासमये तत्तत्स्थानमधिकृत्य एकैकविचारपद्धतिं सुखेनैव शिष्याः समुपादिश्यन्त। शिष्या अपि नान्यत्र निबद्धमिदमुपलब्धव्यमिति कृत्वा महता प्रयत्नेन तां तां पद्धतिमन्तरगतां विदधिरे। सम्प्रति ता एव तैरवतारिता विचार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्धतयो मुद्रायन्त्रसाहाय्येन वाराणस्यादिस्थानतः प्रकाशं नीताः, तेन च गुरूणामपि शिष्येभ्यस्तत्प्रतिपादने वैमुख्यं, शिष्याणामपि तदर्थसौलभ्यपरिज्ञानात् नैव गुरुमुखात् तत्परिग्रहे निर्बन्ध इति प्राप्तस्तत्र शास्त्रार्थेषु महानेव बुद्धग्रवसादो विद्यार्थिनाम्। तदेवं मुद्रायन्त्रबाहुल्यं नितरामवसादाय संवृत्तं संस्कृतविद्याया इति निरवद्यः सिद्धान्तः सूक्ष्मवेदिनाम्।

यदि पुनरमीषां दोषाणामपसारणेन विद्यासमुन्नतिरभिप्रेयते, यदि पुनः प्राचीनकालतुलनया विद्यासमृद्धिः सम्पिपादयिषिता स्यात्, तदा संस्कृतशास्त्रविद्यार्थिनां लेखपद्धतिः प्राचीनरीत्या प्रवर्त्तयितव्या। सत्यपि मुद्रायन्त्रसमन्वये असन्निव सोऽयं मन्तव्यः। असति मुद्रायन्त्रव्यापारे यथा प्रवर्तितव्यं तथैव सत्यपि तस्मिन् यदि प्रवृत्तिः शक्यसाधना तदैव पुनरुद्भविता प्राचीनविद्यासाम्यं वर्त्तमान विद्यार्थिविद्याया इति मितञ्च सारञ्च वचनमस्माकम्।

वस्तुतस्तु स्वल्पायुष्कस्वल्पशक्तिकजनप्राये खल्वस्मिन् समये न हि सर्व्वथा शक्यं प्राचीनवृत्तमनुपालयितुम्, अतएव गुरोः समीपे ये ग्रन्था अध्येतव्या तन्मात्राणामेव स्वहस्तलिपिविन्यासः समुपदिश्यते। ये ये यत्र यत्र विशेषज्ञतामाकाङ्क्षन्ति, तेषामेव विषयाणां स्वहस्तलिपिसाहायकेन संग्रहः परेषाञ्च मुद्रापितानामेव सम्बन्धः कर्त्तव्यः। तेनैव नास्माकमैकान्ततो मुद्रायन्त्रसाहाय्यमपवर्जनीयं भवितुमर्हति। परन्तु मुद्रायन्त्रसाहाय्येन ग्रन्थप्रकाशकानां तथा कर्त्तव्यमवधानं परिशोधनादिव्यापारे यथा विशुद्धहस्तलिखितग्रन्थसमूहादपकर्षातिरेकं शङ्को नोपेयात्। ग्रन्थसंग्राहका अपि तथा मतिं दध्युः यथा भ्रमप्रमादादिपरिपूर्णा नोपादीयेरन् नापि वा विशुद्धा ग्रन्थाः परिवर्जेरन्। आधुनिकमुद्रापितग्रन्थानां बहूनामेव गतिरीदृशी यथा तदवलम्बनेन विद्याभ्यासः सुतरामविद्यामेव समनुकूलयति न तु विद्यामुपकारिणीम्। अतएव कालगतिमनुरुध्यमानानां संग्राह्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽपि मुद्रापितग्रन्थविशेषतो गुणविचारः समपेक्षित एव इत्यलं बहुजल्पनेन।

गोपीनां वस्त्रहरणम्

(पूर्वतोऽनुवृत्तम्)

लेखकः—योगीन्द्रनाथविद्याचुञ्चुः

उक्तं पूर्वं वयमिह सुखं जीवनं त्यक्तुमर्हा
लज्जां नारीचिरसहचरीं नैव काचित् कदाचित्।
तत् किं व्यर्थं पुनरपि गिरा नोदयस्येव चास्मां-
स्तादृग् व्रीड़ां सपदि हृदयाद्यातुमस्यां तटिन्याम् ॥ ३१

गोपीश्वरो रसमयः सुदृशां तदानीं
श्रुत्वा गिरः प्रकुपितारुणगण्डभाजाम्।
कौतूहलार्थमवदच्छृणुत प्रियोक्तिं
शैत्याश्रयात्तनुरलं भविता हि रुग्णा ॥ ३२

नास्तेऽत्र कश्चित् पुरुषो विना मां
शङ्का न काचित् क्रियतां तदर्थम्।
गोपायतेह स्वतनूः कुतो वा
सर्वत्र सत्ता मम वित्त धीराः ॥ ३३

संदृश्यतां नभसि मे जलदायमाना
मूर्तिर्विभाति धरणीरुहशैलशृङ्गे।
भूमीतले च पयसामुदरेऽप्यदूरे
दूरे च कुत्र सरला नहि मेऽधिकारः ॥ ३४

कृत्वा करौ नव सरोरुहकुड्मलाभौ
पूटीकृतौ मम निषीदत वृक्षमूलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकैकशो निजपटं दिशतार्पणार्थं
द्वैधं चणं न हि कदाचन संविधास्ये ॥ ३५
यस्यां यस्यां दिशि च नभसि क्ष्मातले वान्तराले
पर्ज्जन्यानां घनविटपिनां तेजसां चक्रवाले ।
कुर्व्वन्तीनां सचकितमहो दृष्टिपातं तदासां
कृष्णा मूर्त्तिर्नयनमुकुरे विम्बिता जायतेऽस्याम् ॥ ३६
आकण्ठमग्नवपुषां हरिणेचणानां
वक्त्राणि सम्भ्रमवशाच्चलतारकाणि ।
पद्मानि वातविचलद्भ्रमराणि तस्मिन्
संभत्संयन्ति जलगर्भमृणालकानि ॥ ३७
श्रेयान् मृत्युर्व्रजकुलभुवां दुर्यशःपङ्कलेपा-
दस्मिन्नेव द्युमणितनयाकृष्णतोये यदेवम् ।
अन्योऽन्यं ता मरणमतयः प्रोचुरग्रे तदीयां
गाढ़ाभोऽन्तर्दृष्टगुरतुलस्योश्रितां मूर्त्तिमग्राम् ॥ ३८
तं खञ्जनात्ययिसमोच्चणचारुवक्त्र
मास्यावसक्तललितध्वनिवेणुहस्तम् ।
कुन्दाभदन्तपटलद्युतिदीपितोष्ठं
मन्दस्मितं विदधतं विलसत्कटाचम् ॥ ३९
वैदुर्य्यनद्धमणिकुण्डलशोभिकर्णं
केयूरताड़वलयाञ्चितबाहुदण्डम् ।
मुक्तासमुज्ज्वलमहाद्युतिहारकण्ठं
दृष्ट्वैव ता युवतयो मुमुहुस्तदानीम् ॥ ४०
कृष्णो जलस्थो न तरौ कदम्बे
इत्येव मत्वा रमणीगणोऽयम् ।
गत्वा च नीपान्तिकमाशुगत्या
शाखाग्रलग्नांशुकजातमाप ॥ ४१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्यानुग्रहतोऽधिगम्य ललना वासांसि तूर्णं तदा
प्रोत्फुल्ला: परिधाय तत्र किमयं कादम्बशीर्षे न वा ।
इत्यौत्सुक्यवशात् समुन्नतदृश: पश्यन्ति चोर्ध्वं तरौ
सोऽयं तद्धृदयैकचिन्तनफलं चिन्तामणिर्लोकित: ॥ ४२

काश्चिल्लज्जावनतवदना संवरीतुं स्वमास्य-
मालम्बन्तेऽपरमृगदृशां पृष्ठभागं तदेव ।
काश्चित् प्रौढ़ा: प्रणयभरतो भूरिशो द्रष्टुकामा
लज्जावेगाद्विदधति मुखं सन्नतं भूमिपृष्ठे ॥ ४३

काश्चिद्बाला: शिशुकुचयुगा नातिनोच्चैर्हसन्त्य:
पार्श्वस्थानां परिहितपटं बाहुना कर्षयन्ति ।
काश्चिन्मुग्धा रतिरससरिन्मज्जनार्थं सचेष्टा:
सार्द्धं तेन स्वमनसि तदा चिन्तयन्त्येव कालम् ॥ ४४

यातोऽस्तं सविता चिरात् कमलिनी पत्युर्वियोगात् सती
शोकार्त्ता समुपैति मुद्रणमिति चिन्ता पतङ्गास्तदा ।
दु:खेनेव रुदन्ति तां परिजनै: सार्द्धं कुटुम्बै: क्षणं
सन्ध्येयं सहशर्व्वरी मृदुगतिर्द्रष्टुं समायाति ताम् ॥ ४५

अस्तग्रस्तंविचित्रभा: पुनरसौ नो लक्ष्यते वारुणे
दिग्भागे विलसन्ति चाम्बरतले माणिक्यपण्यालय: ।
ऐन्द्रे च क्रमशस्तनोति हसितं तारापतिर्योषित:
स्वं गेहं व्रजत प्रिया नहि शुभं लोकेऽत्र वस्तुन्तु व: ॥ ४६

भर्त्तारो जनका: सहोदरगणो नोद्वीक्ष्य युष्मान् गृहे
चान्वेष्टुं परित: समुत्सुकतरा भ्राम्येयुरुद्वेगत: ।
यूयं तत्त्वरितं स्वबान्धवजने दत्त स्वकं दर्शन-
मित्येतद्व्रजवल्लभ: समगदत् प्रादर्शयत् सत्पथम् ॥ ४७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुशिष्यसंवादः

(पूर्व्वतोऽनुवृत्तम्)

लेखकः—श्रीशरत्कमलन्यायस्मृतितीर्थः ।

यदि नामास्माकमेतादृशदुःसमयस्य परिवर्त्तनमाकाङ्क्षणीयं, तदा यथाशास्त्रं यथाधिकारं "संस्काराः कर्त्तव्याः" । संस्कृता मानवाः पूर्व्ववर्णितपापानि कर्त्तुं नार्हन्त्येव, एतावानेव संस्कारमहिमा ! तथा चाह भगवान् मनुः—

"वैदिकैः कर्म्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्य्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥"

"वैदिकैः"—वेदमन्त्रोच्चारणैः वेदप्रमाणकैर्वा, "कर्म्मभिः"—मन्त्रोच्चारणादीतिकर्त्तव्यतात्मकैः, पुण्यैः, "पावनः"—अशुद्धिनिवर्हणः, "शरीरसंस्कारः"—शरीरं संस्क्रियते येन सः (शरीरशब्दस्योपलक्षणत्वात् तत्कारणशुक्रशोणितादयस्तथा आत्मापि ग्रहीतव्यः), "निषेकादिः"—गर्भाधानादिः संस्कारः, द्विजन्मनां कार्य्य इति समुदितार्थः ।

अत्र—"प्रेत्य चेह च"—इत्यनेन संस्काराणामुभयलोकोपकारत्वमपि प्रतिपादितम् । ततश्च ये खलु संस्कारा इहलोकस्य तथा परलोकस्याप्युपकरोति तेषामुपयोगित्वं सर्व्वदैवोपलभ्यते इति वर्त्तमानोपयोगित्वे किमु वक्तव्यम् ?

अपि चाह हारीतः—

"ब्राह्मसंस्कारसंस्कृतः ऋषीणां समानतां (क) सामान्यतां (ख) समानलोकतां (ग) सायोज्यतां गच्छति । दैवेनोत्तरेणानुसंस्कृता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवानां समानतां सामान्यतां समानलोकतां सायोज्यतां गच्छति॥" इति

"समानता"—समानो मानः पूजा यस्य स समानः, समानस्य भावः समानता। "सामान्यता"—सामान्यशब्दः समानपर्य्यायः, तेन तुल्यरूपता उक्ता। "समानलोकता"—एकलोकनिवासः। "सायोज्यता"—समानम् आयोज्यं शरीरं (आयोज्यते सङ्घातोक्रियते यदिति व्युत्पत्त्या आयोज्यशब्देन सङ्घातीभूतं शरीरमुच्यते) यस्य स सायोज्यः, तस्य भावः सायोज्यता।

गर्भाधानादिपूर्वोक्तषोड़शसंस्कारैः स्मार्त्तैः संस्कृतो जन ऋषिवत् पूजां ऋषितुल्यरूपतां ऋषिस्वभावतां तथा ऋषिभिः सह एकलोकवाससुखं लभते, स्वकीयमपि शरीरं तस्य ऋषीणां शरीरमिव भवतीतिमिहदुपयोगित्वमेषामुपपादितम्।

एवं "पाकयज्ञा हविर्यज्ञा सौम्याश्च देवस्य" इति हारीतवचनं पूर्व्वमेव व्याख्यातं, "सौम्याः" सोमयागा अग्निष्टोमादय इत्यपि व्याख्यातम्। तादृशैः श्रौतैः संस्कारैः संस्कृतो जनो देववत् पूजां, देवतुल्यरूपतां देवस्वभावतां तथा देवैः सह एकलोके वाससुखमनुभवति, स्वकीयमपि शरीरं तस्य देवानां शरीरमिव भवतीति महदुपयोगित्वं कीर्त्तितमेषां (संस्काराणाम्)। एतदेवोक्तं महर्षिगौतमेनापि यथा—

"यस्य खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति।"

अपि चाहतुः—शङ्खलिखितौ—

संस्कारैः संस्कृतः पूर्व्वैरुत्तरैरनुसंस्कृतः।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्राह्मलौकिकः॥
ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः।
नाकपृष्ठं यशो धर्म्मं त्रिरोजानस्त्रिविष्टपम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्व्वैः स्मार्त्तैः संस्कारैः संस्कृतः, तथा उत्तरैः श्रौतैः संस्कारैरनुसंस्कृतः, तथा अष्टगुणैर्नित्यं युक्तो ब्राह्मणः विरोजानः—(पाक-हविः-सोम-संख्याभिरित्यर्थः) सन् नाकपृष्ठं स्वर्गं यशो धर्म्मञ्च लभते तथा क्रमशः ब्राह्मलौकिकः ब्रह्मलोकार्हः सन् ब्राह्मं पदं—"तद्विष्णोः परमं पद"मितिश्रुतिवर्णितं ब्रह्मपदमपि अवाप्नोति, यस्मात् ब्रह्मपदात्—जीवः पुनर्न च्यवते स्खलितो भवति—"न स पुनरावर्त्तते" "यस्माद् भूयो न जायते" इत्यादि श्रुतेः ।

"यश" इति ऐहिकं "नाकपृष्ठ"मिति पारलौकिकं "धर्म्म"मिति दृष्टादृष्टोभयफलं "ब्राह्मं पद"मिति चरमं परमं फलं संस्काराणामुक्तं वेदितव्यम् । एतेन धर्म्मार्थकाममोक्षरूपचतुर्व्वर्गफलप्राप्तिरप्युक्ता ।

तथा "यशो धर्म्मं नाकपृष्ठं ब्राह्मलौकिकः सन् "ब्राह्मं पदमवाप्नोति" इत्येवं क्रमवर्णनात् संस्कारफलकः "श्रुतिवर्णितः क्रममुक्तिमार्गोऽ"प्युपदिष्ट इत्यप्यवधेयम् ।

दृश्यते मानवेषु कश्चिद्धर्म्ममभिलषति, कश्चिदर्थं, कश्चित् कामं कश्चिद्वा मोक्षम् । ततश्च यस्य यदेव वाञ्छनीयं तदेव संस्कारा दातुमर्हन्तीति स्पष्टमुपपादितं भवति । मोक्षात् परमुत्कृष्टं फलं न किमपि विद्यतेतराम्, यतो हि सर्वस्मादेव फलात् पुनरावर्त्तनमकृतकृत्यता च, मोक्षात्तु जीवानां न पुनरावर्त्तनमपि तु कृतकृत्यतैवोपजायते, यतः स मोक्षः स्वयमेव पुनरनावर्त्तनं—तदेतत् श्रूयते

"आत्मानं चेद् विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥"

(बृहदारण्यकोपनिषत् ।४।४।१२।)

स्मर्य्यते चापि—

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत !"

(भगवद्गीता—१४।२०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च येषां संस्काराणां मुक्तिः शेषं फलं तेषां सर्वदैवोपयोगित्वम-
स्तीति किमु वक्तव्यं तेषां वर्त्तमानोपयोगित्वे ?

द्वितीयशिष्यः। अवगतमस्माभिः संस्काराणामुपयोगित्वं सामान्य-
लक्षणञ्च। अन्या खलु जिज्ञासा वर्त्तते चात्र।

गुरुः। कीदृशी तावज्जिज्ञासा कथ्यताम्।

द्वितीयः। यद् यत् फलमुक्तं संस्काराणां तदार्थवादिकं भवति
न वा ? ततश्च अर्थवादस्य प्रकृतार्थे तात्पर्य्याभावात् "संस्काराः
प्रशस्ता" इत्येवमेवार्थः स्यात्, नतु परमार्थतः संस्कारेभ्यस्तत्तत्
फलमुपजायते नाम।

गुरुः। मैवं मन्यताम्। यदा हि गर्भाधानादिविशेष संस्कार-
व्याख्यानमवतारयिष्यामि तदैव संस्कारेभ्यो वर्णितमिदं
फलजातमुपजायत इति प्रदर्शयिष्यामि। साम्प्रतं तस्य दिङ्
मात्रमुपक्षिप्यते, श्रूयताम्। तथा च संस्कारेषु—अष्टौ तावदात्म-
गुणाः कीर्त्तिता।

"दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्य
मस्पृहा चे"ति।

एतेषां लक्षणान्यपि प्राक् कीर्त्तितानि ("आत्मवत् सर्व्वभूतेषु
तद्धिताय शिवाय च" इत्यादि बृहस्पत्युक्तानि) स्मर्य्यन्ताम्। "सर्व्व-
भूतेषु आत्मदृष्टिं" विना दयागुणो नोपजायत इति स्वीकर्त्तव्यमेव।
तथाच एतामेवावस्थां वर्णितवान् भगवान् याज्ञवल्क्यो बृहदारण्य-
कोपनिषदि स्वपत्नीं मैत्रेयीमाहूय—

"न वारे मैत्रेयि! पत्युः कामाय पतिः प्रियो भवति" इत्यारभ्य
"आत्मनस्तु कामाय सर्व्वं प्रियं भवति" इत्यन्तग्रन्थेन।

आत्मा खलु निरतिशय प्रेमास्पदः। "अहं यथा निरतिशय-
प्रेमास्पद आत्मपदार्थः एवं सर्व्वाण्येव भूतानि,—अर्थाद् "योऽहं
निरतिशयप्रेमास्पद आत्मा स एव आत्मा एतानि सर्व्वाणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यमानाद्दृश्यमानानि भूतानि"—एवं रूपोऽवबोधो यदा मानवहृदय मवतरति तदेव मानवानां सर्व्वभूतेषु दयारूपः संस्कारात्मक आत्मगुण उपजायत इति परमात्मभूत ब्रह्मज्ञानमेव संस्कारलक्षणदयारूपात्मगुणस्य मूलमित्युपपादितं भवति। एवं रीत्या—

"वाह्ये चाभ्यन्तरे चैव दुःख उत्पादिते परैः।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता।"

इत्यादि बृहस्पतिवर्णितपूर्व्वोक्तावशिष्टात्मगुणरूपसंस्कारेष्ववबोधः कर्त्तव्यः। एतामेवास्थामुदाजहार श्रीभगवान् गीतायाम्—

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥"

एवमन्यत्रापरात्मगुणरूपे संस्कारेऽववोधः कार्य्यः। तथाहि यदा खलु मानवहृदयं तादृशगुणावलीमण्डितमुपजायते तदा खलु स मानवो मुक्त एव भवतीति स्वीकर्त्तव्यमेव। अतः संस्काराणां यदुपयोगित्वं वर्णितमितः प्राक् तस्य प्रकृतार्थे तात्पर्य्यमपहृत्य प्रशस्तपरतयाऽर्थवादमात्रपरत्वकल्पनं नोपयुज्यते। तत्त्वमिदं गर्भाधानादिविशेषसंस्कारव्युत्पादनसमये विशेषतो व्यक्तीभविष्यतीति।

शिष्यः। आगतमुपयोगित्वमेषाम्। किन्तु साम्प्रतं श्रुतिस्मृतिकथितसदाचारादि सर्व्वमेव लुप्तप्रायमवभासते इत्यवितथम्। तथा चास्मिन् खलु दुर्युगे बहुवित्तव्ययायाससाध्यास्ते संस्कारा न सम्भविष्यन्तीति मन्यामहे।

गुरुः। मैवमवधार्य्यताम्। यदि नामास्माकं स्वजातौ परमा प्रीतिः स्यात् स्वधर्मे चानुरागः परिस्फुरेत्, तदा सर्व्वमेव सम्भवेत्। "स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भया"दिति धर्म्मानुरक्तानामिह किमसम्भवमस्ति? अपि च येषां सर्व्व

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारा न सम्भविष्यन्ति तान् प्रत्याह स परमकारुणिको महर्षिर्गौतमः—

"यस्य खलु संस्काराणा मेकदेशोऽप्यष्टावात्मगुणाः।
अथ स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति गच्छति॥"

वयं किमिदानीं संस्काराणामेकदेशमपरनुतिष्ठामः? इदानी-मस्माकं ये संस्कारा दृश्यन्ते ते हि कङ्कालावशिष्टाः। तथाच—उपनयनमस्ति, किन्तु तस्य प्राणभूतं ब्रह्मचर्य्यवेदाध्ययनादि न दृश्यते, सर्व्वाश्रममूलभूतगार्हस्थ्यसम्पादको विवाहसंस्कारोऽपि प्रहसनमात्रे पर्य्यवसितः। एवं यत्रैव दृष्टिः पतति स एव संस्कारः साम्प्रतमहि-निर्ल्वयणीव वल्मीके मृता प्रतिभाति।

शिष्यः। सत्यमुक्तमाचार्य्यपादेन। किन्तु ब्रह्मचर्य्यपालनेन, वेदाध्ययनेन, आहोस्विद् गार्हस्थ्याश्रमोक्तपञ्चयज्ञाद्यनुष्ठानेन किमिदानीन्तनजीवनसमस्यासमाधानमुपजायेत, यतस्तत्र लोकः प्रवर्त्तिष्यते?

गुरुः। किमुक्तं श्रीमद्भिः? ब्रह्मचर्य्यवेदाध्ययनादि परिहृत्यैव इदानीन्तनजीवनसमस्यासमाधानं कर्त्तुं शक्यते? असम्भवं मन्यतामेतत्। यदि नाम तदेवाभविष्यत् तर्हि सर्व्वेषामेव कथं दग्धोदरपरिपूरणार्थमेतादृशः कोलाहलः श्रूयते? बहुभिरेव वर्णाश्रमधर्म्मोक्तसंस्कारादि परिहृतं वैदेशिकशिक्षामात्रा-लम्बलैर्नानापथमाश्रयद्भिर्जीवनसमस्यासमाधानार्थमितस्ततः परिभ्रम्यते। केचित् स्ववृत्तिमपहाय श्ववृत्तिमवलम्बन्ते, केचिदसद्वाणिज्यादि कुर्व्वन्ति, केचित् स्वधर्म्ममपहाय विदेशं गताः सन्तस्तत्रापरवमानाद्येव लभन्ते, कथं तेषामेतादृशी दुर्गतिः? न ते वेदाध्ययनब्रह्मचर्य्यादि कुर्व्वन्ति? किं बहुना यासामादर्शं पश्यद्भिरेतदुक्तं श्रीमद्भिः, ता अपि विदेशस्था जातयः किं भवदुक्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनसमस्यासमाधानपटवः ? मैवं मन्यताम्। यदि ता जातयस्तादृशास्तदा साम्प्रतमपि तासां देशे धनिदरिद्रविवादः युद्धविग्रहादि तथैवमशेषविधो विप्लववादः कथं दृश्यते नाम ? त्यागतपस्यादिपूते अस्मिन्नेवाध्यात्मिकभारतवर्षे जीवनसमस्या-समाधानमभवत्, साम्प्रतमपरास्ति। सर्वदर्शिभिः खलु परम-र्षिभिरेव जीवनसमस्यासमाधानोपायो विज्ञातः। स खलूपायोऽष्ट-चत्वारिंशत्संस्कारादिमण्डितवर्णाश्रमधर्म्मावलम्बनम्। साम्प्रतं दूरं तादृशमुपायमपहाय सर्व्व एव सर्व्वेषामधिकारमादाय कन्दुकक्रीड़ामारभन्ते, तत एवाधुना वृत्तिसङ्कटः समुपस्थितः, सङ्कटेन खलु तादृशेनाऽसृज्यत भवदुक्तजीवनसमस्या।

"विषया विनिवर्त्तन्ते निराहारस्य देहिनः"

तत्त्वमिदं भारतवर्षेणैव पवित्रेणावगतम्, तत एव तदीयं जीवनं वैराग्यमण्डितं सन्न्यासभूषितमदृश्यत, तत एव "सन्तोषो जीवनोपाय" इत्यमन्यत, तत एव तेन (भारतवर्षेण)

'सर्व्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः।'

'योऽर्थे शुचिः स हि शुचिः न मृद्वारिशुचिः शुचिः॥'

इत्यादिमवितथां भारतीं भाषितुमशक्यत। भोगपरिपुष्टप्रमाथि-जीवानां सागरशोषिणी खलु पिपासा

'परं दृष्ट्वा निवर्त्तते'

इति यथार्थसत्यस्य मधुरिममण्डिता मोहिनीमूर्त्तिर्भारतवर्षस्यैव हृदयमन्दिरमधिचकार, तेनैवाध्यात्मिकभारतवर्षमिदं जीवन-स्यापहाय समग्रमभिलाषं परात्परान्वेषणाय समाधिमग्नमभवत्। तस्मादेव तदानीं समाधिमग्नभारतवर्षस्य विश्व-विदारि-कण्ठाद श्रूयत विश्वेनेयं सर्व्वभूतानामभयवाणी खल्वश्रुतपूर्व्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृण्वन्ति विश्वे अमृतस्य पुत्राः ।
आये धामानि दिव्यानि तस्थुः ।
अग्निर्यत्राभिमथ्यते, वायुर्यत्राभियुज्यते,
सोमो यत्रातिरिच्यते तत्र सञ्जायते मनः इति

अहो ! महद्दुःखमिदानीमिह समुपस्थितं तस्यैवामृतपुरुषस्य परमस्नेहास्पदाः खल्विमे भारतीया विहाय तममृतमार्गमिदानीं मृतशरणिमनुगच्छन्तो जीवनसमस्यासमाधानमभिलषन्तो मृता इवावभान्ति । ततश्च नायं पन्था भारतीयानां वर्णाश्रमिणामिति प्रागेवाभिहितम्—

वर्णाश्रमविभागो हि भारतस्य विशिष्टता ।
यदि नाम न विद्येत मरणं शरणं भवेत् ॥

तस्मादष्टचत्वारिंशत्संस्कारादिमण्डितपरमपूतसनातनवर्णाश्रम धर्मप्रदर्शितपथेनैव जीवनसमस्यासमाधानमागमिष्यतीत्यर्थमेवै तेषां (संस्काराणाम्) व्युत्पादनप्रयत्नो मे भवद्भिरवगन्तव्यः ।

शिष्यः । अवगम्यतेऽस्माभिः । इतःपरमष्टचत्वारिंशत् संस्काराणां यज् ज्ञातव्यमस्ति तदवगन्तुमिष्यते ।

गुरुः । आगामिनि दिवसे तत् कथयितव्यम् । अद्य तावदियं कथाऽत्रैव विरमतु ॥

शिष्यः । यथा आज्ञापयन्ति गुरुपादाः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्तिकनास्तिकदर्शनविवेकः

(पूर्व्वतोऽनुवृत्तः)

लेखकः—श्रीहरिपद काव्यस्मृतिमीमांसातीर्थः

इदानीं सांख्यवादप्रक्रिया वर्ण्यते। तत्रभवान् कपिलस्त्रिविधतापपरीतत्रिलोकसमुद्धरणायावतरन् तत्त्वमिदं समुदीरयामास,—"त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति। आध्यात्मिकाधिभौतिकाधिदैविकदुःखाभिघातवेदनाविधुरो जीवो निरन्तरमेव क्लेशोदधिमग्नोऽनन्तमन्तस्तापमाप्नोति। कदाचित् वातपित्तश्लेष्मप्रकोपपीड़ितो दाहज्वरराजयक्ष्मादिविक्षोभितः स्वलीलामुपसंहरति। कदाचित् कामसंकल्पवासनापूरणाय इतस्ततो धावन् पूर्णाभिलाषोऽनुशयो शिथिलानुबन्धो विषयमृगतृष्णामुपशमयितुमलम्भविष्णुरन्तस्तापपरिपाकं कुर्वन् क्षीणमना मनागपि मुदं न लभते। कदाचन व्याघ्रतस्करवैरिभिर्जीवग्राहं गृहीतोऽशेषमेव क्लेशमापद्यते। कदाचन शीतवातातपविशीर्णाङ्गो भङ्गुरो भवति क्षणेनैव। तदेतत्त्रिविधदुःखात्यन्तनिवृत्तिर्यया रीत्या भवति, सैवाख्येया। न खलु दृष्टोपायेन धनादिना तस्यात्यन्तनिवृत्तिः कदाचन जायते। यतो नष्टे द्रविणे पुनरपि तदेव दुःखमनुवर्त्तते प्राणिनः। तत एवोक्तम्—"न दृष्टात्तत्सिद्धिर्निवृत्तेऽप्यनुवृत्तिदर्शनात्"। श्रुतिरपि घोषयति "अमृतत्वस्य तु नाशास्ति वित्तेनेति"। धनाद्यर्ज्जनप्रवृत्तिस्तु, आपाततो दुःखध्वंसायोपपद्यते; तदुक्तम्,—प्रात्यहिकक्षुत्प्रतीकारवत् तत्प्रतीकारचेष्टनात् पुरुषार्थत्वमस्ति। यदि वदति कश्चित्,—यत् प्रत्यक्षमेव धनार्ज्जनादिना प्रात्यहिकदुःखध्वंसकरणात् धनार्ज्जनादेरेव दुःखध्वंसं प्रति कारण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमव्याहतमिवातोऽलमन्यचेष्टया। तत्रोच्यते—धनार्ज्जनादिना दुःख प्रतीकारोऽपि प्रमाणकुशलैर्दुःखपक्षे एव निक्षेपणीयः। न खलु धनार्ज्जनादिना यावद्दुःखं नश्यति, नाशसम्भवे वा पुनरपि प्रतिग्रह-हिंसाजन्यपापैर्दुःखहेतुभूतमपुण्यमुद्भवति। तथा चोक्तम्—योगसूत्रे "परिणामतापसंस्कारैर्दुःखैर्गुणवृत्तिविरोधाच्च, सर्व्वमेव दुःखं विवेकिनः" इति। तद्दुःखपरिजिहीर्षया पञ्चविंशतितत्त्वसाक्षात्कार एव कर्त्तव्य इति तेषामभिमतम्। सुखदुःखमोहान्वितं सर्वं वस्तु साम्यावस्थापन्नरजस्तमोगुणस्वरूपप्रकृतिकार्य्यमेवमुक्तम्। अचेतनापि प्रकृतिर्वत्सविवृद्ध्यर्थं क्षीरमिव प्रपञ्चसृष्ट्यर्थं स्वयमेव प्रवर्त्तते। तस्या जीवेन विवेकाग्रह एव दुःखनिदानमिति तद्विशेषज्ञानमेव दुःखध्वंसात्मकाय मोक्षाय कल्पते। ईश्वरस्तु तदधिष्ठानतया निमित्तत्वेनोपादानत्वेन वा न कथमपि सिध्यतीति कार्य्यत्वहेतुकानुमानं प्रधाननिर्णय एवोपक्षीणम् ईश्वरसत्त्वं नैव गोचरयतीति ईश्वरसत्तां नानुमन्यन्ते। तथा चोक्तं भगवता कपिलेन महर्षिणा—

"अहङ्कारकर्त्रधीना कार्य्यसिद्धिर्नेश्वराधीना प्रमाणाभावात्" इति सूत्रेण।

प्रकृतिस्तावत्—प्रधानान्यनामधेया, अनवस्थाभिया न तस्याः काचन प्रकृतिरभ्युपगम्यते। पुरुषस्तु न प्रकृतिर्नवा विकृतिः, परन्तु पुष्करपलाशवन्निर्लेपः। अन्धपङ्गुन्यायेन एतदुभाभ्यां संसृष्टाभ्यां कार्य्यसिद्धिरिति तेषामाशयः। कार्य्यानुमानात् प्रधानकारणसिद्धिश्च। तथा च सांख्यकारिकायाम्—

"असदकरणादुपादानग्रहणात् सर्व्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणाभावाच्च सत्कार्य्यम्॥"

स्मृतौ च "नासतो विद्यते भावो नाभावो विद्यते सतः" इति भगवद्वचनम्। नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः, बाधानुपलम्भात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिष्ठानारोपयोश्चिज्जड़योः कलधौतरौप्यादिवत् सारूप्याभावेनारोपसम्भवाच्च। तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयम्। तथा च प्रयोगः—विमतं भावजातं सुखदुःखमोहात्मक कारणकं तदन्वितत्वात्—यद्येनान्वीयते तत्तत्कारणकं यथा—रुचकादिकं सुवर्णकारणकं सुवर्णान्वितत्वात्। तथाचेदं तस्मात्तथा। जगदुपादाने येयं सुखात्मकता सत्त्वं, या दुःखात्मकता तद्रजः, या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिरव्याहता। तथा च "त्रैगुण्यविषया भावा" इति। यस्य यस्मिन् दृष्टे सुखमाविरस्ति तं प्रति तस्य सत्त्वगुणोद्रेकः, यस्मिन्दृष्टे दुःखं तम्प्रति रजोगुणोद्रेकः, यस्मिन्नलब्धे मोहो भवति, तं प्रति तमोगुणोद्रेक—इति सार्व्वजनीनम्। तथाच श्वेताश्वतरोपनिषदि श्रूयते—

"अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजा जनयन्तीं सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते,
जहात्येकां भुक्तभोगामजोऽन्यः॥"

अत्र लोहितशुक्लकृष्णशब्दा रञ्जकत्वप्रकाशकत्वावरकत्वसाधर्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपरा इति सिद्धम। न खलु परमेश्वरः करुणया प्रवर्त्तक इति वाच्यम्, विकल्पानुपपत्तेः। स किं सृष्टेः प्राक्प्रवर्त्तते, तदूर्ध्वं वा? आद्ये शरीराद्यभावेन दुःखानुत्पत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः, द्वितीये परस्पराश्रयत्वप्रसङ्गः। करुणामोदितस्य सृष्टिकार्य्यप्रवृत्तिः, सृष्ट्या च कारुण्यमिति पक्षद्वयमपि, अपास्तम्। तस्मादचेतनस्यापि चेतनानधिष्ठितस्य—प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तः प्रधानपुरुषसंयोगनिमित्तः। यथा निर्व्यापारस्यायस्कान्तस्य सन्निधानेन लोहस्य व्यापारस्तथा निर्व्यापारस्य पुरुषस्य सन्निकर्षात् प्रधानव्यापारो युज्यते? पङ्ग्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धवत् परस्परापेक्षानिबन्धन इत्युक्तमेव प्राक्। प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते, पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छायापत्त्या तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। यथोक्तम्—

"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि सम्बन्धस्तत्कृतः सर्गः।"

प्रकृतिस्तु भर्त्रा दृष्टदोषा स्वैरिणी यथा भर्त्तारं पुनर्नोपैति, तथा निवर्त्तते।

यथोक्तम्,—

"रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य निवर्त्तते प्रकृतिरिति।"

निरीश्वरवाद एवाश्रितस्तत्रभवता भगवदवतारेण कपिलेन। यत्पुनर्विज्ञानभिक्षुणाचार्येण सांख्यशास्त्रस्य निरीश्वरवाद उपेक्षणीय इति ग्रन्थारम्भे बहुशः प्रयासः कृतः, सांख्यदर्शनपर्य्यालोचनेन पुनः—स पक्ष उपेक्षणीय एव। "यं न पश्यन्ति योगीन्द्राः सांख्या अपि महेश्वरम्" इत्यादिकूर्म्मपुराणवचनशतैः सांख्यानामीश्वराज्ञानस्यैव प्रकटितत्वात्। पद्मपुराणीयपार्व्वतीश्वरसंवादेऽपि—निरीश्वर सांख्यादिशास्त्रज्ञानेन पातित्यमायाति इत्यपि घोषितम्। "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्" इत्याद्युक्त्वा "सांख्यस्तु कपिलेन वै। द्विजन्मना जैमिनिना पूर्व्वं वेदमयार्थतः। निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्। धिषणेन तथा प्रोक्तम् चार्व्वाकमतिगर्हितम्" इति नास्तीश्वरवादिनां गर्हणा कृता। ईश्वरमप्रमाणयन्तोऽपि ते वेदपरलोकादिप्रामाण्याङ्गीकारात् कर्म्ममीमांसका इव कथञ्चित् आस्तिका एव।

कणभुजां मते तावत् पीलुसंज्ञमेव कारणमेतस्य जगतोऽवगम्यते। तस्मादेवादौ वियदनिलतेजोऽब्बनिप्रभृति चराचरमुत्पद्यते कार्य्यजातम्। अतः कारणात्यन्तभिन्नमेव कार्य्यमसत्कार्य्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादिना कणादेनाभिहितम्। जीवसाक्षात्कारद्वारा साधर्म्य-वैधर्म्याभ्यां सप्तपदार्थनिर्विचिकित्सनिश्चयान्मोक्षो दुःखप्रागभावा-समानकालीनदुःखध्वंसरूपः प्रतिभासते।

तत्रभवान् भगवान् गोतमस्तु न्यायदर्शनमान्वीक्षिक्यपरपर्य्यायं विरचयन् तत्त्वज्ञानाद्दुःखात्यन्तोच्छेदलक्षणं निःश्रेयसं भवतीति प्रतिपादितवान्। तत्त्वज्ञानञ्च प्रमाणप्रमेयादिपदार्थादिनिरूपणद्वारेण सम्भवति। पक्षिलस्वामिना च—"सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना" "प्रदीपः सर्वविद्यानामुपायः सर्व्व-कर्म्मणाम्। आश्रयः सर्व्वविद्यानां विद्योद्देशे प्रकीर्त्तिता" इत्यभाणि। वैशेषिकैरस्य सर्वमेव सममाभाति। केवलं श्रुतिगति-रस्याधिका। न्यायशास्त्रे श्रुतेः प्रामाण्यमुक्त्वा विध्यर्थवादादिभेद-मुपवर्णितवान्। तत्त्वज्ञानानन्तरमेव किं निःश्रेयसं सम्पद्यते? नेत्युच्यते, किन्तु तत्त्वज्ञाना "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्त-रोत्तरापाये तदनन्तरापायादपवर्ग" इति सूत्रेण सर्व्वमेव व्यक्तीचकार गोतमः। तत्र मिथ्याज्ञानं नामानात्मनि देहेन्द्रियादावात्मबुद्धिः, तदनुकूलेषु रागस्तत्प्रतिकूलेषु च द्वेषः। वस्तुतस्त्वात्मनः प्रतिकूल-मनुकूलं वा न किञ्चिदस्ति। परस्परानुबन्धत्वाच्च रागादीनां मूढो रज्यति, रक्तोमुह्यति, मुह्यमानः कुप्यति, कोपपरीतो मोहमेति। इत्थ-मेव रागद्वेषप्रणोदितः प्राणिनिकायोऽस्मिन् संसारे शारीरवाचिक-मानसिकपातकानि हिंसास्तेयानृतपरद्रोहादीन्यसकृदाचरन् स्थावर-तिर्य्यगन्त्यजातिभावमापन्नो भवति। तथाच स्मृतिः "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्य-जातिताम्।" यदि कायेन वाचा मनसा च दानपरित्राणहितसत्या-हिंसादीनि कर्म्माण्याचरति शुभानि, तदा पुण्यमाविर्भवति, ततश्च उन्नतिर्भवति। सेयं धर्म्माधर्म्मरूपोभयी प्रवृत्तिः। ततश्च प्रशस्तं निन्दितञ्च जन्म पुनः शरीरान्तरपरिग्रहः! तस्मिन् सति प्रतिकूल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदनीयतया वासनात्मकं दुःखं भवति। त इमे मिथ्याज्ञानादयो दुःखान्ताः सन्ततमेव प्रवर्तमानाः संसारशब्दाभिधेया घटीयन्त्रवदनिशमेवानुवर्तन्ते। यदा कश्चन सज्जनः पुराकृतसुकृतराशिपरिपाकवशात् कारुणिकाचार्य्योपदेशेन सर्व्वमिदं दुःखायतनं विविधदुःखहुतभुजा दन्दह्यमानञ्च पश्यति, तदा तत् सर्वं हेयत्वेन बुध्यते, ततस्तन्निवर्तकमविद्यातिरोधानोपायमिच्छति। तन्निवृत्त्युपायश्च तत्त्वज्ञानमिति कस्यचित् चतसृभिर्विद्याभिः प्रविभक्तं प्रमेयं भावयतस्तत्त्वज्ञानं जायते, ततश्च मिथ्याज्ञानमावरणं नश्यति, तदपाये च तदुद्भवा दोषाः स्वयमेवापयान्ति। दोषापायानन्तरं प्रवृत्तिरपैति, तदपाये जन्मापैति, जन्मनोऽपाये दुःखमत्यन्तं निवर्त्तते। सात्यन्तिकी निवृत्तिरपवर्गः। "क्षितिः सचेतनकर्त्तृका कार्य्यत्वात् घटवत्" इत्याद्यनुमानेन जगत्कर्त्तारं साधयन्ति इति ईश्वरास्तित्ववादिन एवैते।

वेदान्तदर्शने तावत् "अथातो ब्रह्मजिज्ञासा" इत्यारभ्य "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" इत्यन्तेनाध्यायचतुष्टयेन नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्म एव जगत्कारणमिति प्रतिपादितं वादरायणेन।

"जन्माद्यस्य यत" इति सूत्रेण "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभि संविशन्ती"त्युपनिषद्वचनेन ब्रह्मैव दृश्यमानस्य जगतः स्रष्टृ-पालयितृ-संहारयितृरूपेणाभिमतमित्यसकृदेव साधितम्। "अस्यैव महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेद" इत्यादिर्बृहदारण्यकश्रुत्या चतुर्णां वेदानां प्रभवत्वेनापि तदेवाम्नातम्। 'ब्रह्मविद् ब्रह्मैव भवति,' 'अभयं वै जनक प्राप्तोऽसि,' "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"। "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादि शतशः श्रुतिवचनप्रामाण्येन अविद्यादोषोप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवृत्तये परमार्थब्रह्मज्ञानमेव प्रयोजनमिति उक्तम्। "वाचारम्भनं विकारो नामधेयं मृत्तिकेत्येव सत्य"मिति उपनिषद्वचनेन ब्रह्मातिरिक्तं नान्यदस्तीति प्रमाणितम्। "अत्ता चराचरग्रहणात्" इति वादरायणसूत्रेण, 'कम्पनाच्च' इत्यन्तेन सर्व्वेषामेव भयानकानां भयहेतुस्तदेव इति प्रतिज्ञातम्। "भीषास्मात् वातः पवते भीषोदेतिसूर्य्यः" इत्याद्युपनिषद्वाक्येन सूर्य्यचन्द्रयमादीनामपि निग्रहानुग्रहकारि तदेव परब्रह्मेत्याम्नातम्। तदेवं सर्वेषामेवास्तिकनास्तिकमतानुवर्त्तिणां महर्षीणां सत्यपि प्रकरणान्यत्वे अत्यन्तदुःखनिवृत्तिरेव लक्षणीया इत्यत्र ऐक्यमायाति। केचन वदन्ति सुखाभिव्यक्तिरेवमुक्तिः। केचन वा दुःखात्यन्ताभाव एव साधनीय इति स्वीकुर्व्वन्ति। लोकायतिकानामपि सुखसाधने महानाग्रहः परिलक्ष्यते। कतिचन जगतः पदार्थनिरूपणद्वारेणैव निखिलपदार्थस्वरूपज्ञानेन दुःखप्रतिकूलवस्तुविज्ञानात् तदायत्तीकरणे दुःखं समूलमुन्मूलितं भवेदिति, तत्रैव तेषां यत्नः सूपलक्ष्यते। महान्तः केचन सुखन्तावत् दुःखपरित्यागेन सर्व्वथा दुर्ग्रहमिति कृत्वा सुखमेव न कदापि वाञ्छनीयमिति दुःखदूरीकरणे यतितव्यमिति वदन्ति। संसारस्यायं सदसद्भ्यामनिर्वाच्य एव इत्यत्रापि अनेकेषामेकमत्यमस्ति। परं नानामतमवलम्बमानास्तत्तद्विभिन्नमार्गतत्त्वमाविष्कुर्वन्तः स्वयमेव पृथिव्यां भेदमात्मनः परिस्फुटीचक्रुः। सांख्यमते तावत् प्रकृतिपुरुषयोर्विवेकादेव मुक्तिः। वेदान्तिनस्तावत् जगत्प्रपञ्चस्य मिथ्यात्वं व्यवहारिकं साधयन्तः परब्रह्मात्मनैक्यमेव मोक्षस्वरूपमाकलयन्ति। "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्य"मिति सूत्रेण कृतभोगापवर्गाणां पुरुषार्थशून्यानां कार्य्यकारणात्मनां गुणानां स्वकारणेऽत्यन्तविलय एव कैवल्यमिति प्रकटयता स्फुटीकृतं तत्रभवता भगवता पतञ्जलिना मोक्षलक्षणमात्मनोऽभिप्रेतम्। तदेवं महर्षयः मुक्तिं विभिन्नस्वरूपां वदन्तः परस्परमतद्वैधमावि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यक्तुः। यो येन रूपेण मानवानां दुःखप्रहाणोपायं भावयामास स तेनैव रूपेण स्वमतं व्यक्तीचकार। न खलु मानवानां मतिरेकविधैव। अन्यथा—

"वेदा विभिन्नाः स्मृतयो विभिन्नाः,
नासौ मुनिर्यस्य मतं न भिन्नम्।
धर्म्मस्य तत्त्वं निहितं गुहायां,
महाजनो येन गतः स पन्थाः॥"

इति महाजनगणाग्रगणनीयानां तत्रभवतां त्रिकालोन्मीलितनयनां नारायणांशावतीर्णानां भगवतां व्यासानां वचनमलीकमेव स्यात्।

अत्र जगतीतले कलुषाकुलमतीनां जीवानां यातनानाशनाय पूर्व्वं महर्षयः शतं समाः समाधियोगबलेन तत्त्वज्ञानोदयादासाद्य महतीं शक्तिं यद् ज्ञातवन्तस्तदेव करुणया अन्याकारेण परिणमय्य प्रकाशितवन्तः। वयन्तु अविद्याविक्षिप्तमतयो गहनेऽस्मिन् संसार-कान्तारे परिभ्रमन्तः सर्व्वथा तत्त्वं न लब्धुमीशाः। यथा खलु तेषां मतमस्माकं नयनसमक्षमेव प्रतिभास्यति तथा वाङ्मनःकायैर्गुरु-शुश्रूषणे यतितव्यमस्माभिरिति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

(माघमासतोऽनुवृत्तम्)

कलिः—पुणो पुणो वुच्चदि, एक्को ज्जेव तह पादवोत्ति, जइ ण पच्चओ, ता गच्छ इदो अवरं अह्मेहिं णो बिसादं।

नलः—भद्र, कथं कुप्यसि? अनधिगतकाननवृत्तान्तोऽस्मीति पृच्छ्यसे।

कलिः—किदं सम्पदं पह्लाणुपह्लिआए, जाव अह्मेहिं बिसादं दाव भणिदं, दाणिं जइ फलं कामेसि, ता गच्छ, असधा इध ज्जेव कुक्खिवेअणाए मूच्छिदो चिट्ठ।

नलः—भद्र, अपि युष्माकमधीश्वरः केनचिदुपायान्तरेण परितुष्टः पादपफलं नानुमन्यते?

कलिः—बहुसो ज्जेव वुच्चदि णिअमोत्ति, अध जइ इध विकप्पो ता कुदो से णिअमत्तणं।

नलः—तत् का गतिः, यावत् प्रकृतमनुतिष्ठामि।

कलिः—जं दे रोअदि। अहं घरअं ज्जेव गच्छेमि। (परिक्रामन्) मूढ़े दमयन्ति, मूढ़ नल, दुर्जात धर्म्म, एते यूयं पराभूताः स्थ। कियानवसरो मे युष्मानभिभवितुम्। एषोऽहमचिरात्—

नलेन भैम्या विरहं विधास्ये द्रक्ष्यामि तस्याः परमाभिमानम्।
धर्म्मप्रभावं क्षयितं करिष्ये निजां प्रतिष्ठां भुवि भावयिष्ये॥

भवतु गच्छामि साम्प्रतं स्वनियोगमनुष्ठातुम्। (निष्क्रान्तः)

नलः—(दमयन्तीमुपसृत्य) देवि, अपि श्रुतं भवत्या किरातवचनं?

दम—अथ किम् आमूलं श्रुतम्।

नलः—तदेहि यावत्तत्रैव गत्वा प्रकृतं निरूपयावः।

दम—आर्य्यपुत्र, इयमपि किं वा माया? यत् सत्यं न मे मनसो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशुद्धिरस्ति, पदे पदे विपदमेव परिशङ्कते मे हृदयं, तदलं तत्र गत्वा फललाभेन।

नलः—देवि, किमेवं शङ्कसे, लोकोत्तरेषु किरातेषु तथा नीतयो नैव विस्मयाय परिकल्पन्ते। तदेहि गच्छावः। (निष्क्रान्तौ)

तृतीयाङ्कः समाप्तः

चतुर्थाङ्कः

(ततः प्रविशति सहर्षः कलिः)

कलिः—हो हो भोः! विजयते प्रभावपर्य्यायः! कुतः—

किरातवेशेन विमूढनैषधं
प्रतार्य्य सौवर्णविहङ्गवार्त्तया।
वैरं विनिर्य्यातितमेव दुर्द्दमं
किमन्यदस्मात् परमस्य साध्यताम्?

तथाहि मायाकल्पितसौवर्णविहङ्गसंयमनेच्छया तदानीं यावदेव साधनान्तरमनवेक्षमाणो नलहतकः कियद्दूरं परिक्रम्य स्वं परिधानं तदुपरि निक्षिप्तवान्, तावदेव मायाविहङ्गास्तदुपादाय गगनं प्रति प्रस्थिता दृष्टोर्गोचरतामतिक्रान्ताः। अथासौ दमयन्त्या वसनार्द्धं वसानो नितरां परितप्यमानः पुनः पुनरेव अनिच्छन्तीमपि दमयन्तीं विदर्भप्रस्थानाय अनुरुन्धे। अहो मे सामर्थ्यम्!

आसीद्राज्यं तत् प्रदत्तं परस्मै
आसीत् प्रज्ञा सा च नीता विलोपम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीद् वासो हारितं मायया तत्
कान्तारेऽस्मिन् कष्टसीमाऽस्य जाता ॥

अथवा अद्यापि महदवशिष्यते मे करणीयम्। कुतः—

एतावत्यपि दुर्दशाव्यतिकरे दाम्पत्यसौख्यक्रमः
सन्दीप्तः प्रतिभाति किन्तु विहितं तावत् प्रयत्नान्मया।
सम्प्रत्येष करोमि भीमदुहितुर्विच्छेदविवासनां
यावद्देवगणावमाननफलं भुङ्क्ते चिरं दुर्गता ॥

तदेषा पतिमनुसरन्ती वर्त्तते, अहमपि यावत् कृत्यशेषं सम्पादयामि। (निष्क्रान्तः)

विष्कम्भकः

(ततः प्रविशत एकमेव वसनं वसानौ नलो दमयन्ती च)

नलः—प्रिये, अपि दृष्टमधुना दुरन्तव्यवसायस्य कलेरतिविस्मयकरं व्यवसितम्? आकर्णितञ्चास्य क्रोधानलज्वालाजटिलं तर्जनवचनम्? तत् किमद्यापि मामनुवर्त्तसे, अप्रतिविधेयप्रभावः कलिरधुना विच्छेदमावयोः कर्त्तुकामो यथा कथमपि विरोधितया वर्त्तिष्यते। अलं सुमहत् कष्टमनुभूय, स्वेच्छया गृह्यतां वियोगः यतो दुरतिक्रम एष कलिकोपेन।

दम—आर्य्यपुत्र, किमेवं मां मन्दभागिनीमुपदिशसि। जीवनसमाप्तिरवश्यम्भाविनीति विजानतोऽपि न जायते विरागो भेषजसेवनेषु। तद् यदि अवश्यमेव कलिना आवयोर्वियोगः सम्पाद्येत, सम्पाद्यतां तेन। कथं स्वेच्छया एव वियोगो जनयितव्यः? देवकृपया कदाचिदल्पायुषां मृत्युमुखे पततामपि किं न दृष्टो मरणव्यतिक्रमः। चिरमेव वयं देवानाराधयामः, स्वयंवरवेलायामपि प्राप्तं प्रमाणं देवकरुणायाः, तत् क एष कलिर्नाम देवानतिक्रमितुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलः—देवि, देवकरुणामपीच्छसे ? मुग्धे, सुषुप्तास्ते देवाः सुचिरात् प्रभृति, कथमन्यथा तथाविधे अपि परिणमति आवयोर्दशान्तरे लेशतोऽपि दृशं नारोपयन्ति ? पश्य—

या त्वं राजपुरोचितासि गहनं सा दुर्गमं प्रापिता,
या भोग्यैः समपेक्षिता फललवे तस्यास्तवाद्य स्पृहा।
नाना भूषणभूषितासि पुरतो वस्त्रार्द्धमाच्छमा,
किन्तावद्व विपदासुपेक्षणकरी देवी क्षपाभूत् पुरा॥

दम—(स्वगतम्) हन्त पिपासया अवसीदन्तीव मे अङ्गानि, परिशुष्यतीव हृदयम् यदि आर्य्यपुत्रस्तथा जानीयात् तदा क्लेशातिशयमेव अनुभवेत्, पिपासया जड़ीभूता तु रसना नालमेकमपि वचनमुच्चारयितुम्। तद्व यदि जलं याचितस्य आर्य्यपुत्रस्य पुरा फलप्रयत्नइव जलप्रयत्नोऽपि निष्फलः स्यात् ? अथवा का गतिः ? अनीशास्मि जलमन्तरेण सम्प्रति प्राणान् धारयितुम्। (प्रकाशम्) आर्य्यपुत्र, अपि सन्निहितोऽत्र जलाशयः ?

नलः—वाढ़मेष सन्निहितो दृश्यते। वचनक्रमेणैव पिपासार्त्ता विज्ञातासि, तदेहि जलाशयमनुसरावः। (परिक्रामतः) प्रिये, जलाशयं परिप्राप्तौ स्वः। अहो रमणीयसलिलेयं सरसी। प्रिये लब्धं हृदयनिर्व्वाणं यतः खलु पिपासाविनिवर्त्तनानि निर्म्मलसलिलानीव स्निग्धा मृणालकन्दा अप्यत्र संलक्ष्यन्ते, तदत्रैव पिपासा क्षुधा चेति द्वयमेव शक्यं निर्व्वापयितुम्, तदेहि अवतरावः। (अवतरणं नाटयतः)

दम—आर्य्यपुत्र, न निःशङ्कमवतरितुं समर्थास्मि, अपि नेयं कलिहतकस्य माया स्यात् ?

नलः—(सरोवरं दृष्ट्वा सावेगं) प्रिये दमयन्ति, मा तावदवतीर्य्यतां, माया एव इयं, माया एव इयम्। अहो क्षुत्पिपासापरिक्षीणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवो त्वम् अदूरे समालोक्य सहसा स्वच्छसलिलं मृणालकन्दप्रायं सरोवरं द्वितीयं समुच्छ्वसितमिव लब्धवतो, सचायं क्षणेनैव समुपनतः शोणितसरोवरः। नैते मृणालाः परं समुद्यतशिरसो महाभुजङ्गाः, नैतानि स्वच्छसलिलानि परं तरङ्गितानि सफेनशोणितानि, नैतानि कमलानि प्रतिभान्ति परं शोणितरञ्जितानि अश्वमांसानि। प्रिये इत एहि इत एहि, मा तावदवतीर्णा भूः, कलेरिदं कठोरमायाविजृम्भितम्। (इत्यपसर्पति)

दम—आर्य्यपुत्र, अलमावेगेन। नाहमिदानीं तथा क्षुत्पिपासापर्य्याकुलास्मि, तदेषा शोणितसरसी सुधासरसी वास्तु तेन किं मे विनश्यति समुपचीयते वा? तदेहि इतोऽपसृत्य प्रच्छायशीतले वटपादपतले समुपविश्य निर्वृतौ भवावः। (परिक्रामतः)

नलः—देवि, विमूढोऽस्मि, अगतिकोऽस्मि, मुषितोऽस्मि, प्रज्वलन्तीव मे शिरांसि, तदेवं क्रियताम्। (तथा कुरुतः)

दम—आर्य्यपुत्र, प्रवातसुभगोऽयं वनोद्देशः, तदत्र प्रवातं सेवमानः किञ्चिदिव शान्तिं लभस्व।

नलः—देवि, एवमिदम्, अत्रहि—

सारङ्गाः पवनोन्मुखा मृदुगतिं वातं सुखं भुञ्जते,
दूरात् कौसुमसौरभं परिसृतं तृप्तिं परां यच्छति॥
शान्ता मानसवेदना खगकुलं सङ्गीतमासेवते,
कान्तारे विपदां पदेऽपि सहसा शान्तिः परा जृम्भते।

दम—आर्य्यपुत्र, अत्र विश्रामं लभस्व। विस्मृता मया सर्व्वैव क्षुत्पिपासादिवेदना। तदलमद्य पदान्तरमतिक्रम्य, अत्रैव प्रवातसुभगे वनोद्देशे दिवसशेषमतिपातयावः।

नलः—देवि, पथिश्रमेण परिक्षीणशरीरासि, तदत्रैव विश्रम्यतां, अथ यदि पुष्करेण अत्रापि अनुसृतः स्यां तदा साञ्जलिबन्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुनीय निरुपद्रवं वनवासं प्रार्थयिष्ये। यदि तथापि दुरात्मा अत्याहिते प्रवर्त्तेत, तदा—

विस्मृत्य स्नेहधारां परुषपरिकरां चात्मवृत्तिं दधानो,
वीर्य्योपष्टम्भदम्भव्यतिकरविषमं सन्नियुद्धं करिष्ये।
उत्पातव्रातभीमं कलिमपि तरसा तत्सहायोपचारं
जित्वावीर्य्यातिरेकादनुजमनुगतं संविधातास्मिभूयः॥

अथवा नाद्य तथाभूतोऽस्मि, अहो तथापि मत्त इव पदे पदे पूर्वतनीमवस्थामनुस्मरामि। (दीर्घं निश्वस्य) यथा तथा वा भवतु, अत्र क्षणं विश्रामः कर्त्तव्य एव। (स्वगतं) अहो अस्मिन् कान्तारे भैमी मे सहचारिणी, नहि नहि, नेदमुपपद्यते, प्रतिपदमेव कान्तारे विपदः सम्भाव्यन्ते तदेषा विसर्जयितव्या। एकाकी कान्तारे गमिष्यामि, अलं विकल्पेन, यथा कथमपि इयं परिहातव्या, दूरे सुदूरे मया गन्तव्यम्, तत् पश्येयं कियानवधिः स्यादिति।

दम—आर्य्यपुत्र, प्रवातमासेवमाना इच्छामि इह सुषुप्तिसुखमनुभवितुम्, अवसितप्रायो दिवसः, अस्तमुपगच्छतीव भगवान् सहस्रदीधितिः, तदिह कियन्तं कालं विश्रमितुमिच्छामि। (स्वगतम्) अहो सीदन्तीव मे अङ्गानि नातः परं चक्षुषी समुन्मीलयितुमीशास्मि, अथ यदि आर्य्यपुत्रो मां परित्यजेत्? नहि नहि तथा प्रियंवदो मे आर्य्यपुत्रः कथमीदृशे तमिस्रामुखे मामिकाकिनीं प्रतिभयशताकुले कान्तारे विहाय गच्छेत्?' तदलमेवं भावनयापि।

नलः—प्रिये, एवमिदम्। अवसितप्रायो दिवसः, तथाहि—

मद्भाग्यान्यनुकृत्य तीक्ष्णकिरणो गच्छत्यरम्यां दशां,
तत्कान्तेरनुवर्त्तनेन किरणाः क्षीणास्तमोनिर्भराः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखानामिव मानसं परिसृतध्वान्तैर्जगत् पूर्य्यते,
आशाबद्धहृदां प्रमोदतुलितो दूरे विशीर्णातपः।

तदिहैव मदीये ऊरुभागे शिरो विन्यस्य निद्रातुमर्हसि।

दम—तथैव कुर्य्याम्, किन्तु नाथ, एषा ते पादौ स्पृशामि मा खलु मामेकाकिनीं परिवर्जय कान्तारे। अनिच्छन्ती अपि निद्राबाधामतिक्रामितुमक्षमा स्वपिमि, तन्मम शिरसा शापितोऽसि यथा न त्वया दमयन्ती परित्यक्तव्येति।

नलः—किमिवं चञ्चलासि? को वा जनो ममास्ति त्वया विना अस्मिन् कान्तारे? तत् सुखं स्वपिहि, यावदहम् ऊरुं प्रसारयामि, (ऊरुं प्रसार्य्य दमयन्तीं सम्भ्रान्तां दृष्ट्वा) देवि, ममोरुमधिशयितुं सम्भ्रान्ता भवसि। देवि, अलं सम्भ्रमेण। नाहं तथा परिश्रान्तः यथा सम्भावयति मां भवती। अपि विस्मृतमिदं देव्या, यद्धि पुरा राजासनमधितिष्ठन्—

निस्त्रिंशच्छुरशत्रुद्विपरुधिरसमभ्युक्षिताङ्गः प्रकामं
युद्धे श्रद्धासमृद्धिव्यतिकरितमनाः खड्गघातान् व्यधार्षम्।
मल्लैः सामर्थ्यकीर्त्तिप्रथितगुणगणैर्बाहुयुद्धान्यकार्षम्
हर्य्यक्षप्रोग्रधर्षौ त्रिभुवनबलिनां विस्मयञ्च व्यतार्षम्।

अपिच तदानीं—

निरन्तरकथामृतैरतनुभावसञ्चारितै
रनल्पकविकल्पना ललितहावसम्भावितैः।
अलोकमधुरक्रमा ललितरागविस्तारिणी,
मदीयभुजमाश्रिता शयितुमर्हरावं प्रिया॥

तदशङ्कमिव ममोरुमाश्रिता सुषुप्तिभोगेन निर्वृतिं लब्धुमर्हति देवी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम—(स्वगतं) अये, कथान्तरेण अन्तरितो मे प्रश्नः, तत् पुनरपि पृच्छेयम्, अतिभूमिं गतो मे नाथेन आत्मनः परित्यागसन्देहः। भवतु एवं करोमि। (प्रकाशम्) नाथ, एष ते विहितो मया विनयाञ्जलिः, एषाहं शिरसि पादौ ते वहामि, कथय, नैव मन्दभागिनी दमयन्ती त्वया परित्यक्तव्येति।

नलः—देवि, किमेवं पुनः पुनराशङ्कसे ? कदाचिदेवमपि स्यात् ?

दम—तदिदानीं निःशङ्का स्वपिमि ?

नलः—बाढं निःशङ्का स्वपिहि।

दम—नाथ, प्रियंवद, तथापि अहं कराभ्यां करौ ते गृहीत्वा सुप्ता भवेयम्। (स्वगतम्) अद्य कथमपि न मे चेतो विश्वसितुमिच्छति यथा आर्यपुत्रो मां न परित्यक्ष्यतीति। तदिदमेव सम्यक् चिन्तितं मया, अथवा एकमेवावयोः परिधानं, कथमेतावता परित्यागः सुकरः स्यात्, तदलं चिन्तया। (शेते) प्रियंवद नाहं सुचिरं सुप्ता भविष्यामि, यतः प्रदोषे समधिका सुप्तिरनिष्टाय परिकल्पते। तदियमहं क्षणमात्रकेणैव निद्रामनुभूय पुनस्ते पादसेवां करोमि।

नलः—प्रिये, अलमुत्कण्ठया, यावच्चिरं स्वपिहि, अद्यमायास्ते प्रदोषसुप्तिरपि नातिमात्रदोषाय सम्पत्स्यते।

दम—यूयमेव विज्ञतमा गुणदोषयोः प्रमाणम्। (स्वपिति)

नलः—अहो संविधानकम् !

साम्राज्यं निरुपद्रवं परिजना वश्या यशो निर्म्मलम्,
निर्व्याजोपनतं मनोरथमलं पूजा प्रजाभिश्चिरम्।
नैष्ठुर्य्येण विधेरिहाद्य सकलं सद्यो विपर्य्यासितं
हा कष्टं निजदुर्विवेकलसितं किं दुःखमस्मात् परम् ॥

प्रिये दमयन्ति सुप्तासि ? अहो कष्टं !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देशाः

गीताव्याख्यानम्—विदितमस्ति परिषत्पत्रिकावाचकमहाभागानां यथा संस्कृतशास्त्रग्रन्थेषु सन्ति बहूनि निरर्घरत्नानि येषामेकमात्रप्रभावादपि भारतं वर्षमिदं समुत्कर्षमुपालब्धुमर्हति जनपदान्तरेभ्य इति। एषामेवान्यतमं श्रीमद्भगवद्गीतारत्नं यद्वि महारत्नं कौस्तुभमिव स्यमन्तकरत्नमिव वा श्रीमता नारायणेन स्ववक्षसि विधृतं महागौरवपदं प्रापत् प्रियतत्त्वेषु। तस्य वस्तुनो माहात्म्यं के वा न जानन्ति। दार्शनिकाः तदीय गभीरार्थमनुध्यायन्तो महतीं प्रीतिमासादयन्ति, संसारतापतप्तास्तदेव समाश्रयन्तो विज्ञानसीमामुपालभमानास्त्रितापमुक्ता भवन्ति, कर्म्मपरिश्रमेण शिथिलसमुत्साहा वा कारणान्तरेण कर्म्मविरता वा कर्म्मोत्साहसमुद्दीपकं तदेव सम्प्राप्तवन्तः सहसा नवीनं जीवनमासीदन्तः कर्म्मसु परमं समुत्साहमवलम्बमानाः सुफलमात्मोपयुक्तं गन्तुमर्हन्ति। तत्र च सन्ति बहुलं प्राचीननव्यमनीषिणां भाष्य-टीका-विवरणादीनि येषामवलम्बनेन विद्वांसः तत्तत्त्वार्थविनिश्चयमनायासतः कर्त्तुमलं भवन्ति। परं ये दर्शनतत्त्वेषु अनिष्णाताः अपि श्रीमद्भगवद्गीतामृतपानलालसा भवन्ति, तेषां संस्कृतभाषादिविज्ञानमन्तरेण महदसौकर्य्यं सम्पद्यते तदभिप्रायपरिपूरणे। सर्व्वमिदमध्यार्य्य लोकमहोपकाराय संस्कृतसाहित्यपरिषत्परिवृढ़ाः प्रतिसप्ताहं रविवासरे परिषद्भवन एव गीताव्याख्यानव्यवस्थां सम्पादितवन्तः। तत्र मनीषिप्रवरा नानाशास्त्रतत्त्वप्रवीणाः श्रीमन्तो जानकीनाथसाहित्यशास्त्रिणः नियमेन गीताव्याख्यानविधौ नियमिताः सन्ति। तेषां गभीरार्थपूर्णसरलवाक्कौशलेन स्वभावसिद्धव्याख्याननैपुण्येन दर्शनार्थानां सरलया दिशा विवरणप्रयत्नेन मोहिताः साम्प्रतमेव श्रोतारः प्रतिसप्ताहमेव प्र वर्द्धन्ते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगत्य च गीतार्थप्रकर्षमवबुध्यमानाः परमां तृप्तिमनुभवन्तः प्रतिष्ठन्ते। अयि भोः धर्मपरिस्थितिकामिनः दार्शनिकतत्त्वरसपिपासवश्च समागच्छत निरन्तरायमस्मिन् सदुद्यमे, अलङ्कुरुत प्रतिसप्ताहं सायं परिषद् भवनम्, शृणुत महताममीषां नानारसभावगम्भीराणि सरलोदारगीताप्रवचनानि, विभावयत आत्मनः परमानन्दम्, सर्व्वं दिवसं कर्त्तव्यार्थमनुष्ठाय सायं परिभ्रमणवेलायां समयः समतिवाह्यतां परमार्थतत्त्वानुशीलनेन। अयमेव कालः शास्त्रे विनिश्चितोऽस्ति पौराणिकं विषयसमालोचनायाः। तदिदं महत् सौकर्य्यमपरिहृत्य जीवनं सुखमयं कुर्व्वन्तु श्रीमन्तः, तदागत्य समास्वाद्यतां परमो गीता रसः, मा नाम वर्त्ततामणुरप्यौदासीन्यस्य इति।

चित्रपरिचयः—एतत्पत्रिकामुखपत्रविनिवेशित-चित्राणां प्रथितयशसां तत्रभवतां श्रीयुक्तहरप्रसादशास्त्रिपादानां परिचयः पौनरुक्त्यदोषमावहति संस्कृतभारतीप्रियेषु भारतीयेषु भारतेतरदेशवासिषु च जनगणेषु। कलिकातासंस्कृतकालेजाख्यपाठशालायामधिगतविद्याप्रसारा एते महान्तः क्रमेणालङ्कृत्य प्रेसिडेन्सिकालेजप्रधानसंस्कृताध्यापकपदं, संस्कृतकालेजाध्यक्षपदवीम्, "एसियाटिकसोसाइटी" समितेः सभापतिपदं तथा ढाका-विश्वविद्यालयसंस्कृतविभागकर्त्तृत्वम् अधुनानुभवन्ति विश्रान्तिसुखम् अनुक्षणं संस्कृतसाहित्यालोचनेन विश्रमोचितेऽपि वयसि। बाल्ये एव 'भारतमहिला'-'वाल्मीकिजया'दिवङ्गभाषानिबद्धसुरचितनिबन्धविरचनेन, यौवने बहुषु पत्रिकासु नानाविधप्रत्नतत्त्वानुशीलनपरप्रबन्धप्रणयनेन, प्रौढ़े वयसि रामपालचरिताद्यैतिहासिकग्रन्थसम्पादनेन,वार्द्धके च नेपालादिदेशप्रचलितमहायानीयबौद्धतत्त्वानामालोचनेन तथाशेषसंस्कृतपुस्तकपरिचयसूचकग्रन्थमालाप्रकाशनेन लब्धकीर्त्तय एते महोदयाः संस्कृतरसिकानां विद्वज्जनानां समाजेषु। एतेषां वैदग्धविमुग्धाः गुण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहिणो राजपुरुषा एभ्यो "महामहोपाध्याय" इति "सि, आइ, इ," इति च सम्मानपदद्वयं समर्प्य मन्यामहे राजप्रदत्तोपाधीनां गौरवमेव सम्पादयामासुः। तथा वङ्गीया विद्वांसो वङ्गीयसाहित्यसम्मेलनस्य भारतीयाश्च निखिलभारतसंस्कृतमहासम्मेलनस्य सभापतित्वे सादरं संस्थाप्य प्रदत्तगुणग्राहित्वपरिचया एव सञ्जाताः। अधुना कीर्त्तिशिखरमारूढाः श्रीमन्तः पश्चिमं जीवनकालं सुदीर्घं परमसौख्येन यापयन्त्विति आशास्महे वयम्।

मासिक सभा—विगतगौरफाल्गुनस्य दशमदिवसे सुसम्पादितं संस्कृतसाहित्यपरिषदो माघीयमधिवेशनम्। तत्र कलिकाताविश्वविद्यालयस्यान्यतमोपाध्यायेन श्रीमता बाबुयामिश्रमहोदयेन वाचितोऽभूत् ज्योतिःशास्त्रमधिकृत्यारचितो कश्चन बहुसारो निबन्धो यत्र पाश्चात्त्यज्यौतिषविषयतुलनया समवतारितान्यभूवन् बहून्येव भारतीयज्यौतिषमूलतत्त्वानि, बहुधा प्रतिपादितञ्च तद्विद्यायाः प्राचीनत्वमस्मिन् भारते वर्षे।

परिषदोऽस्या एकादशाधिवेशनं पुनः सुनिर्वृत्तं चैत्रस्य दशमे दिने महामहोपाध्यायानां श्रीप्रमथनाथतर्कभूषणपादानामाध्यक्ष्येण। तत्रादौ एम्,ए-काव्यतीर्थ इत्युपाधिकानां श्रीमत्प्रभातचन्द्र चक्रवर्त्तिमहोदयानां कलिकाताविश्वविद्यालयतः 'पि-एइच्, डि' इत्याख्यमानपदप्राप्तेः तथा प्रत्नेतिहासप्रवीणानां श्रीयुक्तरमाप्रसादचन्द-वि,ए-महोदयानां विश्रुतयशसां श्रीमद्बद्रिदासगोयेनकामहोदयानाञ्च 'राय वाहादुर' इत्युपाधिलाभात् त्रयस्ते परिषत्सदस्याः सभायामभिनन्दिताः। तत्र संस्कृत वाङ्मयस्योपयोगमवलम्ब्य मितञ्च सारञ्च किञ्चिदभिहितवत्सु श्रीमत्सु चन्दमहोदयेषु संस्कृतविद्यायाः समुज्जीवनमन्तरा नैव सम्भवो भारतभूमेः कथमपप्यभ्युदय इति प्रतिपादितवत्सु च प्रवृत्तः पण्डितवरयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमतोः कृष्णप्रसन्नतर्कवागीशानन्तकुमारतर्कतीर्थयोर्न्यायविषये शास्त्रार्थविचारः। तत्र च निर्णेतृपदमध्यासीनानां महामहोपाध्याय-श्रीयुक्तपार्वतीचरणतर्कतीर्थमहाशयानां निर्णयानुसारतो वादिनौ तौ प्रत्येकं मुद्रादशकं परिषदो लब्धवन्तौ।

पण्डितवियोगः—न मासोऽप्यतिक्रान्तो देवभूयमवाप्तवतः उत्कलीयविद्वन्मुकुटमणेर्महामहोपाध्यायजगन्नाथमिश्रमहाभागस्य वियोगदुःखं दुःसहमनुभूतवतां नो विद्वन्मात्रसहायानाम्। अतिकष्टोऽयमन्तर एवापरो गुरुशोकवृत्तान्ताधिगमो यथा 'यशोहर'वास्तव्यो महामहोपाध्यायवरः आशुतोषतर्कभूषणमहोदयोऽपि यशोनामशेषतां नीतः करालकालहतकेन। न जाने कीदृशोऽयं भागधेयविपरिणामः संस्कृतविद्याया यदियमियं विरलबान्धवा प्रतिदिनं शोच्यां दशामुपनीयत इति।

०४०५४१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतवर्षस्य श्रेष्ठानाम् औषधालयानां चिकित्सालयानां च अन्यतमः

"आर्, सि, सेन एण्ड कों लिमिटेड्"

(यथाशास्त्रं निर्मितानि विशुद्धानि औषधानि सर्व्वदा लभ्यन्ते)

१। **च्यवनप्राशस्य** प्रतिविंशतितोलकं मूल्यं रूप्यकद्वयं २) प्रेषणादिव्ययः ।/० आणकषट्कम् ।

२। **बृहच्चन्द्रोदयमकरध्वजस्य** सप्ताहार्थं २) रूप्यकद्वयम्, प्रेषणादिव्ययः ।/० आनकपञ्चकम् ।

३। **तुषारविन्दुतैलस्य** प्रतिदशतोलकम् २) रूप्यकद्वयम् प्रेषणादिव्ययः ।/० आनकषट्कम् ।

(सर्वेषाम् औषधानां मूल्यादिविषयकं विवरणपूर्णं पुस्तकं मूल्यं विनैव प्रेष्यते)

कविराजः राखालचन्द्र सेनः एल् एम् एस्

श्रीसुधीरकुमार सेनः

२५९ नं अपार-चित्पुर-रोड्, कलिकाता

सर्व्वत्र भारतवर्षे सुधीजनैः समादृतं,

कविराज-राखालचन्द्र-सेन एल् एम् एस् कृतं

कुन्तलकौमुदीतैलम्

भवत्कुटुम्बमध्यवर्त्तिनीनां महिलानां केशप्रसाधनार्थं
विशुद्धोपादानजातं केशतैलमेतत् क्रीयताम् ।
भवत्-स्वदेशवासिना सुशिक्षितेन भिषजा निर्मितमेतत्
तैलम् अतो भैषजगुणैः श्रेष्ठम् ।
(सर्व्वत्र गान्धिकानामापणेषु प्राप्तव्यम्)

आर् सि सेन एण्ड कों लिमिटेड्

२५९ अपार-चित्पुर-रोड्, कलिकाता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

অজীর্ণ অম্লপিত্ত ও শূলরোগের মহৌষধ।

সুধা চূর্ণ।

ভুক্তদ্রব্য যাঁহাদের সহজে জীর্ণ হয় না, পেট ফাঁপা, খৈ ঢেকুর, পেটে গুড় গুড়, পুটপাট শব্দ, বেদনা, পেট খোঁচা, কোষ্ঠ একেবারে পরিষ্কার না হওয়া বা বারম্বার অল্পপরিমাণে হওয়া, অথবা মাঝে মাঝে দম্‌কা ভেদ হওয়া, অরুচি, অক্ষুধা ইত্যাদি উপসর্গে যাঁহারা পীড়িত, তাঁহারা এই ঔষধ সেবনে সদ্য ফললাভ করিয়া আনন্দিত হইবেন।

অম্লোদ্গার, বুকজ্বালা, পেটজ্বালা, ভোজনান্তে বমন, পেটব্যথা ইত্যাদি যেরূপ অবস্থা কেন হউক না, সুধাচূর্ণ সেবন করিলে আশাতীত ফল পাওয়া যাইবে।

যে প্রকার কঠিন শূলরোগই কেন হউক না, সুধাচূর্ণ সেবনে নিশ্চয় সুফল লাভ করা যাইবে।

মূল্য বড় এক শিশি ১।৹ দেড় টাকা, ছোট শিশি ৸৵৹ আনা। প্যাকিং ও ডাকমাশুল।৶৹ আনা। একত্রে বড় ৩ শিশি ৪৲ টাকা মাশুলাদি ॥৵৹ আনা।

কবিরাজ—শ্রীকেশব লাল রায়—
৪১ নং বাগবাজার ষ্ট্রীট—

THE SANSKRIT SAHITYA PARISHAT PATRIKA.

The most popular and widely read Sanskrit magazine, circulated all over India.

The best medium for advertisement in Northern and Southern India.

N. B.—Advertisements are published in all languages.

Monthly rate of advertisements.

	Full page.	Half page.
For one year	Rs. 6 ...	... Rs. 3
For one Issue	„ 8 ...	... „ 4

For further particulars apply to the Secretary.

Sanskrit Sahitya Parishad,
Shambazar Bridge Road,
Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সারিবাদ্যরিষ্ট ৩৲ সের

অধ্যক্ষ মথুর বাবুর

স্থাপিত ১৩০৮ ঢাকা

শক্তি ঔষধালয়

মহাভৃঙ্গরাজ তৈল ৬৲ সের

চ্যবনপ্রাশ ৩৲ সের

মকরধ্বজ ৪৲ তোলা

ঢাকা, কলিকাতা, ময়মনসিংহ, জলপাইগুড়ি, গৌহাটি, চট্টগ্রাম, শিলেট, রঙ্গপুর, সিরাজগঞ্জ, পাটনা, বেনারস ও মান্দ্রাজ

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট,

৭১।১ রসা রোড নর্থ:ভবানীপুর।

বিনামূল্যে ক্যাটালগ পাওয়া যায়।

আপনার পারিবারিক ঔষধের বাক্সের

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১১৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনা, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস্ ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৩৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ

সংস্কৃতসাহিত্যপরিষদ্ভবনম্, শ্যামবাজার ব্রীজ রোড, কলিকাতা।

মুদ্রণস্থান—সিদ্ধেশ্বরপ্রেস, ২৮ নন্দকুমারচৌধুরী সেকেণ্ডলেন, কলিকাতা।

পুস্তকালয় গুরুকুল কাংড়ী

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar